॥ श्रीगणेशायनमः ॥

॥ ॐ नमः श्रीपुरुषोत्तमाय ॥

ॐ नमोहरिहरहिरण्यगर्भेभ्यो नमोव्यासवाल्मीकिशुकपराशरेभ्यो नमोगुरुगो-ब्राह्मणेभ्यः ॥

स्कन्दपुराणस्थावन्तीखण्डान्तर्गतरेवाखण्ड-माहात्म्यारम्भः

—:*:—

प्रथमोऽध्यायः

पुराणसंहितावर्णनम्

ॐ नमोनर्मदायै ॥

ॐ मज्जन्मातङ्गगण्डच्युतमदमदिरामोदमत्तालिमालं,
स्नानैः सिद्धाङ्गनानां कुचयुगविगलत्कुङ्कुमासङ्गपिङ्गम् ॥
सायं प्रातर्मुनीनां कुसुमचयसमाच्छन्नतीरस्थवृक्षं,
पायाद्वो नर्मदाम्भः करिमकरकराक्रान्तरंहस्तरङ्गम् ॥ १
उभयतटपुण्यतीर्थां प्रक्षालितसकललोकदुरितौघा ।
देवमुनिमनुजवन्द्या हरतु सदा नर्मदा दुरितम् ॥ २ ॥
नाशयतु दुरितमखिलं भूतं भव्यं भवच्च भुवि भविनाम् ।
सकलपवित्रितवसुधा पुण्यजला नर्मदा भवति ॥ ३ ॥

तटपुलिनं शिवदेवा यस्या यतयोऽपि कामयन्ते वा ।
मुनिनिवहविहितसेवा शिवाय मम जायतां रेवा ॥ ४ ॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्
नैमिषेपुण्यनिलये नानाश्रमविनिषेविते । शौनकःसत्रमासीनःसूतं पप्रच्छविस्तरात्

मन्येऽहं धर्मनैपुण्यं त्वयि सूत! सदार्चितम् ।
पुण्यामृतकथावक्ता व्यासशिष्यस्त्वमेव हि ॥ ७ ॥

अतस्त्वां परिपृच्छामि धर्मतीर्थाश्रयंकवे ! बहूनिसन्तितीर्थानिबहुशोमेश्रुतानिच
श्रुतादिव्यनदीब्राह्मीतथा विष्णुनदीमया । तृतीयानमयाक्वापिश्रुतारौद्रीसरिद्वरा

तां वेदगर्भां विख्यातां विबुधौघाभिवन्दिताम् ।
वद मे त्वं महाप्राज्ञ! तीर्थपूगपरिष्कृताम् ॥ १० ॥

कंदेशमाश्रितारेवाकथं श्रीरुद्रसंभवा । तत्संश्रितानि तीर्थानियानितानिवदस्वमे

सूत उवाच

साधु पृष्टं कुलपते! चरित्रं नर्मदाश्रितम् । चित्रं पवित्रं दोषघ्नं श्रुतमुक्तं च सत्तम
वेदोपवेदवेदाङ्गादीन्यभिव्यस्य पूरितः । अष्टादशपुराणानां वक्ता सत्यवतीसुतः

तं नमस्कृत्य वक्ष्यामि पुराणानि यथाक्रमम् ।
येषामभिव्याहरणादभिवृद्धिर्वृषायुषोः ॥ १४ ॥
श्रुतिः स्मृतिश्च विप्राणां चक्षुषी परिकीर्तिते ।
काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः ॥ १५ ॥
श्रुतिस्मृतिपुराणानि विदुषां लोचनत्रयम् ।
यस्त्रिभिर्नयनैः पश्येत्सोंऽशो माहेश्वरो मतः ॥ १६ ॥
आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता ।
शौनकीया च पौराणी धर्मशास्त्रात्मिका च या ॥ १७ ॥
तिस्रोविद्याइमामुख्याः सर्वशास्त्रविनिर्णये ।
पुराणंपञ्चमोवेद इति ब्रह्मानुशासनम् ॥ १८ ॥

योनवेद पुराणंहिनस वेदात्रकिञ्चन । कतमःसहिधर्मोऽस्ति किंवाज्ञानंतथाविधम्
अन्यद्वा तत्किमत्राह पुराणे यन्नदृश्यते । वेदाः प्रतिष्ठिताः पूर्वं पुराणे नात्रसंशयः
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति । इतिहासपुराणैश्च कृतोऽयंनिश्चयः पुरा
आत्मापुराणंवेदानां पृथगङ्गानितानिषट् । यच्चदृष्टंहि वेदेषु तद्दृष्टंस्मृतिभिःकिल
उभाभ्यां यत्तु दृष्टंहि तत्पुराणेषुगीयते । पुराणं सर्वशास्त्राणां प्रथमंब्रह्मणःस्मृतम्

अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ।
पुराणमेकमेवासीदस्मिन्कल्पान्तरे मुने !॥ २४ ॥

त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् । स्मृत्वाजगादच मुनीन्प्रतिदेवश्चतुर्मुखः
प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः । कालेनाग्रहणंदृष्ट्वा पुराणस्यततोमुनिः
व्यासरूपं विभुः कृत्वा संहरेत्स युगेयुगे । अष्टलक्षप्रमाणे तु द्वापरेद्वापरे सदा ॥
तदष्टादशधाकृत्वाभूर्लोकेऽस्मिन्प्रभाष्यते । अद्यापिदेवलोकेतच्छतकोटिप्रविस्तरम्
तदथात्र चतुर्लक्षं संक्षेपेण निवेशितम् । पुराणानि दशाष्टौ चसाम्प्रतं तदिहोच्यते

नामतस्तानि वक्ष्यामि-शृणु त्वमृषिसत्तम !॥ २९ ॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चैव पुराणं पञ्चलक्षणम्

ब्राह्मं पुराणं तत्राद्यं संहितायां विभूषितम् ।
श्लोकानां दशसाहस्रं नानापुण्यकथायुतम् ॥ ३१ ॥

पाद्मं च पञ्चपञ्चाशत्सहस्राणि निगद्यते । तृतीयंवैष्णवंनामत्रयोविंशतिसङ्ख्यया

चतुर्थं वायुना प्रोक्तंवायवीयमिति स्मृतम् ।
शिवभक्तिसमायोगाच्छैवं तच्चापराख्यया ॥ ३३ ॥

चतुर्विंशतिसङ्ख्यातं सहस्राणितुशौनक !। चतुर्भिःपर्वभिःप्रोक्तंभविष्यंपञ्चमंतथा
चतुर्दशसहस्राणि तथा पञ्चशतानितत् । मार्कण्डं नवसाहस्रं षष्ठं तत्परिकीर्तितम्
आग्नेयं सप्तमं प्रोक्तं सहस्राणितुषोडश । अष्टमं नारदीयं तु प्रोक्तं वै पञ्चविंशतिः
नवमं भगवन्नाम भागद्वयविभूषितम् । तदष्टादशसाहस्रं प्रोच्यते ग्रन्थसंख्यया ॥

दशमं ब्रह्मवैवर्तं तावत्सङ्ख्यमिहोच्यते । लैङ्गमेकादशं ज्ञेयं तथैकादशसङ्ख्यया ॥
भागद्वयं विरचितं तल्लिङ्गमृषिपुङ्गव । चतुर्विंशतिसाहस्रं वाराहं द्वादशं विदुः ॥
विभक्तं सप्तभिः खण्डैः स्कान्दं भाग्यवताम्वर !।
तदेकाशीतिसाहस्रं सङ्ख्यया वै निरूपितम् ॥ ४० ॥
ततस्तु वामनंनाम चतुर्दशतमं स्मृतम् । संख्यया दशसाहस्रं प्रोक्तं कुलपते! पुरा॥
कौर्मं पञ्चदशं प्राहुर्भागद्वयविभूषितम् । दशसप्तसहस्राणिपुरा साङ्ख्यपते कलौ ॥
मात्स्यं मत्स्येनयत्प्रोक्तं मनवेषोडशंक्रमात् । तच्चतुर्दशसाहस्रंसङ्ख्ययावदताम्वर
गारुडं सप्तदशमं स्मृतं चैकोनविंशतिः ।
अष्टादशं तु ब्रह्माण्डं भागद्वय विभूषितम् ॥ ४४ ॥
तच्च द्वादशसाहस्रं शतमष्टसमन्वितम् । तथैवोपपुराणानि यानि चोक्तानिवेधसा
इदं ब्रह्मपुराणस्य सुलभं सौरमुत्तमम् । संहिताद्वयसंयुक्तं पुण्यं शिवकथाश्रयम्
आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता ।
सनत्कुमारनाम्ना हि तद्विख्यातं महामुने !॥ ४७ ॥
द्वितीयं नारसिंहं च पुराणे पाद्मसंज्ञिते । शौकेयं हि तृतीयं तु पुराणे वैष्णवेमतम्
बार्हस्पत्यं चतुर्थं च वायव्यं संमतंसदा । दौर्वाससं पञ्चमं च स्मृतंभागवतेसदा
भविष्ये नारदोक्तं च सूरिभिःकथितं पुरा । कापिलंमानवं चैवतथैवोशनसेरितम्
ब्रह्माण्डं वारुणं चाथकालिकाह्वयमेव च । माहेश्वरंतथासाम्बंसौरंसर्वार्थसञ्चयम्
पाराशरं भागवतंकौर्मंचाष्टादशंक्रमात् । एतान्युपपुराणानिमयोक्तानियथाक्रमम्
पुराणसंहितामेतांयःपठेद्वाशृणोति च । सोऽनन्तपुण्यभागीस्यान्मृतोब्रह्मपुरंव्रजेत्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे पुराणसंहितावर्णनंनाम प्रथमोऽध्यायः ॥ १ ॥

———

द्वितीयोऽध्यायः

रेवामाहात्म्यवर्णनम्

सूत उवाच

नर्मदायास्तु माहात्म्यं कृष्णद्वैपायनोऽब्रवीत् ।
तत्तेऽहं सम्प्रवक्ष्यामि यत्त्वया परिपृच्छितम् ॥ १ ॥
विस्तरं नर्मदायास्तु तीर्थानां मुनिसत्तम !।
कोऽन्यः शक्तोऽस्ति वै वक्तुमृते ब्रह्माणमीश्वरम् ॥ २ ॥
एतमेव पुरा प्रश्नं पृष्टवाञ्जनमेजयः । वैशम्पायनसञ्ज्ञन्तु शिष्यं द्वैपायनस्य ह ॥ ३
रेवातीर्थाश्रितं पुण्यं तत्ते वक्ष्यामि शौनक! ।
पुरा पारीक्षितो राजा यज्ञदीक्षासु दीक्षितः ॥ ४ ॥
सम्भृते तु हविर्द्रव्ये वर्तमानेषु कर्मसु । आसीनेषु द्विजाग्र्येषु हूयमाने हुताशने
वर्तमानासु सर्वत्र तथा धर्मकथासु च । श्रूयमाणे तथा शब्दे जनैरुक्ते त्वहर्निशम्
यज्ञभूमौ कुलपतेर्दीयतांभुज्यतामिति । विविधांश्चविनोदान्वैकुर्वाणेषु विनोदिषु
एवम्विधे वर्तमाने यज्ञे स्वर्गसदः समे । वैशंपायनमासीनं पप्रच्छ जनमेजयः ॥८॥

जनमेजय उवाच

द्वैपायनप्रसादेनज्ञानवानसिमेमतः । वैशंपायनतस्मात्त्वां पृच्छामिऋषिसन्निधौ
ब्रूहि मे त्वं पुरावृत्तं पितॄणां तीर्थसेवनम् ।
चिरं नानाविधान्क्लेशान्प्राप्तास्तइतिमे श्रुतम् ॥ १० ॥
कथं द्यूतजिताःपार्थाममपूर्वपितामहाः । आसमुद्रां महींविप्रभ्रमन्तस्तीर्थलोभतः
केन ते सहितास्तात भूमिभागाननेकशः । चेरुः कथयतत्सर्वंसर्वज्ञोऽसि मतोमम

वैशम्पायन उवाच

कथयिष्यामिभूनाथ! यत्पृष्टंतुत्वयाऽनघ । नमस्कृत्यविरूपाक्षंवेदव्यासंमहाकविम्

पितामहास्तु तेपञ्चपाण्डवाःसहकृष्णया । उषित्वाब्राह्मणैःसार्द्धंकाम्यकेवनउत्तमे
प्रधानोद्दालके तत्र कश्यपोऽथमहामतिः । विभाण्डकश्चराजेन्द्र गुरुश्चैवमहामुनिः

पुलस्त्यो लोमशश्चैव तथाऽन्ये पुत्रपौत्रिणः ।
स्नात्वा निःशेषतीर्थेषु गतास्ते विन्ध्यपर्वतम् ॥ १६ ॥

ते च तत्राश्रमं पुण्यं सर्वैर्वृक्षैः समाकुलम् । चम्पकैः कर्णकारैश्च पुन्नागैर्नागकेसरैः
बकुलैः कोविदारैश्च दाडिमैरुपशोभितम् । पुष्पितैरर्जुनैश्चैव बिल्वपाटलकेतकैः
कदम्बाम्रमधूकैश्च निम्बजम्बीरतिन्दुकैः । नालिकेरैः कपित्थैश्च खर्जूरपनसैस्तथा
नानाद्रुमलताकीर्णं नानावल्लीभिरावृतम् । सपुष्पं फलितं कान्तं वनं चैत्ररथंयथा

जलाश्रयैस्तु विपुलैः पद्मिनीखण्डमण्डितम् ।
सितोत्पलैश्च सञ्छन्नं नीलपीतैः सितारुणैः ॥ २१ ॥
हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम् ।
आडीकाकबलाकाभिः सेवितं कोकिलादिभिः २२ ॥

सिंहैर्व्याघ्रैर्वराहैश्च गजैश्चैव महोत्कटैः । महिषैश्चमहाकायैः कुरङ्गैश्चित्रकैः शशैः
गण्डकैश्चैव खड्गैश्च गोमायुसुरभीयुतम् । सारंगैर्मल्लकैश्चैव द्विपदैश्च चतुष्पदैः

तथा च कोकिलाकीर्णं मनः कान्तं सुशोभितम् ।
जीवंजीवकसङ्घैश्च नानापक्षिसमायुतम् ॥ २५ ॥
दुःखशोकविनिर्मुक्तं सत्वोत्कटमनोरमम् ।
क्षुत्तृषारहितं कान्तं सर्वव्याधिविवर्जितम् ॥ २६ ॥

सिंहीस्तनं पिबन्त्यत्र कुरङ्गाः स्नेहसंयुतम् । मार्जारमूषकौचोभाववलेहतउन्मुखौ
पञ्चास्याःपोतकेभाश्चभोगिनस्तुकलापिनः।दृष्ट्वातद्विपिनंरम्यंप्रविष्टाःपाण्डुनन्दनाः
मार्कण्डंदृष्टवांस्तत्रतरुणादित्यसन्निभम् ।ऋषिभिःसेव्यमानंतुनानाशास्त्रविशारदैः
कुलीनैःसत्वसम्पन्नैःशौचाचारसमन्वितैः । धीसङ्गतैःक्षमायुक्तैस्त्रिसंध्यंजपतत्परैः

ऋग्यजुःसामविहितैर्मन्त्रैर्होमपरायणैः ।
केचित्पञ्चाग्निमध्यस्थाः केचिदेकान्तसंस्थिताः ॥ ३१ ॥

ऊर्द्ध्वबाहुनिरालंबा आदित्यभ्रमणाः परे । सायंप्रातर्भुजश्चान्येएकाहारास्थापरे
द्वादशाहात्तथाचान्येअन्येमासार्द्धभोजनाः । दर्शेदर्शेतथाचान्येअन्येशैवालभोजनाः
पिण्याकमपरेऽभुञ्जन्केचित्पालाशभोजनाः।अपरेनियताहारावायुभक्ष्याम्बुभोजनाः

एवम्भूतैस्तथा वृद्धैः सेव्यते मुनिपुङ्गवैः ।
ततो धर्मसुतः श्रीमानाश्रमं तं प्रविश्य सः ॥ ३५ ॥

दृष्ट्वा मुनिवरं शान्तं ध्यायमानं परं पदम् । प्रादक्षिण्येनसहसादण्डवत्पतितोऽग्रतः
भक्त्यानुपतितंदृष्ट्वा चिरादादायलोचनम् । कोभवानित्युवाचेदंधर्मंश्रीमानपृच्छत
तस्य तद्वचनं श्रुत्वा दारकस्तत्समीपगः । आहाऽयंधर्मराजस्तेदर्शनार्थं समागतः

तच्छ्रुत्वा दारकेणोक्तं वचनं प्राह सादरः ।
एह्येहि वत्सवत्सेति किञ्चित्स्थानाच्चलन्मुनिः ।
तं तु स्नेहादुपाघ्राय आसने उपवेशयत् ॥ ३६ ॥

उपविष्टे सभायांतु पूजांकृत्वायथाविधि । वन्यैर्धान्यैःफलैर्मूलै रसैश्चैवपृथग्विधैः
पाण्डवाब्राह्मणैःसार्द्धंयथायोग्यम्प्रपूजिताः । मुहूर्त्तादथविश्रम्यधर्मपुत्रोयुधिष्ठिरः

पृच्छति स्म मुनिश्रेष्ठं कौतूहलसमन्वितम् ।
भगवन्सर्वलोकानां दीर्घायुस्त्वं मतो मम ॥ ४२ ॥

सप्तकल्पानशेषेण कथयस्वममाऽनघ । कल्पक्षयेऽपि लोकस्यस्थावरस्येतरस्य च
न विनष्टोऽसि विप्रेन्द्र! कथंवाकेनहेतुना । गङ्गाद्याःसरितःसर्वाःसमुद्रांताश्चयामुने

तासां मध्ये स्थिताः काः स्वित्काश्चैव प्रलयंगताः ।
का नु पुण्यजला नित्यं का नु न क्षयमागता ॥ ४५ ॥

एतत्कथयमेतातप्रसन्नेनान्तरात्मना । श्रोतुमिच्छाम्यशेषेणऋषिभिःसहबान्धवैः

श्रीमार्कण्डेय उवाच

साधु साधु महाप्राज्ञ! धर्मपुत्रयुधिष्ठिर! । कथयामियथान्यायंयत्पृच्छसिममानघ
सर्वपापहरं पुण्यं पुराणं रुद्रभाषितम् । यःशृणोतिनरोभक्त्या तस्यपुण्यफलंशृणु
अश्वमेधसहस्रेण वाजपेयशतेन च । तत्फलंसमवाप्नोति राजन्नास्त्यत्र संशयः ॥

ब्रह्मघ्नश्च सुरापी च स्तेयी गोघ्नश्च यो नरः। मुच्यतेसर्वपापेभ्यो रुद्रस्यवचनं यथा

गङ्गा तु सरितां श्रेष्ठा तथा चैव सरस्वती।
कावेरी देविका चैव सिन्धुः सालकुटी तथा ॥ ५१ ॥

सरयूः शतरुद्रा च मही चर्मिलया सह। गोदावरी तथा पुण्या तथैव यमुना नदी
पयोष्णीच शतद्रुश्च तथाधर्मनदीशुभा। एताश्चान्याश्चसरितःसर्वपापहराःस्मृताः

किं तु ते कारणं तात! वक्ष्यामि नृपसत्तम!।
समुद्राः सरितः सर्वाः कल्पे कल्पे क्षयं गताः ॥ ५४ ॥

सप्तकल्पक्षये क्षीणे न मृता तेन नर्मदा। नर्मदैकैव राजेन्द्र! परंतिष्ठेत्सरिद्वरा ॥५५

तोयपूर्णा महाभाग! मुनिसङ्घैरभिष्टुता।
गङ्गाद्याः सरितश्चान्याः कल्पेकल्पे क्षयं गताः ॥ ५६ ॥
एषा देवी पुरा दृष्टा तेन वक्ष्यामि तेऽनघ ॥ ५७ ॥
आश्चर्यभूता राजेन्द्र! त्रिषु लोकेषु विश्रुता ॥ ५८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे रेवामाहात्म्यवर्णनंनाम द्वितीयोऽध्यायः ॥ २ ॥

———

तृतीयोऽध्यायः

मार्कण्डेयकृतपोताधिरोहणवर्णनम्

युधिष्ठिर उवाच

सप्तकल्पक्षया घोरास्त्वयादृष्टा महामुने!। न चापीहास्तिभगवन्दीर्घायुरिहकश्चन
त्वयाह्येकार्णवे सुप्तः पद्मनाभः सुरारिहा। दृष्टः सहस्रचरणः सहस्रनयनोदरः॥
त्वं किलानुग्रहात्तस्य दह्यमाने चराचरे। न क्षयं समनुप्राप्तो वरदानान्महात्मनः॥
किं त्वयाश्चर्यभूतं हि दृष्टश्च भ्रमताऽनघ। एतदाचक्ष्व भगवन्परं कौतूहलं हि मे॥

सम्प्राप्ते च महाघोरे युगस्यान्ते महाक्षये। अनावृष्टिहते लोके पुरावर्षशताधिके॥
औषधीनां क्षये घोरे देवदानववर्जिते। निर्वीर्ये निर्वषट्कारे कलिनादूषितेभृशम्
सरित्सरस्तडागेषु पल्वलोपवनेषु च। संशुष्केषु तदा ब्रह्मन्निराकारे युगक्षये ॥७॥
जनं प्राप्ते महर्लोके ब्रह्मक्षत्त्रविशादयः। ऋषयश्च महात्मानो दिव्यतेजःसमन्विताः

स्थितानि कानि भूतानि गतान्येव महामुने!।
एतत्सर्वं महाभाग! कथयस्व पृथक्पृथक् ॥ ९ ॥
भूतानि कानि विप्रेन्द्र! कथं सिद्धिमवाप्नुयात्।
ब्रह्मविष्ण्विन्द्ररुद्राणां काले प्राप्ते सुदारुणे ॥ १० ॥

एवमुक्तस्ततःसोऽथ धर्मराजेनधीमता। मार्कण्डः प्रत्युवाचेदमृषिसङ्घैःसमावृतः

श्रीमार्कण्डेय उवाच

शृण्वन्तु ऋषयःसर्वे त्वया सह नरेश्वर!। महत्पुराणं पूर्वोक्तं शम्भुना वायुदैवते॥

वायोः सकाशात्स्कन्देन श्रुतमेतत्पुरातनम्।
वसिष्ठः श्रुतवांस्तस्मात्पराशरस्ततः परम् ॥ १३ ॥

तस्माच्चजातूकर्ण्येनतस्माच्चैवमहर्षिभिः। एवंपरम्पराप्रोक्तंशतसङ्ख्यैर्द्विजोत्तमैः

संहिता शतसाहस्री पुरोक्ता शम्भुना किल।
आलोड्य सर्वशास्त्राणि वेदार्थं तत्वतः पुराः ॥ १५ ॥

युगरूपेण सा पश्चाच्चतुर्द्धा विनियोजिता। मन्दप्रज्ञानुसारेण नराणांतु महर्षिभिः
आराध्य पशुभर्त्तारं मयापूर्वं महेश्वरम्। पुराणं श्रुतमेतद्धि तत्ते वक्ष्याम्यशेषतः
यच्छ्रुत्वा मुच्यते जन्तुः सर्वपापैर्नरेश्वर!। मानसैः कर्मजैश्चैव सप्तजन्मसुसञ्चितैः
सप्तकल्पक्षयाघोरा मया दृष्टाः पुनः पुनः। प्रसादाद्देवदेवस्य विष्णोश्च परमेष्ठिनः

द्वादशादित्यनिर्द्दग्धे जगत्येकार्णवीकृते।
श्रान्तोऽहं विभ्रमंस्तत्र तरन्बाहुभिरर्णवम् ॥ २० ॥

अथाहं सलिले राजन्नादित्यसमरूपिणम्। पुरा पुरुषमद्राक्षमनादिनिधनं प्रभुम्॥
शृङ्गं चैवाद्रिराजस्यभासयन्तंदिशोदश। द्वितीयोऽन्योमनुर्दृष्टःपुत्रपौत्रसमन्वितः

अगाधे भ्रमते सोऽपि तमोभूते महार्णवे । अविश्रमन्मुहूर्त्तं तु चक्रारूढ इव भ्रमन्
अथाहं भयादुद्विग्नस्तरन्बाहुभिरर्णवम् । तत्रस्थोहं महामत्स्यमपश्यं मदसंयुतम् ॥

ततोऽब्रवीत्स मां दृष्ट्वा एह्येहीति च भारत !।
परं प्रधानः सर्वेषां मत्स्यरूपो महेश्वरः ॥ २५ ॥

ततोऽहं त्वरया गत्वा तन्मुखे मनुजेश्वर !। सुश्रान्तो विगतज्ञानः परंनिर्वेदमागतः
ततोऽद्राक्षं समुद्रान्ते महदावर्त्तसङ्कुलाम् । उद्यत्तरङ्गसलिलां फेनपुञ्जाट्टहासिनीम्

नदीं कामगमां पुण्यां झषमीनसमाकुलाम् ।
नद्यास्तस्यास्तु मध्यस्था प्रमदा कामरूपिणी ॥ २८ ॥
नीलोत्पलदलश्यामा महत्प्रक्षोभवाहिनी ।
दिव्यहाटकचित्राङ्गी कनकोज्ज्वलशोभिता ॥ २९ ॥
द्वाभ्यां संगृह्य जानुभ्यांमहत्पोतं व्यवस्थिता ।
तां मनुः प्रत्युवाचेदं का त्वं दिव्यवराङ्गने !॥ ३० ॥

तिष्ठसे केन कार्येण त्वमत्र सुरसुन्दरि !। सुरासुरगणेनष्टे भ्रमसे लीलयाऽर्णवे ॥
सरितःसागराःशैलाः क्षयंप्राप्ताह्यनेकशः । त्वमेकाकुतकथंसाध्वितिष्ठसेकारणंमहत्

श्रोतुमिच्छाम्यहं देवि! कथयस्व ह्यशेषतः ॥ ३२ ॥

अबलोवाच

ईश्वराङ्गसमुद्भूता ह्यमृतानाम विश्रुता । सरित्पापहरापुण्या मामाश्रित्यभयंकुतः

साऽहं पोतमिमं तुभ्यं गृहीत्वा ह्यागता द्विज !।
न ह्यस्य पोतस्य क्षयोऽत्र तिष्ठति शङ्करः ॥ ३४ ॥

तस्यास्तद्वचनं श्रुत्वा विस्मयोत्फुल्ललोचनः । मनुना सहराजेन्द्रपोतारूढोह्यहंतदा
कृताञ्जलिपुटो भूत्वा प्रणम्य शिरसा विभुम् । व्यापिनंपरमेशानमस्तौषमभयप्रदम्
सद्योजाताय देवाय वामदेवाय वै नमः । भवेभवे नमस्तुभ्यंभक्तिगम्याय ते नमः
भूर्भुवाय नमस्तुभ्यं रामज्येष्ठाय वैनमः । नमस्ते भद्रकालाय कलिरूपाय वै नमः
अचिन्त्याव्यक्तरूपाय महादेवाय धामने । विद्महे देवदेवाय तन्नो रुद्र नमोनमः ॥

जगत्सृष्टिविनाशानां कारणाय नमोनमः ।
एवं स्तुतो महादेवः पूर्वं सृष्ट्या मयाऽनघ ॥ ४० ॥
प्रसन्नोमाऽवदत्पश्चाद्वरं वरय सुव्रत !॥ ४१ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्ये मार्कण्डेयधर्मराजसम्वादे कल्पक्षये मार्कण्डेय
कृतपोताधिरोहणवृत्तान्तवर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

नर्मदापञ्चदशनामवर्णनम्

श्रीमार्कण्डेय उवाच

ततोऽर्णवात्समुत्तीर्य्य त्रिकूटशिखरे स्थितम् ।
महाकनकवर्णाभे नानावर्णशिलाचिते ॥ १ ॥

महाशृङ्गे समासीनं रुद्रकोटिसमन्वितम् । महादेवं महात्मानमीशानमजमव्ययम् ॥
सर्वभूतमयं तात! मनुना सह सुव्रत !। भूयो ववन्दे चरणौ सर्वदेवनमस्कृतौ ॥ ३॥
तत्काले युगसाहस्रं सह रुद्रेणमानद !। तस्मिन्नेकार्णवे घोरेस्थितोऽहं कुरुनन्दन

युधिष्ठिर उवाच

एतच्छ्रुत्वा तु मे तात परं कौतूहलंहृदि । जातं तत्कथयस्वेतिशृण्वतःसहवान्धवैः
कासापद्मपलाशाक्षी तमोभूतेमहार्णवे । योगिवद्भ्रमतेनित्यंरुद्रजांस्वांचयाब्रवीत्

श्रीमार्कण्डेय उवाच

एतमेव मया प्रश्नं पुरापृष्टो मनुः स्वयम् । तदेव तेऽद्यवक्ष्यामि अबलायाःसमुद्भवम्
व्यतीतायां निशायां तु ब्रह्मणः परमेष्ठिनः । ततःप्रभाते विमलेसृज्यमानेषु जन्तुषु

मनुं प्रणम्य शिरसा पृच्छाम्येतद्युधिष्ठिर !।

केयं पद्मपलाशाक्षी श्यामा चन्द्रनिभानना ॥ ६ ॥
एकार्णवे भ्रमत्येका रुद्रजाऽस्मीतिवादिनी ।
सावित्री वेदमाता च ह्यथवा सा सरस्वती ॥ १० ॥
मन्दाकिनी सरिच्छ्रेष्ठा लक्ष्मीर्वा किमथो उमा ।
कालरात्रिर्भवेत्साक्षात्प्रकृतिर्वा सुखोचिता ॥ ११ ॥

एतदाचक्ष्व भगवन्का सा ह्यमृतसम्भवा । चरत्येकार्णवे घोरे प्रनष्टोरगराक्षसे ॥

मनुरुवाच

शृणुवत्सयथान्यायमस्यावक्ष्यामिसम्भवम् । ययारुद्रसमुद्भूतायाचेयंवरवर्णिनी पुरा शिवः शान्ततनुश्चचार विपुलं तपः । हितार्थं सर्वलोकानामुमया सह शङ्करः ऋक्षशैलं समारुह्य तपस्तेपे सुदारुणम् । अदृश्यः सर्वभूतानां सर्वभूतात्मको वशी तपतस्तस्य देवस्य स्वेदः समभवत्किल । तंगिरिंप्लावयामास सस्वेदोरुद्रसंभवः

तस्मादासीत्समुद्भूता महापुण्या सरिद्वरा ।
या सा त्वयाऽर्णवे दृष्टा पद्मपत्रायतेक्षणा ॥ १७ ॥

स्त्रीरूपं समवस्थाय रुद्रमाराधयत्पुरा । आद्ये कृतयुगे तस्मिन्समानामयुतं नृप ततस्तुष्टो महादेव उमया सह शङ्करः । ब्रूहि त्वं तु महाभागे यत्ते मनसि वर्त्तते

सरिदुवाच

प्रलये समनुप्राप्ते नष्टे स्थावरजङ्गमे । प्रसादात्तव देवेश अक्षयाहं भवे प्रभो !॥ २०॥ सरित्सु सागरेष्वेव पर्वतेषु क्षयिष्वपि । तव प्रसादाद्देवेश!पुण्याक्षय्याभवे प्रभो!

पापोपपातकैर्युक्ता महापातकिनोऽपि ये ।
मुच्यन्ते सर्वपापेभ्यो भक्त्या स्नात्वा तु शङ्कर !॥ २२ ॥

उत्तरे जाह्नवी देवी महापातकनाशिनी । भवामि दक्षिणेमार्गेयद्येवं सुरपूजिता ॥ स्वर्गादागम्यगङ्गेतियथाख्याताक्षितौविभो । तथादक्षिणगङ्गेतिभवेयंत्रिदशेश्वर

पृथिव्यां सर्वतीर्थेषु स्नात्वा यल्लभते फलम् ।
तत्फलं लभते मर्त्यो भक्त्या स्नात्वा महेश्वर !॥ २५ ॥

ब्रह्महत्यादिकंपापंयदास्तेसञ्चितंकचित् । मासमात्रेण तद्देवक्षयंयात्ववगाहनात् यत्फलं सर्ववेदेषु सर्वयज्ञेषु शङ्कर । अवगाहेन तत्सर्वं भवत्विति मतिर्मम ॥ २७ ॥ सर्वदानोपवासेषु सर्वतीर्थावगाहने । तत्फलं मम तोयेन जायतामिति शङ्कर !॥ मम तीरे नरा ये तु अर्च्चयन्तिमहेश्वरम् । ते गतास्तत्र लोकं स्युरेतदेवभवेच्छिव मम कूले महेशान उमया सह दैवतैः । वस नित्यं जगन्नाथ एष एव वरो मम ॥

सुकर्मा वा विकर्मा वा शान्तो दान्तो जितेन्द्रियः ।
मृतो जन्तुर्मम जले गच्छतादमरावतीम् ॥ ३१ ॥

त्रिषु लोकेषु विख्याता महापातकनाशिनी । भवामि देवदेवेश प्रसन्नो यदिमन्यसे एतांश्चान्यान्वरान्दिव्यान्प्रार्थितो नृपसत्तम । नर्मदया ततः प्राह प्रसन्नोवृषवाहनः

श्रीमहेश उवाच

एवंभवतुकल्याणि यत्त्वयोक्तमनिन्दिते । नान्यावराहालोकेषुमुक्त्वात्वांकमलेक्षणे यदैव मम देहात्त्वं समुद्भूता वरानने !। तदैव सर्वपापानां मोचिनी त्वं न संशयः कल्पक्षयकरे काले काले घोरे विशेषतः । उत्तरं कूलमाश्रित्य निवसन्ति चयेनराः अपिकीटपतंगाश्च वृक्षगुल्मलतादयः । आदेहपतनाद्देवि!तेऽपियास्यन्तिसद्गतिम्

दक्षिणं कूलमाश्रित्य ये द्विजा धर्मवत्सलाः ।
आमृत्योर्निवसिष्यन्ति ते गताः पितृमन्दिरे ॥ ३८ ॥
अहं हि तव वाक्येन कस्मिंश्चित्कारणान्तरे ।
त्वत्तीरे निवसिष्यामि सदैव ह्युमया समम् ॥ ३६ ॥

एवं देवि! महादेवि! एवमेव न संशयः । ब्रह्मेन्द्रचन्द्रवरुणैः साध्यैश्च सह विष्णुना उत्तरेदेवि!ते कूलेवसिष्यन्तिममाज्ञया । दक्षिणे पितृभिःसार्द्धं तथाऽन्येसुरसुन्दरि

वसिष्यन्ति मया सार्द्धमेव ते वर उत्तमः ।
गच्छ गच्छ महाभागे! मर्त्यान्पापाद्विमोचय ॥ ४२ ॥

सहिता ऋषिसंघैश्च तथासिद्धसुरासुरैः । एवमुक्त्वा महादेवउमयासहितोविभुः वन्द्यमानोऽथ मनुना मया चादर्शनंगतः । तेन चैषा महापुण्यामहापातकनाशिनी

कथिता पृच्छ्यते या ते मा ते भवतु विस्मयः ।
एषा गङ्गा महापुण्या त्रिषु लोकेषु विश्रुता ॥ ४१ ॥
दशभिःपञ्चभिः स्रोतैःप्लावयन्ती दिशो दश । शोणोमहानदश्चैवनर्मदासुरसाकृता
मन्दाकिनी दशार्णा च चित्रकूटा तथैवच । तमसाविदशा चैवकरभायमुनातथा
चित्रोत्पलाविपाशाच रञ्जनावालुवाहिनी । ऋक्षपादप्रसूतास्ताःसर्वावैरुद्रसंभवाः
सर्वपापहराः पुण्याः सर्वमङ्गलदाःशिवाः । इत्येतैर्नामभिर्दिव्यैःस्तूयतेवेदपारगैः
पुराणज्ञैर्महाभागैराज्यपैः सोमपैस्तथा । इत्येतत्सर्वमाख्यातं महाभाग्यं नरोत्तम
मनुनोक्तं पुरामह्यममृतायाः समुद्भवम् । पुण्यं पवित्रमतुलं रुद्रोद्गीतमिदं शुभम् ॥
ये नराः कीर्त्तयिष्यन्ति भक्त्या शृण्वन्ति येऽपि च ।
प्रातरुत्थाय नामानि दश पञ्च च भारत !॥ ५२ ॥
ते नराः सकलंपुण्यंलभिष्यन्त्यवगाहजम् । विमानेनार्कवर्णेनघण्टाशतनिनादिना
त्यक्त्वा मानुष्यकं भावं यास्यन्ति परमां गतिम् ॥ ५४ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदापञ्चदशनामवर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्याय:

नर्मदानामनिरुक्तिवर्णनम्

युधिष्ठिर उवाच

आश्चर्यमेतदखिलं कथितं भो द्विजोत्तम । विस्मयं परमापन्ना ऋषिसङ्घामयासह
अहो भगवतीपुण्या नर्मदेयमयोनिजा । रुद्रदेहाद्विनिष्क्रान्ता महापापक्षयङ्करी ॥
सप्तकल्पक्षये प्राप्ते त्वयेयं सह सुव्रत !। न मृता च महाभागाकिमतःपुण्यमुत्तमम्
के तेकल्पाः समुद्दिष्टाः सप्त कल्पक्षयंकराः । न मृताचेदियं देवी त्वंचैवऋषिपुङ्गव

अपक्षिगणसङ्घाते जगत्येकार्णवीकृते । कीदृग्रूपः समभवन्महादेवो युगक्षये ॥ ५ ॥
कथं संहरते विश्वं कथं चाऽस्ते महार्णवे । कथं चसृजते विश्वं कथंधारयतेप्रजाः
कीदृग्रूपा भवेद्देवीसरिदेकार्णवीकृते । किमर्थं नर्मदा प्रोक्ता रेवेति चकथं स्मृता
अञ्जनेति किमर्थं वा किमर्थं सुरसेति च ।
मन्दाकिनी किमर्थं च शोणश्चेति कथं भवेत् ॥ ८ ॥
त्रिकूटेति किमर्थं वा किमर्थं वालुवाहिनी ।
कोटिकोट्या हि तीर्थानां प्रविष्टा या महार्णवम् ॥ ९ ॥
कियत्यः सरितां कोट्यो नर्मदांसमुपासते । यज्ञोपवीतैर्ऋषिभिर्देवताभिस्तथैवच
विभक्तेयं किमर्थं च श्रूयतेमुनिसत्तम । वैष्णवीति पुराणज्ञैः किमर्थमिह चोच्यते
केषु स्थानेषु तीर्थेषु पूजनीया सरिद्वरा । तीर्थानिच पृथग्ब्रूहि यत्रसन्निहितोहरः
यत्प्रमाणा च सा देवी या रुद्रेण विनिर्मिता ।
कीदृशानि च कर्माणि रुद्रेण कथितानि ते ॥ १३ ॥
कथंम्लेच्छसमाकीर्णो देशोऽयंद्विजसत्तम । एतदाचक्ष्व मांब्रह्मन्मार्कण्डेय महामते

श्रीमार्कण्डेय उवाच

शृण्वन्तु ऋषयः सर्वे त्वं च तातयुधिष्ठिर । पुराणंनर्मदायां तु कथितंचत्रिशूलिना
वायोः सकाशाच्च मया तेनापि च महेश्वरात् ।
अशक्यत्वान्मनुष्याणां सङ्क्षिप्तमृषिभिः पुरा ॥ १६ ॥
मायूरं प्रथमं तातकौर्म्यं च तदनन्तरम् । पुरं तथा कौशिकं च मात्स्यंद्विरदमेवच
वाराहं यन्मयादृष्टं वैष्णवं चाष्टमंपरम् । न्यग्रोधाख्यमतश्चासीदाकांक्षंपुनरुत्तमम्
पद्मं च तामसं चैव संवर्त्तोद्वर्त्तमेव च । महाप्रालयमित्याहुः पुराणे वेदचिन्तकाः
एतत्संक्षेपतः सर्वं संक्षिप्तं तैर्महात्मभिः । विभक्तं च चतुर्भागैर्ब्रह्माद्यैश्च महर्षिभिः
तदहं संप्रवक्ष्यामिपुराणार्थविशारद !। सप्त कल्पामहाघोरायैरियं न मृता सरित्
आजङ्गमं तमोभूतमप्रज्ञातमलक्षणम् । नष्टचन्द्रार्ककिरणमासीद्भूतविवर्जितम् ॥
तमसोऽन्तेमहानाम्नापुरुषःसजगद्गुरुः । चचारतस्मिन्नेकाकीव्यक्ताव्यक्तःसनातनः

स चोङ्कारमयोऽतीतो गायत्रीमसृजद्द्विजः ।
स तया सार्द्धमीशानश्चिक्रीड पुरुषो विराट् ॥ २४ ॥
स्वदेहादसृजद्विश्वं पञ्चभूतात्मसंज्ञितम् । क्रीडन्समसृजद्विश्वं पञ्चभूतात्मसंज्ञितम्
क्रीडन्सृजद्विराट्सञ्ज्ञः सबीजं च हिरण्मयम् ।
तच्चाण्डमभवद्दिव्यं द्वादशादित्यसन्निभम् ॥ २६ ॥
तद्भित्वा पुरुषो जज्ञे चतुर्वक्त्रः पितामहः । सोऽसृजद्विश्वमेवंतु सदेवासुरमानुषम्
सतिर्यक्पशुपक्षीकं स्वेदाण्डजजरायुजम् । एतदण्डं पुराणेषु प्रथमं परिकीर्तितम्
पूर्वकल्पे नृपश्रेष्ठ क्रीडन्त्या परमेष्ठिना । उमया सह रुद्रस्य क्रीडतश्चार्णवीकृतः
हर्षाज्जज्ञे शुभा कन्या उमायाः स्वेदसम्भवा ।
शर्वस्योरःस्थलाज्जज्ञे उमा कुचविमर्द्दनात् ॥ ३० ॥
स्वेदाद्विजज्ञेमहती कन्याराजीवलोचना । द्वितीयः संभवोयस्यारुद्रदेहाद्य धिष्ठिर
सा परिभ्रमतेलोकान्सदेवासुरमानवान् । त्रैलोक्योन्मादजननीरूपेणाऽप्रतिमातदा
तां दृष्ट्वा देवदैत्येन्द्रा मोहिता लभते कथम् ।
मृगयन्ति स्म तां कन्यामितश्चेतश्च भारत !॥ ३३ ॥
हावभावविलासैश्चमोहयत्यखिलंजगत् । भ्रमतेदिव्यरूपासाविद्य त्सौदामिनीयथा
मेघमध्ये स्थिता भाभिः सर्वयोषिदनुत्तमा । ततो रुद्रं सुराःसर्वेदैत्याश्चसहदानवैः
वरयन्ति स्म तां कन्यां कामेनाऽऽकुलिता भृशम् ।
ततोऽब्रवीन्महादेवो देवदानवयोर्द्वयोः ॥ ३६ ॥
बलेन तेजसा चैव ह्यधिको यो भविष्यति ।
स इमां प्राप्स्यते कन्यां नान्यथा वै सुरोत्तमाः !॥ ३७ ॥
ततो देवासुराःसर्वे कन्यां वै समुपागमन् । अहमेनांग्रहीष्यामि अहमेनामितिब्रुवन्
पश्यतामेवसर्वेषां सा कन्याऽन्तरधीयत । पुनस्तांददृशुःसर्वेयोजनान्तरधिष्ठिताम्
जग्मुस्ते त्वरिताः सर्वे यत्र सासमदृश्यत । त्रिभिश्चतुर्भिश्चतथायोजनैर्दशभिः पुनः
धिष्ठितां समपश्यंस्ते सर्वे मातङ्गगामिनीम् ।

योजनानां शतैर्भूयः सहस्रैश्चाप्यधिष्ठिताम् ॥ ४१ ॥
तथा शतसहस्रेण लघुत्वात्समदृश्यत । अग्रतः पृष्ठतश्चैव दिशासु विदिशासु च
तां पश्यन्ति वरारोहामेकधाबहुधा पुनः । दिव्यवर्षसहस्रं तु भ्रामितास्तेतयापुरा
न चावाप्ता तु सा कन्या महादेवाङ्गसम्भवा ।
सहोमया ततो देवो जहासोच्चैः पुनः पुनः ॥ ४४ ॥
गणास्तालकसम्पातैर्नृत्यन्ति च मुदान्विताः ।
अकस्माद् दृश्यते कन्या शङ्करस्य समीपगा ॥ ४५ ॥
तां दृष्ट्वा विस्मयापन्ना देवा यान्ति पराङ्मुखाः ।
तस्याश्चक्रे ततो नाम स्वयमेव पिनाकधृक् ॥ ४६ ॥
नर्म चैभ्योददेयस्मात्तत्कृतैश्चेष्टितैःपृथक् । भविष्यसिवरारोहेसरिच्छ्रेष्ठातुनर्म्मदा
स्वरूपमास्थितोदेवः प्रापहास्यंयतोभुवि । नर्मदातेनचोक्तेयंसुशीतलजला शिवा
सप्तकल्पक्षये जाते यदुक्तं शम्भुना पुरा । न मृतातेनराजेन्द्र नर्मदाख्यातिमागता
ततस्तामददात्कन्यां शीलवतीं सुशोभनाम् । महार्णवायदेवेशः सर्वभूतपतिः प्रभुः
ततः सा ऋक्षशैलेन्द्रात्फेनपुञ्जाट्टहासिनी । विवेश नर्मदादेवी समुद्रंसरितांपतिम्
एवं ब्राह्मे पुरा कल्पे समुद्भूतेयमीश्वरात् ।
मात्स्ये कल्पे मया दृष्टा समाख्याता मया शृणु ॥ ५२ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्यनर्मदानामनिरुक्तिवर्णनं नाम
पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

सहेतुकं रेवानाममहत्त्वंमयूरकल्पवर्णनम्

मार्कण्डेय उवाच

पुनर्युगान्ते सम्प्राप्ते तृतीये नृपसत्तम !। द्वादशार्कवपुर्भूत्वा भगवान्नीललोहितः
सप्तद्वीप समुद्रान्तांसशैलवनकाननाम् । निर्दग्धांतुमहीं कृत्स्नांकालोभूत्वामहेश्वरः

ततो महाघनो भूत्वा प्लावयामास वारिणा ।
कृष्णं कृष्णवपुस्त्वेनां विद्युच्चन्द्रायुधाङ्किताम् ॥ ३ ॥
प्लावयित्वा जगत्सर्वं तस्मिन्नेकार्णवीकृते ।
सुष्वाप विमले तोये जगत्सङ्क्षिप्य मायया ॥ ४ ॥

ततोऽहंभ्रममाणस्तु तमोभूते महार्णवे । दिव्यं वर्षसहस्रं तु वायुभूते महेश्वरे ॥ ५
ओंकृत्वा देवदेवेशं येनेदं गहनीकृतम् । ध्यायमानस्ततो देवं राजेन्द्र! विमले जले
तस्मिन्महार्णवे घोरे नष्टे स्थावरजङ्गमे । मयूरं स्वर्णपत्राढ्यमपश्यंसहसा जले ॥

विचित्रचन्द्रकोपेतं नीलकण्ठं सुलोचनम् ॥ ७ ॥
ततो मयूरः स महार्णवान्ते विक्षोभयित्वा हि महारवेण ।
चचार देवस्त्रिशिखी शिखण्डी त्रैलोक्यगोप्ता स महानुभावः ॥ ८ ॥
शिवश्च रौद्रेण मयूररूपिणा विक्षोभ्यमाणे सलिलेऽपि तस्मिन् ।
सह भ्रमन्तीं च महार्णवान्ते सरिन्महौघां सुमहान्ददर्श ॥ ९ ॥
स तां महादेवमयूररूपो दृष्ट्वा भ्रमन्तीं सहसोर्मिजालैः ।
का त्वं शुभे शाश्वतदेहभूता क्षयं न यातासि महाक्षयान्ते ॥ १० ॥

देवासुरगणे नष्टे सरित्सरमहार्णवे । का त्वं भ्रमसि पद्माक्षि! क्व गतासिचनक्षयम्

नर्मदोवाच

तव प्रसादाद्देवेश! मृत्युर्मम नविद्यते । सृजदेव! पुनर्विश्वं शर्वरी क्षयमागता ॥

एवमुक्तो महादेवोऽव्यधुनोत्पक्षपञ्जरम् । तावत्पञ्जरमध्यान्ते तस्य पक्षाद्विनिःसृताः
तावन्तोदेवदैत्येन्द्राःपक्षाभ्यां तस्यजज्ञिरे । तेषांमध्येपुनः सासुनर्मदाभ्रमतेसरित्
ततश्चान्यो महाशैलो दृश्यतेभरतर्षभ !। त्रिभिःकूटैःसुविस्तीर्णैःशृङ्गवानिवगोवृषः

त्रिकूटस्तु इति ख्यातः सर्वरत्नैर्विभूषितः ।
ततस्तस्मात्त्रिकूटाच्च प्लावयन्ती महीं ययौ ॥ १६ ॥
त्रिकूटी तेन विख्याता पितॄणां त्रायणी परा ।
द्वितीयाच्च ततो गङ्गा विस्तीर्णा धरणीतले ॥ १७ ॥

तृतीयं चततः शृङ्गं सप्तधा खण्डशोगतम् । जम्बूद्वीपे तुसञ्जाताःसप्त ते कुलपर्वताः
चन्द्रनक्षत्रसहिता ग्रहग्रामनदीनदाः । अण्डजं स्वेदजं जातमुद्भिज्जं च जरायुजम्
एवं जगदिदं सर्वं मयूरादभवत्पुरा । समस्तं नरशार्दूल महादेवसमुद्भवम् ॥ २० ॥

ततो नदीः समुद्रांश्च सम्विभज्य पृथक्पृथक् ।
नर्मदामाह देवेशो गच्छ त्वं दक्षिणां दिशम् ॥ २१ ॥

एवंसा दक्षिणागङ्गा महापातकनाशिनी । उत्तरेजाह्नवी देशे पुण्या त्वंदक्षिणेशुभा
यथा गङ्गा महापुण्या मम मस्तकसम्भवा । तद्विशिष्टामहाभागेत्वंचैवेतिनसंशयः
त्वया सह भविष्यामिएकेनांशेन सुव्रते !। महापातकयुक्तानामौषधं त्वंभविष्यसि
एवमुक्तातुदेवेनमहापातकनाशिनी । दक्षिणंदिग्विभागं तुसाजगामाऽऽशुविक्रमा

ऋक्षशैलेन्द्रमासाद्य चन्द्रमौलेरनुग्रहात् ।
वार्यौघैः प्रस्थिता यस्मान्महादेवप्रणोदिता ॥ २६ ॥

महताचाऽपिवेगेन यस्मादेषा समुच्छ्रिता । महतीतेन सा प्रोक्तामहादेवान्महीपते

तपतस्तस्य देवस्य शूलाग्राद् बिन्दवोऽपतन् ।
तेनैषा शोणसञ्ज्ञातु दशसप्त च ताःस्मृताः ॥ २८ ॥

सर्वेषांनर्मदापुण्या रुद्रदेहाद्विनिःसृता । सर्वाभ्यश्च सरिद्भ्यश्च वरदानान्महात्मनः
शङ्करानुग्रहाद्देवी महापातकनाशिनी । यस्मान्महार्णवे घोरे दृश्यतेमहतीचसा

सुव्यक्ताङ्गी महाकाया महती तेन सा स्मृता ।

तस्माद्विक्षोभ्यमाणा हि दिग्गजैरम्बुदोपमैः ॥ ३१ ॥

कलुषत्वं नयत्येव रसेन सुरसा तथा । कृपां करोति सा यस्माल्लोकानामभयप्रदा

संसारार्णवमग्नानां तेन चैषा कृपा स्मृता ।

पुरा कृतयुगे पुण्ये दिव्यमन्दारभूषिता ॥ ३३ ॥

कल्पवृक्षसमाकीर्णा रोहीतकसमाकुला । वहत्येषा च मन्देनतेनमन्दाकिनीस्मृता

भित्वा महार्णवं क्षिप्रं यस्माल्लोकमिहागता ।

पूज्या सुरैश्च सिद्धैश्च तस्मादेषा महार्णवा ॥ ३५ ॥

विचित्रोत्पलसङ्घातैर्मत्स्यद्विपसमाकुला ॥ ३६ ॥

भित्वा शैलं च विपुलं प्रयात्येवंमहार्णवम् । भ्रामयन्ती दिशःसर्वा रवेणमहतापुरा

प्लावयन्ती विराजन्ती तेन रेवा इति स्मृता ।

भार्यापुत्रसुदुःखाढ्यान्नराञ्छापैः समावृतान् ॥ ३८ ॥

विपापान्कुरुते यस्माद्विपापा तेन सा स्मृता ।

विण्मूत्रनिचयां घोरां पांशुशोणितकर्दमाम् ॥ ३९ ॥

पाशैर्नित्यं तु सम्बाधां यस्मान्मोचयते भृशम् ।

विपाशेति च सा प्रोक्ता संसारार्णवतारिणी ॥ ४० ॥

नर्मदा विमलाम्भा च विमलेन्दुशुभानना । तमीभूते महाघोरेयस्मादेषा महाप्रभा

विमला तेन सा प्रोक्ता विद्वद्भिर्नृपसत्तम !। करैरिन्दुकरप्रख्यैः सूर्यरश्मिसमप्रभा

क्षरन्ती मोदते विश्वं करभा तेन चोच्यते । यस्माद्रञ्जयते लोकान्दर्शनादेव भारत

रञ्जनाद्रञ्जना प्रोक्ताधात्वर्थैराजसत्तम । तृणवीरुधगुल्माद्यास्तिर्यञ्चःपक्षिणस्तथा

तानुद्भूतान्नयेत्स्वर्गं तेनोक्ता वायुवाहिनी ॥ ४४ ॥

एवं यो वेत्ति नामानि निर्गमंचविशेषतः । सयातिपापनिर्मुक्तोरुद्रलोकं न संशयः

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमऽवन्तीखण्डे

रेवाखण्डे नर्मदामाहात्म्ये सहेतुकरेवानाममाहात्म्यवर्णने मयूरकल्पसमुद्भवो

नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

पूर्वकल्पसमुद्भववर्णनम्

श्रीमार्कण्डेय उवाच

पुनरेकार्णवे घोरे नष्टे स्थावरजङ्गमे । सलिलेनाप्लुते लोके निरालोके तमोद्भवे ॥

ब्रह्मैको विचरंस्तत्र तमीभूते महार्णवे । दिव्यवर्षसहस्रं तु खद्योत इव रूपवान् ॥

शेते योजनसाहस्रमप्रमेयमनुत्तमम् । द्वादशादित्यसङ्काशं सहस्रचरणेक्षणम् ॥ ३ ॥

प्रसुप्तं चार्णवे घोरे ह्यपश्यत्कूर्मरूपिणम् । तं दृष्ट्वा विस्मयापन्नो ब्रह्मा बोधयतेशनैः

स्तुतिभिर्मङ्गलैश्चैव वेदवेदाङ्गसम्भवैः । वाचस्पते! विबुध्यस्वमहाभूतनमोऽस्तु ते

तवोदरे जगत्सर्वं तिष्ठते परमेश्वर !। तद्विमुञ्च महासत्त्व! यत्पूर्वं संहृतं त्वया ॥ ६ ॥

व्यतीता रजनी ब्राह्मी दिनं समनुवर्त्तते । निरीक्ष्य सर्वलोकेश येन सम्भवते जगत्

स निशम्य वचस्तस्य उत्थितः परमेश्वरः ।

समुद्गिरन्सलोकांस्त्रीन्ग्रस्तान्कल्पक्षये तदा ॥ ८ ॥

देवदानवगन्धर्वाः सयक्षोरगराक्षसाः । सचन्द्रार्कग्रहाः सर्वे शरीरात्तस्य निर्गताः

ततो ह्येकार्णवंसर्वं विभज्यपरमेश्वरः । विस्तीर्णोपलतोयौघांसरित्सरविवर्द्धिताम्

पश्यते मेदिनीं देवः सवृक्षौषधिपल्वलाम् । हिमवन्तं गिरिश्रेष्ठं श्वेतं पर्वतमुत्तमम्

शृङ्गवन्तं महाशैलं ये चान्ये कुलपर्वताः । जम्बूद्वीपंकुशं क्रौञ्चंसगोमेदंसशाल्मलम्

पुष्करान्ताश्च ये द्वीपा ये च सप्तमहार्णवाः ।

लोकालोकं महाशैलं सर्वं च पुरतः स्थितम् ॥ १३ ॥

चतुः प्रकृतिसंयुक्तं जगत्स्थावरजङ्गमम् । युगान्ते तु विनिष्क्रान्तमपश्यत्समहेश्वरः

विप्रकीर्णशिलाजालामपश्यत्स वसुन्धराम् ।

कूर्मपृष्ठोपगां देवीं महार्णवगतां प्रभुः ॥ १५ ॥

तस्मिन्विशीर्णशैलाग्रे सरित्सरोविवर्जिते । नानातरङ्गभिन्नोद आवर्तोद्वृत्तसङ्कुले

नानौषधिप्रज्वलितेनानोत्पलशिलातले । नानाविहंगसंघुष्टांमत्स्यकूर्मसमाकुलाम्
दिव्यमायामयीं देवी मुत्कृष्टाम्बुदसन्निभाम् ।
नदीमपश्यद्देवेशो ह्यनौपम्यजलाशयाम् ॥ १८ ॥
मध्ये तस्याम्बुदश्यामां पीनोरुजघनस्तनीम् । वस्त्रैरनुपमैर्दिव्यैर्नानाभरणभूषिताम्
सनूपुररवोद्दामां हारकेयूरमण्डिताम् । तादृशींनर्मदां देवीं स्वयंस्त्रीरूपधारिणीम्
योगमायामयैश्चित्रैर्भूषणैः स्वैर्विभूषिताम् ।
अव्यक्ताङ्गीं महाभागामपश्यत्स तु नर्मदाम् ॥ २१ ॥
अर्द्धोद्यतभुजां बालां पद्मपत्रायतेक्षणाम् । स्तुवन्तीं देवदेवेशमुत्थितां तु जलात्तदा
विस्मयाऽऽविष्टहृदयो ह्यहमुद्वीक्ष्य तां शुभाम् ।
स्नात्वा जले शुभे तस्याः स्तोतुमभ्युद्यतस्ततः ॥ २३ ॥
अर्चयामास संहृष्टो मन्त्रैर्वेदाङ्गसम्भवैः । सृष्टं च तत्पुरा राजन्पश्येयं सचराचरम्॥
सदेवासुरगन्धर्वं सपन्नगमहोरगम् । पश्याम्येषा महाभागा नैव याता क्षयं पुरा ॥
महादेवप्रसादाच्च तच्छरीरसमुद्भवा । भूयोभूयो मया दृष्टा कथिता ते नृपोत्तम ॥
प्रादुर्भावमिमं कौर्म्यं येऽधीयन्ते द्विजोत्तमाः ।
येऽपि शृण्वन्ति विद्वांसो मुच्यन्ते तेऽपि किल्बिषैः ॥ २७ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्ये कूर्मकल्पसमुद्भवोनाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

बककल्पसमुद्भववर्णनम्

मार्कण्डेय उवाच

नष्टे लोके पुनश्चान्येसलिलेनसमावृते । महार्णवस्य मध्यस्थोबाहुभ्यामतरंजलम्
दिव्ये वर्षशते पूर्णे श्रान्तोऽहं नृपसत्तम । ध्यातुं समारभं देवं महदर्णवतारणम् ॥
ध्यायमानस्ततःकालेअपश्यं पक्षिणं परम् । हारकुन्देन्दुसङ्काशं बकंगोक्षीरपाण्डुरम्
ततोऽहं विस्मयाविष्टस्तं बकं समुदीक्ष्य वै ।
अस्मिन्महार्णवे घोरे कुतोऽयं पक्षिसम्भवः ॥ ४ ॥
तरन्बाहुभिरश्रान्तस्तं बकं प्रत्यभाषिषि । पक्षिरूपंसमास्थायकस्त्वमेकार्णवीकृते
भ्रमसे दिव्ययोगात्मन्मोहयन्निव मां प्रभो !।
एतत्कथय मे सर्वं योऽसि सोऽसि नमोऽस्तु ते ॥ ६ ॥
सोऽब्रवीन्मां महादेवोब्रह्माऽहंविष्णुरेव च । जगत्सर्वंमया वत्स! संहृतं किंनबुध्यसे
तव माता पिताऽहं वै विश्वस्य च महामुने !।
कारुण्यं मम सञ्जातं दृष्ट्वा मग्नं महर्णवे ॥ ८ ॥
पक्षिरूपंसमास्थायअतोऽत्राऽहंसमागतः । किमर्थमातुरोभूत्वाभ्रमसीत्थंमहार्णवे
शीघ्रम्प्रविश मत्पक्षौ येन विश्रमसे द्विज । एवमुक्तस्ततस्तेन देवेनाऽहं नरेश्वम्
ततोऽहंतस्यपक्षान्तेप्रलीनस्तु भ्रमञ्जले । कालेयुगसहस्रान्ते अश्रान्तोऽर्णवमध्यगः
ततः शृणोमि सहसा दिक्ष सर्वासुसुव्रत । किञ्चिन्नूपुरसंमिश्रमद्भुतं शब्दमुत्तमम्
तदार्णवजलंसर्वंसंक्षिप्तं सहसाऽभवत् । किमेतदिति सञ्चिन्त्यदिशःसमवलोकयम्
दश कन्यास्ततोदिक्षआगताश्चमहार्णवे । वस्त्रालङ्कारसहितादिग्भ्योनूपुरभूषिताः
काचिच्चन्द्रसमाभासा काचिदादित्यसप्रभा ।
काचिदञ्जनपुञ्जाभा काचिद्रक्तोत्पलप्रभा ॥ १५ ॥

नानारूपधरा सौम्या नानाऽऽभरणभूषिता ।
अर्घ्यपाद्यादिभिर्माल्यैर्बकमभ्यर्च्य सुव्रताः ॥ १९ ॥

सतस्तं पर्वताकारं गुह्यं पक्षिणमव्ययम् । प्रविवेशमहाघोरं पर्वतोह्यर्णवं स्वराट् योजनानांसहस्राणितावन्त्येवशतानिच । त्रिंशद्योजनसाहस्रंयावद्भूमण्डलंत्विति ततोभूमण्डलंदिव्यंपञ्चरत्नसमाकुलम् । दिव्यस्फटिकसोपानं रुक्मस्तम्भमनोरमम्

योजनानां सहस्रं तु विस्तराद् द्विगुणाऽऽयतम् ।
वापीकूपसमाकीर्णं प्रासादाट्टालकावृतम् ॥ २० ॥

कल्पवृक्षसमाकीर्णंध्वजयष्टिविभूषितम् । तस्मिन्पुरवरेरम्ये नानारत्नोपशोभितम्

तथाऽन्यच्च पुरं रम्यं पताकोज्ज्वलवेदिकम् ।
शतयोजनविस्तीर्णं तावद्द्विगुणमायतम् ॥ २२ ॥

पुरमध्ये ततस्तस्मिन्नदीपरमशोभना । महती पुण्यसलिला नानारत्नशिला तथा तस्यास्तीरेमया दृष्टं तडित्सूर्यसमप्रभम् । इन्द्रनीलमहानीलैश्चितं रत्नैः समन्ततः

क्वचिद्वह्निसमाकारं क्वचिदिन्द्रायुधप्रभम् ।
क्वचिद्धूम्रं क्वचित्पीतं क्वचिद्रक्तं क्वचित्सितम् ॥ २५ ॥
नानावर्णैः समायुक्तं लिङ्गमद्भुतदर्शनम् ।
ब्रह्मविष्ण्विन्द्रसाध्यैश्च समन्तात्परिवारितम् ॥ २६ ॥
नन्दीश्वरगणाध्यक्षैश्चेन्द्रादित्यैश्च तद्वृतम् ।
पश्यामि लिङ्गमीशानं महालिङ्गं तमेव च ॥ २७ ॥
परिवार्य ततस्तं तु प्रसुप्तान्देवदानवान् ।
निमीलिताक्षान्पश्यामि दिव्याभरणभूषितान् ॥ २८ ॥
ततस्ताः पद्मपत्राक्ष्यो नार्य्यः परमसम्मताः ।
नद्यास्तस्या जले स्नात्वा दिव्यपुष्पैर्मनोरमैः ॥ २९ ॥

दत्वाऽर्घपाद्यं विधिवल्लिङ्गस्यसहपक्षिणा । अर्चयन्तीर्वरारोहादशताःप्रमदोत्तमाः ततस्त्वभ्यर्च्यतल्लिङ्गं तस्मिन्नेवपुरोत्तमे । सर्वा अदर्शनं जग्मुर्विद्युतोऽभ्रगणेष्विव

न चाऽसौ पक्षिराट् तस्मिन्न स्त्रियो न च देवताः ।
तदेवैकं स्थितं लिङ्गमर्चयन्विस्मयान्वितः ॥ ३२ ॥
ततोऽहं दुःखमूढात्मा रुद्रमायेति चिन्तयन् ।
ततः कन्याः समुत्तीर्य दिव्याम्बरविभूषणाः ॥ ३३ ॥
भासयन्त्यो जगत्सर्व्वं विद्युतोऽभ्रगणानिव ।
पद्मैर्हिरण्मयैर्दिव्यैरर्च्चयित्वा शुभाननाः ॥ ३४ ॥

विविशुस्तज्जलं क्षिप्रं समन्ताद्वरभूषणाः । तस्मिन्पुरवरेचाऽन्ये तामेवाहंपुनःपुनः पश्यामिह्यमरांकन्यांअर्चयन्तींमहेश्वरम् । ततोऽहंतां वरारोहामपृच्छंकमलेक्षणाम्

कात्वमस्मिन्पुरेदेवि! वससे शिवमर्चती ।
ताश्चागताः स्त्रियः सर्वाः क्वगतास्गणेश्वराः ॥ ३७

नमोऽस्तुते महाभागे! ब्रूहि पुण्येमहेश्वरि !। तवप्रसादाद्विज्ञातुमेतदिच्छामिसुव्रते

दयां कृत्वा महादेवि! कथयस्व ममाऽनघे ॥ ३८ ॥

स्त्र्युवाच

विस्मृताऽहं कथं विप्र! दृष्टा कल्पे पुरातने ।
मा तेऽभूत्स्मृतिविभ्रंशःसचाऽहं कल्पवाहिनी ॥ ३९ ॥
नर्मदानाम विख्याता रुद्रदेहाद्विनिःसृता ।
यास्ताः कन्यास्त्वया दृष्टा ह्यर्चयन्त्यो महेश्वरम् ॥ ४० ॥
याभिस्त्विह समानीतः पक्षिराजसमन्विताः ।
दिशस्ता विद्धि सर्वेशाः सर्वास्त्वं मुनिसत्तम !॥ ४१ ॥

तिर्यक्पक्षिस्वरूपेण महायोगी महेश्वरः । एभिःशिवपुराद्विप्रआनीतः स महेश्वरः सैषदेवो महादेवो लिङ्गमूर्त्तिर्व्यवस्थितः । अर्च्यतेब्रह्मविष्ण्विन्द्रैः सुरासुरजगद्गुरुः

लयमायाति यस्माद्धि जगत्सर्वं चराचरम् ।
तेन लिङ्गमितिप्रोक्तं पुराणज्ञैर्महर्षिभिः ॥ ४४ ॥

तेनदेवगणाःसर्वे संक्षिप्ता मायया पुरा । प्रलीनाश्चैवलोकेशान दृश्यन्तेहिसाम्प्रतम्

पुनर्द्रक्ष्याभविष्यन्ति सृजमानाः स्वयम्भुवा ।
साऽहं लिङ्गार्चनपरा नर्मदानामनामतः ॥ ४६ ॥
कालंयुगसहस्रस्य रुद्रस्य परिचारिका । अस्य प्रसादादमरस्तथा त्वं द्विजपुङ्गव
सत्यार्जवदयायुक्तः सिद्धोऽसित्वंशिवार्चनात् ।एवमुक्त्वातुसादेवीतत्रैवान्तरधीयत
ताः स्त्रियः स च देवेशोबकरूपोमहेश्वरः ।तस्यास्तद्वचनं श्रुत्वाअवतीर्यमहानदीम्
स्नात्वा समर्च्य त्वं हि विधिना मन्त्रपूर्वकम् ।
ततोऽहं सहसा तस्मात्समुत्तीर्य जलाशयात् ॥ ५० ॥
न च पश्यामि तल्लिङ्गं न च तां निम्नगां नृप ।
तदैव लोकाः सञ्जाताः क्षितिश्चैव सकानना ॥ ५१ ॥
ऋक्षचन्द्रार्कविततं तदेव च नभस्तलम् । यथापूर्वमदृष्टं तु तथैव च पुनः कृतम्
ततोऽहं मनसा देवमपूजयं महेश्वरम् ॥ ५२ ॥
एवं बके पुरा कल्पे मया दृष्टेयमव्यया । नर्मदा मर्त्यलोकस्थमहापातकनाशिनी ॥
तस्माद्धर्मपरैर्विप्रैःक्षत्रशूद्रविशादिभिः । सदासेव्यामहाभागाधर्मवृद्ध्यर्थकारिभिः
येऽपि भक्त्या सकृत्तोये नर्मदाया महेश्वरम् ।
स्नात्वाऽर्चयन्ति ते सर्वं पापं नाशयन्त्यसंशयम् ॥ ५५ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्ये बककल्पसमुद्भवोनामाऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

नर्मदोत्पत्तितत्स्नानफलादिकथनम्

श्रीमार्कण्डेय उवाच

पुनर्युगान्तं ते चाऽन्यं सम्प्रवक्ष्यामितच्छृणु । सूर्यैरादीपितेलोकेजङ्गमेस्थावरेपुरा
सरित्सरःसमुद्रेषु क्षयं यातेषु सर्वशः ।
निर्मानुषवषट्कारे ह्यमर्यादगतिं गते ॥ २ ॥
नानारूपैस्ततो मेघैःशक्रायुधविराजितैः । सर्वमापूरितं व्योम वार्योघैः पूरितेसदा
ततस्त्वेकार्णवीभूते सर्वतः सलिलावृते । जगत्कृत्वोदरे सर्वं सुष्वापभगवान्हरः
प्रकृतिं स्वामवष्टभ्य योगात्मा स प्रजापतिः ।
शेते युगसह स्रान्तं कालमाविश्य सार्णवम् ॥ ५ ॥
तत्रसुप्तं महात्मानं ब्रह्मलोकनिवासिनः । भृग्वादिऋषयःसर्वेये चाऽन्ये सनकादयः
पर्यङ्केविमले शुभ्रे नानास्तरणसंस्तृते । शयानं ददृशुर्देवं सपत्नीकं वृषध्वजम् ॥
विश्वरूपातुसानारीविश्वरूपोमहेश्वरः । गाढमालिङ्ग्य सुप्तस्तां ददृशेचाहमव्ययम्
पादमूले ततस्तस्य श्यामां तां पद्मलक्षणाम् ।
कन्यां पश्यामि सुश्रोणीं चरणौ तस्य मृद्नतीम् ॥ ६ ॥
विमलाम्बरसम्वीतां व्यालयज्ञोपवीतिनीम् ।
श्यामां कमलपत्राक्षीं सर्वाभरणभूषिताम् ॥ १० ॥
सकलं युगसाहस्रं नर्मदेयं विजानती । प्रसुप्तं देवदेवेशमुपास्ते वरवर्णिनी ॥ ११
हृतैर्वेदैश्चतुर्भिश्च ब्रह्माऽप्येवं महेश्वरः । भृग्वाद्यैर्मानसैः पुत्रैः स्तौति शङ्करमव्ययम्
भक्त्यापरमया राजंस्तत्र शम्भुमनामयम् । स्तुवन्तस्तत्रदेवेशं मन्त्रैरीश्वरसम्भवैः
अकस्मात्सम्प्रलीनास्ते चत्वारःश्रुतयोऽर्णवे । वेदैः प्रलीनैर्भगवानज्ञानतमसावृतः
प्रसुप्तं देवमीशानं बोधयन्समुपस्थितः । उत्तिष्ठ हर! पिङ्गाक्ष! महादेव! महेश्वर!

मम वेदाहृताःसर्वेअतोऽहं स्तोतुमुद्यतः । वेदैर्व्याप्तं जगत्सर्वं दिव्यादिव्यंचराचरम्
अतीतं वर्त्तमानं च स्मरामि च सृजाम्यहम् ।
तैर्विना चाऽहमेकस्तु मूकोऽन्धो जडवत्सदा ॥ १७ ॥
गतिर्वीर्य्यंबलोत्साहौ तैर्विनानप्रजायते । तैर्विनादेवदेवेशनाऽहं किंचित्स्मरामिवै
तान्वेदान्देवदेवेश! शीघ्रं मे दातुमर्हसि । जडान्धबधिरं सर्वं जगत्स्थावरजंगमम्
स्थानादि दश चत्वारि न शोभंतेसुरेश्वर । प्रणमाम्यल्पवीर्यत्वाद्वेदहीनः सुरेश्वर
वेदेभ्यः सकलं जातं यत्किञ्चित्सचराचरम् ।
तावच्छोभन्ति शास्त्राणि समस्तानि जगद्गुरो !॥ २१ ॥
यावद्वेदनिधिरयं नोपतिष्ठेत्सनातनः । यथोदितेन सूर्येन तमो याति विनाशताम्
एवं समस्तपापानि यान्ति वेदस्य धारणात् ।
वेदे रहसि यत्सूक्ष्मं यत्तद् ब्रह्म सनातनम् ॥ २३ ॥
हृदिस्थं देव! जानामि गतं तद्वेदगर्जनात् । वेदानुचरतो मेऽद्य तव शङ्कर! चाग्रतः
अकस्मात्तेगतावेदान सृजेयंविभोभुवम् । तेऽपिसर्वेमहादेवप्रविष्टाःसम्मुखार्णवम्
ते याच्यमाना देवेश तिष्ठन्तुस्मरणेमम । दुहितेयंविशालाक्षीसर्वः सर्वं विजानते
जायती युगसाहस्रं नान्या काचिद्भवेदृशी ।
ऋषिश्चायं महाभागो मार्कण्डो धीमताम्वरः ॥ २७ ॥
कल्पेकल्पे महादेव! त्वामयं पर्युपासते । जगत्त्रयहितार्थाय चरते व्रतमुत्तमम् ॥
एवमुक्तस्तु देवेशो ब्रह्मणापरमेष्ठिना । उवाच श्लक्ष्णया वाचानर्मदांसरितांवराम्
कथयस्व महाभागे! ब्रह्मणस्त्वं तुपृच्छतः । केनवेदाहृताः सर्वेवेधसो जगतीगुरोः
एवमुक्ता तु रुद्रेण उवाच मृगलोचना । ब्रह्मणो जपतो वेदांस्त्वयि सुप्ते महेश्वर
भवतश्छिद्रमासाद्य घोरेऽस्मिन्सलिलावृते । पूर्वकल्पसमुद्भूतावसुरौसुरदुर्जयौ
श्रियावृत्तौ महादेव त्वया चोत्पादितौपुरा । सुरासुरसुदुर्जयौ दानवौमधुकैटभौ
तौ वायुभूतौ सूक्ष्मौ च पठतोऽस्मात्पितामहात् ।
तावाशु हृत्वा वेदांश्च प्रविष्टौ च महार्णवम् ॥ ३४ ॥

एतच्छ्रुत्वा महातेजा ह्यमृतायास्ततो वचः । सस्मार सचदेवेशं शङ्खचक्रगदाधरम्
स विवेश महाराज भूतले जसुरोत्तमः । दानवान्तकरो देवः सर्वदैवतपूजितः ॥
मीनरूपधरो देवो लोडयामासचार्णवम् । वेदांश्च ददृशे तत्र पातालेनिहितान्प्रभुः
तौ च दैत्यौ महावीर्य्यौ दृष्टवान्मधुसूदनः । महावेगौ महाबाहू सूदयामासतेजसा
वेदांस्तत्राऽपि तोयस्थानानिनाय जगद्गुरुः ।
चतुर्वक्त्राय देवायाददाचक्रविभूषितः ॥ ३९ ॥
ततःप्रहृष्टो भगवान्वेदाँल्लब्ध्वा पितामहः । जनयामासनिखिलंजगद्भूयश्चराचरम्
सा चदेवी नदीपुण्या रुद्रस्यपरिचारिका । पावनीसर्वभूतानां प्रोवाहसलिलंतदा
तस्यास्तीरे ततो देवाऋषयश्चतपोधनाः । यजन्ति त्र्यम्बकंदेवंप्रहृष्टेनाऽन्तरात्मना
एका मूर्त्तिर्महेशस्य कारणान्तरमागता । त्रैगुण्या कुरुते कर्म ब्रह्मचक्रीशरूपतः ॥
एतेषां तु पृथग्भावं ये कुर्वन्ति सुमोहिताः ।
तेषां धर्म्मः कुतः सिद्धिर्जायते पापकर्मिणाम् ॥ ४४ ॥
एवमेता महानद्यस्तिस्रो रुद्रसमुद्भवाः । एकाएवत्रिधा भूता गङ्गा रेवा सरस्वती
गङ्गा तु वैष्णवी मूर्त्तिः सर्वपापप्रणाशिनी । रुद्रदेहसद्भूता नर्मदा चैवमेव तु ॥
ब्राह्मी सारस्वती मूर्त्तिस्त्रिषु लोकेषु विश्रुता ।
दिव्या कामगमा देवी वाग्विभूत्यै तु संस्थिता ॥ ४७ ॥
नर्मदापरमाकाचिन्मर्त्यमूर्त्तिकला शिवा । दिव्या कामगमा देवीसर्वत्रसुरपूजिता
व्यापिनी सर्वभूतानां सूक्ष्मात्सूक्ष्मतरा स्मृता ।
अक्षया ह्यमृता ह्येषा स्वर्गसोपानमुत्तमा ॥ ४९ ॥
सृष्टा रुद्रेण लोकानां संसारार्णवतारिणी ॥ ५० ॥
सरिज्जलं येऽपि पिबन्ति लोके मुच्यन्ति ते पापविशेषसङ्घैः ।
व्रजन्ति संसारमनादिभावं त्यक्त्वा चिरं मोक्षपदं विशुद्धम् ॥ ५१ ॥
यथा गङ्गा तथा रेवा तथाचैवसरस्वती । समं पुण्यफलं प्रोक्तं स्नानदर्शनचिन्तनैः
वरदानान्महाभागाह्यधिकाचोच्यतेबुधैः । कारुण्यान्तरभावेन न मृतासमुपागता

मुच्यन्ते दर्शनात्तेन पातकैःस्नानमङ्गलैः । नर्मदायां नृपश्रेष्ठये नमन्ति त्रिलोचनम्

उमारुद्राङ्गसम्भूता येन चैषा महानदी ।

लोकान्प्रापयतोस्वर्गं तेन पुण्यत्वमागता ॥ ५५ ॥

य एवमीशानवरस्य देहं विभज्य देवीमिह संशृणोति ।

स याति रूद्रं महता रवेण गन्धर्वयक्षैरपि गीयमानः ॥ ५६ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्ये नर्मदोत्पत्तितत्स्नानफलादिकथनंनाम
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

कल्पान्तेऽपिनर्मदास्थितिवर्णनम्

युधिष्ठिर उवाच

कस्मिन्कल्पे महाभागा नर्मदेयं द्विजोत्तम !।

विभक्ता ऋषिभिः सर्वैस्तपोयुक्तैर्महात्मभिः ॥ १ ॥

एतद्विस्तरतः सर्वं ब्रूहि मे वदताम्वर !। कल्पान्ते यद्भवेत्कष्टं लोकानां तत्त्वमेवच
अतीते तु पुरा कल्पेयथेयंवर्त्ततेऽनघ । अस्यान्त्यस्यचकल्पस्यव्यवस्थांकथयप्रभो

एवमुक्तः सभामध्ये मार्कण्डो वाक्यमब्रवीत् ॥ ३ ॥

मार्कण्डेय उवाच

वक्ष्येऽहं श्रूयतां सर्वैः कथेयं पूर्वतः श्रुता ॥ ४ ॥

महत्कथेयं वैशिष्टी कल्पादस्मात्परं तु या ।

लोकक्षयकरो घोर आसीत्कालः सुदारुणः ॥ ५ ॥

तस्मिन्नपि महाघोरे यथेयंनमृतासती । परितुष्टैर्विभक्ताच शृणुध्वंतांकथामिमाम्

युगान्ते समनुप्राप्ते पितामहदिनत्रये । मानसा ब्रह्मणः पुत्राः साक्षाद्ब्रह्मे वसत्तमाः

सनकाद्या महात्मानोःये च वैमानिकागणाः ।

यमेन्द्रवरुणाद्याश्च लोकपाला दिनत्रये ॥ ८ ॥

कालापेक्षास्तु तिष्ठन्ति लोकवृत्तांततत्पराः । ततःकल्पक्षयेप्राप्ते तेषांज्ञानमनुत्तमम्
सर्वेषां नश्यते चायुर्युगरूपाऽनुसारतः । भूर्लोकं ते परित्यज्य अगमंश्च भुवं तदा
स्वर्लोकं च महश्चैव जनश्चैव तपस्तदा । आश्रयं सत्य लोकं च सर्वलोकमनुत्तमम्
कालंयुगसहस्रान्तंपुत्रपौत्रसमन्विताः । सत्यलोके च तिष्ठन्तियावत्सञ्जायतेजगत्
ब्रह्मपुत्राश्चयेकेचित्कल्पादौनभवन्ति ह । त्रैलोक्यं ते परित्यज्यअनाधारंभवन्ति च

तैः सार्धं ये तु ते विप्रा अन्ये चापि तपोधनाः ।

यक्षरक्षः पिशाचाश्च अन्ये वैमानिका गणाः ॥ १४ ॥

ऋषयश्च महाभागा वर्णाश्चान्ये पृथग्विधाः ।

सीदन्ति भूम्यां सहिता ये चाऽन्ये तलवासिनः ॥ १५ ॥

अनावृष्टिरभूत्तत्र महती शतवार्षिकी । लोकक्षयकरी रौद्रा वृक्षवीरुद्विनाशिनी ॥
त्रैलोक्यसंक्षोभकरीसप्तार्णवविशोषणी । ततोलोकाःक्षुधाविष्टाभ्रमन्तीवदिशोदश

कन्दैर्मूलैः फलैर्वापि वर्त्तयन्ते सुदुःखिताः ।

सरितः सागराः कूपाःसेवन्ते पावनानि च ॥ १८ ॥

तत्राऽपि सर्वे शुष्यन्ति सरिद्भिः सह सागराः ।

ततो यान्यल्पसाराणि सत्त्वानि पृथिवीतले ॥ १९ ॥

तान्येवाग्रे प्रलीयन्ते भिन्नान्युरुजलेन वै । अथसंक्षीयमाणासु सरित्सु सह सागरैः
ऋषीणांषष्टिसाहस्रंकुरुक्षेत्रनिवासिनाम् । येचवैखानसाविप्रादन्तोलूखलिनस्तथा
हिमाचलगुह्यगुह्ये ये वसंति तपोधनाः । सर्वे ते मामुपागम्यक्षुत्तृषार्त्तास्तपोधनाः
ऊचुः प्राञ्जलयः सर्वे सीदयामो महामुने । सरित्सागरशैलान्तं जगत्संशुष्यते द्विज
कुत्र यास्याम सहितायावत्कालस्यपर्ययः । दीर्घायुरसि विप्रेन्द्रनमृतस्त्वंयुगक्षये
भूतं भव्यंभविष्यच्चसर्वं तवहृदि स्थितम् । तस्मात्त्वंवेत्सिसर्वं चकथयस्वमहाव्रत

कीदृक्कालं महाभाग क्षपिष्यामोऽथ सुव्रत। अनावृष्टिहतं सर्वं सीदते सचराचरम्
परित्राहिमहाभागन यथायामसंक्षयम्। ततः सश्चिन्त्यमनसात्वरन्विप्रानथाब्रवम्

कुरुक्षेत्रं त्यजध्वं च पुत्रदारसमन्विताः।
त्यक्त्वोदीचीं दिशं सर्वे यामो याम्यामनुत्तमाम्॥ २८ ॥

नगरग्रामघोषाढ्यां पुरपत्तनशोभिताम्। गच्छामो नर्मदातीरं बहुसिद्धनिषेवितम्

रुद्राङ्गीं तां महापुण्यां सर्वपापप्रणाशिनीम्।
पश्यामस्तां महाभागां न्यग्रोधावारसङ्कुलाम्॥ ३० ॥
तरङ्गावर्त्तसलिलांदर्दुरीमत्स्यसङ्कुलाम्।
नानाविहगसङ्घुष्टामृषिकोटिनिषेविताम्॥ ३१ ॥
माहेश्वरैर्भागवतैः साङ्ख्यैः सिद्धैः सुसेविताम्।
अनावृष्टिभयाद्भीताः कूलयोरुभयोरपि॥ ३२ ॥

आश्रमे ह्याश्रमान्दिव्यान्कारयामोजितव्रताः। एवमुक्तास्तुतेसर्वेसमेतानुचरैःसह

नर्मदातीरमासाद्य स्थिताः सर्वेऽकुतोभयाः।
किञ्चित्पूर्वमनुस्मृत्य पुरा कल्पादिभिर्भयम्॥ ३४ ॥

प्राप्तास्तु नर्मदातीरमादावेव कलौ युगे। ततो वर्षशतं पूर्णं दिव्यं रेवातटेऽवसन्
षड्विंशच्च सहस्राणि वर्षाणां मानुषाणि च। तत्राश्चर्यमयादृष्टमृषीणांवसतांनृप
अनावृष्टिहते लोके संशुष्के स्थावरे चरे। भिन्ने युगादिकलने हाहाभूते विचेतने॥
चातुर्वर्ण्येप्रलीने तु नष्टेहोमबलित्रये। निः स्वाहेनिर्वषट्कारे शौचाचारविवर्जिते

इयमेका सरिच्छ्रेष्ठा ऋषिकोटिनिषेविता।
नान्या काचित्त्रिलोकेऽपि रमणीया! नरेश्वर !॥ ३६ ॥

यथेयं पुण्यसलिला इन्द्रस्येवामरावती। देवतायतनैःशुभ्रै राश्रमैश्च सुकल्पितैः॥

शोभते नर्मदा देवी स्वर्गे मन्दाकिनी यथा।
यावद्वृक्षा महाशैला यावत्सागरसम्भवा॥ ४१ ॥

उभयोः कूलयोस्तावन्मण्डितायतनैः शुभैः। हूयद्भिरग्निहोत्रैश्चहविर्धूमसमाकुला

बभूव नर्मदा देवी प्रावृट्कालेव शर्वरी। देवतायतनैर्नैकैः पूजासंस्कारशोभिता॥

सरिद्भिर्भ्राजते श्रेष्ठा पुरी शाक्री च भास्करी।
केचित्पञ्चाग्नितपसः केचिदप्यग्निहोत्रिणः॥ ४४ ॥

केचिद्धूमकमश्नन्तितपस्युग्रेव्यवस्थिताः। आत्मयज्ञरताःकेचिदपरेभक्तिभागिनः
वै॰णवज्ञानमासाद्य केचिच्छैवं व्रतंतथा। एकरात्रंद्विरात्रं च केचित्षष्ठाहभोजनाः

चान्द्रायणविधानैश्च कृच्छ्रिणश्चातिकृच्छ्रिणः।
एवंविधैस्तपोभिश्च नर्मदातीरशोभितैः॥ ४७ ॥

यजद्भिः शङ्करं देवं केशवं भातिनित्यदा। एकत्वे च पृथक्त्वे च यजतांच महेश्वरम्

कलौ युगे महाघोरे प्राप्ताः सिद्धिमनुत्तमाम्।
यस्य यस्य हि या भक्तिर्विज्ञानं यस्य यादृशम्॥ ४६ ॥
यस्मिन्यस्मिंश्च देवे तु तां तामीशोऽददात्प्रभुः।
स्वभावैकतया भक्त्या तामेत्याऽन्तःप्रलीयते॥ ५० ॥

संसारे परिवर्त्तन्तेयेपृथग्भाजिनोनराः। येमहावृक्षमीशानंत्यक्त्वाशाखावलम्बिनः
पुनरावर्त्तमानास्तेजायन्तेहिचतुर्युगे। देवान्तेस्थावरान्तेचसंसारेचाऽभ्रमन्क्रमात्
पुनर्जन्म पुनः स्वर्गे पुनर्घोरे च रौरवे। ये पुनर्देवमीशानं भवं भक्तिसुसंस्थिताः॥
यजन्तिनर्मदातीरे न पुनस्ते भवन्तिच। आदेहपतनात्केचिदुपासन्तः परं गताः॥
केचिद्द्वादशभिर्वर्षैःषड्भिरन्येतपोधनाः। त्रिभिःसंवत्सरैःकेचित्केचित्संवत्सरेणतु

षड्भिर्मासैस्तु संसिद्धास्त्रिभिर्मासैस्तथाऽपरे।
मुनयो देवमाश्रित्य नर्मदां च यशस्विनीम्॥ ५६ ॥

छित्त्वा संसारदोषांश्च अगमन्ब्रह्मशाश्वतम्। एवं कलियुगे घोरेशतशोऽथसहस्रशः

नर्मदातीरमाश्रित्य मुनयो रुद्रमाविशन्॥ ५८ ॥
ये नर्मदातीरमुपेत्य विप्राः शैवे व्रते यत्नमुपप्रपन्नाः।
त्रिकालमम्भः प्रविगाह्य भक्त्या देवं समभ्यर्च्य शिवं व्रजन्ति॥ ५९ ॥

ध्यानार्च्चनैर्जाप्यमहाव्रतैश्च नारायणं वा सततं स्मरन्ति।

ते धौतपाण्डुरपटा इव राजहंसाः संसारसागरजलस्य तरन्ति पारम् ॥ ६० ॥
सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते। इदमेकंसुनिष्पन्नं ध्येयोनारायणःसदा
यो वा हरं पूजयते जितात्मा मासं च पक्षं च वसेन्नरेन्द्र! ।
रेवां समाश्रित्य महानुभावः स देवदेवोऽथ भवेत्पिनाकी ॥ ६२ ॥
कीटाः पतङ्गाश्च पिपीलिकाश्च ये वै म्रियन्तेऽम्भसि नर्मदायाः ।
ते दिव्यरूपास्तु कुलप्रसूताः शतं समा धर्मपरा भवन्ति ॥ ६३ ॥
कालेन वृक्षाः प्रपतन्ति येऽपि महातरङ्गौघनिकृत्तमूलाः ।
ते नर्मदाम्भोभिरपास्तपापा देदीप्यमानास्त्रिदिवं प्रयान्ति ॥ ६४ ॥
अकामकामाश्च तथा सकामा रेवान्तमाश्रित्य म्रियन्ति तीरे ।
जडान्धमूकास्त्रिदिवं प्रयान्ति किमत्र विप्रा भवभावयुक्ताः ॥ ६५ ॥
मासोपवासैरपि शोषिताङ्गा न तां गतिं यान्ति विमुक्तदेहाः ।
म्रियन्ति रेवाजलपूतकायाः शिवार्चने केशवभावयुक्ताः ॥ ६६ ॥
ये नर्मदातीरमनुप्रपन्ना अभ्यर्चयित्वा शिवमव्ययाख्यम् ।
नारायणं वा मनसा सुपूताः पिबन्ति मातुर्न पुनः स्तनं ते ॥ ६७ ॥
नीवारश्यामाकयवेङ्गुदाद्यैरन्यैर्मुनीन्द्रा इह वर्त्तयन्ति ।
आश्रित्य कूलं त्रिदशानुगीतं ते नर्मदाया न विशन्ति मृत्युम् ॥ ६८ ॥
भ्रमन्ति ये तीरमुपेत्य देव्यास्त्रिकालदेवार्चनसत्यपूताः ।
विण्मूत्रचर्मास्थिशिरोपधानाः कुक्षौ युवत्या न वसन्ति भूयः ॥ ६९ ॥
किं यज्ञदानैर्बहुभिश्च तेषां निषेवितैस्तीर्थवरैः समस्तैः ।
रेवातटं दक्षिणमुत्तरं वा सेवन्ति ते रुद्रचरानुपूर्वम् ॥ ७० ॥
ते वञ्चिताः पङ्गुजडान्धभूता लोकेषु मर्त्याः पशुभिश्च तुल्याः ।
ये नाऽऽश्रिता रुद्रशरीरभूतां सोपानपङ्क्तिं त्रिदिवस्य रेवाम् ॥ ७१ ॥
युगं कलिं घोरमिमं य इच्छेद् द्रष्टुं कदाचिन्न पुनर्द्विजेन्द्रः ।
स नर्मदातीरमुपेत्य सर्वं सम्पूजयेत्सर्वविमुक्तसङ्गः ॥ ७२ ॥

विघ्नैरनेकैरतियोज्यमाना ये तीरमुज्झन्ति न नर्मदायाः ।
ते चैव सर्वस्य हितार्थभूता वन्द्याश्च ते सर्वजनस्य मान्याः ॥ ७३ ॥
भृग्वत्रिगार्ग्यवशिष्ठकङ्काः शतैः समेतैर्नियतास्त्वसङ्ख्यैः ।
सिद्धिं परां ते हि जलप्लुताङ्गाः प्राप्तास्तु लोकान्मरुतां न चान्ये ॥ ७४ ॥
ज्ञानं महत्पुण्यतमं पवित्रं पठन्त्यदो नित्यविशुद्धसत्त्वाः ।
गतिं परां यान्ति महानुभावा रुद्रस्य वाक्यं हि यथा प्रमाणम् ॥ ७५ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये नर्मदास्नानफलश्रुतिकथनंनाम दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

नर्मदामाहात्म्यवर्णनम्

युधिष्ठिर उवाच

अहो महत्पुण्यतमा विशिष्टा क्षयं न याता इह या युगान्ते
तस्मात्सदा सेव्यतमा मुनीन्द्रैर्ध्यानार्चनस्नानपरायणैश्च ॥ १ ॥
यामाश्रित्य गता मोक्षमृषयोधर्मवत्सलाः ।
ये त्वयोक्तास्तु नियमा ऋषीणां वेदनिर्मिताः ॥ २ ॥
मोक्षावाप्तिर्भवेद्येषां नियमैश्च पृथग्विधैः ।
दशद्वादशभिर्वाऽपि षड्भिरष्टाभिरेववा ॥ ३ ॥
त्रिभिस्तथा चतुर्भिर्वावर्षैर्मासैस्तथैव च । मुच्यन्तेकलिदोषैस्तेदेवेशानसमर्चनात्
त्र्यक्षं वा सुरश्रेष्ठं केशवं वा जगद्गुरुम् । अर्चयन्पापमखिलं जहात्येव न संशयः
तद्विस्तरतः सर्वं कथयस्व ममाऽनघ! । यस्मिन्संसारगहने निमग्नाः सर्वजन्तवः
ते कथं त्रिदिवं प्राप्ता इति मे संशयो वद ॥ ६ ॥

श्रीमार्कण्डेय उवाच

जन्मान्तरैरनेकैस्तु मानुष्यमुपलभ्यते । भक्तिरुत्पद्यते चाऽत्र कथञ्चिदपि शङ्करे।
तीर्थदानोपवासानां यज्ञैर्देवद्विजार्चनैः । अवाप्तिर्जायतेपुंसां श्रद्धया परया नृप

तस्माच्छ्रद्धा प्रकर्त्तव्या मानवैर्धर्मवत्सलैः ।
ईशोऽपि श्रद्धया साध्यस्तेन श्रद्धा विशिष्यते ॥ ६ ॥

अन्यथा निष्फलं सर्वं श्रद्धाहीनं तु भारत! । तस्मात्समाश्रयेद्भक्तिरुद्रस्य परमेष्ठिनः

तेषां हि सफलं जन्म येषां भक्तिरचञ्चला ।
सा चैव त्रिविधा भक्तिः सात्त्विकी राजसी तथा ॥ ११ ॥
तामसी सर्वलोकस्य त्रिविधं च फलं लभेत् ।
ते कर्मफलसंयोगादावर्त्तन्ते पुनः पुनः ॥ १२ ॥

जन्मान्तरशतैस्तेषांज्ञानिनां देवयाजिनाम् । देवत्रयेभवेद्भक्तिःक्षयात्पापस्य कर्मणः
ईशानात्तु पुनर्मोक्षो जायते छिन्नसंशयः । ये पुनर्नर्मदातीरमाश्रित्यद्विजपुङ्गवाः

त्रयीमार्गमसन्दिग्धास्ते यान्तिपरमां गतिम् ।
एकाग्रमसो ये तु शङ्करं शिवमव्ययम् ॥ १५ ॥
अर्चयन्तीह निरताः क्षिप्रं सिद्ध्यन्ति ते जनाः ।
कालेन महता सिद्धिर्जायतेऽन्यत्र देहिनाम् ॥ १६ ॥
नर्मदायाःपुनस्तीरे क्षिप्रं सिद्धिरवाप्यते ।
षड्भिर्वर्षैस्तु सिध्यन्ति ये तु साङ्ख्यविदो जनाः ॥ १७ ॥
वैष्णवा ज्ञानसम्पन्नास्तेऽपि सिद्ध्यन्ति चाऽग्रतः ।
सर्वयोगविदो ये च समुद्रमिव सिन्धवः ॥ १८ ॥

एकीभवन्तिकल्पान्ते योगेमाहेश्वरे गताः । सर्वेषामेवयोगानां योगोमाहेश्वरो वरः
तमासाद्यविमुच्यन्ते येऽपिस्युपापयोनयः । शिवमर्च्यनदीकूलेजायन्तेतेन योनिषु
गतिरेषा दुरारोहा सर्वपापक्षयङ्करी । मुच्यन्ते मंक्षु संसाराद्रेवामाश्रित्य जन्तवः

तस्मात्स्नायीभवेन्नित्यं तथा भस्मविलेपनः ।

नर्मदातीरमासाद्य क्षिप्रं सिद्धिमवाप्नुयात् ॥ २२ ॥
त्रिकालं पूजयेच्छान्तो यो नरो लिङ्गमादरात् ।
सर्वरोगविनिर्मुक्तः स याति परमां गतिम् ॥ २३ ॥
षड्भिः सिद्ध्यति मासैस्तु यद्यपि स्यात्स पापकृत् ।
ये पुनः शुद्धमनसो मासैः शुध्यन्ति ते त्रिभिः ॥ २४ ॥

यथा दिनकरस्पृष्टं हिमंशैलाद्विशीर्यते । तद्वद्विलीयते पापं स्पृष्टं भस्मकणैः शुभैः
सद्योजातादियुक्तेन भस्मनायेसमुक्षिताः । सूर्यवद्विमलाभान्तिद्विजारुद्रपरायणाः

वैनतेयभयत्रस्ता यथा नश्यन्ति पन्नगाः ।
तद्वत्पापानि नश्यन्ति भस्मनाऽभ्युक्षितानि ह ॥ २७ ॥

नर्मदातोयपूतेन भस्मनोधूलयन्ति ये । सद्यस्तेपापसङ्घाच्च मुच्यन्तेनाऽत्र संशयः
व्रतं पाशुपतंभक्त्यायथोक्तंपालयन्तिये । शूद्रान्नेनविहीनास्तुतेयान्ति परमांगतिम्

अमृतं ब्राह्मणस्याऽन्नं क्षत्त्रियान्नं पयःस्मृतम् ।
वैश्यान्नमन्नमेव स्याच्छूद्रान्नं रुधिरं स्मृतम् ॥ ३० ॥

शूद्रान्नरससम्पुष्टाये म्रियन्तेद्विजोत्तमाः । ते तपोज्ञानहीनास्तुकाकागृध्राभवन्तिते

दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति ।
यो यस्यान्नं समश्नाति स तस्याश्नाति किल्बिषम् ॥ ३२ ॥

विशेषाद्यातिधर्मेणतपोलौल्यंसमाश्रिताः। नरकंयान्त्यसंदिग्धमित्येवंशङ्करोऽब्रवीत्
ईदृशपाश्रयेविप्राः पाशुपत्ये व्यवस्थिताः । ते महत्पापसङ्घातं दहन्त्येव न संशयः
विडम्बेनचसंयुक्तालौलुप्येनचपीडिताः । असम्भाष्याअसंग्राह्याइत्येवंश्रुतिनोदना
मातापितृकृतैर्दोषैरन्ये केचित्स्वकर्मजैः । नष्टाज्ञानावलेपेन अहङ्कारेण चाऽपरे ॥

शाङ्करे प्रस्थिता धर्मे ये स्मृत्यर्थबहिष्कृताः ।
क्लिश्यमानास्तु कालेन ते यान्ति परमां गतिम् ॥ ३७ ॥
अश्रद्दधानाः पुरुषा मूर्खा दम्भविवर्द्धिताः ।
न सिद्ध्यन्ति दुरात्मानः कुदृष्टंतीर्थकीर्तनाः ॥ ३८ ॥

महाभाग्येऽपि तीर्थस्य शाङ्करं व्रतमास्थिताः ।
वियोनिं यान्त्यसन्दिग्धं लौलुप्येन समन्विताः ॥ ३९ ॥
न तीर्थैर्नचदानैश्चदुष्कृतं हि विलुप्यते । आज्ञानाच्च प्रमादाच्च कृतंपापम्विनश्यति
एवं ज्ञात्वातुविधिना वर्त्तितव्यंद्विजातिभिः । परम्ब्रह्म जपद्भिश्चवर्त्तितव्यं मुहुर्मुहः
ऊर्ध्वरूपं विरूपाक्षं योऽधीतेरुद्रमेव च । ईशानंपश्यते साक्षात्षण्मासात्सङ्गवर्जितः
संहितायां दशावृत्तीर्यः करोति सुसंयतः । नर्मदातटमाश्रित्य समुच्येत्सर्वपातकैः
पुराणसंहितां वापि शैवीं वा वैष्णवीमपि ।
यः पठेन्नर्मदातीरे शिवाग्रे स शिवात्मकः ॥ ४४ ॥
आभूतसङ्क्षयं यावत्स्वर्गलोके महीयते । संसारव्यसनं हातुं पुरा प्रोक्तंतु नन्दिना
देवर्षिसिद्धगन्धर्वसमवायेशिवालये । नन्दिगीतामिमांराजञ्छृणुष्वैकमनाःशुभाम्
स्वर्गमोक्षप्रदां पुण्यां संसारभयनाशिनीम् ॥ ४७ ॥
संसारगह्वरगुहां प्रविहातुमेतां चेदिच्छथ प्रतिपदं भवतापखिन्नाः ।
नानाविधैर्निजकृतैर्बहुकर्मपाशैर्बद्धाः सुखाय शृणुतैकहितं मयोक्तम् ॥४८॥
शक्र वक्रगतिं मा गा मा कृथा यमयातनाम् । चेतःप्रचेतःशमयलौलुप्यंत्यजवित्तप
दीनानाथविशिष्टेभ्यो धनं सर्वं परित्यज । यदि संसारजलधेर्वीचीप्रेङ्खोलनातुरः
जन्मोद्विग्नं मृतेस्त्रस्तं ग्रस्तं कामादिभिर्नरम् ।
त्रस्तं यो न यमादिभ्यः पिनाकी पाति पावनः ॥ ५१ ॥
मा धेहि गर्वं कीनाशहास्यं यास्यसि पीडयन् ।
प्राणिनं सर्वशरणं तद्भावि शरणं तव ॥ ५२ ॥
कालः करालको बालः को मृत्युः को यमाधमः ।
शिव विष्णु पराणां हि नराणां किं भयं भवेत् ॥ ५३ ॥
भवभारार्तजन्तूनां रेवातीरनिवासिनाम् । भर्गश्च भगवांश्चैव भवभीतिधिभेदनौ
शिवं भज शिवं ध्याय शिवं स्तुहि शिवं यज ॥
शिवं नम वराक! त्वं ज्ञानं मोक्षं यदीच्छसि ॥ ५५ ॥

पठ पञ्चाननंशास्त्रं मन्त्रं पञ्चाक्षरं जप । धेहि पञ्चात्मकं तत्त्वं यज पञ्चाननं परम् ॥
किं तैः कर्मगणैः शोच्यैर्नानाबाधविशेषितैः ।
यदि पञ्चाननः श्रीमान्सेव्यते सर्वथा शिवः ॥ ५७ ॥
किं संसारगजोन्मत्तवृंहितैर्निभृतैरपि । यदि पञ्चाननोदेवो भावगन्धोपसेवितः ॥
रे मूढ! किं विषादेन प्राप्यकर्मकदर्थनाम् । भवानीवल्लभंभीमं जप त्वं भयनाशनम्
नर्मदातीरनिलयं दुःखौघविलयङ्करम् । स्वर्गमोक्षप्रदं भर्गं भज मूढ सुरेश्वरम् ॥
विहाय रेवां सुरसिन्धुसेव्यां तत्तीरसंस्थश्च हरं हरिं च ।
उन्मत्तवद्भावविवर्जितस्त्वं क्व यासि रे मूढ! दिगन्तराणि ॥ ६१ ॥
भज रेवाजलं पुण्यं यजरुद्रं सनातनम् । जपपञ्चाक्षरींविद्यां व्रजस्थानंत्ववाञ्छितम्
क्लेशयित्वा निजं कायमुपायैर्बहुभिस्तु किम् ।
भज रेवां शिवम्प्राप्य सुखसाध्यं परम्पदम् ॥ ६३ ॥
एवं कैलासमासाद्य नन्दी स शिवसन्निधौ ।
जगौ यल्लोकपालानां तन्मयोक्तं तवाऽधुना ॥ ६४ ॥

मार्कण्डेय उवाच

स्नानदानपरो यस्तु नित्यं धर्ममनुव्रतः । नर्मदातीरमाश्रित्य मुच्यते सर्वपातकैः ॥
विधिहीनो जपेन्नित्यं वेदान्सर्वाञ्छतं समाः ।
मृत्युलाङ्गल्यजाप्येन समो योऽप्यधिको गुणैः ॥ ६६ ॥
बीजयोन्यविशुद्धस्तुयथा रुद्रंनविन्दति । तथा लाङ्गलमन्त्रोऽपिनतिष्ठतिगतायुषि
गायत्रीजपसंयुक्तः संयमीह्यधिकोगुणैः । अग्निमीलेइषेत्वोवाअग्नआयाहिनित्यदा
शन्नो देवीति कूलस्थो जपेन्मुच्येत किल्बिषैः ॥ ६९ ॥
साङ्गोपाङ्गांस्तथा वेदाञ्जपन्नित्यं समाहितः ।
न तत्फलमवाप्नोति गायत्र्या संयमी यथा ॥ ७० ॥
रुद्राध्यायंसकृज्जप्त्वाविप्रोवेदसमन्वितः ।मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति
अन्यद्वै जप्यसंस्थानं सूक्तमारण्यकं तथा ।

मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७२ ॥

यत्किञ्चित्क्रियते जाप्यं यच्च दानं प्रदीयते । नर्मदाजलमाश्रित्यतत्सर्वंचाक्षयंभवेत्
एवंविधैर्व्रतैर्नित्यं नर्मदां ये समाश्रिताः । ते मृता वैष्णवंयान्तिपदंवाशैवमव्ययम्
सत्यलोकं नराः केचित्सूर्यलोकं तथापरे । अप्सरोगणसम्वीतायावदाभूतसंप्लवम्
एवं वै वर्तमानेऽस्मिँल्लोकेनुनृपपुङ्गव! । ऋषीणांदशकोट्यस्तुकुरुक्षेत्रनिवासिनाम्
मया सहमहाभागनर्मदातटमाश्रिताः । फलमूलकृताहाराअर्चयन्तःस्थिताःशिवम्
तच्चवर्षशतंदिव्यंकालसंख्यानुमानतः । षड्विंशतिसहस्राणितानि मानुषसङ्ख्यया
ततस्तस्यामतीतायांसंध्यायांनृपसत्तम! । शेषं मानुष्यमेकंतुकालेवर्षशतं स्थितम्
ततोऽभवदनावृष्टिर्लोकक्षयकरीतदा । यया यातं जगत्सर्वं क्षयं भूयो हि दारुणम्
ये पूर्वमिह संसिद्धा ऋषयो वेदपारगाः । तेषां प्रभावाद्भगवान्ववर्ष बलवृत्रहा ॥

महती भूरिसलिला समन्ताद्वृष्टिराहिता ।
ततो वृष्ट्यां तु तेषां वै वर्तनं समजायत ॥ ८२ ॥
श्यामाकेङ्गुदबिल्वाद्यैर्नर्मदातीरमाश्रितैः ।
नीयते स महान्कालो महासिद्धमभीप्सुभिः ॥ ८३ ॥

पुनर्युगान्ते संप्राप्ते किञ्चिच्छेषे कलौयुगे । निःशेषमभवत्सर्वंशुष्कंस्थावरजङ्गमम्
निर्वृक्षौषधगुल्मं च तृणवीरुद्विवर्जितम् । अनावृष्टिहतं सर्वं भूमण्डलमभूद्भृशम् ॥
ततस्ते ऋषयः सर्वे क्षुत्तृषार्ताः सहस्रशः । युगस्वभावमाविष्टा हीनसत्त्वाभवन्नृप

नष्टहोमस्वधाकारे युगान्ते समुपस्थिते ।
किं कार्यं क नु यास्यामः कोऽस्माकं शरणं भवेत् ॥ ८७ ॥

तानहं प्रत्युवाचेदं मा भैष्टेति पुनः पुनः । ईदृग्विधा मया दृष्टा बहवःकालपर्ययाः
नर्मदातीरमाश्रित्य ते सर्वे गमिता मया । एषा हि शरणं देवी संप्राप्ते हि युगक्षये

नान्या गतिरिहास्माकं विद्यते द्विजसत्तमाः! ।
जनित्री सर्वभूतानां विशेषेण द्विजोत्तमाः ॥ ९० ॥
पितामहा ये पितरो ये चान्ये प्रपितामहाः ।

ते समस्ता गताः स्वर्गं समाश्रित्य महानदीम् ॥ ९१ ॥
भृग्वाद्याः सप्त ये त्वासन्मम पूर्वपितामहाः ।
धौम्रृणी च महाभागा मम भार्या शुचिस्मिता ।
मनस्वती च या माता भार्गवोऽङ्गिरसस्तथा ॥ ९२

पुलस्त्यः पुलहश्चैववसिष्ठात्रेयकाश्यपाः । तथान्येचमहाभागानियमव्रतचारिणः

अन्ये च शतसाहस्रा अत्र सिद्धिं समागताः ॥ ९३ ॥
तस्मादियं महाभागा न मोक्तव्या कदाचन ।
नान्या काचिन्नदी शक्ता लोकत्रयफलप्रदा ॥ ९४ ॥

द्वन्द्वैरनेकैर्बहुभिः क्षुत्तृषाद्यैर्महाभयैः । मुच्यन्ते नराः सद्यो नर्मदातीरवासिनः ॥
तस्मात्सर्वप्रयत्नेन सेवितव्या सरिद्वरा । वाञ्छद्भिः परमं श्रेय इह लोके परत्र च

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीनर्मदामाहात्म्यवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

नर्मदास्तोत्रवर्णनम्

श्रीमार्कण्डेय उवाच

एतच्छ्रुत्वा वचो राजन्संहृष्टा ऋषयोऽभवन् ।
नर्मदां स्तोतुमारब्धाः कृताञ्जलिपुटा द्विजाः ॥ १ ॥
नमोऽस्तु ते पुण्यजले नमोमकरगामिनी ।
नमस्ते पापमोचिन्यै नमो देवि! वरानने! ॥ २ ॥
नमोऽस्तु ते पुण्यजलाश्रये! शुभे! विशुद्धसत्त्वे!सुरसिद्धसेविते ।
नमोस्तु ते तीर्थगणैर्निषेविते नमोऽस्तु रुद्राङ्गसमुद्भवे! वरे ॥ ३ ॥

नमोऽस्तु ते देवि! समुद्रगामिनि! नमोनतु ते देवि वरप्रदेऽस्शिवे ।
नमोऽस्तु लोकद्वयसौख्यदायिनि!ह्यनेकभूतौघसमाश्रितेऽनघे ॥ ॥
सरिद्वरे! पापहरे! विचित्रिते! गन्धर्वयक्षोरगसेविताङ्गे ।
सनातनि! प्राणिगणानुकम्पिनि! मोक्षप्रदे! देवि! विधेहि शं नः ॥ ५ ॥
महागजौघैर्महिषैर्वराहैः संसेविते देवि महोर्मिमाले! ।
नताः स्म सर्वे वरदे! सुखप्रदे! विमोचयास्मान्पशुपाशबन्धात् ॥ ६
पापैरनेकैरशुभैर्विबद्धा भ्रमन्ति तावन्नरकेषु मर्त्याः ।
महानिलोद्भूततरङ्गभूतं यावत्तवाम्भो हि न संस्पृशन्ति ॥ ७ ॥
अनेकदुःखौघभयार्दितानां पापैरनेकैरभिवेष्टितानाम् ।
गतिस्त्वमम्भोजसमानवक्त्रे द्वन्द्वैरनेकैरपि सम्वृतानाम् ॥ ८ ॥
नद्यश्च पूता विमला भवन्ति त्वां देवि! सम्प्राप्य न संशयोऽत्र ।
दुःखातुराणामभयं ददासि शिष्टैरनेकैरभिपूजिताऽसि ॥ ९ ॥
स्पृष्टं करैश्चन्द्रमसो रवेश्च तदैव दद्यात्परमं पदं तु ।
यत्रोपलाः पुण्यजलाप्लुतास्ते शिवत्वमायान्ति किमत्र चित्रम्! ॥ १० ॥
भ्रमन्ति तावन्नरकेषु मर्त्या दुःखातुराः पापपरीतदेहाः
महानिलोद्भूततरङ्गभङ्गं यावत्तवाम्भो न हि संश्रयन्ति ॥ ११ ॥
म्लेच्छाः पुलिन्दास्त्वथ यातुधानाः पिबन्ति येऽम्भस्तव देवि! पुण्यम्
मुक्ता भवन्तीह भयात्तु घोराश्चिःसंशयं तेऽपि किमत्र चित्रम् ॥ १२ ॥
सरांसि नद्यः क्षयमभ्युपेता घोरे युगेऽस्मिन्हि कलौ प्रदूषिते ।
त्वं भ्राजसे देवि! जलौघपूर्णा दिवीव नक्षत्रपथे च गङ्गा ॥ १३ ॥
तव प्रसादाद्वरदे वरिष्ठेकालं यथेमं परिपालयित्वा ।
यामोऽथ रुद्रं तव सुप्रसादाद्वयं तथा त्वं कुरु वै प्रसादम् ॥ १४ ॥
गतिस्त्वमम्बेव पितेव पुत्रांस्त्वं पाहि नो यावदिमंयुगान्तम् ।
काले त्वनावृष्टिहतं सुघोरं यावत्तरामस्तव सुप्रसादात् ॥ १५

पठन्ति ये स्तोत्रमिदं द्विजेन्द्राः शृण्वन्ति ये चापि नराः प्रशान्ताः ।
यान्ति रुद्रं वृषसंयुतेन यानेन दिव्याम्बरभूषिताश्च ॥ १६
ये स्तोत्रमेतत्सततं पठन्ति स्नात्वा तु तोये खलु नर्मदायाः ।
अन्ते हि तेषां सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ १७ ॥
प्रातः समुत्थाय तथा शयानो यः कीर्तयेताऽनुदिनं स्तवं च ।
स मुक्तपापः सुविशुद्धदेहः समाश्रयं याति महेश्वरस्य ॥ १८ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीनर्मदामहात्म्ये नर्मदास्तोत्रकथननामद्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

एकविंशतिकल्पकथानकवर्णनम्

श्रीमार्कण्डेय उवाच

एवं भगवती पुण्या स्तुता सा मुनिपुङ्गवैः ।
चिन्तयामास सर्वेषां दास्यामि वरमुत्तमम् ॥ १ ॥
ततः प्रसुप्तांस्ताञ्ज्ञात्वा रात्रौ देवी जगाम ह ।
एकैकस्य ऋषेः स्वप्ने दर्शनं चारुहासिनी ॥ २ ॥
ततोऽर्धरात्रेसंप्राप्तउत्थिताजलमध्यतः । विमलाम्बरसंवीतादिव्यमालाविभूषिता
धृतातपत्रा सुश्रोणी पद्मरागविभूषिता । जगाद माभैरिति तानेकैकंतुपृथक्पृथक्
वसध्वं मम पार्श्वे तु भयं त्यक्त्वा क्षुधादिजम् ॥ ५ ॥
एवमुक्त्वा तदा देवी स्वप्नान्ते तान्महामुनीन् ।
जगामादर्शनं पश्चात्प्रविश्य जलमात्मिकम् ॥ ६ ॥
ततः प्रभाते मुनयो मिथ ऊचुर्मुदान्विताः ।

तथा दृष्टा मया दृष्टा स्वप्ने देवी सुदर्शना ॥ ७ ॥

अभयं दत्तमस्माकं सिद्धिश्चाप्यचिरेण तु । प्रशस्तं दर्शनं तस्यानर्मदायानसंशयः

अथान्यदिवसे राजन्मत्स्यानां रूपमुत्तमम् ।

पश्यन्ति सपरीवाराः स्वकीयाश्रमसन्निधौ ॥ ६ ॥

तान्दृष्ट्वा विस्मयाविष्टा मत्स्यांस्तत्र महर्षयः ।

पूजयामासुरव्यग्रा हव्यकव्येन देवताः ॥ १० ॥

तान्मत्स्यसङ्घान्सम्प्राप्य महादेव्याः प्रसादतः ।

सपुत्रदारभृत्यास्ते वर्तयन्ति पृथक्पृथक् ॥ ११ ॥

दिनेदिनेतथाप्येवमाश्रमेषुद्विजातयः । मत्स्यानांसञ्चयंदृष्ट्वाविस्मिताश्चाभवंस्तदा

मृतांस्तांस्तु सुपुष्टाङ्गान्पाठीनांश्च विशेषतः ।

द्वारेद्वारे चाश्रमाणां तापसानां युधिष्ठिर! ॥ १३ ॥

हृष्टपुष्टास्तदा सर्वे नर्मदातीरवासिनः । ऋषयस्ते भयं सर्वेतत्यजुः क्षुत्तृषोद्भवम् ॥

ते जपन्तस्तपन्तश्च तिष्ठन्ति भरतर्षभ! । अर्चयन्ति पितृन्देवान्नर्मदातटमाश्रिताः

तैर्जपद्भिस्तपद्भिश्च सततं द्विजसत्तमैः । भ्राजते सासरिच्छ्रेष्ठातारामिर्यौर्ग्रहैरिव

तत्र तैर्बहुलैः शुभ्रैर्ब्राह्मणैर्वेदपारगैः ।

नर्मदा धर्मदा पूर्वं सम्विभक्ता यथाक्रमम् ॥ १७ ॥

ऋषिभिर्दशकोटीभिर्नर्मदातीरवासिभिः । विभक्तेयंविभक्ताङ्गीनर्मदाशर्मदानृणाम्

यज्ञोपवीतैश्च शुभैरक्षसूत्रैश्च भारत! । कूलद्वयेमहापुण्यानर्मदोदधिगामिनी ॥ १६ ॥

पृथगायतनैः शुभ्रैर्लिङ्गैर्वालुकमृण्मयैः । भ्राजते या सरिच्छ्रेष्ठा नक्षत्रैरिव शर्वरी

एवं त ऋषयः सर्वे तर्पयन्तः सुरान्पितन् । न्यवसन्नर्मदातीरेयावदाभूतसम्प्लवम्

किञ्चिद्गते ततस्तस्मिन्घोरे वर्षशताधिके । अर्धरात्रे तदा कन्याजलादुत्तीर्यभारत

विद्युत्पुञ्जसमाभासा व्यालयज्ञोपवीतिनी ।

त्रिशूलाग्रकरा सौम्या तानुवाचऋषींस्तदा ॥ २३ ॥

आगच्छध्वं मुनिगणा विशध्वं मामयोनिजाम् ।

समेताः पुत्रदारैश्च ततः सिद्धिमवाप्स्यथ ॥ २४ ॥

यस्य यस्य हि या वाञ्छा तस्य तां तां ददाम्यहम् ।

विष्णुं ब्रह्माणमीशानमन्यं वा सुरमुत्तमम् ॥ २५ ॥

तत्रसर्वान्नयिष्यामिप्रसन्नावरदाह्यहम् । प्राणायामपराभूत्वामांविशध्वंसमाहिताः

सह पुत्रैश्च दारैश्च त्यक्त्वाश्रमपदानि च । कालक्षेपोनकर्तव्यःप्रलयोऽयमुपस्थितः

संहारः सर्वभूतानां कल्पदाहः सुदारुणः । एकाहमभवं पूर्वं महाघोरे जनक्षये ॥

शेषा नद्यः समुद्राश्च सर्व एव क्षयंगताः । वरदानान्महेशस्यतेनाहं न क्षयं गता ॥

अमृतः शाश्वतो देवः स्थाणुरीशः सनातनः ।

स पूजितः प्रार्थितो वा किं न दद्याद्द्विजोत्तमाः ॥ ३० ॥

एवमुक्त्वा ऋषीन्देवी प्रविवेश जलंततः । करात्तशूलासादेवीव्यालयज्ञोपवीतिनी

ततस्ते तद्वचः श्रुत्वा विस्मयापन्नमानसाः । अभिवन्द्यचमांसर्वेक्षामयन्तःपुनःपुनः

क्षम्यतां नो यदुक्तं हि वसतां तव संश्रये ।

गृहांस्त्यक्त्वा महाभागाः सशिष्याः सह बान्धवाः ॥ ३३ ॥

जप्त्वा चैकाक्षरं ब्रह्म हृदि ध्यात्वा महेश्वरम् ।

स्नात्वा च मन्त्रपूताभिरथ चाद्भिर्जितव्रताः ॥ ३४ ॥

विविशुर्नर्मदातोयं सपक्षा इव पर्वताः । द्योतयन्तोदिशःसर्वाःकुशहस्ताःसहाग्नयः

गतेषु तेषु राजेन्द्र अहमेकः स्थितस्तदा । अमरेशं समासाद्य पूजयन्नर्मदां नदीम् ॥

अनुभूताः सप्तकल्पा मायूराद्या मया नृप!। प्रसादाद्वेधसः सर्वे रेवया सह भारत

जन्मतोऽद्य दिनं यावन्न जानेऽस्याः पुरा स्थितिम् ॥ ३८ ॥

इयं हि शाङ्करी शक्तिः कला शम्भोरिलाह्वया ।

नर्मदा दुरितध्वंसकारिणी भवतारिणी ॥ ३६ ॥

यदाहमपि नाभूवं पुराकल्पेषु पाण्डव! । चतुर्दशसुकल्पेषु तेष्वियं सुखसंस्थिताः

चतुर्दश पुरा कल्पा न मृता येषु नर्मदा । तानहं सम्प्रवक्ष्यामि देवी प्राहयथा मम

कापिलं प्रथमं विद्धि प्राजापत्यं द्वितीयकम् ।

ब्राह्मं सौम्यं च सावित्रं बार्हस्पत्यं प्रभासकम् ॥ ४२ ॥
माहेन्द्रमग्निकल्पं च जयन्तं मारुतं तथा । वैष्णवं बहुरूपं च ज्यौतिषं च चतुर्दशम्
एते कल्पा मयाऽऽख्याता न श्रुतायेषुनर्मदा । मायूरं पञ्चदशमंकौर्मं चैवात्रषोडशम्
बकं मात्स्यं च पाद्मं चवटकल्पंचभारत! । एकविंशतिमंचैतं वाराहं सांप्रतीनकम्
इमे सप्तमया साकंरेवयापरिशीलिताः । एकविंशतिकल्पास्तु नर्मदायाःशिवांगतः
सञ्जातायां नृपश्रेष्ठ मयादृष्टा ह्यनेकशः । कथिता नृपतिश्रेष्ठ! भूयः किं कथयामिते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्ये एकविंशतिकल्पकथानकवर्णनंनाम
त्रयोदशोऽध्यायः ॥ १३ ॥

———

चतुर्दशोऽध्यायः

कालरात्रिकृतजगत्संहरवर्णनम्

युधिष्ठिर उवाच

ततस्त ऋषयःसर्वेमहाभागास्तपोधनाः । गतास्तुपरमं लोकं ततः किंजातमद्भुतम्

श्रीमार्कण्डय उवाच

ततस्तेषु प्रयातेषु नर्मदातीरवासिषु । बभूव रौद्रसंहारः सर्वभूतक्षयङ्करः ॥ २ ॥
कैलासशिखरस्थं तु महादेवं सनातनम् ।
ब्रह्माद्याः प्रास्तुवन्देवमृग्यजुःसामभिः शिवम् ॥ ३ ॥
संहरत्वं जगद्देव!सदेवासुरमानुषम् । प्राप्तोयुगसहस्रान्तःकालः संहरणक्षमः ॥ ४ ॥
मद्रूपं तु समास्थाय त्वया चैतद्विनिर्मितम् ।
वैष्णवीं मूर्तिमास्थाय त्वयैतत्परिपालितम् ॥ ५ ॥
एका मूर्तिस्त्रिधा जाता ब्राह्मी शैवी च वैष्णवी ।

सृष्टिसंहाररक्षार्थं भवेदेवं महेश्वर! ॥ ६ ॥
एतच्छ्रुत्वावचस्तथ्यंविष्णोश्चपरमेष्ठिनः । सगणःसपरीवारःसहताभ्यांसहोमया
सप्तलोकान्विभिद्येमान्भगवान्नीललोहितः ।
भूराद्यब्रह्मलोकान्तं भित्त्वाऽण्डं परतः परम् ॥ ८ ॥
शैवं पदमजं दिव्यमाविशत्सह तैर्विभुः । न तत्र वायुर्नाकाशंनाग्निस्तत्र न भूतलम्
यत्र संतिष्ठते देव उमया सह शङ्करः । न सूर्यो न ग्रहास्तत्र न ऋक्षाणिदिशस्तथा
न लोकपाला न सुखं न च दुःखं नृपोत्तम! ॥ ११ ॥
ब्राह्मं पदं यत्कवयो वदन्तिशैवं पदं यत्कवयो वदन्ति ।
क्षेत्रज्ञमीशं प्रवदन्ति चान्ये साङ्ख्याश्च गायन्ति किलादिमोक्षम् ॥ १२
यद्ब्रह्म आद्यं प्रवदन्ति केचिद्यं सर्वमीशानमजं पुराणम् ।
तमेकरूपं तमनेकरूपमरूपमाद्यं परमव्ययाख्यम् ॥ १३ ॥
अवर्णमप्यर्थमनामगोत्रं तुर्यं पदं यत्कवयो वदन्ति ।
ध्यानार्थविज्ञानमयं सुसूक्ष्ममात्मस्थमीशानवरं वरेण्यम् ॥ १४ ॥
ततस्त्रयस्ते भगवन्तमीशं सम्प्राप्य सङ्क्षिप्य भवन्त्यथैकम् ।
पृथक्स्वरूपैस्तु पुनस्त एव जगत्समस्तं परिपालयन्ति ॥ १५ ॥

संहारं सर्वभूतानां रुद्रत्वे कुरुते प्रभुः ।
विष्णुत्वे पालयेल्लोकान्ब्रह्मत्वे सृष्टिकारकः ॥ १६ ॥

प्रकृत्या सह संयुक्तः कालो भूत्वा महेश्वरः ।
विश्वरूपा महाभागा तस्य पार्श्वे व्यवस्थिता ॥ १७ ॥
यामाहुः प्रकृतिं तज्ज्ञाःपदार्थानांविचक्षणाः । पुरुषत्वेप्रकृतित्वे च कारणं परमेश्वरः
तस्मादेतज्जगत्सर्वंसमुद्भूतं चराचरम् । तस्मिन्नेवलयं याति युगान्ते समुपस्थिते
भगलिङ्गाङ्कितं सर्वं व्याप्तं वै परमेष्ठिना । भगरूपो भवेद्विष्णुर्लिङ्गरूपो महेश्वरः ॥
भाति सर्वेषु लोकेषु गीयते भूर्भुवादिषु । प्रविष्टः सर्वभूतेषुतेनविष्णुर्भगः स्मृतः
विशनाद्विष्णुरित्युक्तः सर्वदेवमयो महान् । भासनाद्गमनाच्चैवभगसञ्ज्ञाप्रकीर्तिता

ब्रह्मादिस्तम्बपर्यन्तं यस्मिन्नेतिलयंजगत् । एकभावंसमापन्नंलिङ्गं तस्माद्विदुर्बुधाः

महादेवस्ततो देवीमाह पार्श्वे स्थितां तदा ।

संहरस्व जगत्सर्वं मा विलम्बस्व शोभने! ॥ २४ ॥

त्यज सौम्यमिदंरूपंसितचन्द्रांशुनिर्मलम् । रौद्रंरूपं समास्थायसंहरस्व चराचरम्

रौद्रैर्भूतगणैर्घोरैर्देवि त्वं परिवारिता । जीवलोकमिमं सर्वं भक्षयस्वाम्बुजेक्षणे ॥

ततोऽहं मर्दयिष्यामि प्लावयिष्ये तथा जगत् ।

कृत्वा चैकार्णवं भूयः सुखं स्वप्स्ये त्वया सह ॥ २७ ॥

श्रीदेव्युवाच

नाहं देवजगच्चैतत्संहरामि महाद्युते । अम्बा भूत्वा विचेष्टं न भक्षयामिभृशातुरम्

स्त्रीस्वभावेन कारुण्यं करोति हृदयं मम । कथं वै निर्दहिष्यामिजगदेतज्जगत्पते ॥

तस्मात्त्वं स्वयमेवेदं जगत्संहर शङ्कर! । अथैवमुक्तस्तां देवीं धूर्जटिर्नीललोहितः ॥

क्रुद्धो निर्भर्त्सयामास हुङ्कारेण महेश्वरीम् ।

ॐ हुंफट् त्वं स इत्याह कोपाविष्टैरथेक्षणैः ॥ ३१ ॥

हुङ्कारिताविशालाक्षीपीनोरुजघनस्थला । तत्क्षणाच्चाभवद्रौद्राकालरात्रीवभारत

हुङ्कुर्वती महानादैर्नादयन्ती दिशो दश । व्यवर्धतमहारौद्रा विद्युत्सौदामिनीयथा

विद्युत्सम्पातदुष्प्रेक्ष्या विद्युत्सङ्घातचञ्चला ।

विद्युज्ज्वालाकुला रौद्रा विद्युदग्निनिभेक्षणा ॥ ३४ ॥

मुक्तकेशी विशालाक्षीकृशग्रीवा कृशोदरी । व्याघ्रचर्माम्बरधराव्यालयज्ञोपवीतिनी

वृश्चिकैरग्निपुञ्जाभैर्गोनसैश्च विभूषिता । त्रैलोक्यंपूरयामासविस्तारेणोच्छ्रयेण च

भासुराङ्गा तु सम्वृत्ता कृष्णसर्पैककुण्डला ।

चित्रदण्डोद्यतकरा व्याघ्रचर्मोपसेविता ॥ ३७ ॥

व्यवर्धत महारौद्राजगत्संहारकारिणी । सृक्किणीलेलिहानाचक्रूरफूत्कारकारिणी

व्यात्तास्या घुर्घुरारावा जगत्सङ्क्षोभकारिणी ।

खेलद्भूतानुगा क्रूरा निःश्वासोच्छ्वासकारिणी ॥ ३६ ॥

जाताट्टहासादुर्नासावह्निकुण्डसमेक्षणा । प्रोद्यत्किलकिलारावाद्दाहसकलंजगत्

दह्यमानाः सुरास्तत्र पतन्ति धरणीतले । पतन्ति यक्षगन्धर्वाः सकिन्नरमहोरगाः

पतन्ति भूतङ्सघाश्च हाहाहैहैविराविणः ।बुम्बापातैःसनिर्घातैरुदितार्तस्वरैरपि ।

व्याप्तमासीत्तदा विश्वं त्रैलोक्यं सचराचरम् ।

सम्पतद्भिः पतद्भिश्च ज्वलद्भूतगणैर्मही ॥ ४३ ॥

जातैश्चटचटाशब्दैः पतद्भिर्गिरिसानुभिः । तत्र रौद्रोत्सवे जातारुद्रानन्दविवर्धिनी

विहिंसमानाभूतानिचर्वमाणाचरानपि । तत्तद्गन्धमुपादाय शिवारावविराविणी

गलच्छोणितधाराभिमुखादिग्धकलेवरा। चण्डशीलाऽभवच्चण्डीजगत्संहारकर्मणि

येऽपि प्राप्ता महर्लोकं भृग्वाद्याश्च महर्षयः ।

तेऽपि नश्यन्ति शतशो ब्रह्मक्षत्रविशादयः ॥ ४७ ॥

देवासुराभयत्रस्ताःसयक्षोरगराक्षसाः । विशन्तिकेऽपिपातालं लीयन्तेचगुहादिषु

सा च देवी दिशः सर्वा व्याप्य मृत्युरिव स्थिता ।

युगक्षयकरे काले देवेन विनियोजिता ॥ ४६ ॥

एकापि नवधा जाता दशधा दशधा तथा ।

चतुःषष्टिस्वरूपा च शतरूपाट्टहासिनी ॥ ५० ॥

जज्ञे सहस्ररूपाचलक्षकोटितनुः शिवा । नानारूपायुधाकारानानावादनचारिणी

एवंरूपाऽभवद्देवीशिवस्यानुज्ञया नृप! । दिक्षु सर्वासु गगने विकटायुधशीलिनः

रुन्धन्तो नश्यमानांस्तान्गणा माहेश्वराः स्थिताः ।

विचरन्ति तया सार्द्धं शूलपट्टिशपाणयः ॥ ५३ ॥

ततो मातृगणाः केचिद्विनायकगणैःसह । व्यवर्धन्त महारौद्राजगत्संहारकारिणः

ततस्तस्या व्यवर्धन्त दंष्ट्राः कुन्देन्दुसन्निभाः ।

योजनानां सहस्राणि अयुतान्यर्बुदानि च ॥ ५५ ॥

दंष्ट्रावलिः कररुहाः क्रूरास्तीक्ष्णाश्च कर्कशाः ।

वियद्दिशो लिखन्त्येव सप्तद्वीपां वसुन्धराम् ॥ ५६ ॥

तस्यादंष्ट्राभिसम्पातैश्चूर्णितावनपर्वताः । शिलासञ्चयसङ्घाताविशीर्यन्तेसहस्रशः
हिमवान्हेमकूटश्च निषधो गन्धमादनः । माल्यवांश्चैवनीलश्च श्वेतश्चैव महागिरिः
मेरुमध्यमिलापीठंसप्तद्वीपं च सार्णवम् । लोकालोकेन सहितं प्राकम्पत नृपोत्तम!

दंष्ट्राशनिविस्पृष्टाश्च विशीर्यन्ते महाद्रुमाः ।
उत्पातैश्च दिशो व्याप्ताघोररूपैः समन्ततः ॥ ६० ॥
तारा ग्रहगणाः सर्वे ये च वैमानिका गणाः ।
शिवासहस्रैराकीर्णा महामातृगणैस्तथा ॥ ६१ ॥
सा चचार जगत्कृत्स्नं युगान्ते समुपस्थिते ।
भ्रमद्भिश्च ब्रुवद्भिश्च क्रोशद्भिश्च समन्ततः ॥ ६२ ॥
प्रमथद्भिर्ज्वलद्भिश्च रौद्रै व्याप्तादिशो दश ।
विस्तीर्णं शैलसङ्घातं विघूर्णितगिरिद्रुमम् ॥ ६३ ॥

प्रभिन्नगोपुरद्वारं केशशुष्कास्थिसङ्कुलम् । प्रदग्धग्रामनगरं भस्मपुञ्जाभिसम्वृतम्
चिताधूमाकुलं सर्वं त्रैलोक्यं सचराचरम् । हाहाकाराकुलंसर्वमहहस्वननिस्वनम्

जगदेतदभूत्सर्वमशरण्यं निराश्रयम् ॥ ६६ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये कल्पानुकथने कालरात्रिकृतजगत्संहरणवर्णनंनाम चतुर्दशोऽध्यायः ॥ १४ ॥

—:*:—

पञ्चदशोऽध्यायः

सृष्टिसंहरणसंरम्भवर्णनम्

श्रीमार्कण्डेय उवाच

ततो मातृसहस्रैश्च रौद्रैश्च परिवारिता । कालरात्रिर्जगत्सर्वं हरते दीप्तलोचना ॥

ततस्ता मातरो घोरा ब्रह्मविष्णुशिवात्मिकाः ।
वाय्विन्द्रानलकौबेरा यमतोयेशशक्तयः ॥ २ ॥
स्कन्दक्रोडनृसिंहानां विचरन्त्यो भयानकाः ।
चक्रशूलगदाखड्गवज्रशक्त्यृष्टिपट्टिशैः ॥ ३ ॥

खट्वाङ्गैरुल्मुकैर्दीप्तैर्व्यचरन्मातरःक्षये । उमासंनोदिताःसर्वाःप्रधावन्त्योदिशोदश
तासांचरणविक्षेपैर्हुङ्कारोद्गारनिस्वनैः । त्रैलोक्यमेतत्सकलं विप्रदग्धं समन्ततः

हाहारवाक्रन्दितनिस्वनैश्च प्रभिन्नरथ्यागृहगोपुरैश्च ।
बभूव घोरा धरणी समन्तात्कपालकेशाकुलकर्बुराङ्गी ॥ ६ ॥

यदेतच्छतसाहस्रं जम्बूद्वीपं निगद्यते । सर्वमेव तदुच्छन्नं समाधृष्य नृपोत्तम!॥ ७॥

जम्बु शाकं कुशं क्रौञ्चं गोमेदं शाल्मलिस्तथा ।
पुष्करद्वीपसहिता ये च पर्वतवासिनः ॥ ८ ॥

ते ग्रस्ता मृत्युना सर्वे भूतैर्मातृगणैस्तथा । महासुरकपालैश्च मांसमेदोवसोत्कटैः
महानादपरैर्घोरैर्वारुणीगन्धमोहितैः । ज्वालासहस्रसम्वीताविद्युज्ज्वलितकुण्डला
रुधिरोद्गारशोणाङ्गीमहामायासुभीषणा । पिबन्ती रुधिरं तत्रमहामांसवसाप्रिया

कपालहस्ता विकटा भक्षयन्ती सुरासुरान् ।
नृत्यन्ती च हसन्ती च विपरीता महारवा ॥ १२ ॥
त्रैलोक्यसन्त्रासकरी विद्युत्संस्फोटहासिनी ।
सप्तद्वीपसमुद्रान्तां भक्षयित्वा च मेदिनीम् ॥ १३ ॥

ततः स्वस्थानमगमद्यत्र देवो महेश्वरः । नर्मदातीरमाश्रित्यावसन्मातृगणैः सह ॥

अमराणां कटे तुङ्गे नृत्यन्ती हसितानना । अमरा देवताः प्रोक्ताःशरीरंकटमुच्यते

तैः कटैरावृतो यस्मात्पर्वतोऽयं नृपोत्तम ।

छिन्नभिन्नास्थिनिकरैर्वसामेदोस्रविप्लुतैः ॥ १६ ॥

अमरंकट इत्येवं तेन प्रोक्तो मनीषिभिः । महापवित्रो लोकेषुशम्भुना सविनिर्मितः

नित्यंसन्निहितस्तत्रशङ्करोह्य मयासह । ततोऽहं नियतस्तत्र तस्य पादाग्रसंस्थितः

प्रह्वः प्रणतभावेन स्तौमि तं नीललोहितम् ।

ततस्तालकसंपातैर्गणैर्मातृगणैः सह ॥ १६ ॥

सम्प्रनृत्यति संहृष्टो मृत्युना सह शङ्करः । खट्वाङ्गैरुल्मुकैश्चैव पट्टिशैःपरिघैस्तथा

मांसमेदोवसाहस्ताहृष्टानृत्यन्तिसङ्घशः। वामनाजटिलामुण्डालम्बग्रीवोष्ठमूर्द्धजाः

महाशिश्नोदरभुजा नृत्यन्ति च हसन्ति च ।

विकृतैराननैर्घोरैर्भु जोल्बणमुखादिभिः ॥ २२ ॥

अमरं कण्टकं चक्रुःप्राप्तेकालविपर्यये । तेषां मध्ये महाघोरं जगत्सन्त्रासकारणम्

मृत्यु पश्यामि नृत्यन्तं तडित्पिङ्गलमूर्द्धजम् ।

तस्य पार्श्वे स्थितां देवीं विमलाम्बरभूषिताम् ॥ २४ ॥

कुण्डलोद्घुष्टगण्डां तां नागयज्ञोपवीतिनीम् ।

विचित्रैरुपहारैश्च पूजयन्तीं महेश्वरम् ॥ २५ ॥

अपश्यं नर्मदां तत्र मातरं विश्ववन्दिताम् ।

नानातरङ्गां सावर्तां सुवेलार्णवसन्निभाम् ॥ २६ ॥

महासरः सरित्पातैरदृश्यां दृश्यरूपिणीम् । वन्द्यमानांसुरैःसिद्धैर्मुनिसङ्घैश्चभारत

एतस्मिन्नन्तरे घोरां सप्तसप्तकसञ्ज्ञिताम् ।

महावीच्यौघफेनाढ्यां कुर्वन्तीं सजलं जगत् ॥ २८ ॥

दृष्टवान्नर्मदां देवीं मृगकृष्णाम्बरां पुनः । सभ्रमाशनिनिर्ह्रादैर्वहन्तीं सप्तधा तदा ॥

इति संहारमतुलं दृष्टवान्राजसत्तम! । नष्टचन्द्रार्ककिरणमभूदेतच्चराचरम् ॥ ३० ॥

महोत्पातसमुद्भूतंनष्टनक्षत्रमण्डलम् । अलातचक्रवत्तूर्णमशेषंभ्रामयंस्ततः ॥ ३१ ॥

विमानकोटिसङ्कीर्णःसकिन्नरमहोरगः । महावातःसनिर्घातोयेनाकम्पच्चराचरम्

रुद्रवक्त्रात्समुद्भूतःसम्वर्तोनामविश्रुतः । वायुःसंशोषयामासविततन्सप्तसागरान्

उद्धूलिताङ्गः कपिलाक्षमूर्द्धजो जटाकलापैरवबद्धमूर्द्धजः ।

महारवो दीप्तविशालशूलधृक्सपातु युष्मांश्च दिने दिने हरः ॥ ३४ ॥

शूली धनुष्मान्कवची किरीटी श्मशानभस्मोक्षितसर्वगात्रः ।

कपालमालकुलाकण्ठनालो महाहिसूत्रैरवबद्धमौलिः ॥ ३५ ॥

स गोनसौघैः परिवेष्टिताङ्गो विषाग्निचन्द्रामरसिन्धुमौलिः ।

पिनाकखट्वाङ्गकरालपाणिः स कृत्तिवासा डमरुप्रणादः ॥ ३६ ॥

स सप्तलोकान्तरनिःसृतात्मा महाभुजावेष्टितसर्वगात्रः ।

नेत्रेण सूर्योदयसन्निभेन प्रवालकांकूरनिभोदरेण ॥ ३७ ॥

सन्ध्याभ्ररक्तोत्पलपद्मरागसिन्दूरविद्युत्प्रकरारुणेन ।

तप्तेन लिङ्गेन च लोचनेन चिक्रीडमानः स युगान्तकाले ॥ ३८ ॥

हिरण्मयेनैव समुत्सृजन्सदण्डेन यद्वद्भगवान्समेरुः ।

पादाग्रविक्षेपविशीर्णशैलः कुर्वञ्जगत्सोऽपि जगाम तत्र ॥ ३६ ॥

संहर्तुकामस्त्रिदिवं त्वशेषं प्रमुञ्चमानो विकृताट्टहासम् ।

जहार सर्वं त्रिदिवं महात्मा सङ्क्षोभयन्वै जगदीश एकः ॥ ४० ॥

तं देवमीशानमजं वरेण्यं दृष्ट्वा जगत्संहरणं महेशम् ।

सा कालरात्रिः सह मातृभिश्च गणाश्च सर्वे शिवमर्चयन्ति ॥ ४१ ॥

नन्दी च भृङ्गी च गणादयश्च तं सर्वभूतं प्रणमन्ति देवम् ।

जगद्धरं सर्वजनस्य कारणं हरं स्मरारातिमहर्निशं ते ॥ ४२ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये सृष्टिसंहरणसंरम्भवर्णनंनाम पञ्चदशोऽध्यायः ॥ १५ ॥

———

षोडशोऽध्यायः

ब्रह्मकृतशिवस्तुतिवर्णनम्

श्रीमार्कण्डेय उवाच

समातृभिर्भूतगणैश्च घोरैर्वृतः समन्तात्स ननर्त शूली ।
गजेन्द्रचर्मावरणे वसानः संहर्तुकामश्च जगत्समस्तम् ॥ १ ॥
महेश्वरःसर्वसुरेश्वराणां मन्त्रैरनेकैरवबद्धमाली ।
मेदोवसारक्तविचर्चिताङ्गस्त्रैलोक्यदाहे प्रणनर्त शम्भुः ॥ २ ॥
स कालरात्र्या सहितो महात्मा काले त्रिलोकीं सकलां जहार ।
सम्वर्तकाख्यः समहानुभावः शम्भुर्महात्मा जगतो वरिष्ठः ॥ ३ ॥
स विस्फुलिङ्गोत्करधूममिश्रं महोल्कवज्राशनिवाततुल्यम् ।
ततोऽट्टहासं प्रमुमोच घोरं विवृत्य वक्त्रं वडवामुखाभम् ॥ ४ ॥
सहस्रवज्राशनिसन्निभेन तेनाऽट्टहासेन हरोद्गतेन ।
आपूरितास्तत्र दिशोदशैवसङ्क्षोभिताः सर्वमहार्णवाश्च ॥ ५ ॥
स ब्रह्मलोकं प्रजगाम शब्दो ब्रह्माण्डभाण्डं प्रचचाल सर्वम् ।
किमेतदित्याकुलचेतनास्ते वित्रस्तरूपा ऋषयो बभूवुः ॥ ६ ॥
प्रणम्य सर्वे सहसैव भीता ब्रह्माणमूचुः परमेश्वरेशम् ।
भीताश्च सर्वे ऋषयस्ततस्ते सुरासुरैश्चैव महोरगैश्च ॥ ७ ॥
विद्युत्प्रभाभासुरभीषणाङ्गः क एष विक्रीडति भूतलस्थः ।
कालानलं गात्रमिदं दधानो यस्याट्टहासेन जगद्विमूढम् ॥ ८ ॥
वित्रस्तरूपं प्रबभौ क्षणेन संहर्तुमिच्छेत्किमयं त्रिलोकीम् ।
सार्धं त्वया सप्तभिरर्णवैश्च जनस्तपः सत्यमभिप्रयाति ॥ ९ ॥
संहर्तुकामो हि क एष देव एतत्समस्तं कथयाऽप्रमेय! ।

न दृष्टमेतद्विषमं कदापि जानासि तत्वं परमो मतो नः ॥ १० ॥
निशम्य तद्वाक्यमथाबभाषे ब्रह्मा समाश्वास्य सुरादिसङ्घान् ॥ ११ ॥

श्रीब्रह्मोवाच

स एष कालस्त्रिदिवं त्वशेषं संहर्तुकामोजगदक्षयात्मा ।
पूर्णे च शते परिवत्सराणां भविष्यतीशानविभुर्न चित्रम् ॥ १२ ॥
सम्वत्सरोऽयं परिवत्सरश्च उद्वत्सरो वत्सरएष देवः ।
दृष्टोऽप्यदृष्टः प्रहुतः प्रकाशी स्थूलश्च सूक्ष्मः परमाणुरेषः ॥ १३ ॥
नातः परं किञ्चिदिहाऽस्ति लोके परापरोऽयं प्रभुरात्मवादी ।
तुष्येत मे कालसमानरूप इत्येवमुक्त्वा भगवान्सुरेशः ॥ १४ ॥
सनत्कुमारप्रमुखैः समेतः सन्तोषयामास ततो यतात्मा ॥ १५ ॥

ब्रह्मोवाच

नमोऽस्तु सर्वाय सुशान्तमूर्तये ह्यघोररूपाय नमोनमस्ते ।
सर्वात्मने सर्व नमोनमस्ते महात्मने भूतपते! नमस्ते ॥ १६ ॥
ओङ्कारहुङ्कारपरिष्कृताय स्वधावषट्कार नमोनमस्ते ।
गुणत्रयेशाय महेश्वराय ते त्रयीमयाय त्रिगुणात्मने नमः ॥ १७ ॥
त्वं शङ्करस्त्वं हि महेश्वरोऽसि प्रधानमग्र्यं त्वमसि प्रविष्टः ।
त्वं विष्णुरीशः प्रपितामहश्च त्वं सप्तजिह्वस्त्वमनन्तजिह्वः ॥ १८ ॥
स्रष्टाऽसि सृष्टिश्च विभो त्वमेव विश्वस्य वेद्यं च परं निधानम् ।
आहुर्द्विजा वेदविदो वरेण्यं परात्परस्त्वं परतः परोऽसि ॥ १९
सूक्ष्मातिसूक्ष्मं प्रवदन्ति यच्च वाचो निवर्तन्तिमनो यतश्च ॥ २० ॥

श्रीमहादेव उवाच

त्वया स्तुतोऽहं विविधैश्च मन्त्रैः पुष्णामि शान्तिं तव पद्मयोने! ।
ईक्षस्व मां लोकमिमं ज्वलन्तं वक्त्रैरनेकैः प्रसभं हरन्तम् ॥ २१ ॥
एवमुक्त्वा स देवेशो देव्या सह जगत्पतिः ।

पितामहं समाश्वास्य तत्रैवाऽन्तरधीयत ॥ २२ ॥
इदं महत्पुण्यतमं वरिष्ठं स्तोत्रं निशम्येह गतिं लभन्ते ।
पापैरनेकैः परिवेष्टिता ये प्रयान्ति रुद्रं विमलैर्विमानैः ॥ २३ ॥
भयं च तेषां न भवेत्कदाचित्पठन्ति ये तात इदं द्विजाग्र्याः ।
सङ्ग्रामचौराग्निवने तथाऽब्धौ तेषां शिवस्त्राति न संशयोऽत्र ॥ २४ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये ब्रह्मकृतशिवस्तुतिवर्णनंनामषोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्याय

द्वादशादित्यरूपेणजगत्सहरणवर्णनम्

श्रीमार्कण्डेय उवाच

एवं संस्तूयमानस्तु ब्रह्माद्यैर्मुनिपुङ्गवैः । ब्रह्मलोकगतैस्तत्र सञ्जहार जगत्प्रभुः स तद्भीमंमहारौद्रं दक्षिणंवक्त्रमव्ययम् । महादंष्ट्रोत्कटारावंपातालतलसन्निभम् विद्युज्ज्वलनपिङ्गाक्षं भैरवं लोमहर्षणम् । महाजिह्वं महादंष्ट्रं महासर्पशिरोधरम् महासुरशिरोमालं महाप्रलयकारणम् । ग्रसत्समुद्रनिहितवातवारिमयं हविः ॥ वडवामुखसङ्काशं महादेवस्य तन्मुखम् । जिह्वाग्रेण जगत्सर्वं लेलिहानमपश्यत योजनानांसहस्राणिसहस्राणांशतानिच । दिशोदशमहाघोरामांसमेदोवसोत्कटाः तस्य दंष्ट्राव्यवर्धन्तशतशोऽथ सहस्रशः । सासुरान्सुरगन्धर्वान्सयक्षोरगराक्षसान् तस्य दंष्ट्राग्रसंलग्नान्स ददर्श पितामहः । दन्तयन्त्रान्तसम्विष्टंविचूर्णितशिरोधरम् जगत्पश्यामि राजेन्द्रविशन्तंव्यादिते मुखे । नानातरङ्गभङ्गाङ्गामहाफेनौघसङ्कुलाः
यथा नद्यो लयं यान्ति समुद्रं प्राप्य सस्वनाः ॥ ९ ॥
तथा ततं विश्वमिदं समस्तमनेकजीवार्णवदुर्विगाह्यम् ।

विवेश रुद्रस्य मुखं विशालं ज्वलत्तदुग्रं घननादघोरम् ॥ १० ॥
ज्वालास्ततस्तस्य मुखात्सुघोराः सविस्फुलिङ्गा बहुलाः सधूमाः ।
अनेकरूपा ज्वलनप्रकाशाः प्रदीपयन्तीव दिशोऽखिलाश्च ॥ ११ ॥
ततो रविज्वालसहस्रमालि बभूववक्त्रं चलजिह्वदंष्ट्रम् ।
महेश्वरस्याद्भुतरूपिणस्तदा स द्वादशात्मा प्रबभूव एकः ॥ १२ ॥
ततस्ते द्वादशादित्या रुद्रवक्त्राद्विनिर्गताः ।
आश्रित्य दक्षिणामाशां निर्दहन्तो वसुन्धराम् ॥ १३ ॥

भौमं यज्जीवनंकिञ्चिन्नानावृक्षतृणालयम् । शुष्कं पूर्वमनावृष्ट्यासकलाकुलभूतलम् तद्दीप्यमानं सहसा सूर्यैस्तै रुद्रसम्भवैः । धूमाकुलमभूत्सर्वं प्रणष्टग्रहतारकम् जज्वाल सहसा दीप्तं भूमण्डलमशेषतः । ज्वालामालाकुलं सर्वमभूदेतच्चराचरम् सप्तद्वीपसमुद्रेषु सरित्सु च सरस्सु च । अग्निरत्तिजगत्सर्वमाज्याहुतिमिवाध्वरे विशालतेजसा दीप्तामहाज्वालासमाकुलाः । ददहुर्वैजगत्सर्वमादित्यारुद्रसम्भवाः आदित्यानां रश्मयश्चसंस्पृष्टा वै परस्परम् । एवंददाहभगवांस्त्रैलोक्यं सचराचरम् सप्तद्वीपप्रमाणस्तुसोऽग्निर्भूत्वामहेश्वरः । सप्तद्वीपसमुद्रान्तांनिर्ददाह वसुन्धराम् सुमेरुमन्दरान्तां च निर्दहुर्वसुधांतदा । भित्त्वा तु सप्तपातालंनागलोकंततोऽदहत् भूम्यधःसप्तपातालान्निर्दहंस्तारकैः सह । चचाराग्निः समन्तात्तुनिर्दहन्वैयुधिष्ठिर धम्यमानइवाङ्गारैर्लोहराशिरिवज्वलन् ।तथातत्प्राज्ज्वलत्सर्वंसम्वर्त्ताग्निप्रदीपितम्
निर्वृक्षा निस्तृणा भूमिर्निर्निर्झरसरःसरित् ।
विशीर्णशैलशृङ्गौघा कूर्मपृष्ठोपमाऽभवत् ॥ २४ ॥
ज्वालामालाकुलं कृत्वा जगत्सर्वं चिदात्मकम् ।
महारूपधरो रुद्रो व्यतिष्ठत महेश्वरः ॥ २५ ॥

समातृगणभूयिष्ठा सयक्षोरगराक्षसा । ततो देवी महादेवं विवेश हरिलोचना
निर्वाणं परमापन्ना शान्तेव शिखिनःशिखा ।
जगत्सर्वं हि निर्दग्धं त्रिभिर्लोकैः सहाऽनघ! ॥ २७ ॥

रुद्रप्रसादान्मुक्त्वा मां नर्मदां चाप्ययोनिजाम् ।
युगानामयुतं देवो मया चाद्य बुभुक्षणात् ॥ २८ ॥

पुरा ह्याराधितः शूली तेनाहमजरामरः । अघमर्षणघोरं च वामदेवं च त्र्यम्बकम् ऋषभं त्रिसुपर्णं च दुर्गां सावित्रमेव च । बृहदारण्यकं चैव बृहत्साम तथोत्तरम् रौद्रीं परमगायत्रीं शिवोपनिषदं तथा । यथा प्रतिरथं सूक्तं जप्त्वा मृत्युञ्जयंतथा

सरित्सागरपर्यन्ता वसुधा भस्मसात्कृता ।
वर्जयित्वा महाभागां नर्मदाममृतोपमाम् ॥ ३२ ॥

महेन्द्रो मलयः सह्योहेमकूटोऽथमाल्यवान् । विन्ध्यश्चपारियात्रश्चसप्तैतेकुलपर्वताः

द्वादशानित्यनिर्दग्धाः शैलाः शीर्णशिलाः पृथक् ।
भस्मीभूतास्तु दृश्यन्ते न नष्टा नर्मदा तदा ॥ ३४ ॥
हिमवान्हेमकूटश्च निषधो गन्धमादनः ।
माल्यवांश्च गिरिश्रेष्ठो नीलः श्वेतोऽथ शृङ्गवान् ॥ ३५ ॥

एते पर्वतराजानोदेवगन्धर्वसेविताः । युगान्ताग्निविनिर्दग्धाःसर्वेशीर्णमहाशिलाः एवं मया पुरा दृष्टो युगान्ते सर्वसङ्क्षयः । वर्जयित्वा महापुण्यां नर्मदां नृपसत्तम!

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीनर्मदामाहात्म्ये द्वादशादित्यरूपेण जगत्संहरणवर्णनंनाम- सप्तदशोऽध्यायः ॥ १७ ॥

———

अष्टादशोऽध्यायः

नर्मदामाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

निर्दग्धेऽस्मिंस्ततो लोकेसूर्यैरीश्वरसम्भवैः । सप्तभिश्चार्णवैःशुष्कैर्द्वीपैःसप्तभिरेवच

ततो मुखात्तस्य घना महोल्बणा निश्चेरुरिन्द्रायुधतुल्यरूपाः ।
घोराः पयोदा जगदन्धकारं कुर्वन्त ईशानवरप्रयुक्ताः ॥ २ ॥
नीलोत्पलाभाः क्वचिदञ्जनाभागोक्षीरकुन्देन्दुनिभाश्च केचित् ।
मयूरचन्द्राकृतयस्तथाऽन्ये केचिद्विधूमानलसप्रभाश्च ॥ ३ ॥
केचिन्महापर्वतकल्परूपाः केचिन्महामीनकुलोपमाश्च ।
केचिद्गजेन्द्राकृतयः सुरूपाः केचिन्महाकूटनिभाः पयोदाः ॥ ४ ॥
चलत्तरङ्गोर्मिसमानरूपामहापुरोद्यानिभाश्च केचित् ।
सगोपुराट्टालकसन्निकाशाः सविद्युदुल्काशनिमण्डितान्ताः ॥ ५ ॥
समावृताङ्गः स बभूव देवः सम्वर्तकोनाम गणः सरौद्रः ।
प्रवर्षमाणो जगदप्रमाणमेकार्णवं सर्वमिदं चकार ॥ ६ ॥
ततो महामेघविवर्द्धमानमीशानमिन्द्राशनिभिर्वृताङ्गम् ।
ददर्श नाहं भयविह्वलाङ्गो गङ्गाजलौघैश्च समावृताङ्गः ॥ ७ ॥
गजाः पुनश्चैव पुनः पिबन्तो जगत्समन्तात्परिदह्यमानम् ।
आपूरितं चैव जगत्समन्तात्सर्वैश्च तैर्जग्मुरदर्शनं च ते ॥ ८ ॥
महार्णवाः सप्त सरांसि द्वीपा नद्योऽथ सर्वा अथ भूर्भुवश्च ।
आपूर्यमाणाः सलिलौघजालैरेकार्णवं सर्वमिदं बभूव ॥ ॥ ९ ॥
न दृश्यते किञ्चिदहो चराचरे निरग्निचन्द्रार्कमयेऽपि लोके ।
प्रणष्टनक्षत्रतमोऽन्धकारे प्रशान्तवातास्तमितैकनीडे ॥ १० ॥

महाजलौघेऽस्य विशुद्धसत्त्वा स्तुतिर्मया भूप! कृता तदानीम् ।
ततोऽहमित्येव विचिन्तयानः शरण्यमेकं क नु यामि शान्तम् ॥ ११ ॥
स्मरामि देवं हृदि चिन्तयित्वा प्रभुं शरण्यं जलसन्निविष्टः ।
नमामि देवं शरणं प्रपद्ये ध्यानं च तस्येतिकृतं मया च ॥ १२ ॥
ध्यात्वा ततोऽहं सलिलं ततार तस्य प्रसादादविमूढचेताः ।
ग्लानिः श्रमश्चैव मम प्रणष्टौ देव्याः प्रसादेन नरेन्द्रपुत्र! ॥ १३ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्यवर्णनंनामाऽष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

वाराहकल्पवृत्तान्तवर्णनम्

श्रीमार्कण्डेय उवाच

ततस्त्वेकार्णवे तस्मिन्मुमूर्षुरहमातुरः ।
काकूच्छ्वासस्तरंस्तोयं बाहुभ्यां नृपसत्तम! ॥ १ ॥
शृणोम्यर्णवमध्यस्थो निःशब्दस्तिमिते तदा ।
अम्भोरवमनौपम्यं दिशोदशविनादिनम् ॥ २ ॥
हंसकुन्देन्दुसङ्काशां हारगोक्षीरपाण्डुराम् ।
नानारत्नविचित्राङ्गीं स्वर्णशृङ्गां मनोरमाम् ॥ ३ ॥
खुरैःप्रवालकमयैर्लाङ्गूलध्वजशोभिताम् । प्रलम्बघोणांनर्दन्तींखुरैरर्णवगाहिनीम्
गां ददर्शाहमुद्विग्नो मामेवाऽभिमुखीं स्थिताम् ।
किङ्किणीजालमुक्ताभिः स्वर्णघण्टासमावृताम् ॥ ५ ॥
तस्याश्चरणविक्षेपैः सर्वमेकार्णवंजलम् । विक्षिप्तफेनपुञ्जौघैर्नृत्यन्तीव समन्ततः

ररास सलिलोत्क्षेपैः क्षोभयन्ती महार्णवम् ।
सा मामाह महाभाग!श्लक्ष्णगम्भीरया गिरा ॥ ७ ॥
मा भैषीर्वत्सवत्सेति मृत्युस्तव न विद्यते । महादेवप्रसादेन न मृत्युस्तेममापिच
ममाश्रयस्वलांगूलंत्वामतस्तारयाम्यहम् । घोरादस्माद्भयाद्विप्रयावत्संप्लवतेजगत्
क्षुत्तृषाप्रतिघातार्थं स्तनौ मे त्वं पिबस्व ह ।
पयोऽमृताश्रयं दिव्यं तत्पीत्वा निर्वृतो भव ॥ १० ॥
तस्यास्तद्वचनं श्रुत्वा हर्षात्पीतो मया स्तनः ।
न क्षुत्तृषा पीतमात्रे स्तने मह्यं तदाऽभवत् ॥ ११ ॥
दिव्यंप्राणबलं जज्ञे समुद्रप्लवनक्षमम् । ततस्तां प्रत्युवाचेदं का त्वमेकार्णवीकृते
भ्रमसे ब्रूहि तत्त्वेन विस्मयो मे महान्हृदि । भ्रमतोऽत्रममार्तस्य मुमूर्षोःप्रहतस्यह
त्वं हि मे शरणं जाता भाग्यशेषेण सुव्रते! ॥ १४ ॥

गौरुवाच

किमहं विस्मृता तुभ्यं विश्वरूपामहेश्वरी । नर्मदाधर्मदानॄणांस्वर्गशर्मबलप्रदा ॥
दृष्ट्वा त्वां सीदमानं तु रुद्रेणाऽहंविसर्जिता ।
तं द्विजं तारयस्वार्ये मा प्राणांस्त्यजतां जले ॥ १६ ॥
गोरूपेण विभोर्वाक्यात्त्वत्सकाशमिहागता ।
मा मृषावचनः शम्भुर्भवेदिति च सत्वरा ॥ १७ ॥
एवमुक्तस्तयाऽऽहंतुइन्द्रायुधनिभंशुभम् । लांगूलमव्ययंज्ञात्वाभुजाभ्यामवलम्बितः
ततोऽन्तरं तं जलधिलांगूलध्वजमाश्रितः । असौ देवो महादेव इति मां प्रत्यभाषत
ततो युगसहस्रान्तमहं कालं तया सह । व्यचरं वै तमीभूते सर्वतः सलिलावृते ।
महार्णवे ततस्तस्मिन्भ्रमन्गोःपुच्छमाश्रितः ।
निर्वाते चान्धकारे च निरालोके निरामये ॥ २१ ॥
अकस्मात्सलिले तस्मिन्नतसीपुष्पसन्निभम् ।
विभिन्नांञ्जनसङ्काशमाकाशमिव निर्मलम् ॥ २२ ॥

नीलोत्पलदलश्यामं पीतवाससमव्ययम् । किरीटेनार्कवर्णेनविद्युद्विद्योतकारिणा
भ्राजमानेनशिरसाखमिवात्यन्तरूपिणम् ।कुण्डोद्वृष्टगलं तुहारोद्द्ययोतितवक्षसम्
जाम्बूनदमयैर्दिव्यैर्भूषणैरुपशोभितम् । नागोपधानशयनं सहस्रादित्यवर्चसम् ॥
अनेकबाहूरुधरं नैकवक्त्रं मनोरमम् । सुप्तमेकार्णवे वीरं सहस्राक्षशिरोधरम् ॥
जटाजूटेन महतास्फुरद्विद्युत्समार्चिषा । एकार्णवंजगत्सर्वं व्याप्यदेवंव्यवस्थितम्
ग्रसित्वा शङ्करं सर्वं सदेवासुरमानवम् । प्रपश्याम्यहमीशानं सुप्तमेकार्णवे प्रभुम्
सर्वव्यापिनमव्यक्तमनन्तंविश्वतोमुखम्। तस्यपादतलाभ्याशेस्वर्णकेयूरमण्डिताम्

विश्वरूपां महाभागां विश्वमायावधारिणीम् ।
श्रीमयीं ह्रीमयीं देवीं धीमयीं वाङ्मयीं शिवाम् ॥ ३० ॥
सिद्धिं कीर्तिं रतिं ब्राह्मीं कालरात्रिमयोनिजाम् ।
तामेवाहं तदात्यन्तमीश्वरान्तिकमास्थिताम् ॥ ३१ ॥
अद्राक्षं चन्द्रवदनां धृतिं सर्वेश्वरीमुमाम् ॥ ३२ ॥
शान्तं प्रसुप्तं नवहेमवर्णमुमासहायं भगवन्तमीशम् ।
तमोवृतं पुण्यतमं वरिष्ठं प्रदक्षिणीकृत्य नमस्करोमि ॥ ३३ ॥
ततः प्रसुप्तः सहसा विबुद्धो रात्रिक्षये देववरः स्वभावात् ।
विक्षोभयन्बाहुभिरर्णवाम्भो जगत्प्रणष्टं सलिले विमृश्य ॥ ३४ ॥
किं कार्यमित्येव विचिन्तयित्वा वाराहरूपोऽभवदद्भुताङ्गः ।
महाघनाम्भोधरतुल्यवर्चाः प्रलम्बमालाम्बरनिष्कमाली ॥ ३५ ॥
सशङ्खचक्रासिधरः किरीटी सवेदवेदाङ्गमयो महात्मा ।
त्रैलोक्यनिर्माणकरः पुराणो देवत्रयीरूपधरश्च कार्ये ॥ ३६ ॥
स एव रुद्रः स जगज्जहार सृष्ट्यर्थमीशः प्रपितामहोऽभूत् ।
संरक्षणार्थं जगतः स एव हरिः सुचक्रासिगदाब्जपाणिः ॥ ३७ ॥
तेषां विभागो न हि कर्तुमर्हो महात्मनामेकशरीरभाजाम् ।
मीमांसहेत्वर्थविशेषतर्कैर्यस्तेषु कुर्यात्प्रविभेदमज्ञः ॥ ३८ ॥

स याति घोरं नरकं क्रमेण विभागकृद्द्वेषमतिर्दुरात्मा ।
या यस्य भक्तिः स तयैव नूनं देहं त्यजन्स्वं ह्यमृतत्वमेति ॥ ३९ ॥
सम्मोहयन्मूर्तिभिरत्र लोकं स्रष्टा च गोप्ता क्षयकृत्स देवः ।
तस्मान्न मोहात्मकमाविशेत द्वेषं न कुर्यात्प्रविभिन्नमूर्तिः ॥ ४० ॥
वाराहमीशानवरोऽप्यतोऽसौ रूपं समास्थाय जगद्विधाता ।
नष्टे त्रिलोकेऽर्णवतोयमग्ने विमार्गितोयौघमयेऽन्तरात्मा ॥ ४१ ॥
भित्त्वाऽर्णवं तोयमथान्तरस्थं विवेश पातालतलं क्षणेन ।
जले निमग्नां धरणीं समस्तां समस्पृशत्पङ्कजपत्रनेत्राम् ॥ ४२ ॥
विशीर्णशैलोत्पलशृङ्गकूटां वसुन्धरां तां प्रलये प्रलीनाम् ।
दंष्ट्रैकया विष्णुरतुल्यसाहसः समुद्दधार स्वयमेव देवः ॥ ४३ ॥
सा तस्य दंष्ट्राग्रविलम्बिताङ्गी कैलासशृङ्गाग्रगतेव ज्योत्स्ना ।
विभ्राजते साप्यसमानमूर्तिः शशाङ्कशृङ्गे च तडिद्विलग्ना ॥ ४४ ॥
तामुज्जहारार्णवतोयमग्नां करी निमग्नामिव हस्तिनीं हठात् ।
नावं विशीर्णामिव तोयमध्यादुदीर्णसत्त्वोनुपमप्रभावः ॥ ४५ ॥
स तां समुत्तार्य महाजलौघात्समुद्रमार्यो व्यभजत्समस्तम् ।
महार्णवेष्वेव महार्णवाम्भो निक्षेपयामास पुनर्नदीषु ॥ ४६ ॥
शीर्णांश्च शैलान्स चकार भूयो द्वीपान्समस्तांश्च तथार्णवांश्च ।
शैलोपलैर्यं विचिताः समन्ताच्छिलोच्चयांस्तान्स चकार कल्पे ॥ ४७ ॥
अनेकरूपं प्रविभज्य देहं चकार देवेन्द्रगणान्समस्तान् ।
मुखाच्च वह्निर्मनसश्च चन्द्रश्चक्षोश्च सूर्यः सहसा बभूव ॥ ४८ ॥
जज्ञेऽथ तस्येश्वरयोगमूर्तेः प्रध्यायमानस्य सुरेन्द्रसङ्घः ।
वेदाश्च यज्ञाश्च तथैव वर्णास्तथा हि सर्वौषधयो रसाश्च ॥ ४९ ॥
जगत्समस्तं मनसा बभूव यत्स्थावरं किञ्चिदिहाऽण्डजं वा ।
जरायुजं स्वेदजमुद्भिजं वा यत्किञ्चिदाकीटपिपीलकाद्यम् ॥ ५० ॥

ततो विजज्ञे मनसा क्षणेन अनेकरूपाः सहसा महेशः ।
चकार यन्मूर्तिभिरव्ययात्मा अष्टाभिराविश्य पुनः स तत्र ॥ ५१ ॥
लीलां चकाराऽथ समृद्धतेजा अतोऽत्र मे पश्यत एव विप्राः ।
तेषां मया दर्शनमेव सर्वं यावन्मुहूर्तात्समकारि भूप! ॥ ५२ ॥
कृत्वा त्वशेषं किल लीलयैव स देवदेवो जगतां विधाता ।
सर्वत्रदृक्सर्वग एव देवो जगाम चाऽदर्शनमादिकर्ता ५३ ॥
यत्तन्मुहूर्तादिह नामरूपं तावत्प्रपश्यामि जगत्तथैव ।
द्वीपैः समुद्रैरभिसम्भृतं हि नक्षत्रतारादिविमानकीर्णम् ॥ ५४ ॥
वियत्पयोदग्रहचक्रचित्रं नानाविधैः प्राणिगणैर्वृतं च ।
तां वै न पश्यामि महानुभावां गोरूपिणीं सर्वसुरेश्वरीं च ॥ ५५ ॥
क्व साम्प्रतं सेति विचिन्त्य राजन्विभ्रान्तचित्तस्त्वभवं तदैव ।
दिशो विभागानवलोकयान ऋते पुनस्तां कथमीश्वराङ्गीम् ॥
पश्यामि तामत्र पुनश्च शुभ्रां महाभ्रनीलां शुचिशुभ्रतोयाम् ।
वृक्षैरनेकैरुपशोभिताङ्गीं गजैस्तुरङ्गैर्विहगैर्वृतां च ॥ ५७ ॥
यथा पुरा तीरमुपेत्य देव्याः समास्थितश्चाप्यमरकण्टके तु ।
तथैव पश्यामि सुखोपविष्ट आत्मानमव्यग्रमवाप्तसौख्यम् ॥ ५८ ॥
तथैव पुण्यामलतोयवाहां दृष्ट्वा पुनः कल्पपरिक्षयेऽपि ।
अम्बामिवार्यामनुकम्पमानामक्षीणतोयां विरुजां विशोकः ॥ ५९ ॥
एवं महत्पुण्यतमं च कल्पं पठन्ति शृण्वन्ति च ये द्विजेन्द्राः ।
महावराहस्य महेश्वरस्य दिने दिने ते विमला भवन्ति ॥ ६० ॥
अशुभशतसहस्रं ते विधूय प्रपन्नास्त्रिदिवममरजुष्टं सिद्धगन्धर्वयुक्तम् ।
विमलशशिनिभाभिःसर्वएवाप्सरोभिःसहविविधविलासैःस्वर्गसौख्यं लभन्ते

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीनर्मदामाहात्म्ये वाराहकल्पवृत्तान्तवर्णनंनामैकोनविंशोऽध्यायः ।१९।

विंशोऽध्यायः

वाराहकल्पवृत्तान्तवर्णनम्

युधिष्ठिर उवाच

श्रुता मे विविधा धर्माः संहाराास्त्वत्प्रसादतः ।
कृता देवेन सर्वेण ये च दृष्टास्त्वयाऽनघ! ॥ १ ॥
साम्प्रतं श्रोतुमिच्छामि प्रभावं शार्ङ्गधन्वनः ।
त्वयाऽनुभूतं विप्रेन्द्र! तन्मे त्वं वक्तुमर्हसि ॥ २ ॥

श्रीमार्कण्डेय उवाच

अतः परं प्रवक्ष्यामि प्रजासंहारलक्षणम् । यच्चिह्नं दृश्यते तत्र यथाकल्पोविधीयत
उल्कापाताः सनिर्घाता भूमिकम्पस्तथैव च ।
पतते पांशुवर्षं च निर्घोषश्चैव दारुणः ॥ ४ ॥
यक्षकिन्नरगन्धर्वाः पिशाचोरगराक्षसाः । सर्वे तेप्रलयंयान्तियुगान्तेसमुपस्थिते
पर्वताः सागरा नद्यः सरांसि विविधानि च ।
वृक्षाः शोषं समायान्ति वल्लीजातं तृणानि च॥ ६ ॥
एवं हि व्याकुलीभूते सर्वौषधिजलोज्झिते । काष्ठभूते तु सञ्जातेत्रैलोक्येसचराचरे
यावत्पश्यामि मध्याह्ने स्नानकाल उपस्थिते ।
त्रैलोक्यं ज्वलनाकारं दुर्निरीक्ष्यं दुरासदम् ॥ ८ ॥
द्वौ सूर्यौपूर्वतस्तातपश्चिमोत्तरयोस्तथा । तथैव दक्षिणे द्वौ च सूर्यौदृष्टौप्रतापिनौ
द्वौ सूर्यौ नागलोकस्थौ मध्ये द्वौ गगनस्य च ।
इत्येते द्वादशादित्यास्तपन्ते सर्वतो दिशम् ॥ १० ॥
पृथिवीमदहन्सर्वां सशैलवनकाननाम् । नादग्धं दृश्यते किञ्चिद्वृतेरेवां च मां तथा
पृथिव्यां दह्यमानायां हविर्गन्धश्च जायते ।ततो मे शुष्यते गात्रं तृषाप्येवंदुरासदा

न हि विन्दामि पानीयं शोषितं च दिवाकरैः ।
यावत्कमण्डलुं वीक्षे शुष्कं तत्रापि तज्जलम् ॥ १३ ॥

ततोऽहंशोकसन्तप्तो विशेषात्क्षुत्तृषार्दितः । उत्पपातक्षितेरूर्ध्वं पश्यमानोदिवंप्रति
तावत्पश्यामि गगनेगृहंश्रृङ्गारभूषितम् । ततस्तज्ज्ञातुकामोऽहंप्रस्थितोराजसत्तम
प्राकारेण विचित्रेण कपाटार्गलभूषितम् । विचित्रशिखरोपेतंद्वारदेशमुपागतः ॥
षडशीतिसहस्राणि योजनानां समुच्छ्रये । तदर्धं तु पृथक्त्वेन काञ्चनंरत्नभूषितम्
तत्र मध्ये परां शय्यां पश्यामि नृपसत्तम! । शयोपरिशयानंतु पुरुषंदिव्यमूर्धजम्
विकुञ्चिताग्रकेशान्तंसमस्तंयोजनायतम् । मुकुटेनविचित्रेणदीप्तिकान्तेनशोभितम्
श्यामं कमलपत्राभंसुप्रभं च सुनासिकम् । सिंहास्यमायतभुजंगल्लश्मश्रुवराङ्कितम्
त्रिवलीसङ्गसुभगंकर्णकुण्डलभूषितम्। विशालाभंसुपीनाङ्गंपार्श्वस्वावर्तभूषितम्
शोभितं कटिभागेन विभक्तं जानुजङ्घयोः । पद्माङ्किततलंदेवमाताम्रसुनखांगुलिम्
मेघनादसुगम्भीरं सर्वावयवसुन्दरम् । शय्यामध्यगतंदेवमपश्यं पुरुषोत्तमम् ॥२३ ॥
शङ्खचक्रगदापाणिं शयानं दक्षिणेन तु । अक्षसूत्रोद्यतकरंसूर्यायुतसमप्रभम् ॥ २४ ॥

तं दृष्ट्वा भक्तिमान्देवं स्तोतुकामो व्यवस्थितः ।
जयेश! जय वागीश! जय दिव्याङ्गभूषण! ॥ २५ ॥

जय देवपते श्रीमन्साक्षाद्ब्रह्म सनातन! । तवलोका शरीरस्थास्त्वं गतिःपरमेश्वर!

त्वदाधारा हि देवेश सर्वे लोका व्यवस्थिताः ।
त्वं श्रेष्ठः सर्वसत्त्वानां त्वं कर्ता धरणीधरः ॥ २७ ॥
त्वं हौत्रमग्निहोत्राणां सूत्रमन्त्रस्त्वमेव च ।
गोकर्णं भद्रकर्णं च त्वं च माहेश्वरं पदम् ॥ २८ ॥
त्वं कीर्तिः सर्वकीर्तीनां दैन्यपापप्रणाशिनी ।
त्वं नैमिषं कुरुक्षेत्रं त्वं च विष्णुपदं परम् ॥ २९ ॥
त्वया तु लीलया देव पदाक्रान्ता च मेदिनी ।
त्वया बद्धो बलिर्देव! त्वयेन्द्रस्य पदं कृतम् ॥ ३० ॥

त्वं कलिर्द्वापरं देव त्रेता कृतयुगं तथा । प्रलम्बदमनश्च त्वं स्रष्टा त्वं च विनाशकृत्

त्वया वै धार्यते लोकास्त्वं कालः सर्वसङ्क्षयः ।
त्वया हि देव सृष्टास्ताः सर्वाः वै देवयोनयः ॥ ३२ ॥
त्वं पन्थाः सर्वलोकानां त्वं च मोक्षः परा गतिः ।
ब्रह्मा त्वदुद्भवो देवो रजोरूपः सनातनः ।
रुद्रः क्रोधोद्भवोऽप्येवं त्वं च सत्त्वे व्यवस्थितः ॥ ३३ ॥

एतच्चराचरं देव! क्रीडनार्थंत्वया कृतम् । एवं सन्तप्तदेहेन स्तुतो देवो मया प्रभुः
भक्त्यापरमयाराजन्सर्वभूतपतिः प्रभुः ।स्तुवन्वैतत्रपश्यामिवारिपूर्णांस्ततोघटान

ततो मया विस्मृता या तृषा सा वर्द्धिता पुनः ।
उपासर्पं ततस्तस्य पार्श्वं वै पुरुषस्य हि ॥ ३६ ॥
पानीयं पातुकामेन चिन्तितं च मया पुनः ।
नापश्यत हि मां चैष सुप्तोऽपि न च बुध्यते ॥ ३७ ॥

यस्तु पापेनसम्मूढः सुखं सुप्तं प्रबोधयेत् । जायतेतस्य पापस्यब्रह्महत्याफलं महत

एवं सञ्चिन्त्यमाने तु द्वितीयो ह्यागतः पुमान् ।
नेक्षते जल्पते किञ्चिद्वामस्कन्धे मृगाजिनी ॥ ३९ ॥

जटी कमण्डलुधरोदण्डीमेखलयावृतः । भस्मोन्मृदितसर्वाङ्गोमहातेजास्त्रिलोचनः

यावत्तं स्तोतुकामोऽहमपश्यं स्वच्छचक्षुषा ।
तावत्सर्वाङ्गसम्भूतया महत्या रूपसम्पदा ॥ ४१ ॥
अपश्यं सम्भृतां नारीं सर्वाभरणभूषिताम् ।
दृष्ट्वा तां पतितो भूमौ जयस्वेति ब्रुवंस्ततः ॥ ४२ ॥

जय रुद्राङ्गसंभूते जयब्राह्मिसनातनि । जय कौमारिमाहेन्द्रि वैष्णवीवारुणीतथा
जयकौबेरि सावित्रि जय धात्रि वरानने । तृष्णया तप्तदेहस्य रक्षां कुरु चराचरे

श्रीदेव्युवाच

प्रसन्ना विप्रशार्दूल तव वाक्यैःसुशोभनैः । वर्त्तते मानसे यत्तेमया ज्ञातं द्विजोत्तम

शृणु विप्रममाऽप्यस्तिव्रतमेतत्सुदारुणम् । स्त्रीलघुत्वान्मयारब्धंदुष्करंमन्दमेधया
यदि भावी च मे पुत्रो धर्मिष्ठो लोकविश्रुतः ।
विप्रस्य तु स्तनं दत्त्वा पश्चाद्दास्यामि बालके ॥ ४७ ॥
स मे पुत्रःसमुत्पन्नोयथोक्तो मे महामुने! । स्तनंपिबत्वंविप्रेन्द्रयदिजीवितुमिच्छसि

श्रीमार्कण्डेय उवाच

अकार्यमेतद्विप्राणां यस्त्वमं पिबते स्तनम् । पुनश्चैवोपनयनं व्रतसिद्धिंनगच्छति
ब्राह्मणत्वंत्रिभिर्लोकैर्दुर्लभंपद्मलोचने । संस्कारैःसंस्कृतोविप्रोयैश्चजायेततच्छृणु
प्रथमं चैव नारीषु संस्कारैर्बीजवापनम् । बीजप्रक्षेपणादेव वीजक्षेपः स उच्यते ॥
तदन्ते च महाभागेगर्भाधानंद्वितीयकम् । पुंसवनं तृतीयं तु सीमन्तं च चतुर्थकम्
पञ्चमं जातकर्म स्यान्नाम वै षष्ठमुच्यते । निष्कामः सप्तमश्चैव ह्यन्नप्राशनमष्टमम् ॥
नवमं वै चूडकर्म दशमं मौञ्जिबन्धनम् ।ऐषिकं दार्विकं चैव सौमिकं।भौमिकं तथा
पत्नीसंयोजनं चान्यद्दैवकर्म ततः परम् । मानुष्यं पितृकर्म स्याद्दशमाष्टासुशोभने
भूतं भव्यं तथेष्टंच पार्वणश्च ततः परम् ॥ ५६ ॥
श्राद्धं श्रावण्यामाग्रयणश्च चैत्राश्वयुज्यां दशपौर्णमास्याम् ।
निरूढपशुसवनसौत्रामण्यग्निष्टोमात्यग्निष्टोमाः ॥ ५७ ॥
षोडशीवाजपेयातिरात्राप्तोर्यामोदशवाजपेयाः ।
सर्वभूतेषु क्षान्तिरनसूया शौचमङ्गलमकार्पण्यमस्पृहेति ॥ ५८ ॥
एभिरष्टचत्वारिंशद्भिः संस्कारैः संस्कृतो ब्राह्मणो भवति ॥ ५९ ॥
एवं ज्ञात्वा महाभागे! न तु मां पातुमर्हसि ।
शिशुपेयं स्तनं भद्रे! कथं वै मद्विधः पिबेत् ॥ ६० ॥
ममैतद्वचनं श्रुत्वा नारी वचनमब्रवीत् ॥ ६१ ॥
यदि त्वं न पिबेः स्तन्यम्पयो बालो मरिष्यति ।
श्रूयते त्रिषु लोकेषु वेदेषु च स्मृतिष्वपि ।
मुच्यते सर्वपापेभ्यो भ्रूणहत्या न मुञ्चति ॥ ६२ ॥

भवित्रीतवहत्या चमहाभागवतःपुनः । जन्मानि चशतान्यष्टौक्लिश्यतेभ्रूणहत्यया
मृतः शुनत्वंचाप्नोतिवर्षाणां तु शतत्रयम् । ततस्तस्यक्षयेजातेकाकयोनिंव्रजेत्पुनः
तत्रापि च शतान्यष्टौक्लिश्यते पापकर्मणि । वराहो दशजन्मानितदन्तेजायतेकृमिः
ततश्चारोहिणीं प्राप्य गोगजाश्वनृजन्मभाक् ।
श्रूयते श्रुतिशास्त्रेषु वेदेषु च परन्तप! ॥ ६६ ॥
सर्वपापाधिकम्पापम्बालहत्या द्विजोत्तम! । बालहत्यायुतोविप्रःपच्यतेनरकेध्रुवम्
वर्षाणि च शतान्यष्टौ प्राप्नोति यमयातनाम् ।
तस्मादल्पतरो दोषः पिबतो मे स्तनं तव ॥ ६८ ॥
तथैवापिबतःपापंजायतेबहुवार्षिकम् । क्षुधातृषाविरामस्ते पुण्यं चपिबतःस्तनम्
अतो न चेतः सन्दिग्धं कर्तव्यमिह कर्हिचित् ।
एहि विप्र! यथाकामं बालार्थे पिब मे स्तनम् ॥ ७० ॥
ततोऽहं वचनं श्रुत्वास्तनं पातुंसमुद्यतः । नच तृप्तिंविजानामिपिबतःस्तनमुत्तमम्
त्रिंशद्वर्षसहस्राणि भारतैवं शतानि च । ततःप्रबुद्धोत्सङ्गेऽहंमायानिद्राविमोहितः
निद्राविगतमोहोऽहंयावत्पश्यामि पाण्डव । तावत्सुप्तंनपश्यामिनचतंबालकंविभो
चतुरस्तांश्च वै कुम्भान्पश्यामि तत्र भारत ।
न च पश्यामि तां देवीं गता वै कुत्रचिच्च ते ॥ ७४ ॥
एवं विमृश्यमानस्य चिन्तयानस्य तिष्ठतः । ईषद्धसितयावाचा देवीवचनमब्रवीत्

श्रीदेव्युवाच

कृष्णः स पुरुषः सुप्तो द्वितीयोऽप्यागतो हरः ।
ये चत्वारश्च ते कुम्भाः समुद्रास्ते द्विजोत्तम! ॥ ७६ ॥
यश्चबालस्त्वया दृष्टो ब्रह्मालोकपितामहः । अहं च पृथिवीज्ञेया सप्तद्वीपासपर्वता
या गता त्वां परित्यज्य भूतले सुप्रतिष्ठिता ।
इमां च प्रेक्षसे विप्र! नर्मदां सरितां वराम् ॥ ७८ ॥
सर्वसत्त्वोपकाराय बृहते पुण्यलक्षणा । रेवानदी तु विख्याता न मृतातेन नर्मदा

एवं ज्ञात्वा शमं गच्छ स्वस्थो भव महामुने! ।
इत्युक्त्वा मां तदा देवी तत्रैवाऽन्तरधीयत ॥ ८० ॥
एवं हि शेते भगवान्सत्त्वस्थः प्रलये सदा ।
सत्त्वरूपो महादेवो यदाधारे जगत्स्थितम् ॥ ८१ ॥
एवं मयानुभूतं तद्दृष्टमाश्चर्यमुत्तमम् । सर्वपापहरं पुण्यं कथितं ते नरोत्तम! ॥ ८२ ॥
विष्णोश्चरितमित्युक्तं यत्त्वया परिपृच्छितम् ।
भूय एव महाबाहो! किमन्यच्छ्रोतुमिच्छसि ॥ ८३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे वाराहकल्पवृत्तान्तवर्णनं नाम विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

कपिलासरित्सम्भववर्णनम्

युधिष्ठिर उवाच

श्रुतं मेविविधाश्चर्यंत्वत्प्रसादाद्द्विजोत्तम । भूयश्चश्रोतुमिच्छापितन्मेकथयसुव्रत!
कथमेषा नदी पुण्या सर्वनदीषुचोत्तमा । नर्मदानामविख्याताभूयो मे कथयाऽनघ!

श्रीमार्कण्डेय उवाच

नर्मदा सरितां श्रेष्ठासर्वपापप्रणाशिनी । तारयेत्सर्वभूतानि स्थावराणिचराणिच
नर्मदायास्तु माहात्म्यं यत्पूर्वेण मया श्रुतम् ।
तत्तेऽहं सम्प्रवक्ष्यामि शृणुष्वैकमना नृप! ॥ ४ ॥
गङ्गा कनखले पुण्या कुरुक्षेत्रेसरस्वती । ग्रामे वा यदि वारण्ये पुण्या सर्वत्रनर्मदा
त्रिभिः सारस्वतं तोयंसप्ताहेनतु यामुनम् । सद्यः पुनातिगांगेयंदर्शनादेवनार्मदम्
कलिङ्गदेशात्पश्चार्द्धे पर्वतेऽमरकण्टके । पुण्या च त्रिषु लोकेषु रमणीया पदेपदे ॥

तत्र देवाश्चगन्धर्वाऋषयश्च तपोधनाः । तपस्तप्त्वामहाराज सिद्धिंपरमिकांगताः
तत्र स्नात्वा नरो राजन्नियमस्थो जितेन्द्रियः ।
उपोष्य रजनीमेकां कुलानां तारयेच्छतम् ॥ ९ ॥
सिद्धिक्षेत्रं परं तात! पर्वतो ह्यमरंकटः ।
सर्वदेवाश्रितो यस्माद्दृषिभिः परिसेवितः ॥ १० ॥
सिद्धविद्याधरा भूतगन्धर्वाः स्थानमुत्तमम् ।
दृश्यादृश्याश्च राजेन्द्र! सेवन्ते सिद्धिकाङ्क्षिणः ॥ ११ ॥
अहं च परमं स्थानं ततः प्रभृति संश्रितः ।
अत्र प्रणवरूपो वै स्थाने तिष्ठत्युमापतिः ॥ १२ ॥
श्रीकण्ठः सगणः सर्वभूतसङ्घैर्निषेवितः ।
अस्माद्गिरिवराद्भूप! वक्ष्ये तीर्थस्य विस्तरम् ॥ १३ ॥
यानि सन्तीहतीर्थानिपुण्यानिनृपसत्तम! । यानियानीहतीर्थानिनर्मदायास्तटद्वये
न तेषां विस्तरं वक्तुं शक्तोब्रह्माऽपिभूपते । योजनानां शतं साग्रं श्रूयतेसरिदुत्तमा
विस्तरेण तु राजेन्द्र अर्धयोजनमायता । षष्टितीर्थसहस्राणि षष्टिकोट्यस्तथैवच
पर्वतादुदधिं यावदुभे कूले न संशयः ॥ १७ ॥
सप्तषष्टि सहस्राणि सप्तषष्टिशतानि च ।
सप्तषष्टिस्तथा कोट्यो वायुस्तीर्थानि चाब्रवीत् ॥ १८ ॥
परं कृतयुगे तानि यान्ति प्रत्यक्षतां नृप! । पश्यन्ति मानवाः सर्वेसततं धर्मबुद्धयः
यथायथा कलिर्घोरो वर्ततेदारुणोनृप । तथातथाल्पतांयान्तिहीनसत्वायतोनराः
जालेश्वरादितीर्थानि पर्वतेऽस्मिन्नराधिप । पितृतृप्तिप्रदान्याहुःस्वर्गमोक्षप्रदानिच
श्रेष्ठं दारुवनं तत्र चरुकासङ्गमः शुभः । उत्तरे नर्मदायास्तु चरुकेश्वरमुत्तमम् ॥
दारुकेश्वरतीर्थं च व्यतीपातेश्वरं तथा । पातालेश्वरतीर्थं च कोटियज्ञं तथैव च ॥
इति चैवोत्तरे कूले रेवाया नृपसत्तम! । अमरेश्वरपार्श्वे च लिङ्गान्यष्टोत्तरं शतम् ॥
वरुणेश्वरमुख्यानि सर्वपापहराणि च ॥ २५ ॥

मान्धातृपुरपार्श्वे च सिद्धेश्वरयमेश्वरौ । ॐकारात्पूर्वभागे च केदारं तीर्थमुत्तमम्
तत्समीपे महाराज स्वर्गद्वारमघापहम् । नाम्ना ब्रह्मेश्वरं पुण्यं सप्तसारस्वतं पुरः
रुद्राष्टकं च सावित्रं सोमतीर्थं तथैव च । एतानि दक्षिणे तीरे रेवाया भरतर्षभ!॥

अस्मिंस्तु पर्वते तात रुद्राणां कोटयः स्थिताः ।
स्नानैस्तुष्टिर्भवेत्तेषां गन्धमाल्यानुलेपनैः ॥ २६ ॥
प्रीतास्तेऽपि भवन्त्यत्र रुद्रा राजन्न संशयः ।
जपेन पापसंशुद्धिर्ध्यानेनानन्त्यमश्नुते ॥ ३० ॥

दानेन भोगानाप्नोतिइत्येवं शङ्करोऽब्रवीत् । पर्वतात्पश्चिमेदेशे स्वयं देवो महेश्वरः

स्थितः प्रणवरूपोऽसौ जगदादिः सनातनः ॥ ३१ ॥
तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः ।
पितृकार्यं प्रकुर्वीत विधिदृष्टेन कर्मणा ॥ ३२ ॥

तिलोदकेन तत्रैव तर्पयेत्पितृदेवताः । आसप्तमं कुलं तस्य स्वर्गेमोदति पाण्डव! ॥
आत्मना सह भोगांश्च विविधाँल्लभते सुखी । षष्टिवर्षसहस्राणि क्रीडतेसुरपूजितः
मोदते सुचिरं कालं पितृपूजाफलर्धितः । ततः स्वर्गात्परिभ्रष्टोजायते विमले कुले

धनवान्दानशीलश्च नीरोगो लोकपूजितः ।
पुनः स्मरति तत्तीर्थं गमनं कुरुते पुनः ॥ ३६ ॥

द्वितीये जन्मनिभवेद्भद्रस्यानुचरोत्कटः । तथैव ब्रह्मचर्येणसोपवासो जितेन्द्रियः
सर्वहिंसानिवृत्तस्तु लभतेफलमुत्तमम् । एवं धर्मसमाचारो यस्तुप्राणान्परित्यजेत्
तस्य पुण्यफलं यद्वै तन्निबोध नराधिप! । शतं वर्षसहस्राणिस्वर्गे मोदतिपाण्डव

अप्सरोगणसङ्कीर्णे दिव्यशब्दानुनादिते ।
दिव्यगन्धानुलिप्ताङ्गो दिव्यालङ्कारभूषितः ॥ ४० ॥
क्रीडते दैवतैः सार्द्धं सिद्धगन्धर्वसंस्तुतः ।
ततः स्वर्गात्परिभ्रष्टो राजा भवति वीर्यवान् ॥ ४१ ॥

हस्त्यश्वरथयानैश्च धर्मज्ञः शास्त्रतत्परः । गृहे स्तम्भशताकीर्णे सौवर्णे रजतान्विते

सप्ताष्टभूमिसुद्वारे दासीदाससमाकुले । मत्तमातङ्गनिःश्वासैर्वाजिह्रेषितनादितैः
क्षुभ्यतेतस्य तद्द्वारमिन्द्रस्य भुवनं यथा । राजराजेश्वरःश्रीमान्सर्वस्त्रीजनवल्लभः

तस्मिन्गृहे वसित्वा तु क्रीडाभोगसमन्वितः ।
जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ४५ ॥

एवं तेषां भवेत्सर्वं ये मृता ह्यमरेश्वरे । अग्निप्रवेशं यः कुर्याद्भक्त्या ह्यमरकण्टके ॥

स मृतः स्वर्गमाप्नोति यास्यते परमां गतिम् ।
स्नानं दानं जपो होमः शुभं वा यदि वाऽशुभम् ॥ ४७ ॥
पुराणे श्रूयते राजन्सर्वं कोटिगुणं भवेत् ।
तस्यास्तीरे तु ये वृक्षाः पतिताः कालपर्यये ॥ ४८ ॥
नर्मदातोयसंस्पृष्टास्ते यान्ति परमां गतिम् ।
अनिवृत्तिका गतिस्तस्य पवनस्याऽम्बरे यथा ॥ ४६ ॥
पतनं कुरुते यस्तु तस्मिंस्तीर्थे नराधिप! ।
कन्यास्त्रीणि सहस्राणि पाताले भोगभागिनः ॥ ५० ॥
तिष्ठन्ति भवने तस्य प्रेषणे प्रार्थयन्ति च ।
दिव्यभोगैः सुसम्पन्नः क्रीडते कालमीप्सितम् ॥ ५१ ॥

पृथिव्यां ह्यासमुद्रायां तादृशो नैव जायते । यादृशोऽहं नरश्रेष्ठ पर्वतोऽमरकण्टकः
तत्र तीर्थं तु विज्ञेयं पर्वतस्यानु पश्चिमे । ह्रदो जालेश्वरोनाम त्रिषुलोकेषुविश्रुतः
तत्र पिण्डप्रदानेनसन्ध्योपासनकेन तु । पितरो द्वादशाब्दानितर्पितास्तुभवन्तिवै
दक्षिणे नर्मदातीरे कपिला तु महानदी । सरलार्जुनसंच्छन्नाखदिरैरुपशोभिता ॥
माधवीसल्लकीभिश्चवल्लीभिश्चाप्यलङ्कृता ।श्वापदैर्गर्जमानैश्चगोमायुवानरादिभिः
पक्षिजातिविशेषैश्च नित्यं प्रमुदितानृप । साग्रं कोटिशतंतत्रऋषीणामितिशुश्रुम
तपस्तप्त्वा गतं मोक्षं येषां जन्म न चागमः । येन तत्रतपस्तप्तंकपिलेन महात्मना

तत्र तच्चाऽभवत्तीर्थं पुण्यं सिद्धनिषेवितम् ।
ये न सा कापिलैस्तात सेविता ऋषिभिः पुरा ॥ ५६ ॥

तेन सा कपिलानाम गीता पापक्षयङ्करी। तत्रकोटि शतं साग्रं तीर्थानाममरेश्वरे

अहोरात्रोषितो भूत्वा मुच्यते सर्वकिल्बिषैः।

दानं च विधिवद् दत्त्वा यथाशक्त्या द्विजोत्तमे ॥ ६१ ॥

ईश्वरानुग्रहात्सर्वं तत्र कोटिगुणं भवेत्। यस्मादनक्षरं रूपं प्रणवस्येह भारत! ॥

शिवस्वरूपस्य ततः कृतमात्राक्षरं भवेत्। तिर्यञ्चः पशवश्चैववृक्षा गुल्मलतादयः॥

तेऽपि तत्र क्षयं याताः स्वर्गं यान्ति न संशयः।

विशल्या तत्र या प्रोक्ता तत्रैव तु महानदी ॥ ६४ ॥

स्नात्वा दत्त्वा यथान्यायं तत्राऽपि सुकृती भवेत्।

तत्र देवगणाः सर्वे सकिन्नरमहोरगाः ॥ ६५ ॥

यक्षराक्षसगन्धर्वा ऋषयश्च तपोधनाः। सर्वे समागतास्तां वै पश्यन्ति ह्यमरेश्वरे

तैश्च सर्वैः समागम्य वन्दितौ तौ शुभौ करौ।

पुरा युगे महाघोरे सर्वलोकभयङ्करे ॥ ६७ ॥

नर्मदायाः सुतस्तत्र सशल्योविशलीकृतः। सर्वदेवैश्चऋषिभिर्विशल्यातेनसास्मृता

युधिष्ठिर उवाच

उत्पन्ना तु कथं तात! विशल्या कपिला कथम्।

कथं वा नर्मदापुत्रः शल्ययुक्तोऽभवन्मुने! ॥ ६९ ॥

आश्चर्यभूतं लोकस्य श्रोतुमिच्छामि सुव्रत! ॥ ७० ॥

श्रीमार्कण्डेय उवाच

पुरा दाक्षायणीनामसहिताशूलपाणिना। क्रीडित्वानर्मदातोयेपरया च मुदानृप

जलादुत्तीर्य सहसावस्त्रमन्यत्समाहरत्। देव्यास्तुस्नानवस्त्रं तत्पीडितंलीलयानृप

सहितानुचरीभिस्तु इन्द्रायुधनिभं भृशम्।

तस्मिन्निष्पीड्यमाने तु वारि यन्निःसृतं तदा ॥ ७३ ॥

तस्मादियं सरिज्जज्ञे कपिलाख्या महानदी।

संयोगादङ्गरागस्य वस्त्रोद्यत्कपिलं जलम् ॥ ७४ ॥

गलितं तेन कपिला वर्णतो नामतोऽभवत्।

तथा गन्धरसैर्युक्तं नानापुष्पैस्तु वासितम् ॥ ७५ ॥

नानावर्णारुणं शुभ्रं वस्त्राद्यद्वारिनिःसृतम्। पीड्यमानंकरैःशुभ्रैस्तैस्तुपल्लवकोमलैः

कपिलंजलमिश्रैस्तुतस्मादेशासरिद्वरा। कपिलाचोच्यतेतज्ज्ञैःपुराणार्थविशारदैः

एषा वै वस्त्रसम्भूता नर्मदातोयसम्भवा। महापुण्यतमा ज्ञेया कपिला सरिदुत्तमा

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये कपिलासरित्सम्भववर्णनंनामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

विशल्यासम्भववर्णनम्

श्रीमार्कण्डेय उवाच

अतः परं प्रवक्ष्यामि साविशल्या ह्यभूद्यथा। आश्चर्यभूतालोकस्यसर्वपापक्षयङ्करी

ब्रह्मणो मानसः पुत्रोमुख्योह्यग्निरजायत। मुख्योवह्निरितिप्रोक्तऋषिःपरमधार्मिकः

तस्य स्वाहाऽभवत्पत्नी स्मृता दाक्षायणी तु सा।

तस्यां मुख्या महाराज! त्रयः पुत्रास्तदाऽभवन् ॥ ३ ॥

अग्निराहवनीयस्तुदक्षिणाग्निस्तथैव च। गार्हपत्यस्तृतीयस्तुत्रैलोक्यंयैश्चधार्यते

तथा वै गार्हपत्योग्निर्जज्ञे पुत्रद्वयं शुभम्। पत्रकः शङ्कुनामा च तावुभावग्निसत्तमौ

वसन्नग्निर्नदीतीरे समाश्रित्य महत्तपः। रुद्रमाराधयामास जितात्मासुसमाहितः

दशवर्षसहस्राणि चचारविपुलं तपः। तमुवाच महादेवः प्रसन्नोवृषभध्वजः ॥ ७ ॥

भोभो ब्रूहि महाभागयत्तेमनसिवर्तते। दाता ह्यहमसन्देहोयद्यपि स्यात्सुदुर्लभम्

अग्निरुवाच

नर्मदेयं महाभागा! सरितोयाश्चषोडश। भवन्तु ममपत्न्यस्तास्त्वत्प्रसादान्महेश्वर

तासु वै चिन्तितान्पुत्रानग्न्यानुत्पादयाम्यहम् ।
एष एव वरो देव दीयतां मे महेश्वर! ॥ १० ॥

ईश्वर उवाच

एतास्तु धिष्णिनाम्न्यो वै भविष्यन्ति सरिद्वराः
पत्न्यस्तव विशालाक्ष्यो वेदे ख्याता न संशयः ॥ ११ ॥
तासां पुत्रा भविष्यन्ति ह्यग्नयो येऽध्वरे स्मृताः ।
धिष्ण्यानाम सुविख्याता यावदाभूतसम्प्लवम् ॥ १२ ॥

एवमुक्त्वा महादेवस्तत्रैवाऽन्तरधीयत । नर्मदा च सरिच्छ्रेष्ठा तस्यभार्या बभूवह
कावेरी कृष्णवेणीचरेवाचयमुनातथा । गोदावरीवितस्ता च चन्द्रभागाइरावती
विपाशा कौशिकी चैव सरयूः शतरुद्रिका ।
शिप्रा सरस्वती चैव ह्रादिनी पावनी तथा ॥ १५ ॥
एताः षोडश नद्यो वै भार्यार्थं सम्व्यवस्थिताः ।
तदाऽऽत्मानं विभज्याऽऽशु धिष्णीषु स महाद्युतिः ॥ १६ ॥
व्यभिचारात्तु भर्त्तुर्वै नर्मदाद्यासु धिष्णिषु ।
उत्पन्नाः शुचयः पुत्राः सर्वे ते धिष्ण्यपाः स्मृताः ॥ १७ ॥
तस्याश्च नर्मदायास्तु धिष्णीन्द्रोनाम विश्रुतः ।
बभूव पुत्रो बलवान्रूपेणाऽप्रतिमो नृप! ॥ १८ ॥

ततो देवासुरं युद्धमभवल्लोमहर्षणम् । मयतारकमित्येवं त्रिषु लोकेषु विश्रुतम्
तत्र दैत्यैर्महाघोरैर्मयतारपुरोगमैः । ताडितास्तेसुरास्त्रस्ताविष्णुं वै शरणं ययुः
त्रायस्व नो हृषीकेश! घोरादस्मान्महाभयात् ।
दैत्यान्सर्वान्संहरस्व मयतारपुरोगमान् ॥ २१ ॥

एवमुक्तः स भगवान्दिशो दश व्यलोकयत् । ततो भगवता दृष्टौ रणेपावकमारुतौ
आहूतौ विष्णुना तौ तु सकाशं जग्मतुः क्षणात् ।
स्थितौ तौ प्रणतौ चाग्रे देवदेवस्य धीमतः ॥ २३

ततो धिष्णिः पावकेन्द्रो देवेनोक्तो महात्मना ।
निर्द्दहेमान्महाघोरान्नार्मदेयमहासुरान् ॥ २४ ॥

अथैवमुक्तौ तौ देवौ रणे पावकमारुतौ । दैत्यान्ददहतुः सर्वान्मयतारपुरोगमान् ॥
दह्यमानास्तु ते सर्वे शस्त्रैरग्निं त्ववेष्टयन् । दिव्यैरग्न्यर्कसङ्काशैः शतशोऽथसहस्रशः
तांश्चाग्निःशस्त्रनिकरैर्निर्द्दहदाहमहासुरान् । ज्वालामालाकुलंसर्ववायुनानिर्मितंतदा
दह्यमानास्ततो दैत्या अग्निज्वालासमावृताः ।
प्रविश्य पातालतलं जले लीनाः सहस्रशः ॥ २८ ॥

ततः कुमारमग्निं तु नर्मदापुत्रमव्ययम् । पूजयित्वा सुराः सर्वेजग्मुस्तेत्रिदशालयम्
सशल्यस्तु महातेजारेवापुत्रोवृतोऽग्निभिः । नर्मदामागतः क्षिप्रंमातरंद्रष्टुमुत्सुकः
तं दृष्ट्वा पुत्रमायान्तं शस्त्रौघेण परिक्षतम् ।
नर्मदा पुण्यसलिला अभ्युत्थाय सुविस्मिता ॥ ३१ ॥

पर्यष्वजत बाहुभ्यां प्रस्नवापीडितस्तनी । सशल्यं पुत्रमादायकापिलंह्रदमाविशत्
प्रविष्टमात्रे तु ह्रदे कापिलेपापनाशिनि । सशल्यं तं विशल्यंचक्षणात्कृतवतीतदा
स विशल्योऽभवद्यस्मात्प्राप्य तस्याः शिवं जलम् ।
कपिला नामतस्तेन विशल्या चोच्यते बुधैः ॥ ३४ ॥
अन्येऽपि तत्र ये स्नाताः शुचयस्तु समाहिताः ।
पापशल्यैः प्रमुच्यन्ते मृता यान्ति सुरालयम् ॥ ३५ ॥
एतत्ते सर्वमाख्यातं यत्पृष्टोऽहं पुरा त्वया ।
उत्पत्तिकारणं तात! विशल्याया नरेश्वर! ॥ ३६ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये विशल्यासम्भवोनाम द्वाविंशोऽध्यायः ॥ २२

त्रयोविंशोऽध्यायः

विशल्यासङ्गममाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तत्रैव सङ्गमे राजन्! भक्त्या परमया नृप! ।
प्राणास्त्यजन्ति ये मर्त्यास्ते यान्ति परमां गतिम् ॥ १ ॥
सन्न्यस्तसर्वसङ्कल्पो यस्तु प्राणान्परित्यजेत् ।
अमरेश्वरमासाद्य स स्वर्गे नियतं वसेत् ॥ २ ॥

शैलेन्द्रं यः समासाद्य आत्मानं मुञ्चतेनरः । विमानेनार्कवर्णेनसगच्छेदमरावतीम्
नरं पतन्तमालोक्य नगादमरकण्टकात् । ब्रुवन्त्यप्सरसः सर्वा मम भर्त्ता भवेदिति

समं जलं धर्मविदो वदन्ति सारस्वतं गाङ्गमिति प्रबुद्धाः ।
तस्योपरिष्टात्प्रवदन्ति तज्ज्ञा रेवाजलं नात्र विचारणाऽस्ति ॥ ५ ॥
अनेकविद्याधरकिन्नराद्यै रध्यासितं पुण्यतमाधिवासैः ।
रेवाजलं धारयतो हि मूर्ध्नां स्थानं सुरेन्द्राधिपतेः समीपे ॥ ६ ॥

नर्मदा सर्वदा सेव्या बहुनोक्तेन किं नृप! । यदीच्छेन्न पुनर्द्रष्टुं घोरंसंसारसागरम्
त्रयाणामपि लोकानांमहतीपावनीस्मृता । यत्रतत्रमृतस्यापिध्रुवंगाणेश्वरीगतिः

अनेकयज्ञायतनैर्वृताङ्गी न ह्यत्र किञ्चिद्यदतीर्थमस्ति ।
तस्यास्तु तीरे भवता यदुक्तं तपस्विनो वाप्यतपस्विनो वा ॥ ९ ॥
म्रियन्ति ये पापकृतोमनुष्यास्ते स्वर्गमायान्ति यथाऽमरेन्द्राः ॥ १० ॥

एवं तु कपिला चैव विशल्याराजसत्तम! । ईश्वरेणपुरासृष्टालोकानांहितकाम्यया
तत्रस्नात्वानरोराजन्सोपवासोजितेन्द्रियः। अश्वमेधस्यमहतोऽसंशयंफलमाप्नुयात्

अनाशकं च यः कुर्यात्तस्मिंस्तीर्थे नराधिप! ।
सर्वपापविनिर्मुक्तो याति वै शिवमन्दिरम् ॥ १३ ॥

पृथिव्यां सागरान्तायां स्नानदानेन यत्फलम् ।
विशल्यासङ्गमे स्नात्वा सकृत्तत्फलमश्नुते ॥ १४ ॥

एवं पुण्या पवित्रा च कथिता तव भूपते । भूयोमांपृच्छसिचयत्तच्चैवकथयाम्यहम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे विशल्यासङ्गममाहात्म्यवर्णनंनाम त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

करनर्मदासङ्गममाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

सङ्गमः करनर्मदयोः पुरे मान्धातृसञ्ज्ञिते ।
गत्वा स्नात्वा तर्पयित्वा पितॄन्विष्णुपुरं नयेत् ॥ १ ॥

मर्द्दयित्वाकरौ पूर्वं विष्णुर्दैत्यजिघांसया । चक्रं जग्राहतत्रैव स्वेदाज्जातासरिद्वरा

सङ्गता रेवया तत्र स्नात्वा पापैः प्रमुच्यते ॥ ३ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये करनर्मदासङ्गममाहात्म्यवर्णनंनाम-चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

नीलगङ्गासङ्गममाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ॐकारात्पूर्वभागे वै सङ्गमो लोकविश्रुतः। रेवया सङ्गता यत्र नीलगङ्गानृपोत्तम

तत्र स्नात्वा जपित्वा च कोऽर्थोऽलभ्यो भवेद्भुवि।

षष्ठिवर्षसहस्राणि नीलकण्ठपुरे वसेत् ॥ २ ॥

तर्पयित्वा पितॄञ्छ्राद्धेतिलमिश्रैर्जलैरपि। उद्धरेदात्मना सार्द्धं पुरुषानेकविंशतिम्

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये नीलगङ्गायाः सङ्गममाहात्म्यवर्णनंनाम-पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः

मधूकतृतीयाव्रतविधानवर्णनम्

युधिष्ठिर उवाच

जालेश्वरेऽपि यत्प्रोक्तंत्वयापूर्वंद्विजोत्तम। तत्कथंतु भवेत्पुण्यमृषिसिद्धनिषेवितम्

श्रीमार्कण्डेय उवाच

जालेश्वरात्परं तीर्थंनभूतंन भविष्यति। तस्योत्पत्तिंकथयतःशृणु त्वं पाण्डुनन्दन

पुरा ऋषिगणाः सर्वेसेन्द्राश्चैवमरुद्गणाः। तापिताअसुरैः सर्वैः क्षयंनीताह्यनेकशः

बाणासुरप्रभृतिभिर्जम्भशुम्भपुरोगमैः। वध्यमाना ह्यनेकैश्च ब्रह्माणं शरणं गताः

विमानैः पर्वताकारैर्हयैश्चैव गजोपमैः। स्यन्दनैर्नगराकारैः सिंहशार्दूलयोजितैः

कच्छपैर्मकरैश्चान्ये जग्मुरन्ये पदातयः। प्राप्य ते परमं स्थानमशक्यं यदधार्मिकैः

दृष्ट्वा पद्मोद्भवं देवंसर्वलोकस्य शङ्करम्। तेसर्वे तत्र गत्वा तु स्तुतिंचक्रुःसमाहिताः

देवा ऊचुः

जयामेय जयाभेद जय सम्भूतिकारक!। पद्मयोने सुरश्रेष्ठ त्वां वयं शरणं गताः ॥

तच्छ्रुत्वा तु वचोदेवो देवानां भावितात्मनाम्।

मेघगम्भीरया वाचा प्रत्युवाच पितामहः ॥ ६ ॥

कथो ह्यागमनंदेवाःसर्वेषां चविवर्णता। केनावमानिताः सर्वे शीघ्रंकथयतामराः

देवा ऊचुः

बाणोनाम महावीर्यो दानवोबलदर्पितः। तेनास्माकं हृतं सर्वंधनरत्नैर्वियोजिताः

देवानांवचनंश्रुत्वाब्रह्मालोकपितामहः। चिन्तयामासदेवेशस्तस्यनाशाययाक्रिया

अवध्यो दानवः पापः सर्वेषां वै दिवौकसाम्।

मुक्त्वा तु शङ्करं देवं न मया न च विष्णुना ॥ १३ ॥

तत्रैव सर्वे गच्छामो यत्र देवो महेश्वरः। सगतिश्चैव सर्वेषां विद्यतेऽन्यो नकश्चन

एवमुक्त्वा सुरैः सर्वैर्ब्रह्मा वेदविदांवरः। ब्राह्मणैः सह विद्वद्भिर्गतो यत्र महेश्वरः

स्तुतिभिश्च सुपुष्टाभिस्तुष्टाव परमेश्वरम् ॥ १६ ॥

देवा ऊचुः

जय त्वं देवदेवेश! जयोमार्द्धशरीरधृक्!।

वृषासन! महाबाहो शशाङ्ककृतभूषण! ॥ १७ ॥

नमः शूलाग्रहस्ताय नमः खट्वाङ्गधारिणे। जय भूतपते देव! दक्षयज्ञविनाशन ॥

पञ्चाक्षर नमो देव पञ्चभूतात्मविग्रह। पञ्चवक्त्रमयेशान वेदैस्त्वं तु प्रगीयसे ॥

सृष्टिपालनसंहारांस्त्वं सदाकुरुषे नमः। अष्टमूर्ते स्मरहरस्मर सत्यं यथा स्तुतः

पञ्चात्मिका तनुर्द्देव ब्राह्मणैस्ते प्रगीयते। सद्यो वामे तथाऽघोरेईशे तत्पुरुषे तथा

हेमजाले सुविस्तीर्णे हंसवत्कूजसे हर। एवं स्तुतोमुनिगणैर्ब्रह्माद्यैश्च सुरासुरैः

प्रहृष्टः सुमना भूत्वा सुरसङ्घानुवाच ह ॥ २३ ॥

ईश्वर उवाच

स्वागतं देवविप्राणां सुप्रभाताऽद्य शर्वरी ।
किं कुर्मो वदत क्षिप्रं कोऽन्यःसेव्यःसुरासुरैः ॥ २४ ॥
किं दुःखं को नु सन्तापः कुतो वोऽभयमागतम् ।
कथयध्वं महाभागाः ! कारणं यन्मनोगतम् ॥ २५ ॥
एवमुक्तास्तु रुद्रेण प्रत्यवोचन्सुरर्षभाः ।
स्वान्स्वान्देहान्दर्शयन्तो लज्जमाना अधोमुखाः ॥ २६ ॥

अस्तिघोरोमहावीर्योदानवोबलदर्पितः । बाणोनामेतिविख्यातोयस्यतत्त्रिपुरंमहत् तेन वै सुतपस्तप्तं दशवर्षशतानि हि । तस्य तुष्टोऽभवद्ब्रह्मा नियमेन दमेन च पुराणि तान्यभेद्यानिददौकामगमानि वै । आयसं राजतं चैवसौवर्णंचतथापरम्

त्रिपुरं ब्रह्मणा सृष्टं भ्रमत्तत्कामगामि च ।
तस्यैव तु बलोत्कृष्टास्त्रिपुरे दानवाः स्थिताः ॥ ३० ॥

त्रैलोक्यं सकलंदेव!पीडयन्तिमहासुराः । दण्डपाशासिशस्त्राणिअविकारैविकुर्वते

त्रिपुरं दानवैर्जुष्टं भ्रमत्तच्चक्रसन्निभम् ॥ ३१ ॥
क्वचिद्दृश्यमदृश्यं वा मृगतृष्णेव लक्ष्यते ॥ ३२ ॥

यस्मिन्पततितद्दिव्यं दृष्टस्य त्रिपुरंमहत् । नतत्रब्राह्मणादेवागावो नैव तुजन्तवः न तत्र दृश्यते किञ्चित्पतेयत्र पुरत्रयम् । नद्यो ग्रामाश्चदेशाश्चबहवोभस्मसात्कृताः सुवर्णं रजतं चैव मणिमौक्तिकमेवच । स्त्रीरत्नं शोभनं यच्च तत्सर्वं कर्षते बलात् न शस्त्रेण न चास्त्रेण न दिवा निशि वा हर । शक्यतेदेवसङ्घैश्चनिहन्तुं सकथञ्चन तद्वहस्वमहादेव त्वं हि नः परमा गतिः । एवं प्रसादं देवेश! सर्वेषां कर्तुमर्हसि येन देवाश्च गन्धर्वा ऋषयश्च तपोधनाः । परां धृतिंसमायान्ति तत्प्रभो कर्तुमर्हसि

ईश्वर उवाच

एतत्सर्वं करिष्यामि मा विषादं गमिष्यथ ।
आचिरेणैव कालेन कुर्यां युष्मत्सुखावहम् ॥ ३६ ॥

आश्वासयित्वा तान्देवान्सर्वानिन्द्रपुरोगमान् ।
चिन्तयामास देवेशस्त्रिपुरस्य वधम्प्रति ॥ ४० ॥

कथं केन प्रकारेण हन्तव्यं त्रिपुरं मया । तमेकंनारदंमुक्त्वा नान्योपायोविधीयते

एवं संस्तभ्य चात्मानं ततो ध्यातः स नारदः ।
तत्क्षणादेव सम्प्राप्तो वायुभूतो महातपाः ॥ ४२ ॥

कमण्डलुधरो देवस्त्रिदण्डीज्ञानकोविदः । योगपट्टाक्षसूत्रेण च्छत्रेणैव विराजितः जटाजूटाबद्धशिराज्वलनार्कसमप्रभः । त्रिधा प्रदक्षिणीकृत्य दण्डवत्पतितोभुवि

कृताञ्जलिपुटो भूत्वा नारदो भगवान्मुनिः ।
स्तोत्रेण महता शर्वः स्तुतो भक्त्या महामनाः ॥ ४५ ॥

नारद उवाच

जय शम्भोविरूपाक्ष! जय देव त्रिलोचन । जय शङ्कर ईशान रुद्रेश्वर नमोऽस्तुते ॥

त्वं पतिस्त्वं जगत्कर्ता त्वमेव लयकृद्विभो ।
त्वमेव जगतांनाथोदुष्टान्तकनिषूदनः ॥ ४७ ॥

त्वं नः पाहि सुरेशान! त्रयीमूर्ते सनातन । भवमूर्ते भवारे त्वं भजतामभयो भव

भवभावविनाशार्थं भव त्वां शरणं भजे ।
किमर्थं चिन्तितो देव! आज्ञा मे दीयतां प्रभो !॥ ४६ ॥

कस्य संक्षोभये चित्तं को वाऽद्य पततु क्षितौ । कमद्यकलहेनाहंयोजये जयताम्वर नारदस्य वचः श्रुत्वा देवदेवो महेश्वरः । उत्फुल्लनयनो भूत्वा इदं वचनमब्रवीत् ॥ स्वागतं ते मुनिश्रेष्ठ सदैव कलहप्रिय! । वीणावादनतत्त्वज्ञ! ब्रह्मपुत्र सनातन ॥

गच्छ नारद! शीघ्रं त्वं यत्र तत्त्रिपुरं महत् ।
बाणस्य दानवेन्द्रस्य सर्वलोकभयावहम् ॥ ५३ ॥
भर्तारो देवतातुल्याः स्त्रियस्तत्राऽप्सरःसमाः ।
तासां वै तेजसा चैव भ्रमते त्रिपुरं महत् ॥ ५४ ॥

न शक्यते कथं भेत्तुं सर्वोपायैर्द्विजोत्तम । गत्वा त्वं मोहय क्षिप्रं पृथग्धर्मैरनेकधा

नारद उवाच

तव वाक्येन देवेश भेदयामि पुरोत्तमम् । अभेद्यं बहुधोपायैर्यत्तु देवैः सवासवैः ॥ एवमुक्त्वा गतो भूप! शतयोजनमायतम् । बाणस्य तत्पुरश्रेष्ठमृद्धिवृद्धिसमायुतम् कृतकौतुकसम्बाधं नानाधातुविचित्रितम् । अनेकहर्म्यसञ्छन्नमनेकायतनोज्वलम् द्वारतोरणसंयुक्तं कपाटार्गलभूषितम् । बहुयन्त्रसमोपेतं प्राकारपरिखोज्ज्वलम् ॥ वापीकूपतडागैश्च देवतायतनैर्युतम् । हंसकारण्डवाकीर्णं पद्मिनीखण्डमण्डितम्

अनेकवनशोभाढ्यं नानाविहगमण्डितम् ।
एवं गुणगणाकीर्णं बाणस्य पुरमुत्तमम् ॥ ६१ ॥
तस्य मध्ये महाकायं सप्तकक्षं सुशोभितम् ।
बाणस्य भवनं दिव्यं सर्वं काञ्चनभूषितम् ॥ ६२ ॥
मौक्तिकादामशोभाढ्यं वज्रवैडूर्यभूषितम् ।
रुक्मपट्टतलाकीर्णं रत्नभूम्या सुशोभितम् ॥ ६३ ॥

मत्तमातङ्गनिःश्वासैः स्वन्दनैः सङ्कुलीकृतम् । हयहेषितशब्दैश्च नारीणांनूपुरस्वनैः खड्गतोमरहस्तैश्च वज्राङ्कुशशरायुधैः । रक्षितं घोररूपैश्च दानवैर्बलदर्पितैः ॥ ६५॥ एवंगुणगणाकीर्णं बाणस्य भवनोत्तमम् । कैलासशिखरप्रख्यं महेन्द्रभवनोपमम् नारदो गगने शीघ्रमगमत्पुरसन्मुखः । द्वारदेशं समासाद्य क्षत्तारं वाक्यमब्रवीत्

भोभोः क्षत्तर्महाबुद्धे राजकार्यविशारद! ।
शीघ्रं बाणाय चाचक्ष्व नारदो द्वारि तिष्ठति ॥ ६८ ॥
स वन्दयित्वा चरणौ नारदस्य त्वरान्वितः ।
सभामध्यगतं बाणं विज्ञप्तुमुपचक्रमे ॥ ६९ ॥

वेपमानाङ्गयष्टिस्तु करेणापिहिताननः । शृण्वतां सर्वयोधानामिदं वचनमब्रवीत् वन्दितो देवगन्धर्वैर्यक्षकिन्नरदानवैः । कलिप्रियो दुराराध्यो नारदो द्वारितिष्ठति

द्वारपालस्य तद्वाक्यं श्रुत्वा बाणस्त्वरान्वितः ।
द्वाःस्थमाह महादैत्यः सविस्मयमिदं तदा ॥ ७२ ॥

बाण उवाच

ब्रह्मपुत्रं सतेजस्कं दुःसहं दुरतिक्रमम् । प्रवेशय महाभागं किमर्थं वारितो बहिः श्रुत्वा प्रभोर्वचस्तस्य प्रावेशयदुदीरितम् । गत्वा वेगेन महता नारदं गृहमागतम् दृष्ट्वा देवर्षिमायान्तं नारदं सुरपूजितम् । सहसोत्थाय संहृष्टो ववन्दे चरणौ मुनेः

ददौ चाऽऽसनमर्घ्यं च पाद्यं पूजां यथाविधि ।
न्यवेदयच्च तद्राज्यमात्मानं बान्धवैः सह ॥ ७६ ॥
पप्रच्छ कुशलञ्चाऽपि मुनिं बाणासुरः स्वयम् ॥ ७७ ॥

नारद उवाच

साधुसाधु महाबाहोदनोर्वंशविवर्द्धन ।कोऽन्यस्त्रिभुवनेश्लाघ्यस्त्वांमुक्त्वादनुपुङ्गव पूजितोऽहंदनुश्रेष्ठ धनरत्नैः सुशोभनैः ।राज्येन चात्मना वापि ह्येवं कः पूजयेत्परः

न मे कार्यं हि भोगेन भुङ्क्ष्व राज्यमनामयम् ।
त्वद्दर्शनोत्सुकः प्राप्तो दृष्ट्वा देवं महेश्वरम् ॥ ८० ॥
भ्रमते त्रिपुरं लोके स्त्रीसतीत्वान्मया श्रुतम् ।
तान्द्रष्टुकामः सम्प्राप्तस्त्वद्द्वारान्दानवेश्वर !॥ ८१ ॥

मन्यसेयदि मे शीघ्रंदर्शयस्वचमाचिरम् । नारदस्यवचःश्रुत्वाकञ्चुकिं समुदीक्ष्यवै अन्तःपुरचरंवृद्धंदण्डपाणिगुणान्वितम् । उवाच राजा हृष्टात्माशब्देनापूरयन्दिशः नारदाय महादेवीं दर्शयस्वेह कञ्चुकिन् !। अन्तःपुरचरैः सर्वैः समेतामविशङ्कितः नाथस्याज्ञांपुरस्कृत्यगृहीत्वा नारदंकरे । प्रविश्याकथयद्देव्यैःनारदोऽयंसमागतः

दृष्ट्वा देवी मुनिश्रेष्ठं कृत्वा पादाभिवन्दनम् ।
आसनं काञ्चनं शुभ्रमर्घ्यपाद्यादिकं ददौ ॥ ८६ ॥
तस्यै स भगवांस्तुष्टो ह्याशीर्वादमदात्परम् ।
नान्या देवि! त्रिलोकेऽपि त्वत्समा दृश्यतेऽङ्गना ॥ ८७ ॥

पतिव्रताशुभाचारासत्यशौचसमन्विता । यस्याः प्रभावात्त्रिपुरंभ्रमतेचक्रवत्सदा

तच्छ्रुत्वा वचनं देवी नारदस्य मुदान्वितम् ।

पर्यपृच्छद्दृषिं भक्त्या धर्मं धर्मभृताम्वरा ॥ ८६ ॥

राज्युवाच

भगवन्मानुषे लोके देवास्तुष्यन्ति कैर्व्रतैः ।
कानि दानानि दीयन्ते येषां च स्यान्महत्फलम् ॥ ९० ॥
उपवासाश्च ये केचित्स्त्रीधर्मे कथिता बुधैः ।
यैः कृतैः स्वर्गमायान्ति सुकृतिन्यः स्त्रियो यथा ॥ ९१ ॥

एतत्सर्वंमहाभाग!कथयस्वयथातथम् । श्रोतुमिच्छाम्यहंसर्वं कथयस्वाविशङ्कितः

नारद उवाच

साधुसाधु महाभागे! प्रश्नोऽयं वेदितस्त्वया ।
यं श्रुत्वा सर्वनारीणां धर्मवृद्धिस्तु जायते ॥ ९३ ॥

उपवासैश्च दानैश्च पतिपुत्रौ वशानुगौ । बान्धवैः पूज्यते नित्यं यैःकृतैःकथयामिते दुर्भगा सुभगायैस्तु सुभगादुर्भगाभवेत् । पुत्रिणी पुत्ररहिताह्यपुत्रा पुत्रिणीतथा भर्त्तारं लभतेकन्यातथान्याभर्तृवर्जिता । कृताकृतैश्चजायन्ते तन्निबोधस्वसुन्दरि

तिलधेनुं सुवर्णं च रूप्यं गा वाससी तथा ।
पानीयं भूमिदानं च गन्धधूपानुलेपनम् ॥ ९७ ॥
पादुकोपानहौ छत्रं पुण्यानि व्यञ्जनानि च ।
पादाभ्यङ्गं शिरोभ्यङ्गं स्नानं शय्यासनानि च ॥ ९८ ॥

एतानि ये प्रयच्छन्ति नोपसर्पति ते यमम् । मधुमाषंपयःसर्पिर्लवणं गुडमौषधम्

पानीयं भूमिदानं च शालीनिक्षुरसांस्तथा ।
आरक्तवाससीश्लक्ष्णे दम्पत्योर्ललितादिने ॥ १०० ॥

सौभाग्यं जायते चैव इहलोके परत्र च । ब्राह्मणे वृत्तसम्पन्ने सुरूपे च गुणान्विते

तिथौ यस्यामिदं देयं तत्ते राज्ञि वदाम्यहम् ।
प्रतिपत्सु च या नारी पूर्वाह्णे च शुचिव्रता ॥ १०२ ॥

इन्धनं ब्राह्मणेदद्यात्प्रीयतां मे हुताशनः । तस्याजन्मनि षट्त्रिंशदङ्गप्रत्यङ्गसन्धिषु

न रजो नैव सन्तापोजायते राजवल्लभे । द्वितीयायांतुयानारीनवनीतं मुदान्विता ददाति द्विजमुख्याय सुकुमारतनुर्भवेत् । लवणं विप्रवर्याय तृतीयायां प्रयच्छति

गौरी मे प्रीयतां देवी तस्याः पुण्यफलं शृणु ।
कौमारिका पतिं प्राप्य तेन सार्द्धमुमा यथा ॥ १०६ ॥
क्रीडत्यविधवा चापि लभते सा महद्यशः ।
नक्तं कृत्वा चतुर्थ्याम्वै दद्याद्विप्राय मोदकान् ॥ १०७ ॥

प्रीयतां मम देवेशो गणनाथो विनायकः । तस्यास्तेनफलेनाशुसर्वकर्मसुभामिनि

विघ्नं न जायते क्वापि एवमाह पितामहः ।
पञ्चमीं तु ततः प्राप्य ब्राह्मणे तिलदा तु या ॥ १०९ ॥

सा भवेद्रूपसम्पन्नायथा चैव तिलोत्तमा । षष्ठ्यांतुयामधूकस्यफलदा तुभवेत्सदा उद्दिश्यचाग्निजंदेवं ब्राह्मणे वेदपारगे । तस्याःपुत्रोयथा स्कन्दोदेवसङ्घेषुचोत्तमः उत्पद्यते महाराजः सर्वलोकेषु पूजितः । सप्तम्यां या द्विजश्रेष्ठं सुवर्णेन प्रपूजयेत् उद्दिश्य जगतोनाथं देवदेवं दिवाकरम् । तस्यपुण्यफलं यद्वै कथितं द्विजसत्तमैः

तत्ते राज्ञि! प्रवक्ष्यामि शृणुष्वैकमनाः सति !।
दद्रूचित्रककुष्ठानि मण्डलानि विचर्चिका ॥ ११४ ॥
न भवन्तीहचाङ्गेषु पूर्वकर्मार्जितान्यपि ।
कृष्णां धेनुं तथाऽष्टम्यां या प्रयच्छति भामिनी ॥ ११५ ॥

ब्राह्मणेवृत्तसम्पन्नेप्रीयतां मे महेश्वरः । तस्याजन्मार्जितं पापंनश्यतेविभवान्विता

जायते नात्र सन्देहो यस्माद्दानमनुत्तमम् ।
गन्धधूपं तु या नारी भक्त्या विप्राय दापयेत् ॥ ११७ ॥
कात्यायनीं समुद्दिश्य नवम्यां शृणु यत्फलम् ।
तस्या भ्राता पिता पुत्रः पतिर्वा रणमुत्तमम् ॥ ११८ ॥

प्राप्यते नैव सीदन्ति तेन दानेन रक्षिताः । इक्षुदण्डरसंदेवि! दशम्यांयाप्रयच्छति लोकपालान्समुद्दिश्य ब्राह्मणे व्यङ्गवर्जिते । तेन दानेनसानित्यं सर्वलोकस्यवल्लभा

जायतेनात्रसन्देह इत्येवं शङ्करोऽब्रवीत् । एकादश्यामुपोष्याथ द्वादश्यामुदकप्रदा
नारायणं समुद्दिश्य ब्राह्मणेविष्णुतत्परे । सा सदास्पर्शसम्भाषैर्द्रावयेद्द्रावयेज्जनम्

यस्माद्दानं महर्ल्लोके ह्यनन्तमुदके भवेत् ।
पादाभ्यङ्गं शिरोभ्यङ्गं काममुद्दिश्य वै द्विजे ॥ १२३ ॥
ददाति च त्रयोदश्यां भक्त्या परमयाङ्गना ।
यस्यां यस्यां मृता जायेद्‌ भूयो योन्यां तु जन्मनि ॥ १२४ ॥
तस्यां तस्यां तु सा भर्तुर्न वियुज्येत कर्हिचित् ।
तथाप्येवं चतुर्द्दश्यां दद्यात्पात्रमुपानहौ ॥ १२५ ॥
ब्राह्मणे धर्ममुद्दिश्य तस्यालोका ह्यनामयाः ।
एवं च पक्षपक्षान्ते श्राद्धे तर्पेद्द्विजोत्तमान् ॥ १२६ ॥
अव्युच्छिन्ना सदा राज्ञि! सन्ततिर्जायते भुवि ।
एवं ते तिथिमाहात्म्यं दानयोगेन भाषितम् ॥ १२७ ॥

तथा वनस्पतीनांतु आराधनविधिंश्रृणु । जम्बूं निम्बतरुञ्चैव तिन्दुकंमधुकंतथा

आम्रं चामलकञ्चैव शाल्मलिं वटपिप्पलौ ।
शमीबिल्वामलीवृक्षं कदलीं पाटलीं तथा ॥ १२९ ॥
अन्यान्पुण्यतमान्वृक्षानुपेत्य स्वर्गमाप्नुयात् ॥ १३० ॥

नारद उवाच

चैत्रे मासे तु या नारी कुर्याद्व्रतमनुत्तमम् ।
तस्य व्रतस्य चान्यानिःकलांनार्हन्ति षोडशीम् ॥ १३१ ॥

श्रतेन येन सुभगे दुर्भत्वं न पश्यति । यथा हिमं रविं प्राप्य विलयं याति भूतले
तथा दुःखश्च दौर्भाग्यंव्रतादस्माद्विलीयते । मधुकाख्यांतुललितामाराधयतियेनवै
विधिंतंश्रृणुसुभगे! कथ्यमानं सुखावहम् । चैत्रेशुक्लतृतीयायां सुस्नाताशुद्धमानसा
प्रतिमांमधुवृक्षस्य शाङ्करीमुमयासह । कारयित्वा द्विजवरैः प्रतिष्ठाप्ययथाविधि
सुगन्धिकुसुमैर्धूपैस्तथा कर्पूरकुङ्कुमैः । पूजयेद्विधिनादेवं मन्त्रयुक्तेन भामिनी

पादौनमःशिवायेतिमेढ्रं वै मन्मथाय च । कालोदरायेत्युदरंनीलकण्ठायकण्ठकम्

शिरः सर्वात्मने पूज्य उमां पश्चात्प्रपूजयेत् ।
क्षामोदरायै ह्युदरं सुकण्ठाये च कण्ठकम् ॥ १३८ ॥
शिरः सौभाग्यदायिन्यै पश्चादर्घ्यम्प्रदापयेत् ॥ १३९ ॥

नमस्ते देवदेवेश उमावर जगत्पते । अर्घ्येणानेन मे सर्वं दौर्भाग्यं नाशय प्रभो ! ॥

इति अर्घ्यमन्त्रः

अर्घ्यं दत्त्वा ततः पश्चात्करकंवारिपूरितम् । मधूकपात्रोपभृतं सहिरण्यंतुशक्तितः

करकं वारिसम्पूर्णं सौभाग्येन तु संयुतम् ।
दत्तं तुललिते! तुभ्यं सौभाग्यादिविवर्धनम् ॥ १४२ ॥

इति करकदानमन्त्रः

मंत्रेणानेन विप्राय दद्यात्करकमुत्तमम् । लवणंवर्जयेच्छुक्लांयावदन्यांतृतीयिकाम्
क्षमाप्य देवींदेवेशंनक्तमद्यात्स्वयंहविः । अनेन विधिनासार्धंमासिमासिह्युपक्रमेत्

फाल्गुनस्य तृतीयायां शुक्लायां तु समाप्यते ।
वैशाखे लवणं देयं ज्येष्ठे चाज्यं प्रदीयते ॥ १४५ ॥
आषाढे मासि निष्पावाः पयो देयं तु श्रावणे ।
मुद्गा देया नभस्ये तु शालिमाश्वयुजे तथा ॥ १४६ ॥

कार्त्तिके शर्करापात्रं करकं रसम्भृतम् । मार्गशीर्षे तु कार्पासं करकं घृतसंयुतम्
पौषे तुकुङ्कुमं देयंमाघेपात्रंतिलैर्भृतम् । फाल्गुनेमासिसम्प्राप्तेपात्रंमोदकसम्भृतम्

पश्चात्तृतीयादेयं यत्तत्पूर्वस्यां विवर्जयेत् ।
विधानमासां सर्वासां सामान्यं मनसः प्रिये! ॥ १४९ ॥

प्रतिमां मधुवृक्षस्य तामेव प्रति पूजयेत् । तस्मै सर्वं तु विप्रायआचार्यायप्रदीयते
ततः सम्वत्सरस्यान्ते उद्यापनविधिं श्रृणु । मधुवृक्षं ततोगत्वा बहुसम्भारसम्वृतः

निखनेत्प्रतिमां मध्ये माधूकीं मधुकस्य च ।
तत्रस्थं पूजयेत्सर्वमुमादेहार्द्धधारिणम् ॥ १५२ ॥

पूजोपहारैर्विपुलैः कुङ्कुमेन पुनःपुनः ।
श्लक्ष्णाभिःपुष्पमालाभिःकौसुम्भैःकेसरेण च ॥ १५३ ॥
कौसुम्भे वाससी शुभ्रे अतसीपुष्पसन्निभे ।
परिधाप्य तां प्रतिमां दम्पती रविसंख्यया ॥ १५४ ॥
उपानद्य गलैश्छत्रैः कण्ठसूत्रैः सकण्ठिकैः ।
कटकैरङ्गुलीयैश्च शयनीयैः शुभास्तृतैः ॥ १५५ ॥

कुङ्कुमेन विलिप्ताङ्गौ बहुपुष्पैश्च पूजितौ । भोजयेद्विविधैरन्नैर्मधूकावासके स्थितौ
भुक्तोत्थितौ तु विश्राम्य शय्यासु च क्षमापयेत् ।
गुरुमूलं यतः सर्वं गुरुर्ज्ञेयो महेश्वरः ॥ १५७ ॥

प्रीते गुरौ ततः सर्वं जगत्प्रीतं सुरासुरम् । यद्यदिष्टतमं लोके यत्किञ्चिद्दयितं गृहे तत्सर्वं गुरवे देयमात्मनः श्रेय इच्छता । इदं तु धनिभिर्देयमन्यैर्देयं यथोच्यते॥ दाम्पत्यमेकं विधिवत्प्रतिपूज्य शुभव्रतैः । द्वितीयंगुरुदाम्पत्यं वित्तशाठ्यं विवर्जयेत् ततःक्षमापयेद्देवीं देवं च ब्राह्मणं गुरुम् । यथा त्वंदेविललितेनवियुक्तासिशम्भुना
तथा मे पतिपुत्राणामवियोगः प्रदीयताम् ।
अनेन विधिना कृत्वा तृतीयां मधुसञ्ज्ञिकाम् ॥ १६२ ॥

इन्द्राणी चेन्द्रपत्नीत्वमवाप सुतमुत्तमम् । सौभाग्यं सर्वलोकेषुसर्वर्द्धिसुखमुत्तमम् अनेन विधिना यातुकुमारीव्रतमाचरेत् । शोभनं पतिमाप्नोतियथेन्द्राण्याशतक्रतुः
दुर्भगा सुभगत्वं च सुभगा पुत्रिणी भवेत् ।
पुत्रिण्यक्षयमाप्नोति न शोकं पश्यति क्वचित् ॥ १६५ ॥

अनेकजन्मजनितं दौर्भाग्यं नश्यति ध्रुवम् । मृता तु त्रिदिवंप्राप्य उमयासहमोदते
कल्पकोटिशतं साग्रं भुक्त्वा भोगान्यथेप्सितान् ।
पुनस्तु सम्भवे लोके पार्थिवं पतिमाप्नुयात् ॥ १६७ ॥
सुभगा रूपसम्पन्ना पार्थिवं जनयेत्सुतम् ॥ १६८ ॥
एतत्ते कथितं सर्वं व्रतानामुत्तमं व्रतम् ।

अन्यत्पृच्छस्व सुभगे वाञ्छितं यद्धृदि स्थितम् ॥ १६९ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये मधूकतृतीयाव्रतविधानमाहात्म्यवर्णनंनाम षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

त्रिपुरक्षोभणवर्णनम्

श्रीमार्कण्डेय उवाच

नारदस्य वचः श्रुत्वा राज्ञी वचनमब्रवीत् । प्रसादंकुरु विप्रेन्द्र गृह्ण दानंयथेप्सितम्
सुवर्णमणिरत्नानि वस्त्राणि विविधानि च ।
तत्ते दास्यामि विप्रेन्द्र! यच्चान्यदपि दुर्लभम् ॥ २ ॥
राज्ञ्यास्तु वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ।
अन्येषां दीयतां भद्रे! ये द्विजाः क्षीणवृत्तयः ॥ ३ ॥

वयं तु सर्वसम्पन्नाभक्तिग्राह्याःसदैव हि । इत्युक्तासातदाराज्ञीवेदवेदाङ्गपारगान् आहूयब्राह्मणान्निःस्वान्दातुंसमुपचक्रमे । यत्किञ्चिन्नारदेनोक्तंदानंसौभाग्यवर्द्धनम् तेन दानेन मे नित्यं प्रीयेतां हरिशङ्करौ । ततो राज्ञीच सा प्राह नारदंमुनिपुङ्गवम्

राज्ञ्युवाच

दानं दत्तं त्वयोक्तंयद्भर्तृकर्मपरं हि तत् । आजन्मजन्म मे भर्ताभवेद्बाणोद्विजोत्तम
नान्यो हि दैवतं तात! मुक्त्वा बाणं द्विजोत्तम! ।
तेन सत्येन मे भर्ता जीवेच्च शरदां शतम् ॥ ८ ॥
नान्यो धर्म्मो भवेत्स्त्रीणां दैवतं हि पतिर्यथा ।
तथापि तव वाक्येन दानं दत्तं यथाविधि ॥ ९ ॥

स्वकंकर्मकरिष्यामोभर्त्तारंप्रतिमानद । ब्रह्मवेगंगच्छवेदानींत्वमाशीर्वादःप्रदीयताम्
तथेति तामनुज्ञाप्य नारदो नृपसत्तम !। सर्वासां मानसं हृत्वा अन्यतःकृतमानसः
जगामादर्शनं विप्रःपूज्यमानस्तु खेचरैः । ततो गतमनस्कास्ताभर्त्तारंप्रति भारत
विवर्णा निष्प्रभा जाता नारदेन विमोहिताः ॥ १३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये त्रिपुरक्षोभणवर्णनंनाम सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः

त्रिपुरविध्वंसनेजालेश्वरतीर्थामरेश्वरतीर्थवर्णनम्

मार्कण्डेय उवाच

एतस्मिन्नन्तरे रुद्रो नर्मदातटमास्थितः। क्रीडते ह्युमया सार्द्धं नारदस्तत्रचागतः
प्रणम्य देवदेवेशमुमया सह शङ्करम् । ह्यज्ञापयत्तदा देवं यद्वृत्तं त्रिपुरे तदा ॥ २॥
गतोऽहं स्वामिनिर्द्देशाद्यत्र तद्बाणमन्दिरम् ।
दृष्ट्वा बाणं यथान्यायं गतो ह्यन्तःपुरं महत् ॥ ३ ॥
तत्रभार्यासहस्राणिदृष्ट्वाबाणस्यधीमतः । यथायोग्यं यथाकाममागतःक्षोभ्यतत्पुरम्
नारदस्य वचः श्रुत्वा साधुसाध्विति पूयजन् ।
चिन्तयामास देवेशो भ्रमणं त्रिपुरस्य हि ॥ ५ ॥
करमुक्तं यथा चक्रं विष्णुना प्रभविष्णुना । महावेगं महायामं रक्षितं तेजसा मम
स च मेभक्तिनिरतोबाणोलोके चविश्रुतः । भारतीचमयादत्ताब्राह्मणानांविशेषतः
एवं स सुचिरं कालं देवदेवो महेश्वरः । चिन्तयित्वा सुनिर्वाणं कार्यंप्रतिजनेश्वरः
ततोऽसौ मन्दरं ध्यात्वा चापे कृत्वा गुणे महीम् ।
विष्णुं सनातनं देवं बाणे ध्यात्वा त्रिलोचनः ॥ ६ ॥

फले हुताशनं देवं ज्वलन्तं सर्वतोमुखम् । सुपर्णं पुङ्खयोर्मध्ये जवे वायुं प्रकल्प्य च
रथं महीमयं कृत्वा धुरि तावश्विनावुभौ । अक्षे सुरेश्वरं देवमग्रकील्यांधनाधिपम्
यमं तु दक्षिणेपार्श्वेवामेकालंसुदारुणम् । आदित्यचन्द्रौचक्रे तुगन्धर्वानारकादिषु
यन्तारं च सुरज्येष्ठं वेदान्कृत्वा हयोत्तमान् ।
खलीनादिषु चाङ्गानि रश्मींश्छन्दांसि चाऽकरोत् ॥ १३ ॥
कृत्वा प्रतोदमोङ्कारं मुखग्राह्यं महेश्वरः । धातारं चाग्रतःकृत्वाविधातारंचपृष्ठतः
मारुतात्सर्वतोदिग्भ्यऊर्ध्वंयन्त्रेतथैवच । महोरगपिशाचांश्चसिद्धविद्याधरांस्तथा
गणांश्च भूतसङ्घांश्च सर्वे सर्वाङ्गसन्धिषु ।
युगमध्ये स्थितो मेरुर्युगस्याऽधो महागिरिः ॥ १६ ॥
सर्पा यन्त्रस्थिता घोराः शम्ये वरुणनैर्ऋतौ ।
गायत्रीचैव सावित्री स्थिते ते रश्मिबन्धने ॥ १७ ॥
सत्यं रथध्वजे शौचं दमं रक्षां समन्ततः । रथं देवमयं कृत्वा देवदेवो महेश्वरः ॥
सन्नद्धः कवची खड्गी बद्धगोधाङ्गुलित्रवान् ।
बद्ध्वा परिकरं गाढं जटाजूटं नियम्य च ॥ १९ ॥
सज्जं कृत्वा धनुर्दिव्यं योजयित्वा रथोत्तमम् ।
रथमध्ये स्थितो देवः शुशुभे च युधिष्ठिर !॥ २० ॥
धनुषःशब्दनादेनाकम्पयच्चजगत्त्रयम् । स्थानं कृत्वा तु वैशाखंनिभृतंसंस्थितोहरः
निरीक्ष्य सुचिरं कालं कोपसंरक्तलोचनः ।
ध्यात्वा तं परमं मन्त्रमात्मानं च निरुध्य सः ॥ २२ ॥
मुमोच सहसा बाणं पुरस्य वधकाङ्क्षया ।
यदा त्रीणि समेतानि अन्तरिक्षस्थितानि तु ॥ २३ ॥
ततः कालनिमेषार्धं दृष्ट्वैक्यंत्रिपुरस्य च । त्रिपर्वणात्रिशल्येनततस्तान्यवसादयत्
ततो लोकाभयत्रस्तास्त्रिपुरे भरतोत्तम । सर्वासुरविनाशाय कालरूपाभयावहाः
अट्टहासान्प्रमुञ्चन्ति कष्टरूपा नरास्तदा ! निमेषोन्मेषणं चैव कुर्वन्तिलिपिकर्मसु

निष्पन्दनयना मर्त्याश्चित्रेष्वालिखिता इव ।
देवायतनगा देवा रुदन्ति प्रहसन्ति च ।
स्वप्ने पश्यन्ति चात्मानं रक्ताम्बरविभूषितम् ॥ २७ ॥
रक्तमाल्योत्तमाङ्गाश्च पतन्तः कार्द्दमे ह्रदे ।
पश्यन्ति नाम चात्मानं सतैलाभ्यङ्गमस्तकम् ॥ २८ ॥
पश्यन्ति यानमारूढं रासभैश्चनृपोत्तम !। संवर्त्तकोमहावायुर्युगान्तप्रतिमो महान्
गृहानुन्मूलयामासवृक्षजातीननेकशः । भूमिकम्पाःसनिर्घाताउल्कापाताःसहस्रशः
रुधिरं वर्षते देवो मिश्रितं कर्करैर्बहु । अग्निकुण्डेषुविप्राणां हुतः सम्यग्घुताशनः ॥
ज्वलते धूमसंयुक्तो विस्फुलिङ्गकणैः सह ।
कुञ्जरा विमदा जातास्तुरगाः सत्त्ववर्जिताः ॥ ३२ ॥
अवादितानि वाद्यन्ते वादित्राणि सहस्रशः ।
ध्वजा ह्यकम्पिताः पेतुश्छत्राणि विविधानि च ॥ ३३ ॥
ज्वलन्तिपादपास्तत्रपर्णानिचसमन्ततः । सर्वंतद्भयाकुलीभूतंहाहाकारसमन्वितम्
उद्यानानि विचित्राणि प्रबभञ्ज प्रभञ्जनः ।
तेन सम्प्रेरिताः सर्वे ज्वलन्ति विशिखाः शिखाः ॥ ३५ ॥
वृक्षगुल्मलतावल्ल्योगृहाणि च समन्ततः । दिग्विभागैश्चसर्वैश्च प्रवृत्तोहव्यवाहनः
सर्वं किंशुकपर्णाभंप्रज्वलच्चैव दृश्यते । गृहाद्गृहं तदागन्तुं नैवधूमेनशक्यते ॥३७॥
हरकोपाग्निनिर्दग्धाः क्रन्दन्ते त्रिपुरेजनाः । प्रदीप्तं सर्वतो दिक्षुदह्यते त्रिपुरं परम्
पतन्तिशिखराग्राणिविशीर्णानिसहस्रशः । पावकोधूमसम्पृक्तो दह्यमानःसमन्ततः
नृत्यन्वै व्याप्तदिग्देशः कान्तारेष्वभिधावति ।
देवागारेषु सर्वेषु गृहेष्वट्टालकेषु च ॥ ४० ॥
प्रवृत्तो हुतभुक्तत्र पुरे कालप्रचोदितः । ददाह लोकान्सर्वत्र हरकोपप्रकोपितः ॥
दहते त्रैपुरं लोकं बालवृद्धसमन्वितम् । सपुरं सगृहद्वारं सवाहनवनं नृप ॥ ४२ ॥
केचिद्भोजनसक्ताश्च पानासक्तास्तथापरे । अपरा नृत्यगीतेषु संसक्ता वारयोषितः

अन्योन्यं च परिष्वज्य हुताशनशिखार्दिताः ।
दह्यमाना नृपश्रेष्ठ! सर्वे गच्छन्त्यचेतनाः ॥ ४४ ॥
अथान्ये दानवास्तत्र दह्यन्तेऽग्निविमोहिताः ।
न शक्ताश्चाऽन्यतो गन्तुं धूमेनाकुलिताननाः ॥
हंसकारण्डवाकीर्णा नलिन्योहेमपङ्कजाः ॥ ४५ ॥
दह्यन्ते विविधास्तत्र वाप्यः कूपाश्च भारत !।
दृश्यन्तेऽनलदग्धानि पुरोद्यानानि दीर्घिकाः ॥
अम्लानैः पङ्कजैश्छन्ना विस्तीर्णा बहुयोजनाः ॥ ४६ ॥
गिरिकूटनिभास्तत्रप्रासादारत्नशोभिताः ।दृश्यन्तेऽनलसंदग्धाविशीर्णाधरणीतले
नरस्त्रीबालवृद्धेषु दह्यमानेषु सर्वतः । निर्द्दयं ज्वलते वह्निर्हाहाकारो महानभूत्
काचिच्च सुखसंसुप्ता प्रमत्ताऽन्या नृपोत्तम !॥ ४८ ॥
क्रीडित्वा च सुविस्तीर्णशयनस्था वराङ्गना ।
काचित्सुप्ता विशालाक्षी हारावलिविभूषिता ।
धूमेनाऽऽकुलिता दीना न्यपत्तद्धव्यवाहने ॥ ४९ ॥
काचित्तस्मिन्पुरे दीप्ते पुत्रस्नेहानुलालसा । पुत्रमालिङ्ग्यगाढं दह्यतेत्रिपुरेऽग्निना
काचित्कनकवर्णाभाइन्द्रनीलविभूषिता । भर्त्तारं पतितंदृष्ट्वा पतितातस्य चोपरि
काचिदादित्यवर्णाभाप्रसुप्ता तुप्रियोपरि । अग्निज्वालाहतागाढंकण्ठमालिङ्ग्यतेनृप
मेघवर्णा परा नारी चलत्कनकमेखला । श्वेतवस्त्रोत्तरीया तु पपात धरणीतले ॥
काचित्कुन्देन्दुवर्णाभा नीलरत्नविभूषिता ।
शिरसा प्राञ्जलिर्भूत्वा विज्ञापयति पावकम् ॥ ५४ ॥
कस्याश्चिज्ज्वलते वस्त्रं केशाः कस्याश्च भारत !।
ज्वलज्ज्वलनसङ्काशैर्हेमभाण्डैस्त्रसन्ति च ॥ ५५ ॥
काचित्प्रभूतदुःखार्ता विललापवराङ्गना । भस्मीभूतंपतिं दृष्ट्वा क्रन्दन्तीकुररीयथा
आलिङ्ग्य गाढं सहसा पतिता तस्य मूर्द्धनि ।

काचिच्च बहुदुःखार्त्ता व्यलपत्स्त्री स्ववेश्मनि ॥ ५७ ॥
भस्मसाच्च कृतं दृष्ट्वा क्रन्दते कुररी यथा। मातरं पितरं काचिद्दृष्ट्वाविगतचेतनम्
वेपते पतिता भूमौ खेदिता बडवा यथा। इतश्चेतश्च काचिच्च दह्यमानावराङ्गना
नापश्यद्बालमुत्सङ्गे विपरीतमुखी स्थिता।
कुम्भिलस्य गृहं दग्धं पतितं धरणीतले ॥ ६० ॥
कूष्माण्डस्य च धूम्रस्य कुहकस्य वकस्य च।
विरूपनयनस्यापि विरूपाक्षस्य चैव हि ॥ ६१ ॥
शुम्भोडिम्भश्च रौद्रश्च प्रह्लादश्चासुरोत्तमः।
दण्डपाणिर्विपाणिश्च सिंहवक्त्रस्तथाऽनघ!॥ ६२ ॥
दुन्दुभश्चैव संह्लादो डिण्डिर्मुण्डिस्तथैव च।
बाणभ्राताच बाणश्चक्रव्याद्व्याघ्रवक्त्रकौ ॥ ६३ ॥
एवमन्येऽपि येकेचिद्दानवा बलदर्पिताः। तेषां गृहे तथा वह्निर्ज्वलते निर्दयो नृप
दह्यमानाः स्त्रियस्तात! विलपन्ति गृहेगृहे ॥ ६४ ॥
करुणाक्षरवादिन्यो निराधारा गताः शिवम्। यदिवैरंसुरारेश्चपुरस्योपरि पावक
स्त्रियः किमपराध्यन्ति गृहपञ्जरकोकिलाः।
अनिर्दयो नृशंसस्त्वं कस्तेकोपःस्त्रियम्प्रति ॥ ६६ ॥
किं त्वया न श्रुतंलोके अवध्या सर्वथा स्त्रियः।
किं तु तुभ्यं गुणो ह्यस्ति दहने पवनेरितः ॥ ६७ ॥
न कारुण्यं त्वया किञ्चिद्दाक्षिण्यं च स्त्रियम्प्रति।
दयां म्लेच्छा हि कुर्वन्ति वचनं वीक्ष्य योषिताम् ॥ ६८ ॥
म्लेच्छानामपि च म्लेच्छो दुर्निवार्य्यो ह्यचेतनः।
एवं विलपमानानां स्त्रीणां तत्रैव भारत ॥ ६९ ॥
ज्वालाकलापबहुलः प्रज्वलत्येव पावकः। एवं दृष्ट्वा ततो बाणो दह्यमान उवाच ह
अवज्ञाहविनष्टोऽहंपापात्माहरमञ्जसा। मया पापेन मूर्खेण येलोकाना शिताध्रुवम्

गोब्राह्मणाहतानित्यमिहलोकेपरत्र च।
नाशितान्यन्नपानानिमठारामाश्रमास्तथा ॥ ७२ ॥
ऋषीणामाश्रमाश्चैव देवारामागणालयाः। तेनपापेन मेध्वंसस्तपसश्च बलस्य च
किं धनेन करिष्यामि राज्येणान्तःपुरेण च ॥ ७४ ॥
वरं शङ्करपादौच शरणंयामि मूढधीः। न माता न पिताचैव न बन्धुर्नापरो जनः
मुक्त्वा चैव महेशानंपरमार्तिहरंपरम्। आत्मना च कृतं पापमात्मनैव तु भुज्यते
अहंपुनःसमस्तैश्चदह्यामिसहसाधुभिः। एवमुक्त्वाशिवंलिङ्गं कृत्वातन्मस्तकोपरि
निर्जगाम गृहाच्छीघ्रं पावकेनावगुण्ठितः।
स खिन्नः स्विन्नगात्रस्तु प्रस्खलंस्तु मुहुर्मुहुः ॥ ७८ ॥
हरं गद्गदयावाचास्तुवन्वैशरणंययौ। त्वत्कोपानलनिर्दग्धोयदिवध्योऽस्मिशङ्कर
त्वत्प्रसादान्महादेवमास्तु लिङ्गं प्रणश्यतु।
अर्चितं मे सुरश्रेष्ठ ध्यातं भक्त्या मया विभो ॥ ८० ॥
प्राणादिष्टतमं देव! तस्माद्रक्षितुमर्हसि। यदि तेऽहमनुग्राह्यो वध्यो वा सुरसत्तम
प्रतिजन्म महादेव त्वद्भक्तिरचलास्तु मे। पशुकीटपतङ्गेषु तिर्यग्योनिगतेषु च ॥
स्वकर्मणा महादेव त्वद्भक्तिरचलास्तु मे ॥ ८२ ॥
एवमुक्त्वा महाभागो बाणो भक्तिमतां वरः।
स्तोत्रेण देवदेवेशं च्छन्दयामास भारत !॥ ८३ ॥

बाण उवाच

शिव शङ्कर सर्वहराय नमो भवभीतभयार्तिहराय नमः।
कुसुमायुधदेहविनाशकर! प्रमदाप्रियकामक! देव नमः ॥ ८४ ॥
जय पार्वतीश! परमार्थसार! जय विरचितभीमभुजङ्गहार !।
जय निर्मलभस्मविलिप्तगात्र! जय मन्त्रमूल जगदेकपात्र !॥ ८५ ॥
जय विषधरकपिलजटाकलाप जय भैरवविधृतपिनाकचाप !।
जय विषमनयतपरिमुक्तसङ्ग जय शङ्कर धृतगाङ्गतरङ्ग !॥ ८६ ॥

जय भीमरूप खट्वाङ्गहस्त शशिशेखर जय जगतां प्रशस्त !।
जय सुरवरेश सुरलोकसार जय सर्वसकलनिर्द्वन्द्वसार !॥ ८७ ॥
जय कीर्त्तनीय! जगतां पवित्र! जय वृषाङ्क बहुविधचरित्र !।
जय विरचितनरकङ्कालमाल अवासुरदेहकङ्कालकाल !॥ ८८ ॥
जय नीलकण्ठ वरवृषभगमन जय सकललोकदुरितानुशमन !।
जय सिद्धसुरासुरविनतचरण जय रुद्र रौद्रभवजलधितरण !॥ ८९ ॥
जय गिरीश सुरेश्वरमाननीय! जय सूक्ष्मरूप सञ्चिन्तनीय !।
जय दग्धत्रिपुर! विश्वसत्त्व! जय सकलशास्त्रपरमार्थतत्त्व !॥ ९० ॥
जय दुरवबोध संसारतार कलिकलुषमहार्णवघोरतार !।
जय सुरासुरदेवगणेश नमो हयवानरसिंहगजेन्द्रमुख !॥ ९१ ॥
अतिह्रस्वस्थूलसुदीर्घतम उपलब्धिर्नशक्यते ते ह्यमरैः ।
प्रणतोऽस्मि निरञ्जन ते चरणौ जय साम्ब सुलोचनकान्तिहर ॥९२॥
अप्राप्य त्वां किमत्यन्तमुच्छ्रयी न विनाशयेत् ।
अतिप्रमाथि च तदा तपो महत्सुदारुणम् । ९३ ॥
न पुत्रबान्धवादारा नसमस्तःसुहृज्जनः । सङ्कटेऽभ्युपगच्छन्तिव्रजन्तमेकगामिनम्
यद्देवकर्मकैवल्यं कृतं तेन शुभाशुभम् । तदेव सार्थवत्तस्य भवत्यग्रे तु गच्छतः ॥
निर्द्धनस्यैव चरतोन भयं विद्यते क्वचित् ।
धनी भयैर्न मुच्येत धनं तस्मात्त्यजाम्यहम् ॥ ९६ ॥
लुब्धाः पापानि कुर्वन्ति शुद्धांशा नैव मानवाः ।
श्रुत्वा धर्मस्य सर्वस्वं श्रुत्वा चैवाऽवधार्य तत् ॥ ९७ ॥
त्वं विष्णुस्त्वं जगन्नाथो ब्रह्मरूपः सनातनः ।
इन्द्रस्त्वं देवदेवेश सुरनाथ! नमोऽस्तु ते ॥ ९८ ॥
त्वं क्षितिर्वरुणश्चैव पवनस्त्वंहुताशनः । त्वं दीक्षा यजमानश्च आकाशं सोमएवच
त्वं सूर्यस्त्वं तु वित्तेशो यमस्त्वं गुरुरेवच ।

त्वया व्याप्तं जगत्सर्वं त्रैलोक्यं भास्वता यथा ॥ १०० ॥
एतद्बाणकृतंस्तोत्रं श्रुत्वादेवो महेश्वरः । क्रोधंमुक्त्वाप्रसन्नात्मातदावचनमब्रवीत्

ईश्वर उवाच

न भेतव्यं न भेतव्यमद्यप्रभृति दानव !। सौवर्णे भवने तिष्ठ मम पार्श्वेऽथवा पुनः
पुत्रपौत्रप्रपौत्रैश्च बान्धवैः सह भार्यया ।
अद्यप्रभृति वत्स! त्वमवध्यः सर्वशत्रुषु ॥ १०३ ॥

मार्कण्डेय उवाच

भूयस्तस्य वरो दत्तो देवदेवेन भारत !। स्वर्गे मर्त्ये च पातालेपूजितः ससुरासुरैः
अक्षयश्चाऽव्ययश्चैव वस त्वं वै यथासुखम् । ततोनिवारयामासरुद्रःसप्तशिखंतदा
तृतीयंरक्षितं तस्य पुरं देवेन शम्भुना । ज्वालामालाकुलं चान्यत्पतितं धरणीतले
अर्द्धेन प्रस्थितादूर्द्ध्वं तस्य ज्वाला दिवं गताः ।
हाहाकारो महांस्तत्र ऋषिसङ्घैरुदीरितः ॥ १०७ ॥
देवैश्च महाभागैः सिद्धविद्याधरादिभिः । एकं तु पतितंतत्र श्रीशैले खण्डमुत्तमम्
द्वितीयं पतितं राजञ्छैले ह्यमरकण्टके । प्रज्वलत्पतितं तत्र तेनज्वालेश्वरं स्मृतम्
दग्धे तुत्रिपुरेराजन्पतितेखण्डउत्तमे । रुद्रो देवःस्थितस्तत्रज्वालामालानिवारकः
हाहाकारपराणां तु ऋषीणां रक्षणाय च । स्वयंमूर्तिर्महेशान उमावृषभसंयुतः ॥
मनसाऽपि स्मरेद्यस्तुभक्त्या ह्यमरकण्टकम् ।
चान्द्रायणाधिकं पुण्यं स लभेन्नात्र संशयः ॥ ११२ ॥
अतिपुण्यो गिरिश्रेष्ठो यस्माद्भरतसत्तम !। अस्मान्नित्यं भवेद्राजन्सर्वपापक्षयङ्करः
नानाद्रुमलताकीर्णो नानापुष्पोपशोभितः ।
नानागुल्मलताकीर्णो नानावल्लीभिरावृतः ॥ ११४ ॥
सिंहव्याघ्रसमाकीर्णोमृगयूथैरलङ्कृतः । श्वापदानांचघोषेणनित्यंप्रमुदितोऽभवत्
महेन्द्रविष्णुप्रमुखैर्ह्यमरैश्च सहस्रशः । सेव्यते देवदेवेशः शङ्करस्तत्र पर्वते ॥ ११६॥
पतनं कुरुते योऽस्मिन्पर्वतेऽमरकण्टके । क्रीडते क्रमशो राजन्भुवनानि चतुर्दश ॥

ऐन्द्रं वाह्नं च कौबेरं वायव्यं याम्यमेव च ।
नैर्ऋत्यं वारुणं चैव सौम्यं सौरं तथैव च ॥ ११८ ॥
ब्राह्मं च पद्मकं क्लिष्टं वैष्णवं तदनन्तरम् । उमारुद्रं महाभाग! ऐश्वरं तदनन्तरम् ॥
परं सदाशिवं शान्तं सूक्ष्मं ज्योतिरतीन्द्रियम् ।
तस्मिन्याति लयं धीरो विधिना नात्र संशयः ॥ १२० ॥

युधिष्ठिर उवाच

कोऽप्यत्रविधिरुद्दिष्टः पतने ऋषिसत्तम !। एतन्मे सर्वमाचक्ष्वसंशयोऽस्तिमहामुने

श्रीमार्कण्डेय उवाच

शृणुष्व कथयिष्यामि तं विधिं पाण्डुनन्दन !।
यत्कृत्वा प्रथमं कर्म निपतेत्तदनन्तरम् ॥ १२२ ॥
कृत्वा कृच्छ्रत्रयं पूर्वं जप्त्वा लक्षं दशैवतु । शाकयावकभुक्चैवशुचिस्त्रिषवणो नृप
त्रिकालमर्चयेदीशं देवदेवं त्रिलोचनम् । दशांशेन तु राजेन्द्र होमं तत्रैव कारयेत् ।
लक्षवारं जपेदेवं गन्धमाल्यैश्चपूजयेत् । रात्रौस्वप्ने तदापश्येद्विमानस्थंततःक्षिपेत्
अनेनैव विधानेन आत्मानंयस्तुनिक्षिपेत् । स्वर्गलोकमनुप्राप्यक्रीडते त्रिदशैःसह
त्रिंशद्वर्षसहस्राणि त्रिंशत्कोट्यस्तथैव च ।
भुक्त्वा मनोरमान्भोगांस्तदागच्छेन्महीतलम् ॥ १२७ ॥
पृथिवीमेकच्छत्रेण भुनक्ति लोकपूजितः ।
व्याधिशोकविमिर्मुक्तोजीवे च शरदां शतम् ॥ १२८ ॥
ज्वालेश्वरं तु तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ।
तत्र ज्वाला नदी पार्थ प्रसृता शिवनिर्मिता ॥ १२९ ॥
निर्वाप्य तद्बाणपुरंरेवया सह सङ्गता । तत्रस्नात्वा महाराजविधिनामन्त्रसंयुतः
तिलसम्मिश्रतोयेन तर्पयेत्पितृदेवताः । पिण्डदानेनचपितॄन्पौण्डरीकफलं लभेत्
अनाशकन्तु यःकुर्यात्तस्मिंस्तीर्थे नराधिप !।
मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ १३२ ॥

अमराणां शतैश्चैव सेवितो ह्यमरेश्वरः । तथैव ऋषिसङ्घैश्च तेन पुण्यतमो महान्
समन्ताद्योजनं तीर्थं पुण्यं ह्यमरकण्टकम् । रुद्रकोटिसमोपेतं तेन तत्पुण्यमुत्तमम्॥
तस्य पर्वतराजस्य यः करोतिप्रदक्षिणम् । प्रदक्षिणीकृतातेनपृथिवीनाऽत्र संशयः
वाचिकं मानसं चैव काथिकं त्रिविधं च यत् ।
नश्यते पातकं सर्वमित्येवं शङ्करोऽब्रवीत् ॥ १३६ ॥
अमरेश्वरपार्श्वे च तीर्थं शक्रेश्वरं नृप !। तपस्तप्त्वापुरा तत्र शक्रेण स्थापितंकिल
कुशावर्तं नाम तीर्थं ब्रह्मणा च कृतं शुभम् ।
ब्रह्मकुण्डमिति ख्यातं हंसतीर्थं तथा परम् ॥ १३८ ॥
अम्बरीषस्य तीर्थं च महाकालेश्वरंतथा । कावेर्याः पूर्वभागे चतीर्थंवैमातृकेश्वरम्
एतानि दक्षिणे तीरे रेवाया भरतर्षभ । संसेवनस्नानदानैः पापसङ्घहराणि च ॥
भृगुतुङ्गे महाराज प्रसिद्धो भैरवःशिवः । तस्ययाम्यविभागेच तीर्थं वैचपलेश्वरम्
एतौ स्थितौ दुःखहरौ रेवाया उत्तरे तटे ।
तावभ्यर्च्य तथा नत्वा सम्यग्यात्राफलं भवेत् ।
अदृष्टपूजितौ तौ हि नराणां विघ्नकारकौ ॥ १४२ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे त्रिपुरविध्वंसने ज्वालेश्वरतीर्थामरेश्वतीर्थमाहात्म्यवर्णनंनामाऽष्टाविंशोऽध्यायः ॥ २८ ॥

———

एकोनत्रिंशोऽध्यायः

कावेरीसङ्गममाहात्म्यवर्णनम्

युधिष्ठिर उवाच

कावेरीति च विख्याता त्रिषु लोकेषु सत्तम !।
माहात्म्यं श्रोतुमिच्छामि तस्या मार्कण्ड!तत्त्वतः ॥ १ ॥
कीदृशं दर्शनंतस्याःफलंस्पर्शोऽथवाविभो !। स्नानेजाप्येऽथवादानउपवासेतथामुने
कथयस्व महाभागकावेरीसङ्गमेफलम् । धर्मःश्रुतोऽथदृष्टोवाकथितोवाकृतोऽपिवा
अनुमोदितो वा विप्रेन्द्र पुनातीति श्रुतं मया ।
यथा धर्मप्रसङ्गे तु मुने धर्मोऽपिजायते ॥ ४ ॥
स्वर्गश्च नरकश्चैव इत्येवं वैदिकी श्रुतिः ॥ ५ ॥

श्रीमार्कण्डेय उवाच

साधुसाधुमहाभागयत्पृष्टोऽहंत्वयाऽधुना । शृणुष्वैकमनाभूत्वाकावेरीफलमुत्तमम्
अस्ति यक्षो महासत्त्वः कुबेरोनाम विश्रुतः ।
सोऽपि तीर्थप्रभावेण राजन्यक्षाधिपोऽभवत् ॥ ७ ॥
तच्छृणुष्व विधानेन भक्त्यापरमयानृप !। सिद्धिं प्राप्तोमहाभागकावेरीसङ्गमेन तु
कावेर्या नर्मदायास्तुसङ्गमेलोकविश्रुते । तत्रस्नात्वाशुचिर्भूत्वाकुबेरःसत्यविक्रमः
विधिवन्नियमं कृत्वा शास्त्रयुक्त्या नरोत्तम !।
आराधयन्महादेवमेकचित्तः सनातनम् ॥ १० ॥
एकाहारोवसन्मासंतथाषष्ठाह्नकालिकः । पक्षोपवासीन्यवसत्कञ्चित्कालंनृपोत्तम
मूलशाकफलैश्चान्यं कालं नयति बुद्धिमान् ।
किञ्चित्कालं वसंस्तत्र तीर्थे शैवालभोजनः ॥ १२ ॥
पराकेणानयत्कालंकृच्छ्रेणापिचमानद।चान्द्रायणेनचाप्यन्यमन्यम्वाप्यम्बुभोजनः

एवं तत्र नरश्रेष्ठ! कामरागविवर्जितः । स्थितोवर्षशतं साग्रं कर्षयन्स्वं तथा वपुः
ततो वर्षशतस्यान्ते देवदेवो महेश्वरः । तुष्टस्तु परया भक्त्या तमुवाच हसन्निव
भोभो यक्ष! महासत्व वरं वरय सुव्रत !।
परितुष्टोऽस्मि ते भक्त्या तव दास्ये यथेप्सितम् ॥ १६ ॥

यक्ष उवाच

यदि तुष्टोऽसि देवेश उमया सह शङ्कर !। अद्यप्रभृति सर्वेषां यक्षाणामधिपो भवे
अक्षयश्चाव्ययश्चैव तव भक्तिपुरस्सरः । धर्मे मतिं च मे नित्यं ददस्व परमेश्वर !।

ईश्वर उवाच

यत्त्वया प्रार्थितं सर्वं फलं धर्मस्य तत्तथा।।इत्येवमुक्त्वा तं तत्र जगामादर्शनंहरः
सोऽपि स्नात्वा विधानेन सन्तर्प्य पितृदेवताः ।
आमन्त्रयित्वा तत्तीर्थं कृतार्थश्च गृहं ययौ ॥ २० ॥
पूजितस्तत्र यक्षैस्तु सोऽभिषिक्तो विधानतः ।
चकार विपुलं तत्र राज्यमीप्सितमुत्तमम् ॥ २१ ॥
तत्र चान्ये सुराःसिद्धायक्षगन्धर्वकिन्नराः । गणाश्चाप्सरसांतत्रऋषयश्चतथाऽनघ
कावेरीसङ्गमं तेन सर्वपापहरं विदुः । स्वर्गाणामपि सर्वेषां द्वारमेतद्युधिष्ठिर !॥
ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ।
कावेरीसङ्गमे स्नात्वा यैर्दत्तं हि तिलोदकम् ॥ २४ ॥
दश पूर्वे परे तात! मातृतः पितृतस्तथा ।
पितरः पितामहास्तेन उद्धृतानरकार्णवात् ॥ २५ ॥
तस्मात्सर्वप्रयत्नेन तत्र स्नायीतमानवः । अर्चयेदीश्वरं देवंयदीच्छेच्छाश्वतींगतिम्
कावेरीसङ्गमे राजन्स्नानदानार्चनं नरैः । कृतं भक्त्या नरश्रेष्ठ! अश्वमेधाधिकंफलम्
होमेन चाक्षयः स्वर्गो जपादायुर्विवर्धते ।
ध्यानतो नित्यमायाति पदं शिवकलात्मकम् ॥ २८ ॥
अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नरेश्वर !। अग्निलोकेवसेत्तावद्यावदाभूतसंप्लवम्

अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप !।
तस्य पुण्यफलं यद्वै तच्छृणुष्व नरोत्तम !॥ ३० ॥
गन्धर्वाप्सरसङ्कीर्णे विमाने सूर्यसन्निभे । वीज्यमानो वरस्त्रीभिर्दैवतैः सह मोदते
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च । क्रीडते रुद्रलोकस्थस्तदन्ते भुवि चागतः
भोगवान्दानशीलश्च जायते पृथिवीपतिः ।
आधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ३३ ॥
एवंगुणगणाकीर्णा कावेरी सा सरिन्नृप । त्रिषु लोकेषुविख्यातानर्मदासंगमेसदा
जितवाक्कायचित्ताश्च ध्येयध्यानरतास्तथा ।
कावेरीसङ्गमे तात! तेऽपि मोक्षमवाप्नुयुः ॥ ३५ ॥
शृणु तेऽन्यत्प्रवक्ष्यामिआश्चर्यंनृपसत्तम । त्रिषुलोकेषुकात्वन्यादृश्यतेसरितासमा
लब्धं यैर्नर्मदातोयं ये च कुर्युः प्रदक्षिणम् । येपिबन्ति जलंतत्र तेपुण्यानात्रसंशयः
न तेषां सन्ततिच्छेदो दश जन्मानि पञ्च च ।
तेषां पापं विलीयेत हिमं सूर्योदये यथा ॥ ३८ ॥
गङ्गायमुनसङ्गे वै यत्फलं लभते नरः । तत्फलं लभते मर्त्यः कावेरीस्नानमाचरन्॥
भौमे तु भूतजायोगे व्यतीपातेऽत्रसङ्क्रमे । राहुसोमसमायोगेतद्देवाष्टगुणं स्मृतम्
अशीतिश्च यवाः प्रोक्ता गङ्गायामुनसङ्गमे । कावेरीनर्मदायोगेतद्देवाष्टगुणं स्मृतम्
गङ्गा षष्टिसहस्रैस्तु क्षेत्रपालैः प्रपूज्यते । तदर्द्धैरन्यतीर्थानि रक्षन्ते नाऽत्र संशयः
अमरेश्वरे तु सरितां ये योगाः परिकीर्तिताः ।
ते त्वशीतिसहस्रैस्तु क्षेत्रपालैस्तु रक्षिताः ॥ ४३ ॥
तथामरेश्वरे याम्ये लिङ्गं वै त्रपलेश्वरम् । द्वितीयंचण्डहस्ताख्यं द्वे लिङ्गे तीर्थरक्षके
शिवेन स्थापिते पूर्वं कावेर्याद्यभिरक्षके ।
लक्षेण रक्षिता देवी नर्मदा बहुकल्पगा ॥ ४५ ॥
धनुषां षष्ट्यभियुतैः पुरुषैरीशयोजितैः । ॐकारशतसाहस्रैः पर्वतश्चाभिरक्षितः ॥
अन्यदेशकृतं पापमस्मिन्क्षेत्रे विनश्यति ।

अस्मिंस्तीर्थे कृतं पापं वज्रलेपो भविष्यति ॥ ४७ ॥
एषा ते कथिता तात कावेरी सरितां वरा । रुद्रदेहसमुत्पन्ना तेन पुण्यासरिद्वरा
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्ये कावेरीसङ्गममाहात्म्यवर्णनंनामैको-
नत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

दारुतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदोत्तरकूले तु दारुतीर्थमनुत्तमम् । यत्र सिद्धोमहाभाग! तपस्तप्त्वाद्विजोत्तमः

युधिष्ठिर उवाच

कोऽसौ द्विजवरश्रेष्ठः सिद्धस्तत्रमहामुने !। दारुकेति सुतः कस्यएतन्मेवक्तुमर्हसि

श्रीमार्कण्डेय उवाच

भार्गवे विपुले वंशे धीमतोदेवशर्मणः । दारुर्नाममहाभागोवेदवेदाङ्गपारगः ॥ ३ ॥
ब्रह्मचारी गृहस्थश्च वानप्रस्थो विधिक्रमात् ।
यतिधर्मविधानेन चचार विपुलं तपः ॥ ४ ॥
ध्यायन्वै समहादेवंनिराहारोयुधिष्ठिर !। उवासतीर्थेतस्मिन्वैयावत्प्राणपरिक्षयम्
तस्य नाम्ना तु तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ।
तत्र स्नात्वा विधानेन अर्चयेत्पितृदेवताः ॥ ६ ॥
सत्यवादीजितक्रोधः सर्वभूतहिते रतः । सर्वान्कामानवाप्नोति राजन्नत्रैव सर्वथा
यः कुर्यादुपवासंवसत्यशौचपरायणः । सौत्रामणिफलंचास्यसंभवत्यविचारितम्
ऋग्वेदजापी ऋग्वेदी साम वा सामपारगः ।

यजुर्वेदी यजुर्जप्त्वा लभते फलमुत्तमम् ॥ ६ ॥
प्राणांस्त्यजति यो मर्त्यस्तस्मिस्तीर्थे विधानतः ।
अनिवर्त्तिका गतिस्तस्य इत्येवं शङ्करोऽब्रवीत् ॥ १० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे दारुतीर्थमाहात्म्यवर्णनंनामत्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः

ब्रह्मावर्त्ततीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेच्चराजेन्द्रतीर्थंत्रैलोक्यविश्रुतम् । ब्रह्मावर्त्तमितिख्यातंसर्वपापप्रणाशनम्
तत्र सन्निहितो ब्रह्मा नित्यसेवी युधिष्ठिर !।
ऊर्ध्वबाहुर्निरालम्बश्चकार भ्रमणं सदा ॥ २ ॥
एकाहारवशोऽतिष्ठद् द्वादशाब्दं महाव्रती । अत्र तीर्थे विधानेनचिन्तयन्वैमहेश्वरम्
तेन तत्पुण्यमाख्यातं ब्रह्मावर्त्तमति प्रभो !। तत्र स्नात्वाविधानेनतर्पयेत्पितृदेवताः
अर्चयेद्देवमीशानं विष्णुं वा परमेश्वरम् । यत्फलंसर्वयज्ञानांविधिवद्दक्षिणावताम्
तत्फलं समवाप्नोति तत्तीर्थस्य प्रभावतः ।
यस्मिस्तीर्थे तु यो देवो दानवो वा द्विजोऽथ वा ॥ ६ ॥
सिद्धस्तेनैव तन्नाम्ना ख्यातं लोके महच्च तत् ।
न जलं न स्थलं नाम क्षेत्रं वा ह्यपराणि च ॥ ७ ॥
पवित्रत्वं लभन्त्येते पौरुषेण विना नृणाम् ।
सामर्थ्यान्निश्चयाद्धैर्यात्सिध्यन्ति पुरुषा नृप ॥ ८ ॥
प्रमादात्तस्य लोभेन पतन्ति नरके ध्रुवम् । सन्निरुध्येन्द्रियग्रामं यत्रयत्र वसेन्मुनिः

तत्रतत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥ १० ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां पञ्चमेऽवन्तीखण्डे रेवाखण्डे ब्रह्मावर्त्ततीर्थमाहात्म्यवर्णनं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः

पत्रेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

पत्रेश्वरं ततो गच्छेत्सर्वपापप्रणाशनम् । यत्र सिद्धो महाभागश्चित्रसेनसुतोबली

युधिष्ठिर उवाच

कोऽसौ सिद्धस्तदा ब्रह्मंस्तस्मिस्तीर्थे महातपाः ।
पुत्रः कस्य तु को हेतुरेतदिच्छामि वेदितुम् ॥ २ ॥

श्रीमार्कण्डेय उवाच

चित्रोनाम महातेजा इन्द्रस्य दयितः पुरा । तस्यपुत्रो नृपश्रेष्ठ! पत्रेश्वर इति श्रुतः
रूपवान्सुभगश्चैव सर्वशत्रुभयङ्करः । इन्द्रस्य दयितोऽत्यर्थं जय इत्येव चाऽपरः ॥
स कदाचित्सभामध्ये सर्वदेवसमागमे । मेनकानृत्यगीतेन मोहितः सुचिरं किल॥
तिष्ठते गतमर्यादो गतप्राण इव क्षणात् ।
तावत्सुरपतिर्देवः शशापाऽथाऽजितेन्द्रियम् ॥ ६ ॥
यस्मात्त्वं स्वर्गसंस्थोऽपि मर्त्यधर्ममुपेयिवान् ।
तस्मान्मर्त्ये चिरं कालं क्षपयिष्यस्यसंशयम् ॥ ७ ॥
एवमुक्तः सुरेन्द्रेण चित्रसेनसुतोयुवा । वेपमानः सुरश्रेष्ठं कृताञ्जलिरुवाच ह ॥

पत्रेश्वर उवाच

मया पापेन मूढेन अजितेन्द्रियचेतसा । प्राप्तं वै यत्फलं तस्य प्रसादं कर्त्तुमर्हसि

शक्र उवाच

नर्मदातटमाश्रित्य द्वादशाब्दं जितेन्द्रियः ।
आराधय शिवं शान्तं पुनः प्राप्स्यसि सद्गतिम् ॥ १० ॥
सत्यशौचरतानां च धर्मिष्ठानां जितात्मनाम् ।
लोकोऽयं पापिनां नैव इति शास्त्रस्य निश्चयः ॥ ११ ॥

एवमुक्ते महाराज सहस्राक्षेण धीमता । गन्धर्वतनयो धीमान्प्रणम्यागात्तु भूतलम्
रेवाया विमलेतोये ब्रह्मावर्त्त समीपतः । स्नात्वा जप्त्वा विधानेन अर्चयित्वा च शङ्करम्

वाय्वम्बुपियाकफलैश्च पुष्पैः पर्णैश्च मूलाशनयावकेन ।
ततापं पञ्चाग्नितपोभिरुग्रैस्ततश्च तोषं समगात्स देवः ॥ १४ ॥
पिनाकपाणिं वरदं त्रिशूलिनमुमापतिं ह्यन्धकनाशनं च ।
चन्द्रार्धमौलिं गजकृत्तिवाससं दृष्ट्वा पपाताऽग्रगतं समीक्ष्य ॥ १५ ॥

ईश्वर उवाच

वरं वृणीष्व भद्रं ते वरदोऽहं तवाऽनघ ! ।
यमिच्छसि ददाम्यद्य नाऽत्र कार्या विचारणा ॥ १६ ॥

पत्रेश्वर उवाच

यदि तुष्टोऽसि देवेश ! यदि देयो वरो मम । अत्र त्वं सततं तीर्थे ममनाम्ना भव प्रभो
एतच्छ्रुत्वा महादेवो हर्षगद्गदया गिरा । तथेत्युक्त्वा ययौ हृष्ट उमया सह शङ्करः

सोऽपि तत्तीर्थमाप्लुत्य गते देवे दिवम्प्रति ।
स्नात्वा जाप्यविधानेन तर्पयित्वा पितॄन्पुनः ॥ १९ ॥
स्थापयामास देवेशं तस्मिंस्तीर्थे विधानतः ।
पत्रेश्वरं तु विख्यातं त्रिषु लोकेषु भारत ! ॥ २० ॥

इन्द्रलोकं गतः शापान्मुक्तः सोऽपि नरेश्वर ! । हृष्टः प्रमुदितो रम्यं जयशब्दादिमङ्गलैः
एष ते कथितः प्रश्नः पृष्टो यो वै युधिष्ठिर ! । तत्र स्नानेन चैकेन सर्वपापैः प्रमुच्यते
यस्त्वर्चयेन्महादेवं तस्मिंस्तीर्थे युधिष्ठिर ! ।

स्नात्वाऽभ्यर्च्य पितॄन्देवान्सोऽश्वमेधफलं लभेत् ॥ २३ ॥
मृतो वर्षशतं सार्धं क्रीडयित्वा च शिवे पुरे ।
राजा वा राजतुल्यो वा पश्चान्मर्त्येषु जायते ॥ २४ ॥

वेदवेदाङ्गतत्त्वज्ञ ! जीवेच्च शरदःशतम् । व्याधिशोकविनिर्मुक्तः पुनःस्मरति तज्जलम्

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे पत्रेश्वरतीर्थमाहात्म्यवर्णनंनाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः

अग्नितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्त राजेन्द्र अग्नितीर्थमनुत्तमम् । यत्र संनिहितो ह्यग्निर्गतः कामेन मोहितः

युधिष्ठिर उवाच

कथं देवो जगद्धाता कामेन कलुषीकृतः । कथं च नित्यदावासएकस्थानेषु जायते
एतत्त्वाश्चर्यमतुलं सर्वलोकेष्वनुत्तमम् । कथयस्व महाभाग ! परं कौतूहलं मम ॥३॥

श्रीमार्कण्डेय उवाच

साधुसाधु महाप्राज्ञ पृष्टः प्रश्नस्त्वयाऽनघ । कथयामि यथापूर्वं श्रुतमेतन्महेश्वरात्
आसीत्कृतयुगे राजा नाम्ना दुर्योधनो महान् । हस्त्यश्वरथसम्पूर्णो मेदिनीपरिपालकः
रूपयौवनसम्पन्नं दृष्ट्वा तं पृथिवीपतिम् । दिव्योपभोगसम्पन्नं प्रार्थयामास नर्मदा

स तु तां चकमे कन्यां त्यक्त्वाऽन्यं प्रमदाजनम् ।
मुदा परमया युक्तो माहिष्मत्याः पतिर्नृप ! ॥ ७ ॥

रमते स तया सार्द्धं काले वै नृपसत्तम ! । नर्मदा जनयामास कन्यां पद्मदलेक्षणाम्
अङ्गप्रत्यङ्गसम्पन्ना यस्माल्लोकेषु विश्रुता । तस्यां पिता च माता च चक्रतुः प्रेमबन्धनम्

कालेनाऽतिसुदीर्घेण यौवनस्था वराङ्गना ।

प्रार्थ्यमानाऽपि राजन्वै नात्मानं दातुमिच्छति ॥ १० ॥

ततोऽन्यदिवसेवह्निर्द्विजरूपो महातपाः । राजानंप्रार्थयामास रहो गत्वा शनैःशनैः

भोभो रघुकुलश्रेष्ठद्विजोऽहं मन्दसन्ततिः । दरिद्रोह्यसहायश्चभार्यार्थेवरयामिताम्

कन्या सुदर्शना नाम रूपेणाऽप्रतिमा भुवि ।

तां ददस्व महाभाग! वर्द्धते तव मन्दिरे ॥ १३ ॥

ब्रह्मचर्येण निर्विण्ण एकाकी कामपीडितः । याचमानस्यमेतात प्रसादं कर्तुमर्हसि

राजोवाच

नाहं द्रव्यविहीनस्य असवर्णस्य कर्हिचित् ।

दास्यामि त्वां सुतां शुभ्रां गम्यतां द्विजपुङ्गव !॥ १५ ॥

एवमुक्तस्तदावह्निःपरांपीडामुपागतः । नकिञ्चिदुक्त्वाराजानं तत्रैवान्तरधीयत

गतेवादर्शनं विप्रे राजा मन्त्रिपुरोहितैः । मन्त्रयित्वाऽकालेतुतुष्टोमखमुखेस्थितः

यजतश्च मखे भक्त्या ब्राह्मणैः सह भारत !।

ततश्चाऽदर्शनं वह्निः सर्वेषां पश्यतामगात् ॥ १८ ॥

विप्रा दुर्मनसो भूत्वा गता राज्ञो हि मन्दिरम् ।

वह्निनाशं विमनसो राजानमिदमब्रुवन् ॥ १६ ॥

ब्राह्मणा ऊचुः

दुर्योधन! महाराज श्रूयतां महदद्भुतम् । न श्रुतं न च दृष्टं वा कौतुकं नृपपुङ्गव !॥

अग्निकार्यप्रवृत्तानां सर्वेषां विधिवन्नृप !। केनाऽपि हेतुनावह्निर्दृश्यतेनज्वलत्युत

तच्छ्रुत्वा विप्रियं घोरं राजा विप्रमुखाच्च्युतम् ।

आसनात्पतितो भूमौ छिन्नमूल इव द्रुमः ॥ २२ ॥

आश्वस्यच मुहूर्त्तेन उन्मत्त इव संस्तदा । निरीक्ष्यच दिशःसर्वा इदं वचनमब्रवीत्

किमेतदाश्चर्यपरमिति भोभो द्विजोत्तमाः !।

कथ्यतां कारणं सर्वं शास्त्रदृष्ट्या विभाव्य च ॥ २४ ॥

मम वा दुष्कृतं किञ्चिदुताहोभवतामिह । येननष्टोऽग्निशालायां हुतभुक्केनहेतुना

मन्त्रच्छिद्रमथान्यद्वा नैवकिञ्चिददक्षिणम् । क्रियाहीनंकृतंवाथ केनवह्निर्न दृश्यते

अन्नहीनोदहेद्राष्ट्रं मन्त्रहीनस्तुऋत्विजः । दातारंदक्षिणाहीनोनास्तियज्ञसमोरिपुः

ब्राह्मणा ऊचुः

न मन्त्रहीना हि वयं न च राजन्व्रतैस्तथा ।

द्रव्येण च न हीनस्त्वमन्यत्पापं विचिन्त्यताम् ॥ २८ ॥

राजोवाच

तथापि यूयं सहिता उपायं चिन्तयन्त्विति । येनश्रेयोभवेन्नित्यमिहलोके परत्र च

एवमुक्तास्ततःसर्वेब्राह्मणाःकृतनिश्चयाः। निराहाराःस्थिताःसर्व्वेयत्रनष्टोहुताशनः

ततः स्वप्ने महातेजा हुतभुग्ब्राह्मणांस्तदा ।

उवाच श्रूयतां सर्व्वैर्मम नाशस्य कारणम् ॥ ३१ ॥

प्रार्थितोऽयंमयाराजासुतांदातुंन चेच्छति । तेननष्टोऽग्निशरणादहंभोद्विजसत्तमाः

यदि मे स्वसुतां राजा ददाति परमार्चिताम् ।

तदाऽस्य ज्वलमानोऽहं गृहे तिष्ठामि नान्यथा ॥ ३३ ॥

तच्छ्रुत्वा वचनंविप्रावैश्वानरमुखोद्गतम् । विस्मयोत्फुल्लनयना राजानमिदमब्रुवन्

भवतो मतमाज्ञाय सर्वे गत्वाऽग्निमन्दिरम् ।

निराहाराः स्थिता रात्रौ पश्यामो जातवेदसम् ॥ ३५ ॥

तेनोक्ताः स्वसुतां चेत्तु राजा मे दातुमिच्छति ।

ततोऽस्य भूयोऽपि गृहे ज्वलेऽहं नान्यथा द्विजाः ॥ ३६ ॥

एवं ज्ञात्वा महाराज स्वसुतां दातुमर्हसि ॥ ३७ ॥

राजोवाच

भवतांतस्यवाकार्यंदेवस्य वचनं हृदि । समर्थं कर्तुमिच्छामि कन्यादानेह्यनुत्तमम्

मम सन्निहितोनित्यंगृहे तिष्ठतुपावकः । ददामिरुचिरापाङ्गीं नान्यथाकरवाणिवै

एवं ते ब्राह्मणाः श्रुत्वा तथाग्निं प्राप्य सत्वरम् ।

कथयित्वा विवाहेन योजयामासुराशु वै ॥ ४० ॥

सुदर्शनायालाभेन परितुष्टोहुताशनः । ज्वलतेसन्निधौनित्यं माहिष्मत्यांयुधिष्ठिर
ततः प्रभृति तत्तीर्थमग्नितीर्थंप्रचक्षते । ये तत्र पक्षसन्ध्यौ तु स्नानदानैस्तु भाविताः
तर्पयन्तिपितृन्देवांस्तेऽग्निष्टोमफलैर्युताः । सुवर्णंयेप्रयच्छन्तितस्मिंस्तीर्थेनराधिप
पृथ्वीदानफलं तत्र जायते नात्र संशयः । अनाशकं तु यःकुर्यात्तस्मिंतीर्थेनराधिप
स मृतो ह्यग्निलोके तु क्रीडते सुरपूजितः। एतत्ते ह्यग्नितीर्थस्य सम्भवःकथितोमया
सर्वपापहरः पुण्यः श्रुतमात्रोनरोत्तम !। धन्यःपापहरो नित्यमित्येवं शङ्करोऽब्रवीत्

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेऽग्नितीर्थमाहात्म्यवर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

—:*:—

चतुस्त्रिंशोऽध्यायः

रवितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तत्रैवतु भवेदन्यदादित्यस्य महात्मनः । कीर्त्तयामि नरश्रेष्ठ! यदि ते श्रवणे मतिः

युधिष्ठिर उवाच

एतदाश्चर्यमतुलंश्रुत्वातवमुखोद्गतम् । विस्मयाद्धृष्टरोमाऽहंजातोऽस्मिमुनिसत्तम
सहस्रकिरणोदेवो हर्ता कर्ता निरञ्जनः । अवतारेण लोकानामुद्धर्ता नर्मदातटे ॥३॥
पुरुषाकारो भगवानुताऽहो तपसःफलात् । कस्यगोत्रेसमुत्पन्नःकस्यदेवोऽभवद्वशी

श्रीमार्कण्डेय उवाच

कुलिकान्वयसम्भूतो ब्राह्मणोभक्तिमाञ्छुचिः ।
ईक्ष्यामीति रविं तत्र तीर्थे यात्राकृतोद्यमः ॥ ५ ॥

योजनानांशतंसाग्रंनिराहारोगतोदकः । प्रस्थितोदेवदेवेनस्वप्नान्ते वारितः किल

भोभोमुनेमहासत्त्वअलंतेव्रतमीदृशम् । सर्वंव्याप्यस्थितंपश्य स्थावरंजङ्गमंचमाम्

तपाम्यहं ततो वर्षं निगृह्णाम्युत्सृजामि च ।
न मृतं चैव मृत्युश्च यः पश्यति स पश्यति ॥ ८ ॥
वरं वरय भद्रं त्वमात्मनो यस्तवेप्सितम् ॥ ९ ॥

ब्राह्मण उवाच

यदि तुष्टोऽसि मे देव देयो यदिवरो मम । उत्तरे नर्मदाकूले सदा सन्निहितो भव

ये भक्त्या परया देव! योजनानां शते स्थिताः ।
स्मरिष्यन्ति जितात्मानस्तेषां त्वं वरदो भव ॥ ११ ॥

कुब्जान्धबधिरामूकाये केचिद्विकलेन्द्रियाः । तवपादौनमस्यन्तितेषांत्वंवरदोभव
शीर्णघ्राणागतिधियो ह्यस्थिचर्मावशेषिताः । तेषांत्वंकरुणादेव अचिरेणकुरुष्वह
येऽपित्वांनर्मदातोये स्नात्वातत्र दिनेदिने । अर्चयन्ति जगन्नाथ तेषां त्वं वरदोभव
प्रभाते येस्तविष्यन्तिस्तवैर्वैदिकलौकिकैः । अभिप्रेतंवरंदेवं तेषां त्वं ददभोऽच्युत
तवाग्रे वपनं देव कारयन्ति नरा भुवि । स्वामिंस्तेषां वरो देय एषमे परमो वर ॥

एवमस्त्विति तं चोक्त्वा मुनिं करुणया पुनः ।
शतभागेन राजेन्द्र! स्थित्वा चाऽदर्शनंगतः ॥ १७ ॥
तत्र तीर्थे नरो भक्त्या गत्वा स्नानं समाचरेत् ।
तर्पयेत् पितृदेवांश्च सोऽग्निष्टोमफलं लभेत् ॥ १८ ॥
अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप !।
द्योतयन्वै दिशः सर्वा अग्निलोकं स गच्छति ॥ १९ ॥

यस्तत्तीर्थंसमासाद्यत्यजतीहकलेवरम् । स गतो वारुणंलोकमित्येवंशङ्करोऽब्रवीत्
तत्रतीर्थे तु यः कश्चित्संन्यासेन तनुं त्यजेत् । षष्टिवर्षसहस्राणिस्वर्गलोकेमहीयते
अप्सरोगणसङ्कीर्णेदिव्यशब्दानुनादिते । उषित्वाऽऽयातिमर्त्त्येवैवेदवेदाङ्गविद्भवेत्
व्याधिशोकविनिर्मुक्तो धनकोटिपतिर्भवेत् ।:पुत्रदारसमोपेतोजीवेच्च शरदः शतम्

प्रातरुत्थाय यस्तत्र स्मरते भास्करं तदा ।

आजन्मजनितात्पापान्मुच्यते नाऽत्र संशयः ॥ २४ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे रवितीर्थवर्णनं नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः

मेघनादतीर्थमाहात्म्यवर्णनम्

युधिष्ठिर उवाच

जलमध्ये महादेवः केनतिष्ठति हेतुना । उत्तरं दक्षिणं कूलं वर्जयित्वा द्विजोत्तम

श्रीमार्कण्डेय उवाच

एतदाख्यानमतुलंपुण्यं श्रुतिसुखावहम् । पुराणे यच्छ्रुतं तात तत्ते वक्ष्याम्यशेषतः त्रेतायुगे महाभाग रावणो देवकण्टकः । त्रैलोक्यविजयी रौद्रः सुरासुरभयङ्करः देवदानवगन्धर्वैर्ऋषिभिश्च तपोधनैः । अवध्योऽथ विमानेन यावत्पर्यटतेमहीम् ॥ तावद्विन्ध्यगिरेर्मध्येदानवोबलदर्पितः । मयोनामेतिविख्यातोगुहावासी तपश्चरन् तस्य पार्श्वगतो रक्षो विनयादवनिंगतः । पूजितो दानसन्मानैरिदं वचनमब्रवीत् कस्येयं पद्मपत्राक्षी पूर्णचन्द्रनिभानना । किंनामधेया तपति तप उग्रं कथं विभो

मय उवाच

दानवानां पतिः श्रेष्ठो मयोऽहं नाम नामतः ।
भार्या तेजोवती नाम तस्यास्तु तनया शुभा ॥ ८ ॥

मन्दोदरीतिविख्यातातपते भर्तृकारणात् । आराधयन्तीभर्त्तारमुमयादयितंशुभम् तच्छ्रुत्वा वचनं तस्य रावणोमदमोहितः । प्रसृतःप्रणतो भूत्वा मयम्वचनमब्रवीत् पौलस्त्यान्वयसञ्जातो देवदानवदर्पहा । प्रार्थयामिमहाभागसुतां त्वं दातुमर्हसि ज्ञात्वापैतामहंवृत्तंमयेनाऽपि महात्मना । रावणायसुतादत्ता पूजयित्वाविधानतः

गृहीत्वा तां तदा रक्षोऽभ्यर्च्यमानो निशाचरैः ।
देवोद्याने विमानैश्च क्रीडते स तया सह ॥ १३ ॥

केनचित्त्वथ कालेन रावणो लोकरावणः । पुत्रं पुत्रवतां श्रेष्ठो जनयामास भारत तेनैवजातमात्रेणरावो मुक्तोमहात्मना । सम्वर्त्तकस्यमेघस्य तेन लोकाजडीकृताः श्रुत्वातन्नर्दितंघोरं ब्रह्मालोकपितामहः । नाम चक्रे तदा तस्य मेघनादोभविष्यति एवंनामा कृतसोऽपि परमं व्रतमास्थितः । तोषयामास देवेशमुमया सह शङ्करम् व्रतैर्नियमदानैश्च होमजाप्यविधानतः । कृच्छ्रचान्द्रायणैर्नित्यं कृशंकुर्वन्कलेवरम् एवमन्यद्दिने तात! कैलासं धरणीधरम् । गत्वालिङ्गद्वयंगृह्यप्रस्थितोदक्षिणामुखः

नर्मदातटमाश्रित्य स्नातुकामो महाबलः ।
निक्षिप्य पूजयन्देवं कृतजाप्यो नरेश्वर !॥ २० ॥

तत्रायतनवासेन स्नातो हुतहुताशनः । कृतकृत्यमिवात्मानं मानयित्वा निशाचरः गन्तुकामः परंमार्गं लङ्कायां नृपसत्तम !। एकमुद्धरतो लिङ्गं प्रणतः सव्यपाणिना

द्वितीयं तु द्वितीयेन भक्त्या पौलस्त्यनन्दनः ।
तावदेव महालिङ्गं पतितं नर्मदाऽम्भसि ॥ २३ ॥
याहियाहीति चेत्युक्त्वा जलमध्ये प्रतिष्ठितः ।
नमित्वा रावणिस्तस्य देवस्य परमेष्ठिनः ॥ २४ ॥

जगामाकाशमाविश्य पूज्यमानोनिशाचरैः । तदाप्रभृतितत्तीर्थंमेघनादेतिविश्रुतम्

पूर्वं तु गर्जनं नाम सर्वपापक्षयङ्करम् ।
तस्मिंस्तीर्थे तु राजेन्द्र! यस्तु स्नानं समाचरेत् ॥ २६ ॥

अहोरात्रोषितोभूत्वाअश्वमेधफलंलभेत् । पिण्डदानंतुयःकुर्यात्तस्मिंस्तीर्थेनराधिप यत्फलं सत्रयज्ञेन तद्भवेन्नाऽत्र संशयः । तेन द्वादशवर्षाणि पितरः सम्प्रतर्पिताः ॥ यस्तु भोजयते विप्रं षड्रसाऽन्नेनभारत !। अक्षयं पुण्यमाप्नोति तत्र तीर्थे नरोत्तम

प्राणत्यागं तु यः कुर्याद्भावितो भावितात्मना ।
स वसेच्छाङ्करे लोके यावदाभूतसम्प्लवम् ॥ ३० ॥

एषा ते नरशार्दूल! गर्जनोत्पत्तिरुत्तमा । कथिता स्नेहबन्धेन सर्वपापक्षयङ्करी

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे मेघनादतीर्थमाहात्म्यवर्णनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः

दारुकतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेच्च राजेन्द्र! दारुतीर्थमनुत्तमम् । दारुको यत्र संसिद्ध इन्द्रस्य दयितः पुरा

युधिष्ठिर उवाच

दारुकेण कथं तात! तपश्चीर्णं पुराऽनघ !।
विधानं श्रोतुमिच्छामि त्वत्सकाशाद् द्विजोत्तम !॥ २ ॥

श्रीमार्कण्डेय उवाच

हन्त ते कथयिष्यामि विचित्रं यत्पुरातनम् ।
वृत्तं स्वर्गसभामध्ये ऋषीणां भावितात्मनाम् ॥ ३ ॥

सूतो वज्रधरस्येष्टो मातलिर्नामनामतः । सपुत्रं शप्तवान्पूर्वं कस्मिंश्चित्कारणान्तरे
शापाहतो वेपमान इन्द्रस्य चरणौ शुभौ ।
प्रपीड्य मूर्ध्ना देवेशं विज्ञापयति भारत !॥ ५ ॥

तमुवाचाभिशप्तंचाप्यनाथंचसुरेश्वरः । कर्मणाकेनशापस्यघोरस्याऽन्तोभविष्यति
नर्मदातटमाश्रित्य तोषयन्वैमहेश्वरम् । तिष्ठ यावद्युगस्यान्तं पुनर्जन्मह्यवाप्स्यसि
पुनर्भूत्वा तु पूतस्त्वं दारुकोनाम विश्रुतः। संसेव्य परमं देवं शङ्खचक्रगदाधरम्
मानुषं भावमापन्नस्ततः सिद्धिमवाप्स्यसि ।
एवमुक्तस्तु देवेन सहस्राक्षेण धीमता ॥ ६ ॥

प्रणम्य शिरसाभूमिमागतोऽसौ ह्यचेतनः । नर्मदातटमाश्रित्य कर्षयन्निजविग्रहम्
व्रतोपवाससंखिन्नो जपहोमरतः सदा । महादेवं महात्मानं वरदं शूलपाणिनम् ॥
भक्त्या तु परया राजन्यावदाभूतसम्प्लवम् ।
अंशावतरणाद्विष्णोः सूतो भूत्वा महामतिः ॥ १२ ॥
तोषयन्वै जगन्नाथं ततो यातो हि सद्गतिम् ॥ १३ ॥

एषतत्संभवस्तात दारुतीर्थस्यसुव्रत !। कथितोऽयं मया पूर्वंयथामेशङ्करोऽब्रवीत्
ततो युधिष्ठिरःश्रुत्वा विस्मयंपरमंगतः । भ्रातृन्विलोकयामास हृष्टरोमा मुहुर्मुहुः

श्रीमार्कण्डेय उवाच

तस्मिंस्तीर्थेनरः स्नात्वा विधिपूर्वंनरेश्वर । उपास्यसन्ध्यांदेवेशमर्चयेच्च शङ्करम्
वेदाऽभ्यासं तु तत्रैव यः करोति समाहितः ।
सोऽश्वमेधफलं राजँल्लभते नाऽत्र संशयः ॥ १७ ॥
तस्मिंस्तीर्थे तु यो भक्त्या भोजयेद् ब्राह्मणाञ्छुचिः ।
स तु विप्रसहस्रस्य लभते फलमुत्तमम् ॥ १८ ॥

स्नानंदानं जपोहोमः स्वाध्यायोदेवतार्चनम् । यत्कृतंशुद्धभावेन तत्सर्वंसफलंभवेत्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे दारुकतीर्थमाहात्म्यवर्णनंनाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः

देवतीर्थवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत राजेन्द्रदेवतीर्थमनुत्तमम्। येन देवास्त्रयस्त्रिंशत्स्नात्वासिद्धिंपरांगताः

युधिष्ठिर उवाच

कथंतातसुराःसर्वे दानवैर्बलवत्तरैः। निर्जितास्तत्र तीर्थेचस्नात्वासिद्धिंपरांगताः

मार्कण्डेय उवाच

पुरादैत्यगणैरुग्रैर्युद्धेऽतिबलवत्तरैः। इन्द्रो देवगणैःसार्द्धं स्वराज्याच्च्यावितोनृप

हस्त्यश्वरथयानौघैर्मर्द्दयित्वा वरूथिनीम्।

विध्वस्ता भेजिरे मार्गं प्रहारैर्जर्जरीकृताः॥ ४॥

जम्भशुम्भनिशुम्भैश्चकूष्माण्डकुहकादिभिः। वेपमानार्द्दिताःसर्वेब्रह्माणमुपतस्थिरे

प्रणम्य शिरसा देवंब्रह्माणं परमेष्ठिनम्। तदा विज्ञापयामासुर्देवा वह्निपुरोगमाः

पश्यपश्य महाभाग दानवैःशकलीकृताः। वियोजिताःपुत्रदारैस्त्वामेवशरणंगताः

परित्रायस्व देवेश सर्वलोकपितामह। नाऽन्यागतिःसुरेशान!त्वांमुक्त्वापरमेश्वर

ब्रह्मोवाच

दानवानां विघातार्थं नर्मदातटमास्थिताः।

तपः कुरुध्वं स्वस्थाः स्थ तपो हि परमं बलम्॥ ६॥

नाऽन्योपायोनवैमन्त्रोविद्यतेनच मेक्रिया। विनारेवाजलं पुण्यं सर्वपापक्षयङ्करम्

दारिद्र्यव्याधिमरणबन्धनव्यसनानिच। एतानि चैवपापस्य फलानीति मतिर्मम

एवं ज्ञात्वातत श्चैवतपः कुरुतदुष्करम्। तथा चैव सुराः सर्वे देवा ह्यग्निपुरोगमाः

तच्छ्रुत्वा वचनंतथ्यंब्रह्मणः परमेष्ठिनः। नर्मदामागताः सर्वे देवा ह्यग्निपुरोगमाः॥

चेरुव तत्र विपुलं तपः सिद्धिमवाप्नुवन्। तदाप्रभृति तत्तीर्थं देवतीर्थमनुत्तमम्॥

गीयते त्रिषुलोकेषु सर्वपापक्षयंकरम्। तत्र गत्वाचयो मर्त्यो विधिनासंयतेन्द्रियः

स्नानं समाचरेद्भक्त्या स लभेन्मौक्तिकं फलम्।

यस्तु भोजयते विप्रांस्तस्मिंस्तीर्थे नराधिप!॥ १६॥

सलभेन्मुख्यविप्राणां फलं साहस्रिकंनृप। तत्रदेवशिला रम्या महापुण्यविवर्द्धिनी

सन्न्यासेनमृतायेतुतेषांस्यादक्षयागतिः। अग्निप्रवेशंयः कुर्यात्तस्मिंस्तीर्थेनराधिप

रुद्रलोके वसेत्तावद्यावदाभूतसंप्लवम्। एवं स्नानंजपोहोमःस्वाध्यायोदेवतार्चनम्

सुकृतं दुष्कृतं वाऽपितत्रतीर्थेऽक्षयंभवेत्। एषतेविधिरुद्दिष्ट उत्पत्तिश्चैव भारत!॥

देवतीर्थस्य निखिलायथावै शङ्कराच्छ्रुता। पठन्तिये पापहरंसर्वदुःखविमोचनम्

देवतीर्थस्य चरितं देवलोकं व्रजन्ति ते॥ २२॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे देवतीर्थमाहात्म्यवर्णनंनाम सप्तत्रिंशोऽध्यायः॥ ३७॥

अष्टत्रिंशोऽध्यायः

नर्मदेश्वरमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत राजेन्द्र! गुहावासीति चोत्तमम्।

यत्र सिद्धो महादेवो गुहावासी समाबुर्दम्॥ १॥

युधिष्ठिर उवाच

केन कार्येण भोतात महादेवो जगद्गुरुः। गुहायामनयत्कालं सुदीर्घं द्विजसत्तम!

एतद्विस्तरतः सर्वं कथयस्वममानघ!। श्रोतुमिच्छाम्यहंसर्वं परंकौतूहलंहि मे॥

मार्कण्डेय उवाच

साधुप्रश्नोमहाराजपृष्टोयोवैत्वयोत्तमः। पुराणेविस्तरो ह्यस्यनशक्योहिमयाऽधुना

कथितुं वृद्धभावत्वादतीतोबहुकालिकः । सङ्क्षेपात्तेनतेतात कथयामिनिबोध मे
पुरा कृतयुगेराजन्नासीद्दारुवनं महत् । नामाद्रुमलताकीर्णं नानावल्ल्युपशोभितम्
सिंहव्याघ्रवराहैश्च गजैः खड्गैर्निषेवितम् । बहुपक्षियुतं दिव्यंयथा चैत्ररथं वनम्

तत्र केचिन्महाप्राज्ञा वसन्ति संशितव्रताः ।
वसन्ति परया भक्त्या चतुराश्रमभाविताः ॥ ८ ॥

ब्रह्मचारी गृहस्थश्च वानप्रस्थोयतिस्तथा । स्वधर्मनिरताःसर्वेवाञ्छन्तःपरमंपदम्
तावद्वसन्तसमयेकस्मिंश्चित्कारणान्तरे । विमानस्थोमहादेवोगच्छन्वैह्य मयासह
ददर्शतोय आवासमृक्सामयजुर्नादितम् । अलक्ष्यागतनिर्गम्यं सर्वपापक्षयङ्करम्
तं दृष्ट्वा मुदिता देवी हर्षगद्गदया गिरा । पप्रच्छ देवदेवेशं शशाङ्ककृतभूषणम् ॥

देव्युवाच

कस्यायमाश्रमो:देव!वेदध्वनिनिनादितः । यंदृष्ट्वा क्षुत्पिपासाद्यैःश्रमैश्च परिहीयते

महेश्वर उवाच

किं त्वया नश्रुतंदेवि! महादारुवनं महत् । बहुविप्रजनो यत्र गृहधर्मेण वर्त्तते ॥
अत्र यः स्त्रीजनः कश्चिद्भर्तृशुश्रूषणेरतः । नान्यो देवो नवै धर्मो ज्ञायते शैलनन्दिनि
एतच्छ्रुत्वा परं वाक्यं देवदेवेन भाषितम् । कौतूहलसमाविष्टा शङ्करंपुनरब्रवीत्
यत्त्वयोक्तं महादेव पतिधर्मरताःस्त्रियः । तासांत्वं मदनोभूत्वा चारित्रंक्षोभयप्रभो

ईश्वर उवाच

यत्त्वायोक्तं च वचनं नहिमेरोचतेप्रिये । ब्राह्मणा हि महद्भूतं न चैषांविप्रियंचरेत्
मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः । चक्रात्क्रूरतरोमन्युस्तस्माद्विप्रं न कोपयेत्

न ते देवा न ते लोका न ते नागा न चासुराः ।
दृश्यन्ते त्रिषु लोकेषु ये तैर्दृष्टैर्न नाशिताः ॥ २० ॥
तेषां मोक्षस्तथा स्वर्गो भूमिर्मर्त्ये फलानि च ।
येषां तुष्टा महाभागा ब्राह्मणाः क्षितिदेवताः ॥ २१ ॥

एवं ज्ञात्वामहाभागेअसद्ग्राहं परित्यज । तत्रलोके विरुद्धं वै कुप्यन्तेयेन वैद्विजाः

देव्युवाच

नाहं ते दयितादेव नाऽहं तेवशवर्त्तिनी । अकृत्वाऽद्यश्च वैतासांमानंसुरसुपूजितम्
लोकालोके महादेव अशक्यंनास्ति ते प्रभो !। क्रियतांममचैवैकमेतत्कार्यंसुरोत्तम
एवमुक्तो महादेवोदेव्या वाक्यहिते रतः । कृत्वा कापालिकं रूपं ययौदारुवनंप्रति
महाहितजटाजूटं नियम्य शशिभूषणम् । कण्ठत्राणं परं कृत्वा धारयन्कर्णकुण्डले
व्याघ्रचर्मपरीधानो मेखलाहारभूषितः । नूपुरध्वनिनिर्घोषैः कम्पयन्वै वसुन्धराम्

महानूर्द्ध्वजटामाली कृत्तिभस्मानुलेपनः ।
कृत्वा हस्ते कपालं तु ब्रह्मणश्चःमहात्मनः ॥ २८ ॥

महाडमरुघोषेण कम्पयन्वै वसुन्धराम् । प्रभातसमये प्राप्तो महादारुवनं प्रति ॥
तावत्पुण्यजनः सर्वपुष्पपत्रफलार्थिकः । निर्गतो बहुभिः सार्द्धं पवमानः समन्ततः
तद्दृष्ट्वा महदाश्चर्यं रूपं देवस्यभारत । युवतीनां मनस्तासां कामेन कलुषीकृतम्
शोभनं पुरुषं दृष्ट्वा सर्वा अपि वराङ्गनाः । क्लेदभावं ततो जग्मुर्मुदा दारुवनस्त्रियः
विकारा बहवस्तासांदेवं दृष्ट्वा महाद्भुतम् । सञ्जाता विप्रपत्नीनांतदातासुनरोत्तम

परिधानं न जानन्ति काश्चिद्दृष्ट्वा वराङ्गनाः ।
उत्तरीयं तथा चान्या महामोहसमन्विताः ॥ ३४ ॥

केशभारपरिभ्रष्टा काचिदेवासनोत्थिता । दातुकामातदाभैक्ष्यंचेष्टितुंनैवचाशकत्

काचिद्दृष्ट्वा महादेवं रूपयौवनगर्विता ।
उत्संगे संस्थितं बालं विस्मृता पायितुं स्तनम् ॥ ३६ ॥
कामबाणहता चाऽन्या बाहुभ्यां पीड्य सुस्तनौ ।
निःश्वसन्ती तदा चोष्णं न किञ्चित्प्रतिजल्पति ॥ ३७ ॥

एवं संक्षोभ्य तं सर्वं स्त्रीजनंपरमेश्वरः । जगाम तत्र वै तासांक्षोभंकृत्वामहाद्भुतम्

तावत्ते ब्राह्मणाः सर्वे भ्रमित्वा कानन महत् ।
आगताः स्वगृहे दारान्दृष्ट्वाश्च हतौजसः ॥ ३६ ॥
यासां पूर्वतरा भक्तिः पातिव्रत्ये पतीन्प्रति ।

घलितास्ता विदित्वाशु निर्जग्मुर्द्विजसत्तमाः ॥ ४० ॥
सम्विदं परमांकृत्वाज्ञात्वादेवंमहेश्वरम् । क्षोभयित्वामनस्तासांततश्चादर्शनंगतम्
क्रोधाविष्टो द्विजः कश्चिद्दण्डमुद्यम्य धावति ।
कल्माषयष्टिमन्ये च तथान्ये दर्भमुष्टिकाम् ॥ ४२ ॥
इतश्चेतश्च ते सर्वेभ्रमित्वाकाननं नृप । एकीभूत्वामहात्मानो व्याजह्रुश्चरुषागिरम्
यदिदं च हुतं किञ्चिद्गुरवस्तोषिता यदि । तेनसत्येन देवस्यलिङ्गं पततुचोत्तमम्
आश्रमादाश्रमं सर्वे न त्यजामो विधिक्रमात् ।
तेन सत्येन देवस्यलिङ्गं पततु भूतले ॥ ४५ ॥
एवं सत्यप्रभावेण त्रिरुक्तेनद्विजन्मनाम् । शिवस्य पश्यतोलिङ्गंपतितंधरणीतले
हाहाकारो महानासील्लोकालोकेऽपि भारत !।
देवस्य पतिते लिङ्गे जगतश्च महाक्षये ॥ ४७ ॥
पतमानस्य लिङ्गस्य'शब्दोऽभूच्च सुदारुणः ।
उल्कापाता दिशां हाहा भूमिकम्पाश्च दारुणाः ॥ ४८ ॥
पतन्ति पर्वताग्राणि शोषं यान्ति च सागराः ।
देवस्य पतिते लिंगे देवा विमनसोऽभवन् ॥ ४९ ॥
समेत्य सहिताः सर्वे ब्रह्माणं परमेष्ठिनम् ।
कृताञ्जलिपुटाः सर्वे स्तुवन्ति विविधैः स्तवैः ॥ ५० ॥
ततस्तुष्टो जगन्नाथश्चतुर्वदनपङ्कजः । आर्त्तान्प्राह सुरान्सर्वान्मा विषादं गमिष्यथ
ब्रह्मशापाभिभूतोऽसौदेवदेवस्त्रिलोचनः । तुष्टैस्तैस्तपसा युक्तैः पुनर्मोक्षंगमिष्यति
एतच्छ्रुत्वा ययुर्देवा यथागतमरिन्दम । भावयित्वा ततः सर्वे मुनयश्चैव भारत॥
विश्वामित्रवसिष्ठाद्या जाबालिरथ कश्यपः ।
समेत्य सहिताः सर्वे तमूचुस्त्रिपुरान्तकम् ॥ ५४ ॥
ब्रह्मतेजोहि बलवद्द्विजानांहिसुरेश्वर। क्षान्तियुक्तस्तपस्तप्त्वाभविष्यसिगतक्लमः
यतः क्षोभादृषीणांच तदेवंलिङ्गमुत्तमम् । पतितं ते महादेव न तत्पूज्यं भविष्यति

न तच्छ्रेयोऽग्निहोत्रेणनाग्निष्टोमेनलभ्यते । प्राप्नुवन्ति चयच्छ्रेयोमानवालिङ्गपूजने
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् । वचनेनतु विप्राणामेतत्पूज्यं भविष्यति ॥
ब्रह्मविष्ण्विन्द्रचन्द्राणामेतत्पूज्यं भविष्यति । यत्फलं तवलिङ्गस्यइह लोके परत्रच
एवमुक्तोजगन्नाथः प्रणिपत्य द्विजोत्तमान् । मुदा परमया युक्तः कृताञ्जलिरभाषत
ब्राह्मणा जङ्गमं तीर्थं निर्जलं सार्वकामिकम् ।
येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनो जनाः ॥ ६१ ॥
न तत्क्षेत्रं न तत्तीर्थमूषरंपुष्कराणि च । ब्राह्मणेमन्युमुत्पाद्ययत्र गत्वा सशुद्ध्यति
न तच्छास्त्रं यन्न विप्रप्रणीतं न तद्दानं यन्न विप्रप्रदेयम् ।
न तत्सौख्यं यन्नविप्रप्रसादान्न तद्दुःखं यन्न विप्रप्रकोपात् ॥ ६३ ॥
पृथिव्यां यानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
एकस्य विप्रवाक्यस्य कलां नार्हन्ति षोडशीम् ॥ ६४ ॥
अभिनन्द्य द्विजान्सर्वाननुज्ञातो महर्षिभिः । ततोऽगमत्तदादेवो नर्मदातटमुत्तमम् ॥
परमं व्रतमास्थाय गुहावासी समार्बुदम् । तपश्चचार भगवाञ्जपध्यानरतः सदा
समाप्ते नियमेतात स्थापयित्वामहेश्वरम् । वन्द्यमानःसुरैःसार्द्धंकैलासमगमत्प्रभुः
नर्मदायास्तटेतेन स्थापितःपरमेश्वरः । तेनैव कारणेनासौनर्मदेश्वर उच्यते ॥ ६८ ॥
योऽर्चयेन्नर्मदेशानं यतिवै सञ्जितेन्द्रियः ।
स्नात्वा चैव महादेवमश्वमेधफलं लभेत् ॥ ६९ ॥
ददाति यः पितृभ्यस्तु तिलपुष्पकुशोदकम् ।
त्रिः सप्तपूर्वजास्तस्य स्वर्गे मोदन्ति पाण्डव !॥ ७० ॥
यस्तु भोजयते विप्रांस्तस्मिंस्तीर्थे नराधिप !।
पायसं घृतमिश्रं तु सलभेत्कोटिजं फलम् ॥ ७१ ॥
सुवर्णंरजतंवापिब्राह्मणेभ्योयुधिष्ठिर!। ददातितोयमध्यस्थःसोऽग्निष्टोमफलंलभेत्
अष्टम्यांवा चतुर्द्दश्यांनिराहारोवसेत्तुयः । नर्मदेश्वरमासाद्य प्राप्नुयाज्जन्मनःफलम्
अग्निप्रवेशं यःकुर्यात्तस्मिंस्तीर्थेनराधिप । तस्यव्याधिभयंनस्यात्सप्तजन्मसुभारत

अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप !।
अनिवर्त्तिका गतिस्तस्य रुद्रलोके भविष्यति ॥ ७५ ॥
एष ते विधिरुद्दिष्टस्तस्योत्पत्तिर्नरोत्तम !।
पुराणे विहिता तात! सञ्ज्ञा तस्य तु विस्तरात् ॥ ७६ ॥
एतंकीर्त्तयतेयस्तुनर्मदेश्वरसम्भवम् । भक्त्याशृणोति च नरःसोऽपिस्नानफलंलभेत्

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये नर्मदेश्वरतीर्थमाहात्म्यवर्णनंनामा-ऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः

कपिलातीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेच्च राजेन्द्र! कपिलातीर्थमुत्तमम् ।
स्नानमात्रान्नरो भक्त्या मुच्यते सर्वकिल्बिषैः ॥ १ ॥

युधिष्ठिर उवाच

आश्चर्यभूतं लोकेषु कथितं द्विजसत्तम । नर्मदेश्वरमाहात्म्यं कापिलं कथयस्व मे ॥
यस्मिन्कालेऽथ सम्बन्धे उत्पन्नं तीर्थमुत्तमम् ।
सर्वपापहरं पुण्यं तीर्थं जातं कथं प्रभो !॥ ३ ॥

मार्कण्डेय उवाच

शृणु वक्ष्येऽद्यतेराजन्कपिलातीर्थमुत्तमम् । येनतेविस्मयःसर्वःश्रुत्वागच्छतिभारत
पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः । उत्पादयित्वासकलंभूतग्रामंचतुर्विधम्
जपहोमपरो भक्त्या क्षणं ध्यात्वा च तिष्ठति ।

ज्वलमानात्तु कपिला तावत्कुण्डात्समुत्थिता ॥ ६ ॥
अग्निज्वालोज्ज्वलैः शृङ्गैस्त्रिनेत्रा सुपयस्विनी ।
अग्निपूर्णा ह्यग्निमुखा अग्निघ्राणाग्निलोचना ॥ ७ ॥
अग्निसुराह्यग्निपृष्ठाअग्निसर्वाङ्गसंस्थितिः । सर्वलक्षणसंपूर्णाघण्टाललितनिःस्वना
दृष्ट्वा तु तां महाभागां कपिलां कुण्डमध्यगाम् ।
ब्रह्मा लोकगुरुस्तात प्रणम्येदमुवाच ह ॥ ९ ॥
नमस्ते कपिले पुण्ये सर्वलोकनमस्कृते । मङ्गल्ये मङ्गले देवि त्रिषु लोकेष्वनूपमे ॥
त्वं लक्ष्मीस्त्वं स्मृतिर्मेधा त्वं धृतिस्त्वं वरानने !।
उमादेवीति विख्याता त्वं सती नात्र संशयः ॥ ११ ॥
वैष्णवी त्वं महादेवीब्रह्माणी त्वं वरानने । कुमारीत्वंमहाभागेभक्तिःश्रद्धातथैवच
कालरात्रिस्तु भूतानां कुमारी परमेश्वरी । त्वं लवस्त्वं त्रुटिश्चैव मुहूर्त्तं लक्षमेवच
संवत्सरस्त्वं मासस्त्वं कालस्त्वं च क्षणस्तथा ।
नास्ति किञ्चित्त्वया हीनं त्रैलोक्ये सचराचरे ॥ १४ ॥
एवं स्तुता तु मानेन कपिला परमेष्ठिना । तमुवाच महाभागं प्रहृष्यपद्मसम्भवम्
प्रसन्ना तव वाक्येन देवदेव जगद्गुरो । किं करोमि प्रियं तेऽद्य ब्रूहि सर्वपितामह

ब्रह्मोवाच

जगद्धिताय जनिता मया त्वं परमेश्वरि !।
स्वर्गान्मर्त्यं ततो याहि लोकानां हितकाम्यया ॥ १७ ॥
सर्वदेवमयी त्वं तुसर्वलोकमयी तथा । विधिना येप्रदास्यन्तितेषांवासस्त्रिविष्टपे
एवमुक्त्वा ततो देवी ब्रह्माणं परमेश्वरी । वन्द्यमानासुरैः सिद्धैराजगामधरातलम्

युधिष्ठिर उवाच

यदा यातेह सा तात! ब्राह्मणोवचनाच्छुभा ।
तदा देवाश्च लोकाश्च कथमङ्गेषु संस्थिताः ॥ २० ॥
कथं वासंस्थितागत्य कपिलासा द्विजोत्तम । तीर्थे वाह्य धरेक्षेत्रएतन्मेकथयद्विज

मार्कण्डेय उवाच

सा तदा ब्रह्मणा चोक्ता धात्रा लोकस्य भारत !।
ब्रह्मलोकाद्गता पुण्यां नर्मदां लोकपावनीम् ॥ २२ ॥

तपः कृत्वा सुविपुलं नर्मदातटमाश्रिता । चचार पृथिवींसर्वां सशैलवनकाननाम्
तदाप्रभृति राजेन्द्र कपिलातीर्थमुत्तमम् । सर्वपापहरं ख्यातमृषिसङ्घैर्निषेवितम्

तत्तीर्थे विधिवत्स्नात्वा कपिलां यः प्रयच्छति ।
पृथ्वी तेन भवेद्दत्ता सशैलवनकानना ॥ २५ ॥

तां तु पश्यति योभक्त्यादीयमानांद्विजोत्तमे । तस्य वर्षशतंपापंनश्यतेनात्रसंशयः
भूर्भुवः स्वर्महश्चैवजनःसत्यंतपस्तथा । तेतत्पृष्ठंसमाश्रित्यस्थिता लोकानृपोत्तम

मुखे ह्यग्निः स्थितो देवो दन्तेषु च भुजङ्गमाः ।
धाताविधाता ह्योष्ठौ च जिह्वायां तु सरस्वती ॥ २८ ॥

सहस्रकिरणौ देवौ चन्द्रादित्यौ सुलोचनौ । नासिकामध्यगश्चैवमारुतोनृपसत्तम
ललाटे तु महादेवो ह्यश्विनौकर्णसंस्थितौ । नरनारायणौश्रृङ्गे श्रृङ्गमध्येपितामहः
कम्बलोधिगतस्तात पाशधृग्वरुणस्तथा । यमश्च भगवान्देव आश्रित्यचोदरंश्रितः
खुरेषु पन्नगाश्चैवं पुच्छाग्रेसूर्यरश्मयः । एवंभूतांहिकपिलांसर्वदेवमयीं नृप ॥ ३२ ॥
ये धारयन्तिचगृहेधन्यास्तेनात्रसंशयः । प्रातरुत्थाययस्तस्याःकुरुतेतुप्रदक्षिणाम्
प्रदक्षिणा कृता तेन सशैलवनकानना । कपिलापञ्चगव्येन यः स्नापयति शङ्करम् ॥
उपवासपरो यस्तुतस्मिंस्तीर्थेनराधिप !। स्नात्वाद्य कविधानेनतर्पयेत्पितृदेवताः
तस्य ते वंशजाःसर्वेदशपूर्वेदशापरे । तृप्तारोहन्तिवै स्वर्गेध्यायन्तोऽस्यमनोरथान्
एष ते विधिरुद्दिष्टःसम्भवोनृपसत्तम । तीर्थस्य च फलं पुण्यंकिमन्यत्परिपृच्छसि
धन्यं यशस्यमायुष्यं सर्वदुःखघ्नमुत्तमम् । यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे श्रीनर्मदामाहात्म्ये कपिलातीर्थमाहात्म्यवर्णनंनामैकोन-
चत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः

करञ्जेश्वरतीर्थमाहात्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! करञ्जेश्वरमुत्तमम् । यत्रसिद्धोमहाभागोदैत्योलोकेषुविश्रुतः

युधिष्ठिर उवाच

योऽसौ सिद्धो महाभाग! तत्र तीर्थे महातपाः ।
कस्य पुत्रः कथं सिद्धः कस्मिन्काले वद द्विज !॥ २ ॥

मार्कण्डेय उवाच

पुरत कृतयुगे राजन्मानसो ब्रह्मणः सुतः । वेदवेदाङ्गतत्त्वज्ञो मरीचिर्नाम नामतः ॥
तस्यापितपसोराशेः कालेनमहतानघ !। पुत्रोऽथमानसोजातःसाक्षाद्ब्रह्मेवचापरः
क्षमा दमोदयादानंसत्यंशौचमथार्जवम् । मरीचेश्चगुणाह्येते सन्ति तस्यचभारत
एवंगुणगणाकीर्णंकश्यपं द्विजसत्तमम् । ज्ञात्वाप्रजापतिर्दक्षोभार्यार्थेस्वसुतांददौ

अदितिर्दितिर्दनुश्चैव तथाऽप्येवं दशापराः ।
यासां पुत्राश्च सञ्जाताः पौत्राश्च भरतर्षभ !॥ ७ ॥

अदितिर्जनयामासपुत्रानिन्द्रपुरोगमान् ।जातास्तस्यमहाबाहोकश्यपस्यप्रजापतेः
यैस्तु लोकत्रयंव्याप्तंस्थावरं जङ्गमंमहत् । तथान्यस्यमहाभागोदनोःपुत्रोव्यजायत
सर्वलक्षणसम्पन्नः करञ्जो नाम नामतः । बाल एव महाभाग चचार स महत्तपः ॥
नर्मदातटमाश्रित्य चातिघोरमनुत्तमम् । दिव्यं वर्षसहस्रं च कृच्छ्चान्द्रायणं नृप!
शाकमूलफलाहारः स्नानहोमपरायणः । ततस्तुष्टो महादेव उमया सहितः किल॥

वरेण च्छन्दयामास त्रिपुरान्तकरः प्रभुः ।
भोः करञ्ज! महासत्त्व! परितुष्टोऽस्मि तेऽनघ !॥ १३ ॥
वरं वृणीष्व ते दद्मि ह्यमरत्वमृते मम ॥ १४ ॥

करञ्ज उवाच

यदि तुष्टो महादेव यदि देयो वरो मम। तर्हिपुत्राश्च पौत्राश्चसन्तु मे धर्मवत्सलाः

तथेत्युक्त्वा महादेव उमया सहितस्तदा।

वृषारूढो गणैः सार्द्धं तत्रैवान्तरधीयत ॥ १६ ॥

गतेचादर्शनंदेवेसोऽपिदैत्योमुदान्वितः। स्वनाम्नात्रमहादेवंस्थापयित्वाययौगृहम्

तदाप्रभृति तत्तीर्थं सर्वतीर्थेष्वनुत्तमम्। स्नानमात्रान्नरस्तत्र मुच्यते सर्वपातकैः॥

तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः।

सोऽग्निष्टोमस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥ १६ ॥

अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप !।

अनिवर्त्या गतिस्तस्य रुद्रलोकं स गच्छति ॥ २० ॥

अथवाग्निजले प्राणान्यस्त्यजेद्धर्मनन्दन !। अयुतद्वितयं वस्ते वर्षाणां शिवमन्दिरे

ततश्चैवक्षये जातेजायते विमलेकुले। वेदवेदाङ्गतत्त्वज्ञःसर्वशास्त्रविशारदः॥ २२ ॥

राजा वा राजतुल्यो वा जीवेच्च शरदः शतम्।

पुत्रपौत्रसमोपेतः सर्वव्याधिविवर्जितः॥ २३ ॥

एवं ते सर्वमाख्यातं पृष्टं यद्यत्त्वयाऽनघ। तीर्थस्य तु फलं तस्य स्नानदानेषु भारत

एतत्पुण्यं पापहरंधन्यंदुःस्वप्ननाशनम्। पठतां शृण्वतां चैवतीर्थमाहात्म्यमुत्तमम्

यस्तु श्रावयते श्राद्धे पठेत्पितृपरायणः। अक्षयं जायते पुण्यमित्येवंशङ्करोऽब्रवीत्

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे

रेवाखण्डे नर्मदामाहात्म्ये करंजेश्वरतीर्थमाहात्म्यवर्णनंनाम –

चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः

कुण्डलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेच्च राजेन्द्र!कुण्डलेश्वरमुत्तमम्। यत्रसिद्धो महायक्षःकुण्डधारोनृपोत्तम

तपः कृत्वा सुविपुलं सुरासुरभयङ्करम्। पौलस्त्यमन्दिरे चैव चिक्रीड नृपसत्तम!

युधिष्ठिर उवाच

कस्मिन्युगेसमुत्पन्नःकस्यपुत्रोमहामतिः। तपस्तप्त्वासुविपुलं तोषितोयेनशङ्करः

एतद्विस्तरतस्तात कथयस्व ममाऽनघ। शृण्वतश्च न तृप्तिर्मे कथामृतमनुत्तमम् ॥

श्रीमार्कण्डेय उवाच

त्रेतायुगे ब्रह्मसमः पौलस्त्योनाम विश्रवाः। तपः कृत्वासुविपुलंभरद्वाजसुतोद्भवः

पुत्रं पौत्रगणैर्युक्तं पत्न्याभक्त्या सुतोषितः। धनदंजनयामाससर्वलक्षणलक्षितम्

जातमात्रंतु तं ज्ञात्वाब्रह्मालोकपितामहः। चकार नाम सुप्रीतऋषिदेवसमन्वितः

यस्माद्विश्रवसो जातो ममपौत्रत्वमागतः। तस्माद्वैश्रवणो नामतव दत्तंमयाऽनघ

तथा त्वंसर्वदेवानांधनगोप्ताभविष्यसि। चतुर्थोलोकपालानामक्षयश्चाव्ययोभुवि

तस्य भार्या महाराज! ईश्वरीति च विश्रुता।

यक्षो यक्षाधिपः श्रेष्ठस्तस्य कुण्डोऽभवत्सुतः॥ १० ॥

स च रूपं परं प्राप्य मातापित्रोरनुज्ञया। तपश्चचार विपुलं नर्मदातटमाश्रितः॥

ग्रीष्मे पञ्चाग्निसन्तप्तो वर्षासु स्थण्डिलेशयः।

हेमन्ते जलमध्यस्थो वायुभक्षः शतं समाः ॥ १२ ॥

एवं वर्षशते पूर्णे एकाङ्गुष्ठेऽभवन्नृप !। अस्थिभूतः परं तात! ऊर्ध्वबाहुस्ततः परम्

अतपच्च धृतश्वासः कुण्डलो भरतर्षभ। चतुर्थे वर्षशतके तुतोष वृषवाहनः ॥ १४ ॥

वरं वृणीष्व भो वत्सयत्तेमनसिरोचते। ददामि ते न सन्देहस्तपसातोषितोह्यहम्

कुण्डल उवाच

यक्षाधिपप्रसादेन तस्यैवानुचरः पुरे। विचरामि यथाकाममवध्यः सर्वशत्रुषु ॥

तथेत्युक्त्वा महादेवः सर्वलोकनमस्कृतः।
जगामाकाशमाविश्य कैलासं धरणीधरम् ॥ १७ ॥

गते चादर्शनं देवेसोऽपियक्षोमुदान्वितः। स्थापयामास देवेशंकुण्डलेश्वरमुत्तमम्
अलंकृत्वा जगन्नाथं पुष्पधूपानुलेपनैः। विमानैश्चामरैश्छत्रैस्तथा वै लिङ्गपूरणैः॥

तर्पयित्वा द्विजान्सम्यगन्नपानादिभूषणैः।
प्रीणयित्वा महादेवं ततः स्वभवनं ययौ॥ २० ॥

तदाप्रभृति तत्तीर्थं त्रिषुलोकेषु विश्रुतम्। उत्तमं परमं पुण्यं कुण्डलेश्वरनामतः॥
तत्र तीर्थे तु यः कश्चिदुपवासपरायणः। अर्चयेद्देवमीशानं सर्वपापैः प्रमुच्यते॥
सुवर्णं रजतंवापिमणिंमौक्तिकमेव च। दद्याद्भोज्यं ब्राह्मणेभ्यःस सुखीमोदतेदिवि

तत्र तीर्थे तु यः स्नात्वा ऋग्यजुः सामगोऽपि वा।
ऋचमेकां जपित्वा तु सकलं फलमश्नुते॥ २४ ॥
गां प्रयच्छति विप्रेभ्यस्तत्फलं शृणु पाण्डव !।
यावन्ति तस्या रोमाणि तत्प्रसूतिकुलेषु च॥ २५ ॥

तावद्वर्षसहस्राणि स्वर्गलोके महीयते। स्वर्गे वासो भवेत्तस्यपुत्रपौत्रैःसमन्वितः

तावन्ति वर्षाणि महानुभावः स्वर्गे वसेत्पुत्रपौत्रैश्च सार्द्धम्।
तत्रान्नदो याति महेशलोकमसङ्ख्यवर्षाणि न संशयोऽत्र॥ २७ ॥
स वै सुखी मोदते स्वर्गलोके गन्धर्वसिद्धाप्सरःसम्प्रगीते।
एवं तु ते धर्मसुत! प्रभावस्तीर्थस्य सर्वः कथितश्च पार्थ !॥ २८ ॥
श्रुत्वा स्तुवन्मुच्यते सर्वपापैः पुनस्त्रिलोकीमिह तत्प्रभावात्॥ २९ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये कुण्डलेश्वरतीर्थमाहात्म्यवर्णनंनामैक-चत्वारिंशोऽध्यायः॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः

पिप्पलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तुराजेन्द्रपिप्पलेश्वरमुत्तमम्। यत्रसिद्धोमहायोगीपिप्पलादोमहातपाः

युधिष्ठिर उवाच

पिप्पलादस्य चरितं श्रोतुमिच्छाम्यहं विभो !।
माहात्म्यं तस्य तीर्थस्य यत्र सिद्धो महातपाः॥ २ ॥

कस्य पुत्रो महाभाग! किमर्थं कृतवांस्तपः। एतद्विस्तरतः सर्वंकथयस्व ममानघ

मार्कण्डेय उवाच

मिथिलास्थो महाभागो वेदवेदाङ्गपारगः। याज्ञवल्क्यः पुरातातचचारविपुलंतपः

तापसी तस्यभगिनी याज्ञवल्क्यस्य धीमतः।
सा सप्तमेऽपि वर्षे च वैधव्यं प्राप दैवतः॥ ५ ॥
पूर्वकर्मविपाकेन हीनाऽभूत्पितृमातृतः।
नाभूत्तत्पतिपक्षेऽपि कोऽपीत्येकाकिनी स्थिता॥ ६ ॥
भूमौ भ्रमन्ती भ्रातुः सा समीपमगमच्छनैः।
चचार च तपः सोऽपि परलोकसुखेप्सया॥ ७ ॥
चचार सापि तत्रस्था शुश्रूषन्ती महत्तपः।
कस्मिंश्चित्समये साऽथ स्नाताऽहनि रजस्वला॥ ८ ॥

अन्तर्वासो धृतवती दृष्ट्वा कर्पटकं रहः। याज्ञवल्क्योपि तद्रात्रौ सुप्तो यत्र सुसंवृतः

स्वप्नं दृष्ट्वाऽत्यजच्छुक्रं कौपीने रक्तबिन्दुवत्।
विराजितेन तपसा सिद्धं तदनलप्रभम्॥ १० ॥
यावत्प्रबुद्धो विप्रोऽसौ वीक्ष्योच्छिष्टं तदंशुकम्।

चिक्षेप दूरतोऽस्पृश्यं शौचं कृत्वा विधानतः ॥ ११ ॥
निषिद्धं तु निशि स्नानमिति सुष्वाप स द्विजः ।
निशीथे साऽपि तद्वस्त्रं भगस्यावरणं व्यधात् ॥ १२ ॥
प्रातरन्वेषयामास मुनिर्वस्त्रमितस्ततः। ततः सा ब्राह्मणी प्राह किमन्वेषयसे प्रभो
केन कार्यं तव तथा वदस्व मम तत्त्वतः ॥ १३ ॥

याज्ञवल्क्य उवाच

अपवित्रो मयाभद्रे स्वप्नोद्दृष्टोऽद्य वैनिशि। सक्लेदं तत्र मे वस्त्रंनिक्षिप्तं तन्नदृश्यते
तच्छ्रुत्वा ब्राह्मणी वाक्यं भीतभीताऽवदन्नृप !।
तद्वस्त्रं तु मया विप्र स्नात्वा ह्यन्तः कृतं महत् ॥ १५ ॥
तस्यास्तद्वचनंश्रुत्वाहाहेत्युक्त्वामहामुनिः । निपपाततदाभूमौच्छिन्नमूलइवद्रुमः
किमेतदिति सेत्युक्त्वा ह्याकाशमिव निर्मला।
आश्वासयन्ती तं विप्रं प्रोवाच वचनं तदा ॥ १७ ॥
वदस्व कारणं तात!गुह्याद्गुह्यतरं यदि। प्रतीकारोऽस्ययेनैवविमृश्यक्रियतेत्वरा
ततः स सुचिरं ध्यात्वा लब्धवाग्वै ततःक्षणम्।
प्रोवाच साध्वसमना यत्तच्छृणु नरेश्वर !॥ १९ ॥
नाऽत्र दोषोऽस्ति ते कश्चिन्मम चैवशुभव्रते !। त्वोदरेतु गर्भोयस्तत्रदैवंपरायणम्
तस्य तत्त्वेनरक्षाचत्वयाकार्या सदैवहि । विनाशीनैवकर्त्तव्योयावत्कालस्यपर्ययः
तथेति व्रीडिता साध्वी दूयमानेनचेतसा। अपालयच्च तं गर्भं यावत्पुत्रोह्यजायत
जातमात्रं च तं गर्भं गृहीत्वा ब्राह्मणी च सा।
अश्वत्थच्छायामाश्रित्य तमुत्सृज्य वचोऽब्रवीत् ॥ २३ ॥
यानि सत्त्वानि लोकेषु स्थावराणि चराणि च।
तानि सर्वाणि रक्षन्तु त्यक्तं वै बालकं मया ॥ २४ ॥
एवमुक्त्वा गता सा तु ब्राह्मणी नृपसत्तम !।
तथागतः स तु शिशुस्तत्र स्थित्वा मुहूर्त्तकम् ॥ २५ ॥

पाणिपादौविनिक्षिप्यनिकुञ्च्यनयनेशुभे। आस्यंतुविवृतंकृत्वारुरोदविकृतैःस्वरैः
तेनशब्देनवित्रस्ताःस्थावराजङ्गमाश्चये। आकम्पितामहोत्पातैःसशैलवनकानना
ततो ज्ञात्वामहद्भूतंक्षुधाविष्टंद्विजर्षभम्। नजहातिनगश्छायांपानार्थायततःपरम्
अपिबच्च स्रुतं तस्मादमृतं चैव भारत ! ॥ २८ ॥
एवं स वर्द्धितस्तत्रकुमारोनिजचेतसि। चिन्तयामास विश्रब्धःकिममग्रहगोचरम्
ततः क्रूरसमाचारः क्रूरं दृष्ट्वा निरीक्षितः। पपात सहसा भूमौ शनैश्चारी शनैश्चरः
उवाच च भयत्रस्तः कृताञ्जलिपुटस्तदा। किं मयाऽपकृतंविप्र पिप्पलाद महामुने
चरन्वै गगनाद्येन पातितोधरणीतले। सौरिणा ह्येवमुक्तस्तुपिपलादो महामुनिः
क्रोधरूपोऽब्रवीद्वाक्यं तच्छृणुष्व नराधिप !। पितृमातृविहीनस्यममबालस्यदुर्मते!
पीडां करोषि कस्मात्त्वं सौरे! ब्रूहि ह्यशेषतः ॥ ३३ ॥

शनैश्चर उवाच

क्रूरस्वभावः सहजोममदृष्टिस्तथेदृशी। मुञ्चस्व मां तथाकर्त्ता यद्ब्रवीषि नसंशयः

पिप्पलाद उवाच

अद्यप्रभृति बालानांवर्षाद्याषोडशाद्ग्रह !। पीडा त्वया नकर्त्तव्याएषते समयःकृतः
एवमस्त्विति चोक्त्वा स जगाम पुनरागतः।
देवमार्गं शनैश्चारी प्रणम्य ऋषिसत्तमम् ॥ ३६ ॥
गते चादर्शनं तत्र सोऽपि बालो महाग्रहः। विचिन्तयन्वै पितरंक्रोधेन कलुषीकृतः
आग्नेयीं धारणां ध्यात्वा जनयामास पावकम्।
कृत्यामन्त्रैर्जुहावाऽग्नौ कृत्या वै सम्भवत्विति ॥ ३८ ॥
तावज्झटिति सा कन्या ज्वालामालाविभूषिता।
हुतभुक्सदृशाकारा किं करोमीति चाब्रवीत् ॥ ३९ ॥
शोषयामि समुद्रान्किं चूर्णयामि च पर्वतान्।
अवनिं वेष्टयामीति पातये किं नभस्तलम् ॥ ४० ॥
कस्य मूर्ध्नि पतिष्यामि घातयामि च कं द्विज !।

शीघ्रमादिश्यतां कार्यं मा मे कालात्ययो भवेत् ॥ ४१ ॥
तस्यास्तद्वचनं श्रुत्वा पिप्पलादो महातपाः ।क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥
महताक्रोधवेगेनमयात्वंचिन्तिताशुभे । पितामेयाज्ञवल्क्यश्च तस्यत्वंपतमाचिरम्
एवमुक्त्वाऽगमच्छीघ्रं स्फोटयन्ती नभस्तलम् ।
मिथिलास्थो महाप्राज्ञस्तपस्तेपे महामनाः ॥ ४४ ॥
यावत्पश्यतिदिग्भागंज्वलनार्कसमप्रभम् । याज्ञवल्क्योमहातेजामहद्भूतमुपस्थितम्
तद्दृष्ट्वा सहसायान्तं भीतभीतमहामुनिः । अनुयुक्तोऽथ भूतेन जनकं नृपतिं ययौ
शरण्यं मामनुप्राप्तं विद्धि त्वं नृपसत्तम ! । महद्भूतभयाद्रक्ष यदि शक्नोषिपार्थिव
ब्रह्मतेजोभवं भूतमनिवार्यं दुरासदम् । न च शक्नोम्यहं त्रातुं राजा वचनमब्रवीत्
ततश्चान्यं नृपश्रेष्ठं शरणार्थी महातपाः । जगामतेनमुक्तोऽसौचेन्द्रस्यसदनंभयात्
देवराज नमस्तेऽस्तुमहाभूतभयान्नृप । कम्पमानोऽब्रवीद्विप्रो रक्षस्वेति पुनःपुनः
तस्य तद्वचनं श्रुत्वा देवराजोऽब्रवीदिदम् । नशक्नोमिपरित्रातुं ब्रह्मकोपादहं मुने
ततः स ब्रह्मभवनं ब्राह्मणो ब्रह्मवित्तमः । जगामविष्णुलोकं च तेनापीत्युक्तएव च
ततः स मुनिरुद्विग्नो निराशो जीविते नृप ! ।
अनुगम्यमानो भूतेन अगच्छच्छङ्करालयम् ॥ ५३ ॥
तस्य योगबलोपेतोमहादेवस्य पाण्डव ! । नखमांसान्तरे गुप्तो यथादेवोन पश्यति
तदन्ते चागमद्भूतं ज्वलनार्कसमप्रभम् । मुञ्चमुञ्चेति पुरुषं देवदेवं महेश्वरम् ॥
एवमुक्तो महादेवस्तेन भूतेन भारत । योगीन्द्रं दर्शयामास नखमांसान्तरे तदा ॥
संस्थाप्यभूतंभूतेशः परमापन्नतं मुनिम् । उवाचमाभैस्त्वंविप्र निर्गच्छस्वमहामुने
ततः सुसूक्ष्मदेहस्थं भूतंदृष्ट्वाऽब्रवीदिदम् । किमस्यत्वं महाभूत करिष्यसिवदस्वमे

कृत्योवाच

क्रोधाविष्टेन देवेश ! पिप्पलादेन चिन्तिता ।
अस्य देहं हनिष्यामि हिंसार्थं विद्धि मां प्रभो ! ॥ ५६ ॥
एतच्छ्रुत्वा महादेवो भूतस्य वदनाच्च्युतम् ।

कटिस्थं याज्ञवल्क्यं च मन्त्रयामास मन्त्रवित् ॥ ६० ॥
योगीश्वरेतिविप्रस्यकृतवानामयुधिष्ठिर ! । विसर्ज्जयित्वा देवेशस्तत्रैवान्तरधीयत
प्रेषयित्वा तु तं भूतं पिप्पलादोपि दुर्मनाः । पितृमातृसमुद्विग्नो नर्मदातटमाश्रितः
एकाङ्गुष्ठो निराहारो वर्षादाषोडशान्नृप । तोषयामास देवेशमुमया सह शङ्करम् ॥
ततस्तत्तपसा तुष्टः शङ्करो वाक्यमब्रवीत् ॥ ६४ ॥

ईश्वर उवाच

परितुष्टोऽस्मि ते विप्र तपसानेन सुव्रत । वरंवृणीष्वते दद्मिमनसा चेप्सितंशुभम्

पिप्पलाद उवाच

यदि मे भगवांस्तुष्टो यदि देयो वरो मम । अत्र सन्निहितो देव तीर्थे भव महेश्वर
एवमुक्तस्तथेत्युक्त्वापिप्पलादं महामुनिम् । जगामादर्शनं देवो भूतसङ्घसमन्वितः
पिप्पलादेगतेदेवेस्नात्वातत्रमहाम्भसि । स्थापयित्वा महादेवंजगामोत्तरपर्वतम्
तत्र तीर्थेनरो भक्त्या स्नात्वा मन्त्रयुतं नृप ! ।
तर्पयित्वा पितॄन्देवान् पूजयेच्च महेश्वरम् ॥ ६६ ॥
अश्वमेधस्य यज्ञस्यफलंप्राप्नोत्यनुत्तमम् । मृतोरुद्रपुरं याति नात्रकार्या विचारणा
अथयोभोजयेद्विप्रान्पितृनुद्दिश्यभारत । तस्यते द्वादशाब्दानिमोदन्तेदिवितर्पिताः
संन्यासेन तु यः कश्चित्तत्र तीर्थे तनुं त्यजेत् ।
अनिवर्त्तिका गतिस्तस्य रुद्रलोकात्कदाचन ॥ ७२ ॥
एतत्सर्वं समाख्यातं यत्पृष्टं हि त्वयाऽनघ ! ।
माहात्म्यं पिप्पलादस्य तीर्थस्योत्पत्तिरेव च ॥ ७३ ॥
एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनम् ।
पठतां शृण्वतां चैव सर्वपापक्षयो भवेत् ॥ ७४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये पिप्पलादतीर्थमाहात्म्यवर्णनंनाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः

विमलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तुराजेन्द्र विमलेश्वरमुत्तमम् । तत्र देवशिलारम्या स्वयं देवैर्विनिर्मिता

तत्र स्नात्वा तु यो भक्त्या ब्राह्मणान्पूजयेन्नृप !।

स्वल्पेनापि हि दानेन तस्य चान्तो न विद्यते ॥ २ ॥

युधिष्ठिर उवाच

कानि दानानि विप्रेन्द्र ! शस्तानि धरणीतले ।

यानि दत्त्वा नरो भक्त्या मुच्यते सर्वपातकैः ॥ ३ ॥

श्रीमार्कण्डेय उवाच

सुवर्णं रजतं ताम्रं मणिमौक्तिकमेव च । भूमि दानञ्च गोदानं मोचयत्यशुभान्नरम्

तत्रतीर्थे तु यः कश्चित्कुरुतेप्राणसंक्षयम् । रुद्रलोकेवसेत्तावद्यावदाभूतसम्प्लवम्

ततःपुष्करिणीं गच्छेत्सर्वपापभयङ्करीम् । तत्र स्नात्वार्चयेद्देवंतेजोराशिंदिवाकरम्

ऋचमेकां जपेत्साम्नः सामवेदफलंलभेत् । यजुर्वेदस्य जपनादृग्वेदस्य तथैव च ॥

अक्षरं वा जपेन्मन्त्रं ध्यायमानो दिवाकरम् ।

आदित्यहृदयं जप्त्वा मुच्यते सर्वकिल्बिषैः ॥ ८ ॥

तत्र तीर्थे तु यः स्नात्वा विधिना पूजयेद् द्विजान् ।

तस्य कोटिगुणं पुण्यं जायते नात्र संशयः ॥ ९ ॥

अनाशकेनाग्निगतया जले वा देहपातनात् ।

तस्मिंस्तीर्थे मृतो यस्तु स याति परमां गतिम् ॥ १० ॥

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो मा नृपसत्तम !।

विहितं कर्म कुर्वाणः स गच्छेत्परमां गतिम् ॥ ११ ॥

युधिष्ठिर उवाच

व्याधिं सत्त्वक्षयं मोहं ज्ञात्वा वर्णा द्विजोत्तम! ।

पापेभ्यो विप्र ! मुच्यन्ते केन तत्साधनम्वद ॥ १२ ॥

श्रीमार्कण्डेय उवाच

तिलोदकी तिलस्नायी कामक्रोधविवर्जितः ।

ब्राह्मणोऽनशनैः प्राणांस्त्यजँल्लभति सद्गतिम् ॥ १३ ॥

सङ्ग्रामेसद्गतिंतात क्षत्रियोनिधनेलभेत् । तदभावान्महाप्राज्ञ सेवमानोलभेदिति

व्याधिग्रहगृहीतो वा वृद्धो वा विकलेन्द्रियः ।

आत्मानं दाहयित्वाग्नौ विधिना सद्गतिं लभेत् ॥ १५ ॥

वैश्योऽपि हि त्यजन्प्राणानेवं वै शुभभाग्भवेत् ।

जले वा शुद्धभावेन त्यक्त्वा प्राणाञ्छिवो भवेत् ॥ १६ ॥

शूद्रोऽपि द्विजशुश्रूषुस्तोषयित्वा महेश्वरम् । विमुच्यनान्यथापापःपततेनरकेध्रुवम्

अथवाप्रणवाशक्तो द्विजेभ्योगुरवेतथा॥ पञ्चाग्नौ शोषयेद्देहमापृच्छ्यद्विजसत्तमान्

शान्तदान्तजितक्रोधाञ्छास्त्रयुक्तान् विचक्षणान् ।

तेषां चैवोपदेशेन करीषाग्निं प्रसादयेत् ॥ १९ ॥

एवं वर्णा यथात्वेन मूढाहङ्कारमोहिताः । पतन्ति नरके घोरे यथान्धो गिरिगह्वरे

ये शास्त्रविधिमुत्सृज्यवर्त्तते कामचारतः। कृमियोनिंप्रपद्यन्तेतेषांपिण्डोनचक्रिया

श्रुतिस्मृत्युदितं धर्मं (?) त्यक्त्वा यथेच्छाचारसेविनः ।

अष्टाविंशतिर्वै कोट्यो नरकाणां युधिष्ठिर !॥ २२ ॥

प्रत्येकं वा पतन्त्येते मग्नानरकसागरे । दुर्लभं मानुषं जन्म बहुधर्मार्जितं नृप !

तल्लब्ध्वा मदमात्सर्यं यो वै त्यजति मानवः ।

संनियम्य सदात्मानं ज्ञानचक्षुर्नरो हि सः ॥ २४ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ॥ २५ ॥

यस्य नोन्मीलितं चक्षुर्ज्ञेयो जात्यन्ध एव सः । एतत्तेकथितं सर्व्वं यत्पृष्टंनृपसत्तम

तथानिष्टतराणां हि रुद्रस्य वचनं यथा । नर्मदा सरितां श्रेष्ठा रुद्रदेहाद्विनिःसृता

तारयेत्सर्वभूतानि स्थावराणि चराणि च ।
सर्वदेवाधिदेवेन ईश्वरेण महात्मना ॥ २८ ॥
लोकानां च हितार्थाय महापुण्यावतारिता ।
मानसं वाचिकं पापं स्नानान्नश्यति कर्मजम् ॥ २६ ॥

रुद्रदेहाद्विनिष्क्रान्तातेनपुण्यतमाहिसा । प्रातरुत्थाययोनित्यंभूमिमाक्रम्यभक्तितः एतन्मन्त्रं जपेत्तात स्नानस्य लभते फलम् । नमः पुण्यजलेदेवि नमःसागरगामिनि

नमोस्तु पापनिर्मोचे नमो देवि शरानने ! ॥ ३२ ॥
नमोस्तु ते ऋषिवरसङ्घसेविते ! नमोऽस्तु ते त्रिनयनदेहनिःसृते !।
नमोऽस्तु ते सुकृतवतां सदा वरे! नमोऽस्तु ते सततपवित्रपावनि !॥ ३३॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे विमलेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः

शूलभेदप्रशंसावर्णनम्

श्रीमार्कण्डेय उवाच

तीर्थानां परमंतीर्थं तच्छृणुष्वनराधिप !। रेवाया दक्षिणेकूले निर्मितंशूलपाणिना

मोक्षार्थं मानवेन्द्राणां निर्मितं नृपसत्तम !।

युधिष्ठिरःउवाच

श्रुत्वा मे विविधा धर्मास्तीर्थानि विविधानि च ।
दानधर्माः समस्ताश्च त्वत्प्रसादाद् द्विजोत्तम !॥ २ ॥

अन्यच्च श्रोतुमिच्छामिसंसारश्छिद्यतेयथा । पुनरागमनंनास्तिमोक्षप्राप्तिर्भवेद्यथा

एतदाख्याहि मे सर्वं प्रसादाद् द्विजसत्तम !॥ ४ ॥

मार्कण्डेय उवाच

शृणुष्वैकमना भूत्वा तीर्थात्तीर्थान्तरं महत् ।
श्रुते यस्य प्रभावे तु मुच्यते चाब्दिकादघात् ॥ ५ ॥
वाचिकैर्मानसैर्वापि शारीरैश्च विशेषतः ।
कीर्त्तनात्तस्य तीर्थस्य मुच्यते सर्वपातकैः ॥ ६ ॥

पञ्चक्रोशप्रमाणं तु तच्च तीर्थंमहीपते !। भुक्तिमुक्तिप्रदंदिव्यंप्राणिनांपापकर्मिणाम् रेवाया दक्षिणेकूलेपर्वतोभृगुसञ्ज्ञितः । तस्यमूर्ध्नि च तत्तीर्थंस्थापितंचैवशम्भुना शूलभेदेति विख्यातंत्रिषुलोकेषुभूपते । तत्रस्थिताश्चये वृक्षास्तीर्थाच्चैवचतुर्द्दिशम् पतितानिलयंयान्ति रुद्रस्यनात्रसंशयः । मृतास्तत्रैवयेकेचिज्जन्तवो भुवि पक्षिणः ते यान्तिपरमंलोकंतत्रतीर्थेनसंशयः । पातालान्निःसृता गङ्गाभोगवतीतिसञ्ज्ञिता

निष्क्रान्ता शूलभेदाच्च सर्वपापक्षयङ्करी ।
या सा गीर्वाणनाम्न्यन्या वहेत्पुण्या महानदी ॥ १२ ॥
पतिता कुण्डमध्ये तु यत्र भिन्नं त्रिशूलिना ।
शम्भुना च पुरा तात ! उत्पाद्य च सरस्वती ॥ १३ ॥
सा तत्र पतिता राजन्प्राचीनाघविमोचिनी ।
भास्वत्या त्रितयं यत्र शिला गीर्वाणसञ्ज्ञिता ॥ १४ ॥

तत्र तीर्थे च तत्तीर्थं न भूतं न भविष्यति । केदारश्च प्रयागश्च कुरुक्षेत्रं गया तथा

अन्यानि च सुतीर्थानि कलां नार्हन्ति षोडशीम् ।
पञ्च स्थानानि तीर्थानि पृथग्भूतानि यानि च ॥ १६ ॥
वक्ष्यामि च समासेन एकैकं च पृथक्पृथक् ।
गया नाभ्यां यथा पुण्या चक्रतीर्थं च तत्समम् ॥ १७ ॥

धर्मारण्ये यथा कूपं शूलभेदं च तत्समम् । ब्रह्मयूपं यथा पुण्यं देवनद्यास्तथैव च

यथा गयाशिरः पुण्यं सुराणां च यथा शिला ।

यथा च पुष्करं स्थानं मार्कण्डह्रद एव च ॥ १६ ॥

दत्त्वापिण्डोदकंतत्रपितृणां च तथाक्षयम् । यस्तत्रकुरुतेश्राद्धंतोयंपिबतिनित्यशः
मुच्यतेसर्वपापैस्तु उरगःकञ्चुकैरिव । अनिन्द्यान्पूजयेद्विप्रान्दम्भक्रोधविवर्जितान्
त्रयोदशदिनं दानं त्रयोदशगुणम्भवेत् । अभ्यर्चितं सुरं दृष्ट्वा गणनाथं गजाननम्
सर्वे विघ्नाविनश्यन्ति दृष्ट्वा कम्बलक्षेत्रपम् । पूजयेत्परयाभक्त्याशूलपाणिंमहेश्वरम्

देवस्य पूर्वभागे तु उमा पूज्या प्रयत्नतः ।
मार्कण्डेशं ततो भक्त्या पूजयेद् गुहवासिनम् ॥ २४ ॥

मुच्यन्तेपातकैः सर्वैरज्ञानज्ञानसञ्चितैः । गुहामध्ये प्रविष्टस्तु जपेत्सूक्तंतुत्र्यक्षरम्
नीलपर्वतजं पुण्यं षष्ठांशेन लभेत सः । त्रिनरास्तत्र तिष्ठन्ति सादित्यमरुतैः सह
सर्वदेवमयंस्थानंकोटिलिङ्गमनुत्तमम् । यथानदीनदाःसर्वे सागरे यान्तिसङ्क्षयम्

तथा पापानि नश्यन्ति शूलभेदस्य दर्शनात् ।
प्रत्यक्षो दृश्यतेऽद्यापि प्रत्ययो ह्यवनीपते !॥ २८ ॥

विस्फुलिङ्गालिङ्गमध्येस्पन्दन्तेज्ञानयोगतः । द्वितीयःप्रत्ययस्तत्रतैलबिन्दुर्न्नसर्पति
एवं हि प्रत्ययस्तत्र शूलभेदप्रभावजः । यः स्मरेच्छूलभेदं तु त्रिकालं नित्यमेव च
सपूतश्चभवेत्साक्षात्सबाह्याभ्यन्तरोनृप !। नकस्यचिन्मयाख्यातंपृष्टोऽहंत्रिदशैरपि
गुह्याद्गुह्यतरं तीर्थं सदा गोप्यं कृतं मया । सर्वपापहरं पुण्यं सर्वदोषघ्नमुत्तमम् ॥
सर्वतीर्थमयं तीर्थं शूलभेदं जनेश्वर !। श्रुते यस्य प्रभावेतुमुच्यतेसर्वपातकैः ॥ ३३॥
शूलभेदं मयातातसंक्षेपात्कथितं तव । यःश्रृणोतिनरोभक्त्या मुच्यते सर्वपातकैः

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शूलभेद प्रशंसावर्णनंनाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः

शूलभेदनामकथनेऽन्धकप्रशंसनवर्णनम्

श्रीमार्कण्डेय उवाच

एष एव पुरा प्रश्नः परिपृष्टो महेश्वरम् । राज्ञाचोत्तानपादेनऋषिदेवसमागमे ॥ १ ॥

उत्तानपाद उवाच

इदं तीर्थं महापुण्यं सर्वदेवमयं परम् । गुह्याद्गुह्यतरं स्थानं न दृष्टं न श्रुतं हर !॥
शूलभेदं कथं जातंकेनैवोत्पादितंपुरा । माहात्म्यंतस्यतीर्थस्यविस्तराच्छंसमेप्रभो

ईश्वर उवाच

आसीत्पुरा महावीर्योदानवो बलदर्पितः । मर्त्ये न तादृशःकश्चिद्विक्रमेण बलेन वा
सूनुर्ब्रह्मसुतस्याऽयमन्धकोनामदुर्मदः । निजस्थानेवसन्पापःकुर्वन्राज्यमकण्टकम्
हृष्टपुष्टो वसन्मर्त्ये स सुरैर्नाभिभूयते । भवनंतस्यपापस्य वह्नेरुपवनं यथा ॥ ६ ॥
एतस्मिन्नन्धकः काले चिन्तयामासभारत । तोषयामि महादेवंयेनसानुग्रहो भवेत्
प्रार्थयामि वरंदिव्यं योमेमनसिवर्त्तते । परंसनिश्चयं कृत्वासोऽन्धकोनिर्गतोगृहात्

रेवातटं समासाद्य दानवस्तपसि स्थितः ।
उग्रं तपश्चचाराऽसौ दारुणं लोमहर्षणम् ॥ ९ ॥

दिव्यं वर्षसहस्रं स निराहारोऽभवत्ततः । द्वितीयं तु सहस्रं स न्यवसद्वारिभोजनः
तृतीयं तु सहस्रं स धूमपानरतोऽभवत् । चतुर्थं वर्षसाहस्रंयोगाभ्यासेन संस्थितः
कोऽपीह नेदृशं चक्रेतपःपरमदारुणम् । अस्थिचर्माऽवशेषोऽसौ यावत्तिष्ठतिभारत

तस्य मूर्ध्नि ततो राजन्धूमवर्त्तिर्विनिःसृता ।
देवलोकमतीत्याऽसौ कैलासं व्याप्य संस्थिता ॥ १३ ॥

तावद्देवसमीपस्था उमावचनमब्रवीत् । कोऽस्त्ययं मानुषेलोकेतपसोग्रेणसंस्थितः
चतुर्वर्षसहस्राणि व्यतीयुः परमेश्वर !। न केनाऽपीदृशं तप्तं तपो दृष्टं श्रुतं तथा ॥

अवज्ञांकुरुषे देव किमत्रनियमाऽन्विते ।।सर्वस्य दत्से शीघ्रं त्वमल्पेन तपसाविभो
नाक्षक्रीडां करिष्येऽद्यत्वया सहमहेश्वर !। यावन्नोत्थापयतेह्येषदानवोभक्तवत्सल

ईश्वर उवाच

साधुसाधु महादेवि! सर्वलक्षणलक्षिते । अहं तंनविजानामिक्लिश्यन्तं दानवेश्वरम्
योगाभ्यासे स्थितो भद्रे! ध्यायंस्तत्परमं पदम् ।
तत्रागच्छ मया सार्द्धं यत्र तप्यत्यसौ तपः ॥ १६ ॥

उमया सहितो देवो गतस्तत्र महेश्वरः । अस्थिचर्मावशेषस्तु दृष्टो देवेन शम्भुना
प्रत्युवाच प्रसन्नोऽसौ देवदेवो महेश्वरः । भोभोः कष्टं कृतं भीमं दारुणंलोमहर्षणम्
ईदृशंच तपो घोरंकस्माद्वत्स त्वया कृतम् । वरंदास्याम्यहंवत्स यस्तेमनसिवर्त्तते

अन्धक उवाच

यदि तुष्टोऽसिमे देववरदोयदि शङ्कर । सुरान्सर्वान्विजेष्यामित्वत्प्रसादान्महेश्वर!

ईश्वर उवाच

स्वप्नेऽपि त्रिदशाः सर्वे न योद्धव्याः कदाचन ।
असम्भाव्यं न वक्तव्यंःमनसो यन्न रोचते ॥ २४ ॥
अन्यं किमपि याचस्व यस्ते मनसि वर्त्तते ।
स्वर्गे वा यदि वा मर्त्ये पातालेषु च संस्थितान् ॥ २५ ॥
मर्त्येषु विविधान्भोगान्भोक्ष्यसि त्वं यथेप्सितान् ।
कुरु निष्कण्टकं राज्यं स्वर्गे देवपतिर्यथा ॥ २६ ॥
देवस्य वचनं श्रुत्वा सोऽन्धको विमनाः स्थितः ।
वृथा क्लेशश्च मे जातो न किञ्चित्साधितं मया ॥ २७ ॥
निःश्वासं परमं मुक्त्वा निपपात धरातले ।
मूलच्छिन्नोयथावृक्षोनिरुच्छ्वासस्तदाभवत् ॥ २८ ॥

मूर्च्छापन्नं ततो दृष्ट्वा देवी वचनमब्रवीत् । यं कामंकामयत्येष तमस्मै देहि शङ्कर!
भक्तानुपेक्षमाणस्य तवाऽकीर्त्तिर्भविष्यति ॥ ३० ॥

ईश्वर उवाच

यदि दास्ये वरं देविइच्छाभूतंकदाचन । ततो न मंस्यतेविष्णुं नब्रह्माणंनमामपि
उच्चत्वमाप्तो देवेशि! अन्यानपि सुरासुरान् ॥ ३२ ॥

देव्युवाच

कमप्युपायमाश्रित्य उत्थापय महेश्वर !। विष्णुवर्जं सुरान्सर्वाञ्जयस्वेति वरं वद॥

ईश्वर उवाच

उपायः शोभनो देवि! यो मे मनसि वर्त्तते ।
तमेवास्मै प्रदास्यामि यस्त्वया कथितो वरः ॥ ३४ ॥
ततोऽमृतेन संसिक्तः स्वस्थोऽभूत्तत्क्षणादयम् ।
तथा पुनर्नवो जातः सर्वाऽवयवशोभितः ॥ ३५ ॥

शृणुष्वैकमनाभूत्वागृहाण वरमुत्तमम् । विष्णुवर्जंप्रदास्यामियत्त्वाभिमतंप्रियम्
सर्वं च सफलं तुभ्यं मा धर्मस्तेऽन्यथा भवेत् ।
ददामीति वरं तुभ्यं मन्यसे यदि चाऽसुर !॥ ३७ ॥
विष्णुवर्जं सुरान्सर्वाञ्जेष्यसि त्वं च मां विना ॥ ३८ ॥

अन्धक उवाच

भवत्वेवमिति प्राह बलमास्थायकेवलम् । विष्णुवर्जं विजेष्येऽहंस्वबलेन महेश्वर!
कृतार्थोऽहं हि सञ्जात इत्युक्त्वा प्रणतिं गतः ।
गच्छ देवो मया सार्द्धं कैलासशिखरं वरम् ॥ ४० ॥

वृषपुङ्गवमारुह्य देवोऽसावुमया सह । वरंदत्त्वा स तस्यैवंतत्रैवान्तरधीयत ॥ ४१

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे अन्धकवरप्रदानवर्णनंनाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

———

षट्चत्वारिंशोऽध्यायः

शचीहरणवर्णनम्

श्रीमार्कण्डेय उवाच

स दानवोवरं लब्ध्वाजगामस्वपुरं प्रति । ददर्श स्वपुरंराजञ्छोभितंचित्रचत्वरैः
उद्यानैश्चैव विविधैः कदलीखण्डमण्डितैः । पनसैर्बकुलैश्चैवाम्रातैराम्रैश्च चम्पकैः
अशोकैर्नालिकेरैश्चमातुलिङ्गैःसदाडिमैः । नानावृक्षैश्चशोभाढ्यंतडागैरुपशोभितम्
देवतायतनैर्दिव्यैर्ध्वजमालासुशोभितैः । वेदाध्ययननिर्घोषैर्मङ्गलाद्यैर्विनादितम् ॥

प्राविशद्भवने दिव्ये काञ्चने रुक्ममालिनि ।
अपश्यत्स सुतान्भार्याममात्यान्दासभृत्यकान् ॥ ५ ॥

ततो जयप्रदान्सर्वान्सितश्वेतश्चधावतः । हृच्छोभां च प्रकुर्वाणान्वैजयन्तीभिरुच्चकैः

केचित्तोरणमाबद्ध्य केचित्पुष्पाण्यवाकिरन् ।
मातुलिङ्गकराश्चान्ये धावन्ति ह्यन्धकं प्रति ॥ ७ ॥

पुरे जनाश्च दृश्यन्ते भाजनैरन्नपूरितैः । पूर्णहस्ताः प्रदृश्यन्ते तत्रैव बहवो जनाः
साक्षतैर्भाजनैस्तत्रशतसाहस्रयोषितः । मन्त्रान्पठन्ति विप्राश्चमङ्गलान्यपियोषितः

अमात्याश्चैव भृत्याश्च गजांश्चाढौकयन्ति च ।
वर्धापयन्ति ते सर्वे ये केचित्पुरवासिनः ॥ १० ॥

हृष्टस्तुष्टोऽवसत्तत्र सचिवैःसह सोऽन्धकः । ददर्श सजगत्सर्वंतुरङ्गांश्चपदातिकान्

तथैव विविधान्कोशांस्तत्र काञ्चनपूरितान् ।
महिषीर्गा वृषांश्चैवापश्यच्छत्राण्यनेकधा ॥ १२ ॥

स एवमन्धकस्तत्रकियन्तंकालमावसत् । हृष्टस्तुष्टोऽवसन्मर्त्ये स सुरैर्नाभ्यभूयत

वरं लब्धं तु तं ज्ञात्वा शङ्किताः स्वर्गवासिनः ।
एकीभूताश्च ते सर्वे वासवं शरणं गताः ॥ १४ ॥

शक्र उवाच

कथमागमनंवोऽत्र सर्वेषामपिनाकिनाम् ।
कस्माद्वो भयमुत्पन्नमागताःशरणं कथम ।
ततस्ते ह्यमराः सर्वे शक्रमेतद्वचोऽब्रुवन् ॥ १६ ॥

देवा ऊचुः

सुरनाथान्धकोनाम दैत्यः शम्भुवरोर्जितः । अजेयःसर्वदेवानांकिं नुकार्यमतः परम्

तत्त्वं चिन्तय देवेश! क उपायो विधीयताम् ।
इत्थं वदन्ति ते देवाः शक्राग्रे मन्त्रणोद्यताः ॥ १८ ॥

मन्त्रयन्ति च यावद्वैतावच्चारमुखेरितम् । ज्ञात्वातत्र स देवौघंदानवोनिर्गतोगृहात
एकाकी स्यन्दनाऽऽरूढ आयुधैर्बहुभिर्वृतः । दुर्गमं मेरुपृष्ठं स लीलयैव गतो नृप

स्वर्णप्राकारसंयुक्तं शोभितं विविधाश्रमैः ।
दुर्गमं शत्रुवर्गस्य तदा पार्थिवसत्तम !॥ २१ ॥

प्रविवेशाऽऽसुरस्तत्र लीलया स्वगृहे यथा । वृत्रहाभयमापन्नःस्वकीयं चासनंददौ

उपविष्टोऽन्धकस्तत्र शक्रस्यैवाऽऽसने शुभे ।
आस्थानं कलयामास सर्वतस्त्रिदशावृतम् ॥ २३ ॥

शक्र उवाच

किं तवाऽऽगमनं चाऽत्र किं कार्यं कथयस्व मे ।
यदस्मदीयं चित्तं हि तत्ते दास्यामि दानव ! ॥ २४ ॥

अन्धक उवाच

नाऽहं वै कामयेकोशंनगजांश्चसुरेश्वर !। स्वकीयंदर्शयस्वाऽद्यस्वर्गंशृङ्गारभूषितम्
ऐरावतं महानागं तं चैवोच्चैः श्रवोहयम् । उर्वश्यादीनि रत्नानि मम दर्शय गोपते

पारिजातकपुष्पाणि-वृक्षजातीननेकशः ।
वादित्राणि च सर्वाणि दर्शयस्व शचीपते !॥ २७ ॥
तस्य तद्वचनं श्रुत्वा शक्रश्चिन्तितवानिदम् ।

यो़ऽमुं निहन्ति पाप्मानं न पश्यामि कर्हिचित् ॥ २८ ॥

नास्ति रक्षाप्रदः कश्चित्स्वर्गलोकस्य दुःखिनः ।

भयत्रस्तो ददावन्यद्वादित्राद्यप्सरोगणैः ॥ २९ ॥

रङ्गभूमावुपाविश्य कारयामास ताण्डवम् । उपविष्टाःसुराःसर्वे यममारुतकिन्नराः

उर्वश्याद्या अप्सरसो गीतवादित्रयोगतः । ननृतुः पुरतस्तस्यसर्वाएकैकशो नृप !

न व्यश्राम्यत तच्चित्तं दृष्ट्वाचाप्सरसस्तदा । शचीं प्रतिमनस्तस्यसकाममभवन्नृप

गृहीत्वा शक्रभार्यां स प्रस्थितः स्वपुरं प्रति ।

ततः प्रववृते युद्धमन्धकस्य सुरैः सह ॥ ३३ ॥

तेन देवगणाः सर्वे ध्वस्ताः पार्थिवसत्तम !।

सङ्ग्रामे विविधैः शस्त्रैश्चक्रवज्रादिभिर्घनैः ॥ ३४ ॥

सन्तापिताः सुराःसर्वेक्षतनीताह्यनेकराः । सर्वेऽपिमत्तकेनेन भग्नाःसङ्ग्राममूर्द्धनि

यथासिंहोगजान्सर्वान्विजित्य विचरेद्वनम् । तद्वदेकेनदैत्येन जिताःसर्वेपराङ्मुखाः

बालोऽधिपो यथाग्रामे स्वेच्छया पीडयेज्जनान् ।

स्वैरमाक्रम्य गृह्णाति कोशवासांसि चाऽसकृत् ॥ ३७ ॥

गतं न पश्यत्यात्मानं प्रजासन्तापनेन च । गृहीत्वाशक्रभार्यां सगतोवैदानवोत्तमः

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

शूलभेदमाहात्म्ये शचीहरणवर्णनंनाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

———

सप्तचत्वारिंशोऽध्यायः

सब्रह्मदेवैर्विष्णोःस्तवस्थानमनुष्यलोकगमनवर्णनम्

मार्कण्डेय उवाच

गीर्वाणाश्च ततः सर्वे ब्रह्माणं शरणं गताः । गजैर्गिरिवराकारैर्हयैश्चैव गजोपमैः ॥

स्यन्दनैर्नगराकारैः सिंहशार्दूलयोजितैः । कच्छपैर्महिषैश्चान्यैर्मकरैश्च तथाऽपरे

ब्रह्मलोकमनुप्राप्ता देवाःशक्रपुरोगमाः । दृष्ट्वापद्मोद्भवं देवं साष्टाङ्गं प्रणताः सुराः

देवा ऊचुः

जयदेव जगद्वन्द्य जय संसृतिकारक !। पद्मयोने सुरश्रेष्ठ त्वामेव शरणं गताः ॥ ४॥

सोद्वेगं भाषितं श्रुत्वादेवानांभावितात्मनाम् । मेघगंभीरयावाचादेवराजमुवाचह

किमत्राऽऽगमनंदेवाःसर्वेषांत्रैविष्टपे गताः । केनापमानिताःसर्वेशीघ्रंमेकथ्यतांस्वयम्

देवा ऊचुः

अन्धकाख्यो महादैत्यो बलवान्पद्मसम्भव ।

तेन देवगणाः सर्वे धनरत्नैर्वियोजिताः ॥ ७ ॥

हत्वा देवगणांस्तावदसिचक्रपरश्वधैः ।

गृहीत्वा शक्रभार्यां स दानवोऽपि गतो बलात् ॥ ८ ॥

देवानां वचनं श्रुत्वा ब्रह्मालोकपितामहः । चिन्तयामासराजेन्द्रवधार्थंदानवस्यह

अवध्यो दानवः पापः सर्वेषां वो दिवौकसाम् ।

स त्राता सर्वजगतां नान्यो विद्येत कुत्रचित् ॥ १० ॥

एवमुक्ताः सुराः सर्वे ब्रह्मणा तदनन्तरम् । ब्रह्माणं ते पुरस्कृत्य गतायत्र स केशवः

तुष्टुवुर्विविधैः स्तोत्रैर्ब्रह्माद्याश्चक्रपाणिनम् ॥ ११ ॥

देवा ऊचुः

जय त्वं देवदेवेश लक्ष्म्या वक्षस्थलाऽऽश्रितः । असुरक्षय देवेश वयं ते शरणं गताः

स्तूयमानः सुरैः सर्वैर्ब्रह्माद्यैश्च जनार्दनः । संप्रहृष्टमना भूत्वा सुरसङ्घमुवाच ह ॥

श्रीवासुदेव उवाच

स्वागतं देवविप्राणां सुप्रभाताऽद्य शर्वरी ।
किं कार्यं प्रोच्यतां क्षिप्रं कस्य रुष्टा दिवौकसः ॥ १४ ॥
किं दुःखं कश्च सन्तापः कुतो वा भयमागतम् ।
कथयन्तु महाभागाः! कारणं यन्मनोगतम् ॥ १५ ॥

पराभवः कृतो येनसोऽद्ययातुयमालयम् । एवमुक्तास्तु कृष्णेन कथयामासुरस्यतत्

दर्शयन्तः स्वकान्देहाँल्लज्जमाना ह्यधोमुखाः ।
हृतराज्या ह्यन्धकेन कृता निस्तेजसः प्रभो !॥ १७ ॥
पितेव पुत्रं परिरक्ष देव जहीन्द्रशत्रुं सह पुत्रपौत्रैः ।
तथेति चोक्तः कमलासनेन सुरासुरैर्वन्दितपादपद्मः ॥ १८ ॥

शङ्खं चक्रं गदां चापं संगृह्य परमेश्वरः । उत्थितो भोगपर्यङ्काद्देवानां पुरतस्तदा

श्रीवासुदेव उवाच

पाताले यदि वामर्त्येनाकेवायदितिष्ठति । तंहनिष्याम्यहंपापंयेनसन्तापिताःसुराः

स्वं स्थानं यान्तु गीर्वाणाः सन्तुष्टा भावितौजसः ।
विष्णोस्तद्वचनं श्रुत्वा ब्रह्माद्यास्ते सवासवाः ॥ २१ ॥
स्वयानैस्तु हरिं नत्वा हृदि तुष्टा दिवं ययुः ॥ २२ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे विष्णुप्रार्थनमनुगीर्वाणस्वर्गमनवर्णनंनाम
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः

अन्धकवधतद्वरप्रदानवर्णनम्

उत्तानपाद उवाच

कस्मिन्स्थानेऽवसद् देव! सोऽन्धको दैत्यपुङ्गवः ।
सर्वान्देवांश्च निर्जित्य कस्मिन्स्थाने समास्थितः ॥ १ ॥

श्रीमहेश उवाच

प्रविष्टो दानवोयत्रकथयामिनराधिप !। पाताललोकमाश्रित्यकन्याविध्वंसतेतुसः

तत्र स्थितं तं विज्ञाय चापमादाय केशवः ।
व्यसृजद् बाणमाग्नेयं दह्यतामिति चिन्तयन् ॥ ३ ॥

दह्यमानोऽग्निनासोऽपिवारुणास्त्रंससन्दधे । वारुणास्त्रेण महताआग्नेयंशमितंतदा

ततोऽसौ चिन्तयामास केन बाणो विसर्जितः ।
कस्यैषा पौरुषी शक्तिः को यास्यति यमालयम् ॥ ५ ॥

ततोऽन्धको मृधेक्रुद्धोबाणमार्गेणनिर्गतः । सद्दृष्ट्वाबाणमार्गेणचापहस्तंजनार्दनम्

अन्धक उवाच

न शर्म लप्स्यसे ह्यद्य मया दृष्ट्याऽभिवीक्षितः ।
न शक्नोषि तथा गन्तुं नागः शार्दूलदर्शनात् ॥ ७ ॥
आगच्छति यथा भक्ष्यं मार्जारस्य च मूषिकः ।
न शक्नोषि तथा यातुं संस्थितस्त्वं ममाऽग्रतः ॥ ८ ॥

अहं त्वांप्रेषयिष्यामियममार्गेसुदारुणे । अहमन्वेषयिष्यामिकिलयास्यामितेगृहम्
उपनीतोऽसि कालेन संग्रामेमम केशव । येत्वयानिर्जिताः पूर्वं दानवाअप्यनेकशः
न भवन्ति पुमांसस्तेस्त्रियस्ताश्चैव केशव । परं न शस्त्रसंग्रामंकरिष्यामित्वयासह
वदतो दानवेन्द्रस्य न चुकोप स केशवः । अयुध्यमानं तं दृष्ट्वाचिन्तयामास दानवः

द्वन्द्वयुद्धं करिष्यामि निश्चित्य युयुधे नृप । सकृष्णेन पदाक्षिप्तःपतितःपृथिवीतले
मुहूर्त्तात्ससमाश्वस्यउत्थायेदंव्यचिन्तयन् । अशक्तोद्वन्द्वयुद्धायततःसामप्रयुक्तवान्
पाणिभ्यां सम्पुटं कृत्वा साष्टाङ्गं प्रणतः शुचिः ॥ १४ ॥

अन्धक उवाच

जय कृष्णाय हरये विष्णवे जिष्णवे नमः । हृषीकेश जगद्धात्रे अच्युताय महात्मने
नमः पङ्कजनाभाय नमः पङ्कजमालिने । जनार्द्दनाय श्रीशाय श्रीपते पीतवाससे
गोविन्दाय नमो नित्यंनमोजलधिशायिने । नमःकरालवक्त्राय नरसिंहायनादिने
शार्ङ्गिणे सितवर्णायशङ्खचक्रगदाभृते । नमोवामनरूपाययज्ञरूपाय ते नमः ॥ १८ ॥
नमो वराहरूपाय क्रान्तलोकत्रयाय च । व्याप्ताशेषदिगन्ताय केशवाय नमोनमः ॥
वासुदेव नमस्तुभ्यं नमः कैटभनाशिने । लक्ष्म्यालय सुरश्रेष्ठ नमस्ते सुरनायक ॥
विष्णोर्द्देवाधिदेवस्य प्रमाणं येऽपिकुर्वते । प्रजापतेर्जगद्धातुस्तेषामपि नमाम्यहम्
समस्तभूतदेवस्य वासुदेवस्य धीमतः । प्रणामं ये प्रकुर्वन्ति तेषामपि नमाम्यहम्
तस्य यज्ञवराहस्य विष्णोरमिततेजसः । प्रणामं ये प्रकुर्वन्ति तेषामपिनमाम्यहम्
गुणानां हि निधानाय नमस्तेऽस्तु पुनः पुनः ।
कारुण्याम्बुनिधे ! देव ! सर्वभक्तिप्रियाय च ॥ २४ ॥

श्रीभगवानुवाच

तुष्टस्ते दानवेन्द्राहं वरं वृणु यथेप्सितम् । ददामि ते वरं नूनमपि त्रैलोक्यदुर्लभम्

अन्धक उवाच

यदि तुष्टोऽसि मे देव !वरं दास्यसि चेप्सितम् ।
तदा ददस्व मे देव !युद्धं परमशोभनम् ।
त्वद्धस्तपूतो येनाहं लोकान् गन्ताऽस्मि शोभनान् ॥ २६ ॥

श्रीभगवानुवाच

कथंददामितेयुद्धंतोषितोऽहंत्वयापुनः । न त्वांतुप्रभवेत्कोपः कथंयुध्यामितेऽन्धक
यदि ते वर्त्तते बुद्धिर्युद्धं प्रति न संशयः । ततो गच्छस्वयुद्धाय देवं प्रतिमहेश्वरम्

अन्धक उवाच

न तत्र सिद्धयते कार्यं देवं प्रति महेश्वरम् ॥ २९ ॥

श्रीभगवानुवाच

पुत्र त्वं शिखरं गत्वा धूनयस्व बलेन च ॥ ३० ॥
विधूते तत्र देवेशः कोपंकर्त्ता सुदारुणम् । कोपितःशङ्करोरौद्रं युद्धंदास्यतिदानव
विष्णुवाक्यादसौ पापो गतो यत्र महेश्वरः ।
कैलासशिखरं प्राप्य धुनोति स्म मुहुर्मुहुः ॥ ३२ ॥
धूनिते तत्र शिखरे कम्पितंभुवनत्रयम । निपेतुः शिखराग्राणिकम्पमानान्यनेकशः
चत्वारः सागराः क्षिप्रमेकीभूता महीपते । निपेतुरुल्कापाताश्चपादपा अप्यनेकशः
उमया सहितो देवो विस्मयंपरमंगतः । गाढमालिङ्ग्य गिरिजा देवं वचनमब्रवीत्
किमर्थं कम्पते शैलः किमर्थं कम्पतेधरा । किमर्थंकम्पते नागो मर्त्यःपातालमेवच
किं वा युगक्षयो देव तन्ममाख्यातुमर्हसि ॥ ३६ ॥

ईश्वर उवाच

कस्यैषा दुर्मतिर्जाता क्षिप्तः सर्पमुखे करः ।
ललाटे च कृतं वर्म्म स यास्यति यमालयम् ॥ ३७ ॥
कैलासमाश्रितो येन सुप्तोऽहंयेनबोधितः । तं वधिष्येन सन्देहसम्मुखोवाभवेद्यदि
चिन्तयामास देवेशो ह्यन्धकोऽयं न संशयः ।
उपायं चिन्तयामास येनाऽसौ वध्यते क्षणात् ॥ ३९ ॥
आगताश्च सुराःसर्वे ब्रह्माद्याः वसुभिः सह । रथं देवमयं कृत्वा सर्वलक्षणसंयुतम्
केचिद्देवाः स्थिताश्चक्रे केचित्तुण्डाग्रपार्श्वयोः ।
केचिन्नाभ्यां स्थिता देवाः केचिद्धुर्येषु संस्थिताः ॥ ४१ ॥
धुरीषु निश्चलाः केचित्केचिद्यूपेषु संस्थिताः ।
केचित्स्यन्दनसंस्तम्भाः केचित्स्यन्दनवेष्टकाः ॥ ४२ ॥
आमलसारकेऽन्येऽपि अन्येऽपि कलशे स्थिताः ।

रिपोर्भयङ्करं दिव्यं ध्वजमालादिशोभितम् ॥ ४३ ॥

रथंदेवमयं कृत्वा तमारूढो जगद्गुरुः । निर्ययौ दानवो यत्र कोपाविष्टो महेश्वरः तिष्ठतिष्ठेत्युवाचाऽथ क्व प्रयास्यसि दुर्मते !। शरासनंकरे गृह्य शरांश्चिक्षेप दानवे

दानवेऽधिष्ठिते युद्धे शरैश्चिच्छेद सायकान् ।

शरासारेण तत्रैव अन्धकश्छादितस्तदा ॥ ४६ ॥

न तत्रदृश्यतेसूर्यो नाकाशंन च चन्द्रमाः । आग्नेयमस्त्रं व्यसृजद्दानवोऽपि शिवम्प्रति दह्यमानाः शराङ्गारैस्तत्रसुः सर्वदेवताः । रक्षरक्ष महादेव दह्यमानांस्तु दानवात्

ततो देवाधिदेवोऽसौ वारुणास्त्रमयोऽजयत् ।

वारुणाऽस्त्रेण निमिषादाग्नेयं नाशितं तदा ॥ ४९ ॥

दानवेन तदामुक्तं वायव्यास्त्रं रणाजिरे । वारुणंचगतंतात वायव्यास्त्रविनाशितम् देवो व्यसर्जयत्सार्पं क्रोधाविष्टेनचेतसा । मारुतं नाशितंबाणैःसर्प्पैस्तत्रनसंशयः दानवेन ततोमुक्तं गरुडास्त्रंच लीलया । गारुडास्त्रं च तद्दृष्ट्वा सार्प्पंनैव व्यदृश्यत ततो देवाधिदेवेशनारसिंहं विसर्जितम् । नारसिंहास्त्रबाणेनगारुडास्त्रं प्रशामितम् अस्त्रमस्त्रेण शाम्येत न बाध्येत परस्परम् । महद्युद्धमभूत्तात! सुरासुरभयङ्करम् ॥ चक्रनालीकनाराचैस्तोमरैःखड्गमुद्गरैः । वत्सदन्तैस्तथाभल्लैःकर्णिकारैश्चशोभनैः

एवं न शक्यते हन्तुं दानवो विविधायुधैः ।

तदा ज्वालाकरालाश्च खड्गनाराचतोमराः ॥ ५६ ॥

वृषाङ्केन विमुक्तास्तुसमरे दानवम्प्रति । न संस्पृशन्तिशस्त्राणिगात्रंगौडघधूरिवा

आयुधानि ततस्त्यक्त्वा बाहुयुद्धमुपस्थितौ ।

करं करेण संगृह्य प्रहरन्तौ स्वमुष्टिभिः ॥

रणप्रयोगैर्युध्यन्तौ युयुधाते शिवान्धकौ ॥ ५८ ॥

श्रीमार्कण्डेय उवाच

अन्धकं प्रति देवेशश्चिन्तयामास निग्रहम् ।

हनिष्यामि न सन्देहो दुष्टात्मानं न संशयः ॥ ५९ ॥

स शिवेन यदा क्षिप्तः पतितः पृथिवीतले । ऊर्ध्वबाहुरधोवक्त्रो दानवोनृपसत्तम क्रोधाविष्टेनदेवेशःसंग्रामेदेवशत्रुणा । कक्षयोःकुहरेक्षिप्त्वाबन्धेनाऽऽक्रम्यपीडितः

निस्पन्दश्चाऽभवद्देवो मूर्च्छायुक्तो महेश्वरः ।

मूर्च्छापन्नं तु तं ज्ञात्वा चिन्तयामास दानवः ॥ ६२ ॥

हाहाकष्टं कृतं मेऽद्यदुष्कृतंपापकर्मणा । किंकरोमिकथंकर्मकस्मिन्स्थानेतुमोचये गृहीत्वादेवमुत्सङ्गेगतः कैलासपर्वतम् । शय्यायांशङ्करंन्यस्यनिर्ययौदैत्यराट्ततः शय्यायां पतितोदेवं प्रपेदे वेदनांततः । तावद्ददर्श चात्मानं स्वकीयभवनस्थितम् पराभवः कृतोमह्यं कथं तेन दुरात्मना । क्रोधावेगसमाविष्टो निर्ययौ दानवम्प्रति

आयसीं लगुडीं गृह्य प्रभुर्भारसहस्रजाम् ।

दानवं च ततो दृष्ट्वा प्राक्षिपत्तस्य मूर्द्धनि ॥ ६७ ॥

खड्गेनताडयामास दानवः प्रहसन्रणे । देवेनाथस्मृतं चाऽस्त्रंकौच्छेराख्यंमहाहवे दीप्यमानंसमुत्सृज्यहृदयेताडितःक्षणात् । ततः स ताडितस्तेन रुधिरोद्गारमुद्वमन् पतितोऽधोमुखोभूत्वा ततः शूलेन भेदितः । पुनश्च देवदेवेन शूलेन द्विदलीकृतः ॥

शूलाग्रेऽसौ स्थितः पापो भ्रान्तवांश्चक्रवत्तदा ।

ये ये भूम्यां पतन्ति स्म तत्कायाद्रक्तबिन्दवः ॥ ७१ ॥

ते ते सर्वे समुत्तस्थुर्दानवाःशस्त्रपाणयः । व्याकुलस्तुततोदेवो दानवेन तरस्विना

देवेनाऽथ स्मृता दुर्गा चामुण्डा भीषणानना ।

आयाता भीषणाकारा नानायुधविराजिता ॥ ७३ ॥

महादंष्ट्रा महाकाया पिङ्गाक्षी लम्बकर्णिका ।

आदेशो दीयतां देव! को यास्यति यमालयम् ॥ ७४ ॥

ईश्वर उवाच

पिबास्य रुधिरं भद्रे यथेष्टं दानवस्य च । निपतद्रुधिरंभूमौदुर्गेगृह्णीष्व मा चिरम् निहन्मि दानवंयावत्साहाय्यंकुरुसुन्दरि । एवमुक्ता तु सा दुर्गा पपौचरुधिरंततः निहतादानवाःसर्वे देवेशेन सहस्रशः । अन्धकोऽपिचतान्दृष्ट्वा दानवानवनिंगतान्

ततो वाग्भिः प्रतुष्टाव देवदेवं महेश्वरम् ॥ ७७ ॥

अन्धक उवाच

जयस्व देवदेवेश उमार्द्धार्द्धशरीरधृक् । नमस्ते देवदेवेश! सर्वाय त्रिगुणात्मने ॥
वृषभासनमारूढ शशाङ्ककृतशेखर !। जयखट्वाङ्गहस्ताय गङ्गाधर नमोऽस्तुते ॥७९
नमो डमरुहस्ताय नमः कपालमालिने । स्मरदेहविनाशाय महेशाय नमोऽस्तु ते
पूष्णोदन्तनिपाताय गणनाथाय ते नमः । जयस्वरूपदेहाय अरूपबहुरूपिणे ॥८१॥
उत्तमाङ्गविनाशाय विरिञ्चेरपिशङ्कर !। श्मशानवासिने नित्यं नित्यंभैरवरूपिणे

त्वं सर्वगोऽसि त्वं कर्त्ता त्वं हर्त्ता नान्य एव च ।
त्वं भूमिस्त्वं दिशश्चैव त्वं गुरुर्भार्गवस्तथा ॥ ८३ ॥

सौरिस्त्वं देवदेवेश भूमिपुत्रस्तथैव च । ऋक्षग्रहादिकं सर्वं यद्दृश्यं तत्त्वमेवच

एवं स्तुतिं तदा कृत्वा देवं प्रति स दानवः ।
संहताभ्यां तु पाणिभ्यां प्रणनाम महेश्वरम् ॥ ८५ ॥

ईश्वर उवाच

साधुसाधुसहासत्त्ववरंयाचस्वदानव । दाताऽहंयाचकस्त्वंहिददामीहयथेप्सितम्

अन्धक उवाच

यदि तुष्टोऽसि देवेश यदिदेयोवरो मम । तदात्मसदृशोऽहं ते कर्त्तव्यो नाऽपरोवरः
भस्मीजटीत्रिनेत्री च त्रिशूलीच चतुर्भुजः । व्याघ्रचर्मोत्तरीयश्च नागयज्ञोपवीतकः

एतदिच्छाम्यहं सर्वं यदि तुष्टो महेश्वर !॥ ८९ ॥

ईश्वर उवाच

ददामितेवरंह्यद्ययस्त्वयायाचितोऽनघ । गणेषुमे स्थितःपुत्रभृङ्गीशस्त्वंभविष्यसि

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डेऽन्धकवधतद्वरप्रदानवर्णनंनामाष्टचत्वारिंशोऽध्यायः ॥४८॥

एकोनपञ्चाशत्तमोऽध्यायः

शूलभेदोत्पत्तिमाहात्म्यवर्णनम्

मार्कण्डेय उवाच

अन्धकं तु निहत्याथ देवदेवो महेश्वरः । उमया सहितो रुद्रः कैलासमगमन्नगम् ॥
आगताश्चततोदेवा ब्रह्माद्याश्चसवासवाः । हृष्टास्तुष्टाश्चतेसर्वेप्रणेमुःपार्वतीपतिम्

ईश्वर उवाच

उपाविशन्तु ते सर्वे ये केचन समागताः । निहतो दानवोह्येष गीर्वाणार्थेपितामह
रक्तेन तस्य मे शूलं निर्म्मलं नैव जायते । शुभव्रततपोजप्यरतो ब्रह्मन्मया हतः ॥

कर्तुमिच्छाम्यहं सम्यक्तीर्थयात्रां चतुर्मुख !।
आगच्छन्तु मया सार्द्धं ये यूयमिह सङ्गताः ॥ ५ ॥

इत्युक्त्वादेवदेवेशःप्रभासंप्रतिनिर्ययौ । प्रभासाद्यानितीर्थानि गङ्गासागरमध्यतः
अवगाह्यापिसर्वाणि नैर्मल्यंनाभवन्नृप !। नर्मदायांततो गत्वा देवोदेवैः समन्वितः
उत्तरं दक्षिणं कूलमवागाहत्प्रियव्रतः । गतस्तु दक्षिणे कूले पर्वते भृगुसञ्ज्ञितम् ॥

तत्र स्थित्वा महादेवो देवैः सह महीपते !।
भ्रान्त्वा भ्रान्त्वा चिरं श्रान्तो निर्विण्णो निषसाद ह ॥ ९ ॥
मनोहारि यतः स्थानं सर्वेषां वै दिवौकसाम् ।
तीर्थं विशिष्टं तन्मत्वा स्थितो देवो महेश्वरः ॥ १० ॥
गिरिं विव्याध शूलेन भिन्नं तेन रसातलम् ।
निर्मलं चाऽभवच्छूलं न लेपो दृश्यते क्वचित् ॥ ११ ॥

देवैराह्वानितातत्र महापुण्याच भारती । पर्वतान्निःसृता तत्र महापुण्यासरस्वती
द्वितीयःसङ्गमस्तत्र यथा वेण्यांसितासितः । तत्रब्रह्मास्वयंदेवोब्रह्मेशंलिङ्गमुत्तमम्
संस्थापयामासपुण्यं सर्वदुःखघ्नमुत्तमम् । तस्ययाम्येदिशोभागेस्वयंदेवोजनार्द्दनः

तिष्ठतेचसदातत्रविष्णुपादाग्रसंस्थिता ।अम्भसोनभवेन्मार्गःकुण्डमध्यस्थितस्यच
शूलाग्रेण कृता रेखा ततस्तोयं वहेन्नृप !। तत्तोयं च गतं तत्र यत्र रेवा महानदी
जललिङ्गं महापुण्यं चक्रतीर्थं नृपोत्तम !।
शूलभेदे च देवेशः स्नानं कुर्याद्यथाविधि ॥ १७ ॥
आत्मानंमन्यतेशुद्धं न किञ्चित्कल्मषंकृतम् । तस्यैवोत्तरकाष्ठायांदेवदेवोजगद्गुरुः
आत्मना देवदेवेशः शूलपाणिः प्रतिष्ठितः ।
सर्वतीर्थेषु तत्तीर्थं सर्वदेवमयं परम् ॥ १६ ॥
सर्वपापहरं पुण्यं सर्वदुःखघ्नमुत्तमम् । तत्र तीर्थे प्रतिष्ठाप्य देवदेवं जगद्गुरुः ॥
रक्षापालांस्ततो मुक्त्वा शतं चाष्टविनायकान् ।
क्षेत्रपालाः शतं साष्टं तद्रक्षन्ति प्रयत्नतः ॥ २१ ॥
विघ्नास्तस्योपजायन्ते यस्तत्र स्थातुमिच्छति ।
केचित्कुटुम्बचिन्तासु व्यग्राः केचित्कृषीषु च ॥ २२ ॥
केचित्सभांप्रकुर्वन्तिकेचिद्द्रव्यार्जनेरताः। परोक्षवादंकुर्वन्तिकेऽपिहिंसारताःसदा
परदारताः केचित्केचिद्वृत्तिविहिंसकाः । अन्ये केचिद्वदन्त्येवं कथंतीर्थेषु गम्यते
क्षुधया पीड्यते भार्या पुत्रभृत्यादयस्तदा । मोहजालेषुयोज्यन्ते एवं देवगणैर्नराः
पापाचाराश्चयेमर्त्या स्नानं तेषां न जायते। संरक्षन्तिचतत्तीर्थंदेवभृत्यगणाःसदा
धन्याःपुण्याश्चयेमर्त्यास्तेषांस्नानंप्रजायते । सरस्वत्याभोगवत्यादेवनद्याविशेषतः
अयं तु सङ्गमः पुण्यो यथा वेण्यां सितासितः ।
दृष्ट्वा तीर्थं तु ते सर्वे गीर्वाणा हृष्टचेतसः॥ २८ ॥
देवस्य सन्निधौभूत्वा वर्णयामासुरुत्तमम् । इदं तीर्थं तु देवेश गयातीर्थेनते समम्
गुह्याद्गुह्यतमंतीर्थं न भूतं न भविष्यति । शूलपाणिःसमभ्यर्च्यइन्द्राद्यैरप्सरोगणैः
यक्षकिन्नरगन्धर्वैर्दिक्पालैर्लोकपैरपि । नृत्यगीतैस्तथा स्तोत्रैःसर्वैश्चापि सुरासुरैः
पूज्यमानो गणैः सर्वैः सिद्धैर्नागैर्महेश्वरः । देवेन भेदितं तत्र शूलाग्रेण नराधिप!॥
त्रिधा यत्रेक्ष्यतेऽद्यापि ह्यावर्त्तः सुरपूरितः ।

कुण्डत्रयं नरव्याघ्र! महत्कलकलान्वितम् ॥ ३३ ॥
सर्वपापक्षयकरं सर्वदुःखघ्नमुत्तमम् । तत्र तीर्थे तु यः स्नाति उपवासपरायणः ॥
दीक्षामन्त्रविहीनोऽपि मुच्यते चाब्दिकादघात् ।
ये पुनर्विधिवत्स्नान्ति मन्त्रैः पञ्चभिरेव च ॥ ३५ ॥
वेदोक्तैः पञ्चभिर्मन्त्रैः सहिरण्यघटैः शुभैः । अक्षरैर्दशभिश्चैव षड्भिर्वात्रिभिरेव वा
पृथग्भूतैर्द्विजातीनां तीर्थे कार्यं नराधिप !।
ब्रह्मक्षत्त्रविशां वाऽपि स्त्रीशूद्राणां तथैव च ॥ ३७ ॥
पुरुषाणां त्रयीं ध्यात्वा स्नानं कुर्याद्यथाविधि ।
दशाक्षरेण मन्त्रेण ये पिबन्ति जलं नराः ॥ ३८ ॥
ते गच्छन्ति परंलोकं यत्र देवोमहेश्वरः । केदारे च यथा पीतं रुद्रकुण्डे तथैव च ॥
पञ्चरेफसमायुक्तं क्षकारं सुरपूजितम् । ॐकारेण समायुक्तमेतद्वेद्यं प्रकीर्तितम् ॥
यस्तत्र कुरुते स्नानं विधियुक्तो जितेन्द्रियः । तिलमिश्रेणतोयेन तर्पयेत्पितृदेवताः
कुलानां तारयेद्विंशं दशपूर्वान्दशापरान् । गयादिपञ्चस्थानेषु यः श्राद्धं कुरुते नरः
स तत्र फलमाप्नोति शूलभेदे न संशयः ।
यस्तत्र विधिना युक्तो दद्याद्दानानि भक्तितः ॥ ४३ ॥
तदक्षयं फलंतत्र सुकृतं दुष्कृतं तथा । गयाशिरो यथा पुण्यं पितृकार्येषु सर्वदा
शूलभेदं तथा पुण्यं स्नानादानादितर्पणैः ।
भक्त्या ददाति यस्तत्र काञ्चनं गां महीं तिलान् ॥ ४५ ॥
आसनोपानहौ शय्यां वराश्वान्क्षत्रियस्तथा ।
वस्त्रयुग्मं च धान्यं च गृहं पूर्णं प्रयत्नतः ॥ ४६ ॥
स योक्त्रं लाङ्गलं दद्यात्कृष्टां चैव वसुन्धराम् ।
दानान्येतानि यो दद्याद् ब्राह्मणे वेदपारगे ॥ ४७ ॥
श्रोत्रिये कुलसम्पन्ने शुचिष्मति जितेन्द्रिये ।
श्रुताध्ययनसम्पन्ने दम्भहीने क्रियान्विते ।

त्रयोदशाहःस्त्वेकैकं त्रयोदशगुणं भवेत् ॥ ४८ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे शूलभेदोत्पत्तिमाहात्म्यवर्णनंनामै-
कोनपञ्चाशत्तमोऽध्यायः ॥ ४६ ॥

पञ्चाशत्तमोऽध्यायः

पात्रापात्रपरीक्षादानादिनियमवर्णनम्

उत्तानपाद उवाच

द्विजाश्च कीदृशाः पूज्या अपूज्याः कीदृशाः स्मृताः ।
श्राद्धे वैवाहिके कार्यें दाने चैव विशेषतः ॥ १ ॥
यदि श्रद्धा भवेद्दैवयोगाच्छ्राद्धादिके विधौ ।
एतदाख्याहि मे देव! कस्य दानं न दीयते ॥ २ ॥

ईश्वर उवाच

यथाकाष्ठमयोहस्ती यथाचर्ममयोमृगः । ब्राह्मणश्चानधीयानस्त्रयस्तेनामधारकाः
यथा षण्ढोऽफलः स्त्रिषु यथा गौर्गवि चाफला ।
यथाचाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥ ४ ॥
यथाऽनृणेबीजमुप्त्वावप्तानलभते फलम् । तथाऽनृचेहविर्दत्त्वानदातालभते फलम्
रोगी हीनाऽतिरिक्ताङ्गः काणःपौनर्भवस्तथा ।
अवकीर्णी श्यावदन्तः सर्वाशी वृषलीपतिः ॥ ६ ॥
मित्रध्रुक्पिशुनःसोमविक्रयीपरनिन्दकः । पितृमातृगुरुत्यागीनित्यंब्राह्मणनिन्दकः
शूद्रान्नं मन्त्रसंयुक्तं यो विप्रो भक्षयेन्नृप !।
सोऽस्पृश्यः कर्मचाण्डालः स्पृष्ट्वा स्नानं समाचरेत् ॥ ८ ॥

कुनखीवृषली स्तेयी वार्द्धुष्यःकुण्डगोलकौ । महादानरतोयश्च यश्चात्महननेरतः
भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः ।
एते विप्राः सदा त्याज्याः परिभाव्य प्रयत्नतः ॥ १० ॥
प्रतिग्रहं गृहीत्वा तु वाणिज्यं यस्तु कारयेत् ।
तस्य दानं न दातव्यं वृथा भवति तस्य तत् ॥ ११ ॥
श्रुताऽध्ययनसम्पन्ना ये द्विजावृत्ततत्पराः । तेषां यद्दीयते दानं सर्वमक्षयतामव्रजेत्
दरिद्रान्भरभूपालमासमृद्धान्कदाचन । व्याधितस्यौषधंपथ्यं नीरुजस्यकिमोषधैः

उत्तानपाद उवाच

कीदृशोऽथ विधिस्तत्र तीर्थश्राद्धस्य का क्रिया ।
दानं च दीयते यद्वत्तन्ममाख्याहि शङ्कर !॥ १४ ॥

ईश्वर उवाच

श्राद्धं कृत्वा गृहे भक्त्या शुचिश्चाऽपि जितेन्द्रियः ।
गुरुं प्रदक्षिणीकृत्य भोज्य सीमान्तके ततः ॥ १५ ॥
वाग्यतः प्रव्रजेतावद्यावत्सीमांनलङ्घयेत् । शूलभेदंततोगत्वास्नानं कुर्याद्यथाविधि
पञ्चस्थानेषु च श्राद्धं हव्यकव्यादिभिः क्रमात् ।
पिण्डदानञ्च यः कुर्यात्पायसैर्मधुसर्पिषा ॥ १७ ॥
पितरस्तस्य तृप्यन्ति द्वादशाब्दानिपञ्च च । अक्षतैर्बदरैबिल्वैरिङ्गुदैर्मधुसर्पिषा ॥
सोऽपि तत्फलमाप्नोति तीर्थेऽस्मिन्नाऽत्र संशयः ।
उपानहौ च यो दद्याद्ब्राह्मणेभ्यः प्रयत्नतः ॥ ६ ॥
सोऽपि स्वर्गमवाप्नोति हयारूढो न संशयः ।
शय्यामश्वं च यो दद्याच्छत्रिकां वा विशेषतः ॥ २० ॥
गच्छेद्विमानमारूढः सोऽप्सरोवृन्दवेष्टितः । उत्तमंयोगृहंदद्यात्सप्तधान्यसमन्वितम्
स्वेच्छयामेवसेल्लोकेकाञ्चनेभवनेहिसः । तिलधेनुञ्चयो दद्यात्सवत्सांवस्त्रसंप्लुताम्
नाकपृष्ठेवसेत्तावद्यावदाभूतसम्प्लवम् । गृहे वा यदि वाऽरण्येतीर्थवर्त्मनिवानृप

तोयमन्नं च यो दद्याद्यमलोकं स नेक्षते। सर्वदानानि दीयन्ते तेषां फलमवाप्यते॥
उदकं चान्नदानं च दद्यादभयमेव च। अन्नदानात्परं दानं न भूतं न भविष्यति॥
कन्यादानं तु यः कुर्याद् वृषं वा यः समुत्सृजेत्।
तस्य वासो भवेत्तत्र यत्राऽहमिति नान्यथा॥ २६॥

उत्तानपाद उवाच

कन्यादानं कथं स्वामिन्कर्त्तव्यं धार्मिकैः सदा।
परिग्रहो यथा पोष्यः कन्योद्वाहस्तथैव च॥ २७॥
अन्यत्पृच्छामि देवेश! कस्य कन्या न दीयते।
दातव्यं कुत्र तद्देव! कस्मै दत्तमथाऽक्षयम्॥ २८॥
उत्तम मध्यमं वाऽपि कनीयः स्यात्कथं विभो!।
राजसं तामसं वाऽपि निःश्रेयसमथाऽपि वा॥ २९॥

ईश्वर उवाच

सर्वेषामेव दानानां कन्यादानं विशिष्यते।
यो दद्यात्परया भक्त्याऽभिगम्य तनयां निजाम्॥ ३०॥
कुलीनायसुरूपाय गुणज्ञायमनीषिणे। सुलग्ने सुमुहूर्ते च दद्यात्कन्यामलङ्कृताम्॥
अश्वान्नागांश्च वासांसि योऽत्र दद्यात्स्वशक्तितः।
तस्य वासो भवेत्तत्र पदं यत्र निरामयम्॥ ३२॥
येनाऽत्रदुहितादत्ता प्राणेभ्योऽपि गरीयसी। तेनसर्वमिदंदत्तंत्रैलोक्यंसचराचरम्॥
यः कन्यार्थं ततो लब्ध्वा भिक्षते चैव तद्धनम्।
सभवेत्कर्मचण्डालः काष्ठकीलो भवेन्मृतः॥ ३४॥
गृहेऽपि तस्य योऽश्नीयाज्जिह्वालौल्यात्कथञ्चन।
चान्द्रायणेन शुद्ध्येत तप्तकृच्छ्रेण वा पुनः॥ ३५॥

उत्तानपाद उवाच

वित्तं न विद्यते यस्यकन्यैवास्तिच यद्गृहे। कथंचोद्वाहनंतस्यनयाच्ञांकुरुतेयदि

ईश्वर उवाच

अवित्तेनैव कर्त्तव्यं कन्योद्वहनकं नृप!। कन्यानाम समुच्चार्य न दोषाय कदाचन॥
अभिगम्योत्तमं दानं यच्च दानमयाचितम्।
भविष्यति युगस्यान्तस्तस्यान्तो नैव विद्यते॥ ३८॥
अभिगम्योत्तमं दानं स्मृतमाहूय मध्यमम्।
याच्यमानं कनीयः स्याद्देहिदेहीति चाधमम्॥ ३९॥
यथैवाऽश्माऽश्मना बद्धो निक्षिप्तो वारिमध्यतः।
द्वावेतौ निधनं यातस्तद्वद्दन्नमपात्रके॥ ४०॥
असमर्थे ततो दानं न प्रदेयं कदाचन। दातारं नयतेऽधस्तादात्मानञ्च विशेषतः॥
समर्थस्तारयेद् द्वौ तु काष्ठं शुष्कं यथा जले।
यथा नौश्च तथा विद्वान्प्रापयेदपरं तटम्॥ ४२॥
आहिताग्निश्च गृह्णाति यः शूद्राणां प्रतिग्रहम्।
इह जन्मनि शूद्रोऽसौ मृतः श्वा चोपजायते॥ ४३॥
वृथा क्लेशश्चजायेत ब्राह्मणे ह्यग्निहोत्रिणि। असत्प्रतिग्रहंकुर्वन्गुप्तंनीचस्यगर्हितम्॥
अभोज्यः स भवेन्मर्त्यो दह्यते कारिषाऽग्निना।
कटकारो भवेत्पश्चात्सप्तजन्म न संशयः ४५
लज्जादाक्षिण्यलोभाच्च यद्दानं चोपरोधजम्।
भृत्येभ्यश्च तु यद्दानं तद्वृथा निष्फलं भवेत्॥ ४६॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शूलभेदमाहात्म्ये पात्रापात्रपरीक्षादानादिनिर्णयवर्णनं
नाम पञ्चाशत्तमोऽध्यायः॥ ५०॥

एकपञ्चाशत्तमोऽध्यायः

दानधर्मप्रशंसनवर्णनम्

उत्तानपाद उवाच

काले तत्क्रियतेकस्मिञ्छ्राद्धं दानं तथेश्वर !।
यात्रा तत्र प्रकर्त्तव्या तिथौ यस्यां वदाऽऽशु तत् ॥ १ ॥

ईश्वर उवाच

पितृतीर्थंयथापुण्यं सर्वकामिकमुत्तमम् । इदं तीर्थंतथापुण्यं स्नानदानादितर्पणैः
विशेषेण तु कुर्वीत श्राद्धं सर्वयुगादिषु । मन्वन्तराद्योवत्स श्रूयन्तां च चतुर्द्दश
अश्वयुक्छुक्लनवमी द्वादशीकार्त्तिकस्यच । तृतीया चैत्रमासस्यतथाभाद्रपदस्य च
आषाढस्यैव दशमी माघस्यैव तु सप्तमी ।
श्रावणस्याऽष्टमी कृष्णा तथाऽऽषाढस्य पूर्णिमा ॥ ५ ॥
फाल्गुनस्य त्वमावास्या पौषस्यैकादशी सिता ।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी तथा ॥ ६ ॥
मन्वन्तरादयश्चैते अनन्तफलदाः स्मृताः । अयनेचोत्तरे राजन्दक्षिणे श्राद्धमाचरेत्
कार्त्तिकी च तथा माघी वैशाखस्य तृतीयिका ।
पौर्णमासी च चैत्रस्य ज्येष्ठस्य च विशेषतः ॥ ८ ॥
अष्टकासुचसंक्रान्तौ व्यतीपाते तथैव च । श्राद्धकाला इमेसर्वेदत्तमेष्वक्षयंस्मृतम्
मधुमासे सितेपक्ष एकादश्यामुपोषितः । निशि जागरणं कुर्याद्विष्णुपादसमीपतः
धूपदीपादिनैवेद्यैः स्रङ्मालागुरुचन्दनैः ।
अर्चां कुर्वन्ति ये विष्णुः पठेयुःप्राक्तनीं कथाम् ॥ ११ ॥
ऋग्यजुः साममन्त्रोक्तं सूक्तं जपति यो द्विजः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १२ ॥

प्रातः श्राद्धं प्रकुर्वीत द्विजान्सम्पूज्य यत्नतः ।
दानं दद्याद्यथाशक्ति गोहिरण्याम्बरादिकम् ॥ १३ ॥
पितरस्तस्य तृप्यन्ति यावदाभूतसम्प्लवम् । श्राद्धदस्तुव्रजेत्तत्रयत्रदेवो जनार्द्दनः
त्रयोदश्यां ततो गच्छेद् गुहावासिनि लिङ्गके ।
दृष्ट्वा मार्कण्डमीशानं मुच्यते सर्वपातकैः ॥ १५ ॥

उत्तानपाद उवाच

गुहामध्ये महादेव लिङ्गं परमशोभितम् । येन प्रतिष्ठितं देव! तन्ममाख्यातुमर्हसि

ईश्वर उवाच

त्रिषु लोकेषु विख्यातो मार्कण्डेयो मुनीश्वरः ।
दिव्यं वर्ष सहस्रं स तपस्तेपे सुदारुणम् ॥ १७ ॥
गुहामध्यं प्रविष्टोऽसौ योगाभ्यासमुपाश्रितः ।
लिङ्गं तु स्थापितं तेन मार्कण्डेश्वरसञ्ज्ञितम् ॥ १८ ॥
तत्र स्नात्वा च यो भक्त्या सोपवासो जितेन्द्रियः ।
तत्र जागरणं कुर्वन्दद्याद्दीपं प्रयत्नतः ॥ १६ ॥
देवस्यस्नपनंकुर्यादमृतैःपञ्चभिस्तथा । यथाशक्त्यासमालभ्य पूजांकुर्याद्यथाविधि
स्वशाखोत्पन्नमन्त्रैश्च जपंकुर्युर्द्विजातयः । सावित्र्यष्टसहस्रन्तुशताष्टकमथापि वा
एतत्कृत्वा नृपश्रेष्ठ! जन्मनः फलमाप्नुयात् ।
चतुर्दश्यां तु वै स्नात्वा पूजां कृत्वा यथाविधि ॥ २२ ॥
पात्रं परीक्ष्य दातव्यमात्मनः श्रेयइच्छता ।
पितरस्तस्यतृप्यन्ति द्वादशाब्दान्नसंशयम् ॥ २३ ॥
दाता स गच्छते तत्र यत्र भोगाः सनातनाः ।
गुहामध्ये प्रविष्टस्तु लोटयेच्चैव शक्तितः ॥ २४ ॥
नीले गिरौ हि यत्पुण्यं तत्समस्तं लभन्ति ते ।
शूलभेदे तु यः कुर्याच्छ्राद्धं पर्वणि पर्वणि ॥ २५ ॥

विशेषाच्चैत्रमासान्ते तस्य पुण्यफलं शृणु। केदारेचैवयत्पुण्यं गङ्गासागरसङ्गमे सितासिते तु यत्पुण्यमन्यतीर्थे विशेषतः। अर्बुदे विद्यते पुण्यं पुण्यं चामरपर्वते गयादिसर्वतीर्थानां फलमाप्नोति मानवः। विधिमन्त्रसमायुक्तस्तर्पयेत्पितृदेवताः

कुलानां तारयेद्विंशं दशपूर्वान्दशापरान्।
दक्षिणस्यां ततो मूर्त्तौ शुचिर्भूत्वा समाहितः॥ २९॥
न्यासं कृत्वा तु पूर्वोक्तं प्रदद्यादष्टपुष्पिकाम्।
शास्त्रोक्तैरष्टभिः पुष्पैर्मानसैः शृणु तद्यथा॥ ३०॥
वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं पुनः।
वानस्पत्यं भवेत्षष्ठं प्राजापत्यं तु सप्तमम्॥ ३१॥

अष्टमंशिवपुष्पं स्यादेषां शृणु विनिर्णयम्। वारिजंसलिलं ज्ञेयं सौम्यंमधुघृतंपयः

आग्नेयं धूपदीपाद्यं वायव्यं चन्दनादिकम्।
पार्थिवं कन्दमूलाद्यं वानस्पत्यं फलात्मकम्॥ ३३॥

प्राजापत्यं तु पाठाद्यं शिवपुष्पं तु वासना। अहिंसाप्रथमंपुष्पंपुष्पमिन्द्रियनिग्रहः तृतीयं तु दयापुष्पं क्षमापुष्पं चतुर्थकम्। ध्यानपुष्पंतपःपुष्पं ज्ञानपुष्पंतुसप्तमम्

सत्यञ्चैवाष्टमं पुष्पमेभिस्तुष्यन्ति देवताः।
भक्त्या तपस्विनः पूज्या ज्ञानिनश्च नराधिप!॥ ३६॥

छत्रमावरणं दद्यादुपानद्युगलं तथा। तेन पूजितमात्रेण पूजिताः पुरुषास्त्रयः॥ स्वर्गलोकेवसेत्तावद्यावदाभूतसंप्लवम्। शूलपाणेस्तुभक्त्यावैजाप्यंकुर्वन्तियेनराः पञ्चामृतैः पञ्चगव्यैर्यक्षकर्दमकुङ्कुमैः। समालभेत देवेशं श्रीखण्डागुरुचन्दनैः॥३९॥ नानाविधैश्च ये पुष्पैरर्चां कुर्वन्ति शूलिनः। निशिजागरणं कुर्युर्दीपदानंप्रयत्नतः

धूपनैवेद्यकं दद्यात्पठेत्पौराणिकीं कथाम्।
तत्र स्थाने स्थिता भक्त्या जपं कुर्वन्ति ये नराः॥ ४१॥

श्रीसूक्तंपौरुषं सूक्तंपावमानंवृषाकपिम्। वेदोक्तैश्चैववमन्त्रैश्च रौद्रींवाबहुरूपिणीम् ब्राह्मणान्पूजयेद्भक्त्यापूजयित्वाप्रणम्य च। नानाविधैर्महाभोगैःशिवलोकेमहीयते

अग्निमीत्यादिजाप्यानि ऋग्वेदी जपते तु यः।
रुद्रान्पुरुषसूक्तञ्च श्लोकाध्यायं च शुक्रियम्॥ ४४॥
इषेत्वादिकमन्त्रौघं ज्योतिर्ब्राह्मणमेव च।
गायत्र्यं वै मधु चैव मण्डलब्राह्मणानि च॥ ४५॥

एताञ्जप्यांस्तु यो भक्त्या यजुर्वेदीजपेद्यदि। देवव्रतं वामदेव्यं पुरुषर्भमेव च॥ बृहद्रथन्तरञ्चैव यो जपेद्भक्तितत्परः। स प्रयाति नरः स्थानं यत्र देवो महेश्वरः॥

पादशौचं तथाऽभ्यङ्गं कुरुते योऽत्र भक्तितः।
गोदाने चैव यत्पुण्यं लभते नाऽत्र संशयः॥ ४८॥

ब्राह्मणान्भोजयेत्तत्रमधुनापायसेनच। एकस्मिन्भोजितेविप्रेकोटिर्भवतिभोजिता

सुवर्णं रजतं वस्त्रं दद्याद्भक्त्या द्विजोत्तमे।
तर्प्पितास्तेन देवाः स्युर्मनुष्याः पितरस्तथा॥ ५०॥

चन्द्रसूर्यग्रहे भक्त्या स्नानं कुर्वन्ति ये नराः। देवार्चनञ्चयेकुर्युर्जपंहोमं विशेषतः

दद्याद्दानं यथाशक्ति ब्राह्मणे वेदपारगे॥ ५१॥

अश्वं रथं गजं यानं तुलापुरुषमेव च। शकटं यः प्रदद्याद्वा सप्तधान्यप्रपूरितम्॥५२

सयोक्त्रं लाङ्गलं दद्याद्युवानौ तु धुरन्धरौ।
गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम्॥ ५३॥
अपात्रे विदुषा किञ्चिन्न देयं भूतिमिच्छता।
यतोऽसौ सर्वभूतानि दधाति धरणी किल॥ ५४॥
ततो विप्राय सा देया सर्वसस्यौघमालिनी।
अथाऽन्यच्छृणु राजेन्द्र! गोदानस्य तु यत्फलम्॥ ५५॥
यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्रदृश्यते।
तावद्गौ पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति॥ ५६॥

येन केनाप्युपायेन ब्राह्मणे तां समर्पयेत्। पृथ्वी दत्ता भवेत्तेन सशैलवनकानना॥

तारयेन्नियतं दत्ता कुलानामेकविंशतिम्।

रौप्यखुरीं कांस्यदोहां सवत्सां च पयस्विनीम् ॥ ५८ ॥
ये प्रयच्छन्ति कृतिनो ग्रस्ते सूर्ये निशाकरे ।
तेषां सङ्ख्यां न जानामि पुण्यस्याब्दशतैरपि ॥ ५९ ॥
सर्वस्याऽपि हि दानस्य सङ्ख्याऽस्तीह नराधिप !।
चन्द्रसूर्योपरागे च दानसङ्ख्या न विद्यते ॥ ६० ॥
यत्रगौर्दृश्यतेराजन्त्सर्वतीर्थानितत्रहि । तत्रपर्वविजानीयान्नाऽत्रकार्याविचारणा
पुनः स्मृत्वा तु तत्तीर्थं यः कुर्याद्गमनं नरः ।
अथवा म्रियते योऽत्र रुद्रस्याऽनुचरो भवेत् ॥ ६२ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे शूलभेदे दानधर्मप्रशंसावर्णनंनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशत्तमोऽध्यायः

ऋक्षशृङ्गचरित्रेदीर्घतपोमुन्याख्यानवर्णनम्

ईश्वर उवाच

अन्यदाख्यानकं वक्ष्ये पुरावृत्तं नराधिप! । सकुटुम्बोगतःस्वर्गं मुनिर्यत्रमहातपाः

उत्तानपाद उवाच

कथं नाकं गतो विप्रः सकुटुम्बो महानृषिः । कौतुकं परमं देव कथयस्वमम प्रभो

ईश्वर उवाच

चित्रसेनइति ख्यातः काशीराजः पुराऽभवत् ।
शूरो दाता सुधर्मात्मा सर्वकामसमृद्धिमान् ॥ ३ ॥
सा पुरी जनसङ्कीर्णा नानारत्नोपशोभिता ।
वाराणसीति विख्याता गङ्गातीरमुपाश्रिता ॥ ४ ॥

शरच्चन्द्रप्रतीकाशा विद्वज्जनविभूषिता । इन्द्रयष्टिसमाकीर्णा गोपगोकुलसम्वृता
बहुध्वजसमाकीर्णा वेदध्वनिनिनादिता । वणिग्जनैर्बहुविधैः क्रयविक्रयशालिनी
यन्त्राऽऽदानैः प्रतोलीभिरुच्चैश्चान्यैः सुशोभिता ।
देवतायतनैर्दिव्यैराश्रमैर्गहनैर्युता ॥ ७ ॥
नानापुष्पफलै रम्या कदलीखण्डमण्डिता । पनसैर्बकुलैस्तालैरशोकैराम्रकैस्तथा
राजवृक्षकपित्थैश्च दाडिमैरुपशोभिता । वेदाध्ययननिर्घोषैः पवित्रीकृतमङ्गला ॥
तस्याउत्तरदिग्भागेआश्रमोऽभूत्सुशोभनः । तन्मन्दारवनंनाम त्रिषुलोकेषुविश्रुतम्
बहुमन्दारसंयुक्तं तेन मन्दारकं विदुः । विप्रो दीर्घतपानाम सर्वदा तत्र तिष्ठति ॥
तपस्तपति सोऽत्यर्थं तेन दीर्घतपाः स्मृतः ।
स तिष्ठति सपत्नीकः ससुतः सस्नुषः तथा ॥ १२ ॥
शुश्रूषन्ति सदातस्यपुत्राः पञ्च प्रयत्नतः । तस्यपुत्रःकनीयांस्तुऋक्षशृङ्गोमहातपाः
वेदाऽध्ययनसम्पन्नो ब्रह्मचारी गुणान्वितः ।
योगाभ्यासरतो नित्यं कन्दमूलफलाशनः ॥ १४ ॥
तिष्ठतेमृगरूपेण मृगयूथचरस्तदा । दिनान्ते च दिनान्ते च मातापित्रोः समीपगः
अभिवादयते नित्यं भक्तिमान्मुनिपुत्रकः । पुनर्गच्छति तत्रैव कानने गिरिगह्वरे ॥
क्रीडन्बालमृगैः सार्द्धं प्रत्यहं स मुनेः सुतः । कदाचिद्दैवयोगेनऋक्षशृङ्गो ममारसः
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे शूलभेदमाहात्म्ये ऋक्षशृङ्गचरित्रे दीर्घतपोमुन्याख्यानवर्णनं नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः

ऋक्षशृङ्गस्वर्गगमनवर्णनम्

उत्तानपाद उवाच

आश्रमेवसतस्तस्य स दीर्घतपसो मुनेः । कनीयांस्तनयो देव कथं मृत्युमुपागतः

ईश्वर उवाच

शृणुष्वैकमनाभूत्वाकथां दिव्यांमहीपते !। श्रवणादेवयस्यास्तुमुच्यतेसर्वकिल्बिषैः
काशीराजोमहावीर्यो महाबलपराक्रमः । चित्रसेन इतिख्यातो धरण्यांसनराधिप

तस्य राज्ये सदा धर्मो नाऽधर्मो विद्यते क्वचित् ।
वेदधर्म्मरतो नित्यं प्रजा धर्मेण पालयन् ॥ ४ ॥

स्वधर्मनिरतश्चैवयुद्धातिथ्यप्रियःसदा । क्षत्रधर्मंसमाश्रित्यभोगान्भुङ्क्तेसकामतः

कोशस्यान्तो न विद्येत हस्त्यश्वरथपत्तिमान् ।
इतिहासपुराणज्ञैः पण्डितैः सह सङ्कथाम् ॥ ६ ॥

कथयन्राजते राजा कैलास इव शङ्करः । एवं सपालयन्राज्यं राजामन्त्रिणमब्रवीत्

मृगयायां गमिष्यामि तिष्ठध्वं राज्यपालने ।
गम्यतां सचिवैः प्रोक्ते गतोऽसौ वसुधाधिपः ॥ ८ ॥
अश्वारूढाश्च धावन्तो राजानो मण्डलाधिपाः ।
छत्रैश्छत्राणि घृष्यन्तोऽनुजग्मुः काननम्प्रति ॥ ९ ॥
रजस्तत्रोत्थितं भौमं गजवाजिपदाहयम् ।
तेनैतच्छादितं सर्व्वं सदिङ्मार्त्तण्डमण्डलम् ॥ १० ॥
न तत्र दृश्यते सूर्यो न काष्ठा न च चन्द्रमाः ।
पादपाश्च न दृश्यन्ते गिरिशृङ्गाणि सर्वतः ॥ ११ ॥

परस्परं न पश्यन्ति निशार्द्धेवार्षिके यथा । तत्राऽसौसुमहद्यूथं मृगाणांसमलक्ष्यत

अधावत्सहितःसर्वैःसराजाराजपुत्रकैः । वृन्दास्फोटोऽभवत्तेषांशीघ्रंजग्मुर्दिशोदश
एकमार्गगतो राजा चित्रसेनोमहीपतिः । एकाकीसगतस्तत्रयत्रयत्र च ते मृगाः

प्रविष्टोऽसौ ततो दुर्गं काननं गिरिगह्वरम् ।
वल्लीगुल्मसमाकीर्णं स्थितो यत्र न लक्ष्यते ॥ १५ ॥
अदृश्यांस्तु मृगान्मत्त्वा दिशो राजा व्यलोकयत् ।
कां दिशं नु गमिष्यामि क्व मे सैन्यसमागमः ॥ १६ ॥

एवंकष्टं गतो राजाचित्रसेनोनराधिपः । वृक्षच्छायांसमाश्रित्य विश्राममकरोन्नृपः
क्षुत्तृषार्त्तोभ्रमन्दुर्गेकाननेगिरिगह्वरे । ततोऽपश्यत्सरो दिव्यंपद्मिनीखण्डमण्डितम्

हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम् ।
ततो दृष्ट्वा स राजेन्द्रः सम्प्रहृष्टतनूरुहः ॥ १९ ॥

कमलानिगृहीत्वातुततःस्नानंसमाचरत् ।तर्पयित्वापितॄन्देवान्मनुष्यांश्चयथाविधि
आच्छाद्यशतपत्रैश्च पूजयामासशङ्करम् । पपौ पानीयममलं यथावत्स समाहितः
उत्तीर्य सलिलात्तीरे दृष्ट्वा वृक्षं समीपगम् । उत्तरीयमधः कृत्वोपविष्टो धरणीतले

चिन्तयन्नुपविष्टोऽसौ किमद्य प्रकरोम्यहम् ।
तत्राऽऽसीनो ददर्शाऽथ वनोद्देशे मृगान्बहून् ॥ २३ ॥
केचित्पूर्वमुखास्तत्र चाऽपरे दक्षिणामुखाः ।
वारुण्यभिमुखाः केचित्केचित्कौबेरदिङ्मुखाः ॥ २४ ॥
केचिन्निद्रापराः केचिदूर्ध्वकर्णाः स्थिताः परे ।
मृगमध्ये स्थितो योगी ऋक्षशृङ्गो महातपाः ॥ २५ ॥

मृगान्दृष्ट्वा ततोराजाआहारार्थमचिन्तयत् । हत्वातेषुमृगंकञ्चिद्भक्षयामियदृच्छया

स्वस्थावस्थो भविष्यामि मृगमांसस्य भक्षणात् ।
काशीं प्रति गमिष्यामि मार्गमन्विष्य यत्नतः ॥ २७ ॥

विचिन्त्यैवं ततो राजा वृक्षमूलमुपाश्रितः । चापंगृह्यकराग्रेण स शरं सन्दधे ततः
विचिक्षेप शरं तत्र यत्र ते बहवो मृगाः । तेषांमध्येस वैविद्ध ऋक्षशृङ्गोमहातपाः

जग्मुस्त्रस्तास्तु ते सर्वे शब्दं कृत्वा वनौकसः ।
स ऋषिः पतितस्तत्र कृष्णकृष्णेति चाब्रवीत् ॥ ३० ॥
हाहा कष्टं कृतं तेन येनाहंघातितोऽधुना । कस्यैषा दुर्मतिर्जाता पापबुद्धेर्ममोपरि
मृगमध्ये स्थितश्चाऽहं न कश्चिदुपरोधये ।
तां वाचं मानुषीं श्रुत्वा स राजा विस्मयान्वितः ॥ ३२ ॥
शीघ्रं गत्वा ततोऽपश्यद्ब्राह्मणं ब्रह्मतेजसा ।
हाहा कष्टं कृतं मेऽद्य येनाऽसौ घातितो द्विजः ॥ ३३ ॥

चित्रसेन उवाच

अकामाद्घातितस्त्वं तु मृगभ्रान्त्या मयाऽनघ !।
गृहीत्वा बहुदारूणि स्वतनुं दाहयाम्यहम् ॥ ३४ ॥
दृष्टादृष्टन्तु यत्किञ्चिन्न समंब्रह्महत्यया । अन्यथा ब्रह्महत्यायाः शुद्धिर्मेनभविष्यति

ऋक्षशृङ्ग उवाच

न ते सिद्धिर्भवेत्काचिन्मयि पञ्चत्वमागते ।
बह्वयो हत्या भविष्यन्ति विनाशे मम साम्प्रतम् ॥ ३६ ॥
जननी मे पिता वृद्धो भ्रातरश्चतपस्विनः । भ्रातृजायामरिष्यन्तिमयिपञ्चत्वमागते
एताहत्या भविष्यन्ति कथंशुद्धिर्भवेत्तव । उपायं कथयिष्यामि तं कर्तुंयदिमन्यसे

चित्रसेन उवाच

उपायः कथ्यतांमेऽद्य यस्ते मनसि वर्त्तते । करिष्ये तमहंसर्वं यत्नेनापि महामुने!

ऋक्षशृङ्ग उवाच

पृच्छामि त्वां कथं को वा कुतस्त्वमिह चाऽऽगतः ।
ब्रह्मक्षत्रविशां मध्ये को भवानुत शूद्रजः ॥ ४० ॥

चित्रसेन उवाच

नाहं शूद्रोऽस्मि भोस्तात! न वैश्यो ब्राह्मणो न वा ।
न चान्त्यजोऽस्मि विप्रेन्द्र! क्षत्रियोऽस्मि महामुने !॥ ४१ ॥

धर्मज्ञश्च कृतज्ञश्च सर्वसत्त्वहिते रतः । अकामात्पातकंजातं कथंशुद्धिर्भविष्यति ॥

ऋक्षशृङ्ग उवाच

मांगृहीत्वाऽऽश्रमंगच्छयत्रतौपितरौमम । आवेदयस्वचात्मानंपुत्रघातिनमातुरम्
तेदृष्ट्वामांकरिष्यन्तिकारुण्यंचतवोपरि । उपायंकथयिष्यन्तियेनशान्तिर्भविष्यति
तस्य तद्वचनं श्रुत्वा चित्रसेनो नृपोत्तम !।
स्कन्धे कृत्वा तु तं विप्रं जगामाऽऽश्रमसन्निधौ ॥ ४५ ॥
न शक्नोति यदा वोढुं विश्राम्यति पुनः पुनः ।
तावत्पश्यति तं विप्रं मूर्च्छितं विकलेन्द्रियम् ॥ ४६ ॥
मुमोच चित्रसेनस्तं छायायां वटभूरुहः । वस्त्रंचतुर्गुणं कृत्वा चक्रे वातं मुहुर्मुहुः
पश्यतस्तस्यराजेन्द्रऋक्षशृङ्गोमहातपाः । पञ्चत्वमगमच्छीघ्रं ध्यानयोगेनयोगवित्
दाहयामास तं विप्रं विधिदृष्टेन कर्मणा । स्नानंकृत्वासशोकार्त्तो विललापमुहुर्मुहुः
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शूलभेदमाहात्म्ये ऋक्षशृङ्गस्वर्गगमनवर्णनं नाम
त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशत्तमोऽध्यायः

दीर्घतपसःस्वर्गारोहणवर्णनम्

ईश्वर उवाच

ततश्चानन्तरं राजाजगामोद्वेगमुत्तमम् । कथं यामि गृहं त्वद्य वाराणस्यामहंपुनः
ब्रह्महत्यासमाविष्टो जुहोम्यग्नौ कलेवरम् ।
अथवा तस्य वाक्येन तं गच्छाम्याश्रमम्प्रति ॥ २ ॥
कथयामियथावृत्तंगत्वातस्यमहामुनेः । एवंसञ्चिन्त्यराजासौजगामाश्रमसन्निधौ

ऋक्षश्रृङ्गस्य चास्थीनि गृहीत्वा स नृपोत्तमः ।
दृष्टिमार्गे स्थितस्तस्य महर्षेर्भावितात्मनः ॥ ४ ॥

दीर्घतपा उवाच

आगच्छस्वागतंतेऽस्तुआसनेऽत्रोपविश्यताम् । अर्घंददाम्यहंयेनमधुपर्कंसविष्टरम्

चित्रसेन उवाच

अर्घस्यास्य न योग्योऽहं महर्षे ! नाऽस्मि भाषणे ।
मृगमध्यस्थितो विप्रस्तव पुत्रो मया हतः ॥ ६ ॥
पुत्रघ्नंविद्धिमांविप्र तीव्रदण्डेन दण्डय । मृगभ्रान्त्याहतोविप्रऋक्षश्रृङ्गोमहातपाः
इति मत्वामुनिश्रेष्ठकुरुमेत्वं यथोचितम् । मातातद्वचनंश्रुत्वागृहान्निष्क्रम्यविह्वला
हा हताऽस्मीत्युवाचेदं पपात धरणीतले ।
विललाप सुदुःखार्ता पुत्रशोकेन पीडिता ॥ ९ ॥
हा हता पुत्रपुत्रेति करुणं कुररीयथा । विललापाऽतुरामाता क्वगतोमांविहायवै
मुखं दर्शय चात्मीयं मातरं मां हि मानय ॥ १० ॥
श्रुताध्ययनसम्पन्नं जपहोमपरायणम् ।
आगतं त्वां गृहद्वारे कदा द्रक्ष्यामि पुत्रक !॥ ११ ॥
लोकोक्त्या श्रूयतेचैतच्चन्दनं किलशीतलम् । पुत्रगात्रपरिष्वङ्गश्चन्दनादपिशीतलः
किं चन्दनेन पीयूषबिन्दुना किं किमिन्दुना ॥ १३ ॥
पुत्रगात्रपरिष्वङ्गपात्रं गात्रं भवेद्यदि । ॥ १४ ॥
परिष्वजितुमिच्छामि त्वामहं पुत्र सुप्रिय !।
पञ्चत्वमनुयास्यामि त्वद्विहीनाद्य दुःखिता ॥ १५ ॥
एवंविलपतीदीना पुत्रशोकेनपीडिता । मूर्च्छिता विह्वला दीना निपपात महीतले
भार्यांच पतितांदृष्ट्वा पुत्रशोकेनपीडिताम् । चुकोपसमुनिस्तत्र चित्रसेनाय भूभृते

दीर्घतपा उवाच

याहि याहि महापाप! मा मुखं दर्शयस्व मे ।

किं त्वया घातितो विप्रो ह्यकामाच्च सुतो मम ॥ १८ ॥
ब्रह्महत्या भविष्यन्तिबह्वयस्तेवसुधाधिप !। सकुटुम्बस्यमेत्वंहिमृत्युरेषउपस्थितः
एवमुक्त्वाततोविप्रोविचिन्त्यच पुनःपुनः । परित्यज्यतदाक्रोधंमुनिर्भावाज्जगादह

दीर्घतपा उवाच

उद्वेगंत्यजभो वत्स!दुरुक्तं गदितो मया । पुत्रशोकाभिभूतेन दुःखतप्तेन मानद
किं करोति नरः प्राज्ञः प्रेर्यमाणः स्वकर्मभिः ।
प्रागेव हि मनुष्याणां बुद्धिः कर्मानुसारिणी ॥ २२ ॥
अनेनैव विधानेन पञ्चत्वं विहितं मम । हत्यास्तव भविष्यन्ति पूर्वमुक्ता न संशयः
ब्रह्मक्षत्रविशां मध्येशूद्रचण्डालजातिषु । कस्त्वं कथयसत्यंमेकस्माच्चनिहतोद्विजः

चित्रसेन उवाच

विज्ञापयामि विप्रर्षे! क्षन्तव्यं ते ममोपरि ।
नाऽहं विप्रोऽस्मि वै तात ! न वैश्यो न च शूद्रजः ॥ २५ ॥
न व्याधश्चान्त्यजातो वा क्षत्रियोऽहं महामुने !।
काशीराजो मृगान्हन्तुमागतो वनमुत्तमम् ॥ २६ ॥
भ्रान्त्यानिपातितोह्येषमृगरूपधरोमुनिः । इदानींतवपादान्तेसंश्रितःपातकान्वितः
किं कर्त्तव्यं मया विप्र! उपायं कथयस्व मे ॥ २८ ॥

दीर्घतपा उवाच

ब्रह्महत्या न शक्येताप्येका निस्तरितुं प्रभो !।
दशैका च कथं शक्यास्ताः शृणुष्व नरेश्वर !॥ २९ ॥
चत्वारो मे सुताराजन्सभार्यामातृपूर्वकाः । मयासहनजीवन्तिऋक्षश्रृङ्गस्यकारणे
उपायं शोभनंतातकथयिष्येशृणुष्वतम् । शक्नोषि यदि तंकर्तुं सुखोपायं नरेश्वर
सकुटुम्बं समस्तं मां दाहयित्वाऽनलेनृप । अस्थीनिनर्मदातोये शूलभेदेविनिक्षिप
नर्मदादक्षिणे कूले शूलभेदं हि विश्रुतम् । सर्वपापहरं तीर्थं सर्वदुःखघ्नमुत्तमम् ॥
शुचिर्भूत्वा ममाऽस्थीनि तत्र तीर्थे विनिक्षिप ।

मोक्ष्यसे सर्वपापैस्त्वं मम वाक्यान्न संशयः ॥ ३४ ॥

राजोवाच

आदेशो दीयतां तात करिष्यामि न संशयः ।
समस्तं मेऽस्ति यत्किञ्चिद्राज्यं कोशः सुहृत्सुताः ॥ ३५ ॥
तवाधीनं महाविप्र! प्रयच्छामि प्रसीद मे । परस्परंविवदतोर्विप्रराज्ञोस्तदा नृप
स्फुटित्वा हृदयं शीघ्रं मुनिभार्यामृता तदा ।
पुत्रशोकसमाविष्टा निर्जीवा पतिता क्षितौ ॥ ३७ ॥
पुत्राश्चमातृशोकेनसर्वेपञ्चत्वमागताः । स्नुषाश्चैवतदा सर्वामृताश्च सह भर्तृभिः
पञ्चत्वं च गताःसर्वेमुनिमुख्यान्नृपोत्तम !। विप्रानाह्वापयामासयेतत्राश्रमवासिनः
तेभ्यो निवेदयामास यथावृत्तं नृपोत्तमः ।
स तैस्तदाऽभ्यनुज्ञातः काष्ठान्यादाय यत्नतः ॥ ४० ॥
दाहं सञ्चयनंचक्रे चित्रसेनोमहीपतिः । ऋक्षशृङ्गादिसर्वेषांगृहीत्वाऽस्थीनियत्नतः
याम्याशां प्रस्थितो राजा पादचारी महीपते !।
न शक्नोति यदा गन्तुं छायामाश्रित्य तिष्ठति ॥ ४२ ॥
विश्रम्य च पुनर्गच्छेद्भाराक्रान्तो महीपतिः ।
सचैलं कुरुते स्नानं मुक्त्वाऽस्थीनि पदे पदे ॥ ४३ ॥
पिबेज्जलं निराहारः सगच्छन्दक्षिणामुखः । अचिरेणैवकालेन सङ्गतो नर्मदातटम्
आश्रमस्थान्द्विजान्दृष्ट्वा पप्रच्छ पृथिवीपतिः ॥ ४५ ॥

चित्रसेन उवाच

कथ्यतां शूलभेदस्य मार्गं मे द्विजसत्तमाः !।
येन यामि महाभागा स्वकार्यार्थस्य सिद्धये ॥ ४६ ॥

मुनय ऊचुः

इतःक्रोशान्तरादर्वाक्तीर्थंपरमशोभनम् । नर्मदादक्षिणेकूले ततोद्रक्ष्यसिनाऽन्यथा
ऋषिवाक्येन राजाऽसौ शीघ्रंगत्वानरेश्वरः । सददर्शततःशीघ्रं बहुद्विजसमाकुलम्

बहुद्रुमलताकीर्णं बहुपुष्पोपशोभितम् । ऋक्षसिंहसमाकीर्णं नानाव्रतधरैः शुभैः
एकपादास्थिताःकेचिदपरे सूर्यदृष्टयः ।
एकाङ्गुष्ठस्थिताः केचिदूर्ध्वबाहुस्थिताः परे ॥ ५० ॥
दिनैकभोजनाः केचित्केचित्कन्दफलासनाः ।
त्रिरात्रभोजनाः केचित्पराकव्रतिनोऽपरे ॥ ५१ ॥
चान्द्रायणरताः केचित्केचित्पक्षोपवासिनः ।
मासोपवासिनः केचित्केचिदृत्वन्तपारणाः ॥ ५२ ॥
योगाभ्यासरताः केचित्केचिद्ध्यायन्ति तत्पदम् ।
शीर्णपर्णाशिनःकेचित्केचिच्च कटुकाशनाः ॥ ५३ ॥
शैवालभोजनाःकेचित्केचिन्मारुतभोजनाः ।
गार्हस्थ्ये च स्थिताःकेचित्केचिच्चैवाऽग्निहोत्रिणः ॥ ५४ ॥
एवंविधान्द्विजान्दृष्ट्वाजानुभ्यामवनिं गतः । प्रणम्यशिरसाराजन्राजावचनमब्रवीत्

चित्रसेन उवाच

कस्मिन्देशे च तत्तीर्थं सत्यं कथयत द्विजाः !।
येनाभिवाञ्छिता सिद्धिः सफला मे भविष्यति ॥ ५६ ॥

ऋषय ऊचुः

धन्वन्तरशतंगच्छ भृगुतुङ्गस्यमूर्द्धनि । कुण्डंद्रक्ष्यसितत्पूर्णंविस्तीर्णंपयसाशिवम्
तेषां तद्वचनंश्रुत्वागतःकुण्डस्यसन्निधौ । दृष्ट्वाचैवतुतत्तीर्थं भ्रान्तिर्जातानृपस्य वै
ततोविस्मयमापन्नश्चिन्तयन्वैमुहुर्मुहुः । आकाशस्थंददर्शाऽसौ सामिषं कुररं नृप
भ्रममाणंगृहीताहिंवध्यमानं निरामिषैः । परस्परंचयुयुधुःसर्वेऽप्यामिषकाङ्क्षया
हतश्चञ्चुप्रहारेण स ततः पतितोऽम्भसि । शूलेनशूलिनायत्र भूभागो भेदितः पुरा
तत्तीर्थस्य प्रभावेण स सद्यः पुरुषोऽभवत् ।
विमानस्थं ददर्शाऽसौ पुमांसं दिव्यरूपिणम् ॥ ६२ ॥
गन्धर्वाऽप्सरसोयक्षास्तंयान्तं तुष्टुवुर्दिवि । अप्सरोगीयमानेतु गतेसूर्यस्य मूर्द्धनि

चित्रसेनस्ततस्तस्मिन्नाश्चर्यं परमं गतः। ऋषिणा कथितंयद्वत्तद्वत्तीर्थं न संशयः।

हृष्टरोमाऽभवद्दृष्ट्वा प्रभावं तीर्थसम्भवम् ॥ ६४ ॥

ममाऽद्य दिवसो धन्यो यस्मादत्र समागतः।

अस्थीनि भूमौ निक्षिप्य स्नानं कृत्वा यथाविधि ॥ ६५ ॥

तिलमिश्रेणतोयेनातर्पयत्पितृदेवता। गृह्यास्थीनि ततोराजाचिक्षेपाऽन्तर्जलेतदा

क्षणमेकं ततो वीक्ष्य राजोद्ध्र्ववदनः स्थितः।

तान्ददर्श पुनः सर्वान्दिव्यरूपधराञ्छुभान् ॥ ६७ ॥

दिव्यवस्त्रैश्चसम्वीतान्दिव्याभरणभूषितान्।

विमानैर्विविधैर्दिव्यैरप्सरोगणसेवितैः ॥ ६८ ॥

पृथग्भूतांश्च तान्सर्वान्विमानेषु व्यवस्थितान्।

उत्पत्तिवत्समालोक्य राजा संहर्षितोऽभवत् ॥ ६९ ॥

ऋषिर्विमानमारूढश्चित्रसेनमथाब्रवीत्। भो भोः साधोमहाराजचित्रसेन महीपते

त्वत्प्रसादान्नृपश्रेष्ठ गतिर्द्दिव्या ममेदृशी। जातेयंयत्त्वया कार्यं कृतं परमशोभनम्

स्वसुतोऽपि न शक्नोति पितृणां कर्त्तुमीदृशम्।

मदीयवचनात्तात निष्पापस्त्वं भविष्यसि ॥ ७२ ॥

फलं प्राप्स्यसि राजेन्द्र! कामिकं मनसेप्सितम्।

आशीर्वादांस्ततो दत्त्वा चित्रसेनाय धीमते ॥ ७३ ॥

स्वर्गं जगाम ससुतस्ततो दीर्घतपा मुनिः।

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां पञ्चमेऽवन्तीखण्डे रेवाखण्डे दीर्घतपसःस्वर्गारोहणवर्णनंनाम चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशत्तमोऽध्यायः

काशीराजमोक्षवर्णनम्

उत्तानपाद उवाच

माहात्म्यं तीर्थगंदृष्ट्वाचित्रसेनोनरेश्वरः। किंचकारक्रवा वासं किमाहारो बभूवह

ईश्वर उवाच

भृगुतुङ्गं समारुह्य ऐशानीं दिशमाश्रितः। तपश्चचारविपुलं कुण्डे तत्र नृपोत्तमः

सर्वान्देवान्हृदि ध्यात्वा ब्रह्मविष्णुमहेश्वरान्।

विचिक्षेप यदात्मानं प्रत्यक्षौ रुद्रकेशवौ।

करे गृहीत्वा राजानं रुद्रो वचनमब्रवीत् ॥ ३ ॥

ईश्वर उवाच

प्राणत्यागं महाराज! मा काले त्वं कृथा वृथा।

अद्याप्यसि युवा त्वं वै न युक्तं मरणं तव ॥ ४ ॥

स्वस्थानं गच्छ शीघ्रं त्वं भुक्त्वा भोगान्यथेप्सितान्।

कुरु निष्कण्टकं राज्यं नाके शक्र इवापरः ॥ ५ ॥

चित्रसेन उवाच

न राज्यं कामये देव! न पुत्रान्न च बान्धवान्।

न भार्यां न च कोशं च न गजान्न तुरङ्गमान् ॥ ६ ॥

मुञ्चमुञ्च महादेव मा विघ्नःक्रियतां मम। स्वर्गप्राप्तिर्ममाऽद्यैवत्वत्प्रसादान्महेश्वर

ईश्वर उवाच

यस्याऽग्रतो भवेद्ब्रह्मा विष्णुःशम्भुस्तथैव च।

स्वर्गेण तस्य किं कार्यं स गतः किं करिष्यसि ॥ ८ ॥

तुष्टावयंत्रयोदेवा वृणीष्व वरमुत्तमम्। यथेप्सितं महाराज सत्यमेतदसंशयम् ॥

चित्रसेन उवाच

यदि तुष्टास्त्रयोदेवा ब्रह्मविष्णुमहेश्वराः। अद्यप्रभृतियुष्माभिःस्थातव्यमिहसर्वदा
गयाशिरो यथापुण्यं कृतं युष्माभिरेव च। तथैवेदं प्रकर्त्तव्यं शूलभेदं च पावनम्
यत्रयत्रस्थिता यूयं तत्रतत्रवसाम्यहम्। गणानां चैवसर्वेषामाधिपत्यमथाऽस्तुमे

ईश्वर उवाच

अद्यप्रभृति तिष्ठामः शूलभेदे नरेश्वर। त्रिकालं हि त्रयोदेवाः कलांशेन वसामहे॥

नन्दिसञ्ज्ञो गणाधीशो भविष्यति भवान्ध्रुवम्।
मत्समीपे तु भवत आदौ पूजा भविष्यति॥ १४॥
प्रक्षिप्य तानि चास्थीनि यत्र दीर्घतपा ययौ।
सकुटुम्बो विमानस्थः स्वर्गतस्त्वं तथा कुरु॥ १५॥
एवं देवा वरं दत्त्वा चित्रसेनाय पार्थिव!।
कुण्डमूर्द्धनि याम्यायां त्रयो देवास्तदा स्थिताः॥ १६॥

परस्परं वदन्त्येवं पुण्यतीर्थमिदं परम्। यथाहि गयाशिरः पुण्यं पूर्वमेव पठ्यते॥

तथा रेवातटे पुण्यं शूलभेदं न संशयः॥ १७॥

ईश्वर उवाच

इदं तीर्थं तथा पुण्यं यथा पुण्यं गयाशिरः। सकृतिपण्डोदकेनैवनरोनिर्मलतांव्रजेत्

एकं गयाशिरोमुक्त्वा सर्वतीर्थानि भूपते!।
शूलभेदस्य तीर्थस्य कलां नार्हन्ति षोडशीम्॥ १६॥

कुण्डमुदीच्यांयाम्यायांदशहस्तप्रमाणतः। रौद्रवारुणकाष्ठायांप्रमाणंचैकविंशति
एतत्प्रमाणं तत्तीर्थं पिण्डदानादि कर्मसु। नाधर्मनिरता दातुं लभन्ते दानमत्र हि
विष्णुस्तु पितृरूपेण ब्रह्मरूपीपितामहः। प्रपितामहोरुद्रोऽभूदेवंत्रिपुरुषाःस्थिताः

कदा पश्यति तीर्थं वै कदा नस्तारयिष्यति।
इति प्रतीक्षां कुर्वन्ति पुत्राणां सततं नृप!।
शूलभेदे नरः स्नात्वा दृष्ट्वा शूलधरं सकृत्॥ २३॥

नापुत्रो नाधनो रोगी सप्तजन्मसुजायते। एकविंशतिपितुःपक्षेमातुश्चैवैकविंशतिम्
भार्यापक्षे दशैवेह कुलान्येतानि तारयेत्। शूलभेदवनेराजञ्छाकमूलफलैरपि॥

एकस्मिन्भोजिते विप्रे कोटिर्भवतिभोजिता।
पञ्चस्थानेषु यः श्राद्धं कुरुते भक्तिमान्नरः॥ २६॥

कुलानिप्रेतभूतानि सर्वाण्यपि हि तारयेत्। द्विजदेवप्रसादेन पितॄणांच प्रसादतः
श्राद्धदो निवसेत्तत्र यत्रदेवो महेश्वरः। स्युरात्मघातिनोयेच गोब्राह्मणहनाश्च ये

दंष्ट्रिभिर्जलपाते च विद्युत्पातेषु ये मृताः।
न येषामग्निसंस्कारो नाशौचं नोदकक्रिया॥ २६॥

तत्र तीर्थे तु यस्तेषां श्राद्धंकुर्वीत भक्तितः। मोक्षावाप्तिर्भवेत्तेषांयुगमेकंन संशयः
अज्ञानाद्यत्कृतं पापं बालभावाच्च यत्कृतम्। तत्सर्वंनाशयेत्पापंस्नानमात्रेण भूपते
रजकेन यथा धौतं वस्त्रं भवतिनिर्मलम्। तथापापोऽपितत्तीर्थेस्नातोभवतिनिर्मलः

संन्यासं कुरुते योऽत्र तीर्थे विधिसमन्वितम्।
ध्यायन्नित्यं महादेवं स गच्छेत्परमं पदम्॥ ३३॥
क्रीडित्वा स यथाकामं स्वेच्छया शिवमन्दिरे।
वेदवेदाङ्गतत्त्वज्ञो जायतेऽसौ शुभे कुले॥ ३४॥
रूपवान्सुभगश्चैव सर्वव्याधिविवर्जितः।
राजा वा राजपुत्रो वा धर्माचारसमन्वितः॥ ३५॥
एतत्ते कथितं राजंस्तीर्थस्य फलमुत्तमम्।
यच्छ्रुत्वा मानवो नित्यं मुच्यते सर्वकिल्बिषैः॥ ३६॥

य इदंश्रावयेन्नित्यमाख्यानं द्विजपुङ्गवान्। श्राद्धेदेवकुलेवाऽपि पठेत्पर्वणि पर्वणि

गीर्वाणास्तस्य तुष्यन्ति मनुष्याः पितृभिः सह।
पठतां शृण्वतां चैव नश्यते सर्वपातकम्॥ ३८॥
लिखित्वा तीर्थमाहात्म्यं ब्राह्मणेभ्यो ददाति यः।
जातिस्मरत्वं लभते प्राप्नोत्यभिमतं फलम्॥ ३६॥

रुद्रलोके वसेत्तावद्यावदक्षरमन्वितम् ॥ ४० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेरेवाखण्डे शूलभेदमाहात्म्ये काशीराजमोक्षगमनवर्णनंनाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशत्तमोऽध्यायः

सगङ्गावतरणव्याधवाक्योपदेशकथनपूर्वकंदानादिफलवर्णनम्

उत्तानपाद उवाच

अन्यच्च श्रोतुमिच्छामि केन गङ्गाऽवतारिता ।
रुद्रशीर्षे स्थिता देवी पुण्या कथमिहाऽऽगता ॥ १ ॥
पुण्यादेवशिलानाम तस्यामाहात्म्यमुत्तमम् । एतदाख्याहिमेसर्वंप्रसन्नोयदिशङ्कर

ईश्वर उवाच

शृणुष्वैकमना भूत्वा यथागङ्गाऽवतारिता । देवैःसर्वैर्महाभागासर्वलोकहितायवै
अस्ति विन्ध्यो नगोनाम याम्याशायां महीपते !।
गीर्वाणास्तु गताः सर्वे तस्य मूर्ध्नि नरेश्वर !॥ ४ ॥
तत्रचाह्वानितागङ्गा ब्रह्माद्यैरखिलैःसुरैः । अभ्यर्च्येशं जगन्नाथं देवदेवं जगद्गुरुम्
जटामध्यस्थितां गङ्गां मोचयस्वेति भूतले ।
भास्वन्ती सा ततो मुक्ता रुद्रेण शिरसा भुवि ॥ ६ ॥
तत्र स्थाने महापुण्या देवैरुत्पादिता स्वयम् ।
ततो देवनदी जाता सा हिताय नृणां भुवि ॥ ७ ॥
वसन्ति ये तटे तस्याः स्नानं कुर्वन्ति भक्तितः ।
पिबन्ति च जलं नित्यं न ते यान्ति यमालयम् ॥ ८ ॥
यत्र सा पतिता कुण्डे शूलभेदे नराधिप !।

देवनद्याः प्रतीच्यां तु तत्र प्राची सरस्वती ॥ ९ ॥
याम्यायां शूलभेदस्य तत्रतीर्थमनुत्तमम् । तत्रदेवशिलापुण्यास्वयं देवेन निर्मिता
तत्र स्नात्वा तु यो भक्त्या तर्पयेत्पितृदेवताः ।
पितरस्तस्यतृप्यन्ति यावदाभूतसम्प्लवम् ॥ ११ ॥
तत्रस्नात्वा तु योभक्त्या ब्राह्मणान्भोजयेन्नृप ।
स्वल्पान्नेनापि दत्तेन तस्य चाऽन्तो न विद्यते ॥ १२ ॥

उत्तानपाद उवाच

कानि दानानि दत्तानि शस्तानि धरणीतले ।
यानि दत्त्वा नरो भक्त्या मुच्यते सर्वपातकैः ॥ १३ ॥
देवशिलाया माहात्म्यंस्नानदानादिजंफलम् । व्रतोपवासनियमैर्यत्प्राप्यंतद्वदस्वमे

ईश्वर उवाच

आसीत्पुरामहावीर्यश्चेदिनाथोमहाबलः । वीरसेनइतिख्यातोमण्डलाधिपतिर्नृप
राष्ट्रे तस्यरिपुर्नास्तिनव्याधिर्नचतस्कराः । न चाधर्मोऽभवत्तत्रधर्म एवहिसर्वदा
सदा मुदान्वितो राजा सभार्यो बहुपुत्रकः ।
एकासीद् दुहिता तस्य सुरूपा गिरिजा यथा ॥ १७ ॥
दृष्टा सा पितृमातृभ्यां बन्धुवर्गजनस्य च । कृतंवैवाहिकंकर्मकालेप्राप्तेयथाविधि
अनन्तरं चेदिपतिर्द्वादशाब्दमखेस्थितः । ततस्तस्यास्तु योभर्त्तासमृत्युवशमागतः
विधवां तां सुतां दृष्ट्वा राजा शोकसमन्वितः ।
उवाच वचनं तत्र स्वभार्यां दुःखपीडिताम् ॥ २० ॥
प्रिये दुःखमिदं जातं यावज्जीवं सुदुःसहम् । नैषारक्षयितुं शक्या रूपयौवनगर्विता
दूषयेतकुलंकाऽपिकथंरक्ष्याहिबालिका । नोपायोविद्यतेकाऽपिभानुमत्याश्चरक्षणे
परस्परं विवदतोः श्रुत्वा तत्कन्यकाऽब्रवीत् ॥ २२ ॥

भानुमत्युवाच

न लज्जामि तवाग्रेऽहं जल्पन्ती तात ! कर्हिचित् ।

सत्यं नोत्पद्यते दोषो मदर्थे ते नराधिप !॥ २३ ॥

अद्यप्रभृत्यहं तात! धारयिष्ये न मूर्द्धजान् । स्थूलवस्त्रपटार्द्धंतुधारयिष्यामिते गृहे

करिष्यामि व्रतान्याशु पुराणविहितानि च ।

आत्मानं शोषयिष्यामि तोषयिष्ये जनार्दनम् ॥ २५ ॥

ममैषा वर्तते बुद्धिर्यदित्वंतातमन्यसे । भानुमत्यावचःश्रुत्वा राजासंहर्षितोऽभवत्

तीर्थयात्रां समुद्दिश्य कोशं दत्त्वा सुपुष्कलम् ।

विसृज्य पुरुषान्वृद्धान्कृत्वा तस्याः सुरक्षणे ॥ २७ ॥

पुरुषान्सायुधांश्चापि ब्राह्मणान् स पुरोहितान् ।

दासीदासान्पदातींश्च चास्याःसंरक्षणक्षमान् ॥ २८ ॥

ततःपितुर्मतेनैव गङ्गातीरंगतासती । अवगाह्य तटे द्वे तु गङ्गायाः स नराधिप !॥

नित्यं सम्पूज्य सद्विप्रान्गन्धमालयादिभूषणैः ।

द्वादशाब्दानि सा तीरे गङ्गायां समवस्थिता ॥ ३० ॥

त्यक्त्वा गङ्गां तदा राज्ञी गता काष्ठां तु दक्षिणाम् ।

प्राप्ता सा सचिवैः सार्द्धं यत्र रेवा महानदी ॥ ३१ ॥

समाःपञ्च स्थितातत्रॐकारेऽमरकण्टके । उदग्याम्येषुतीर्थेषुतीर्थात्तीर्थंजगामसा

स्नात्वा स्नात्वाऽऽपूज्यविप्रान्भक्तिपूर्वमतन्द्रिता ।

वारुणीं सा दिशं गत्वा देवनद्याश्च सङ्गमे ॥ ३३ ॥

ददर्शचाश्रमंपुण्यं मुनिसङ्घैः समाकुलम् । दृष्ट्वा मुनिसमूहं सा प्रणिपत्येदमब्रवीत्

माहात्म्यमस्य तीर्थस्य नाम चैवाऽस्य कीदृशम् ।

कथयन्तु महाभागाः! प्रसादः क्रियतां मम ॥ ३५ ॥

ऋषय ऊचुः

चक्रतीर्थं तु विख्यातं चक्रं दत्तं पुरा हरेः । महेश्वरेण तुष्टेन देवदेवेन शूलिना ॥

अत्रतीर्थेतुयःस्नात्वातर्पयेत्पितृदेवताः । अनिवर्त्तिकागतिस्तस्यजायतेनात्रसंशयः

द्वितीयेऽह्नितततोगच्छेच्छूलभेदेतपस्विनि !। पूर्वोक्तेनविधानेनस्नानंकुर्याद्यथाविधि

जन्मत्रयकृतैः पापैर्मुच्यते नात्र संशयः । जलेन तिलमात्रेण प्रदद्यादञ्जलित्रयम् ॥

तृप्यन्ति पितरस्तस्य द्वादशाब्दान्यसंशयम् ।

यः श्राद्धं कुरुते भक्त्या श्रोत्रियैर्ब्राह्मणैर्नृप ॥ ४० ॥

वार्धुष्याद्यास्तु वर्ज्यन्ते पितृणां दत्तमक्षयम् ।

अपरेऽह्नि ततोगच्छेत्पुण्यां देवशिलां शुभाम् ॥ ४१ ॥

वीक्ष्यते जाह्नवीपुण्यादेवैरुत्पादिता पुरा । स्नात्वातत्रजलंदद्यात्तिलमिश्रंनराधिप

सकृत्पिण्डप्रदानेन मुच्यते ब्रह्महत्यया ।

एकादश्यामुपोषित्वा पक्षयोरुभयोरपि ॥ ४३ ॥

क्षपाजागरणं कुर्यात्पठेत्पौराणिकींकथाम् । विष्णुपूजां प्रकुर्वीतपुष्पधूपनिवेदनैः

प्रभाते भोजयेद्विप्रान्दानं दद्यात्स्वशक्तितः ।

चतुर्थेऽह्नि ततो गच्छेद्यत्र प्राची सरस्वती ॥ ४५ ॥

ब्रह्मदेहाद् विनिष्क्रान्ता पावनार्थं शरीरिणाम् ।

तत्र स्नात्वा नरो भक्त्या तर्पयेत्पितृदेवताः ॥ ४६

श्राद्धं कृत्वा यथान्यायमनिन्द्यान्भोजयेद् द्विजान् ।

पितरस्तस्य तृप्यन्ति द्वादशाब्दान्यसंशयम् ॥ ४७ ॥

सर्वदेवमयं स्थानं सर्वतीर्थमयं तथा । देवकोटिसमाकीर्णं कोटिलिङ्गोत्तमोत्तमम्

त्रिरात्रं कुरुते योऽत्र शुचिः स्नात्वा जितेन्द्रियः ।

पक्षं मासं च षण्मासमब्दमेकं कदाचन ॥ ४६

न तस्य सम्भवो मर्त्ये तस्य वासो भवेद्दिवि ।

नियमस्थो विमुच्येत त्रिजन्मजनितादघात् ॥ ५० ॥

विनापुंसातुयानारी द्वादशाब्दं शुचिव्रता । तिष्ठतेसाऽक्षयंकालं रुद्रलोकेमहीयते

मुनीनां वचनं श्रुत्वा मुदा परमया ययौ । ततोऽवगाह्य तत्तीर्थमहर्निशमतन्द्रिता

दृष्ट्वा तीर्थप्रभावं तु पुनर्वचनमब्रवीत् । श्रूयतां वचनं मेऽद्य ब्राह्मणाः सपुरोहिताः

न त्यजामीदृशं स्थानं यावज्जीवमहर्निशम् ।

मत्पितुश्च तथा मातुः कथयध्वमिदं वचः ॥ ५४ ॥
त्वत्कन्या शूलभेदस्था नियता व्रतचारिणी ।
एवमुक्त्वा स्थिता सा तु तत्र भानुमती नृप !॥ ५५ ॥
एकान्तरोपवासस्था शनैर्मासोपवासिता
देवशिलास्थिता नित्यं दध्यौ सा चक्रपाणिनम् ॥ ५६ ॥
अहर्निशं दहेद् धूपं चन्दनश्च सदीपकम् ।
पादशौचं स्वयं कृत्वा स्वयं भोजयते द्विजान् ॥
द्वादशाब्दानि सा राज्ञी सुव्रता तत्र संस्थिता ॥ ५७ ॥

ईश्वर उवाच

अन्यद्देवशिलायास्तु माहात्म्यंश्रृणुभूपते । कथयामिमहाबाहोसेतिहासंपुरातनम्
कश्चिद्वनेचरोव्याधः शबरः सह भार्यया । दुर्भिक्षपीडितस्तत्र आमिषार्थं वनंगतः
नापश्यत्पक्षिणस्तत्र न मृगान्न फलानि च ।
सरस्ततो ददर्शाऽथ पद्मिनीखण्डमण्डितम् ॥ ६० ॥
दृष्ट्वा सरोवरं तत्र शबरी वाक्यमब्रवीत् ।
कुमुदानि गृहाण त्वं दिव्यान्याहारसिद्धये ॥ ६१ ॥
देवस्य पूजनार्थं तु शूलभेदस्य यत्नतः । विक्रयो भवितातत्र धर्मशीलो जनो यतः
भार्याया वचनं श्रुत्वा जग्राह कुमुदानिसः । उत्तीर्णस्तुतटे यावद्दृष्ट्वाश्रीवृक्षमग्रतः
श्रीफलानिगृहीत्वा तु सुपक्वानिविशेषतः । शूलभेदं स सम्प्राप्तोददर्श सुबहूञ्जनान्
चैत्रमासेसितेपक्षेएकादश्यांनराधिप । तस्मिन्नहनिनाश्चीयुर्बालावृद्धास्तथास्त्रियः
मण्डपं ददृशे तत्रकृतं देवशिलोपरि । वस्त्रैः सम्वेष्टितंदिव्यं स्रङ्माल्यैरुपशोभितम्
ऋषयश्चाऽऽगतास्तत्र ये चाऽऽश्रमनिवासिनः ।
सोपवासाः सनियमाः सर्वे साग्निपरिग्रहाः ॥ ६७ ॥
देवनद्यास्तटेरम्ये मुनिसङ्घैः समाकुले । आगच्छद्भिर्नृपश्रेष्ठ मार्गस्तत्र न लभ्यते
दृष्ट्वाजनपदंतत्रतांभार्यां शबरोऽब्रवीत् । गच्छपृच्छस्व कमपिकिमद्यस्नानकारणम्

पर्वाणि यानि श्रूयन्ते किंस्वित्सूर्येन्दुसम्प्लवः ।
अयनं किं भवेदद्य किं वाऽक्षयतृतीयका ॥ ७० ॥
ततः स्वभर्तुर्वचनाच्छबरी प्रस्थितातदा । पप्रच्छनारींदृष्ट्वाऽग्रेदत्त्वाग्रे कमले शुभे
तिथिरद्यैव का प्रोक्ता किं पर्व कथयस्व मे ।
किमयं स्नाति लोकोऽयं किं वा स्नानस्य कारणम् ॥ ७२ ॥

नार्युवाच

अद्य चैकादशीपुण्या सर्वपापक्षयङ्करी । उपोषिता सकृद्येन नाकप्राप्तिं करोतिसा
तस्यास्तद्वचनं श्रुत्वाशबरी शबराय वै । कथयामासचाव्यग्रास्त्रीवाक्यं नृपसत्तम
अद्य त्वेकादशीपुण्या बालवृद्धैरुपोषिता । मदनैकादशीनाम सर्वपापक्षयङ्करी ॥
नियता श्रूयते तत्र राजपुत्री सुशोभना ।
व्रतस्था नियताहारा नाम्ना भानुमती सती ॥ ७६ ॥
नैतया सदृशी काचित्त्रिषु लोकेषु विश्रुता ।
दृश्यते सा वरारोहा ह्यवतीर्णा महीतले ॥ ७७ ॥
भार्याया वचनं श्रुत्वा शबरस्तां जगाद ह ।
कमलानि यथालाभं दत्त्वा भुङ्क्ष्व हि सत्वरम् ॥ ७८ ॥
ममैगावर्त्ततेबुद्धिर्नभोक्तव्यंमयाध्रुवम् । न मयोपार्जितंभद्रे ! पापबुद्ध्याशुभंकचित्

शबर्युवाच

न पूर्वं तु मया भुक्तं कस्मिंश्चैवतुवासरे । भुक्तशेषंमयाभुक्तंयावत्कालंस्मराम्यहम्
भार्यया निश्चयं ज्ञात्वा स्नानं कर्तुं जगाम ह ।
अर्धोत्तरीयवस्त्रेण स्नानं कृत्वा तु भक्तितः ॥ ८१ ॥
सर्वान्देवान्नमस्कृत्य गतो देवशिलां प्रति ।
तस्थौ स शङ्कमानोऽपि नमस्कृत्य जनार्द्दनम् ॥ ८२ ॥
यस्यास्तु कुमुदे दत्ते तया राज्ञ्यै निवेदितम् ।
तद्दृष्ट्वा पद्मयुगलं तां दासीं सदाऽब्रवीत्तदा ॥ ८३ ॥

कुत्र पद्मद्वयं लब्धं कथ्यतामग्रतो मम । शीघ्रं तत्रैव गत्वाच पद्मानानय पापरान्
धान्येन वसुना वाऽपि कमलानि समानय ।
भानुमत्या वचः श्रुत्वा गता सा शबरं प्रति ॥ ८५ ॥
श्रीफलानि च पुष्पाणि बह्वन्यन्यानि देहि मे ॥ ८६ ॥

शबर्युवाच

श्रीफलानि सपुष्पाणि दास्यामि च विशेषतः ।
न लोभो न स्पृहा मेऽस्ति गत्वा राज्ञीं निवेदय ॥ ८७ ॥
तया च सत्वरं गत्वा यथावृत्तंनिवेदितम् । शबर्युक्तंपुरस्तस्याःसविस्तरपरंवचः
तस्यास्तु वचनं श्रुत्वा राज्ञी तत्र स्वयं गता ।
उवाच शवरीं प्रीत्या देहि पद्मानि मूल्यतः ॥ ८८ ॥

शबर्युवाच

न मूल्यं कामयेदेवि! फलपुष्पसमुद्भवम् । श्रीफलानिचपुष्पाणियथेष्टंमम गृह्यताम्
अर्चां कुरु यथान्यायं वासुदेवे जगत्पतौ ।

राज्युवाच

विना मूल्यं न गृह्णामि कमलानि तवाऽधुना ।
धान्यस्य खारिकामेकां ददामि प्रतिगृह्यताम् ॥ ६१ ॥
दशविंशत्यथत्रिंशच्चत्वारिंशदथाऽपिवा । गृहाण वा खारिशतंदुर्भिक्षांभोधिमुत्तर
वसुरत्नंसुवर्णं च अन्यत्ते यदभीप्सितम् । तत्सर्वंसम्प्रदास्यामिकमलार्थे नसंशयः

शबर्युवाच

नाहारंचिन्तयाम्यद्य मुक्त्वा देवं वरानने । देवकार्यंविनाभद्रे नान्याबुद्धिःप्रवर्त्तते

राज्युवाच

नत्वयाऽन्नंपरित्याज्यंसर्वमन्नेप्रतिष्ठितम् । तस्मात्सर्वप्रयत्नेनममान्नंप्रतिगृह्यताम्
तपस्विनो महाभागा येचाऽरण्यनिवासिनः ।
गृहस्थद्वारि ते सर्वे याचन्तेऽन्नमतन्द्रिताः ॥ ६६ ॥

शबर्युवाच

निषेधश्च कृतः पूर्वं सर्व्वं सत्ये प्रतिष्ठितम् । सत्येनतपते सूर्यःसत्येन ज्वलतेऽनलः
सत्येन तिष्ठत्युदधिर्वायुः सत्येन वाति हि ।
सत्येन पच्यते सस्यं गावः क्षीरं स्रवन्ति च ॥ ६६ ॥
सत्याधारमिदं सर्वं जगत्स्थावरजङ्गमम् ।
तस्मात्सर्वप्रयत्नेन सत्यं सत्येन पालयेत् ॥ १०० ॥
देवकार्यं तु मे मुक्त्वा नाऽन्या बुद्धिः प्रवर्त्तते ।
गृहाण राज्ञि! पुष्पाणि कुरु पूजां गदाभृतः ॥ १०१ ॥
श्रूयते द्विजवाक्यैस्तु न दोषो विद्यते क्वचित् ।
कुशाः शाकं पयो मत्स्या गन्धाः पुष्पाक्षता दधि ॥
मांसं शय्याऽऽसनं धानाः प्रत्याख्येया न वारि च ॥ १०२ ॥

राज्युवाच

आरामोपहृतं पुष्पमारण्यं पुष्पमेव च । क्रीतं प्रतिग्रहे लब्धं पुष्पमेवं चतुर्विधम् ॥
उत्तमं पुष्पमारण्यं गृहीतं स्वयमेव च । मध्यमं फलमारामे त्वधमं क्रीतमेव च ॥
प्रतिग्रहेण यल्लब्धं निष्फलं तद्विदुर्बुधाः ॥ १०४ ॥

पुरोहित उवाच

गृहाणराज्ञि! पुष्पाणिकुरुपूजां गदाभृतः । उपकारःप्रकर्त्तव्योव्यपदेशेन कर्हिचित्

ईश्वर उवाच

श्रीफलानि सपद्मानि दत्तानि शबरेण तु ।
गृहीत्वा तानि राज्ञी सा पूजाञ्चक्रे सुशोभनाम् ॥ १०६ ॥
क्षपाजागरणञ्चक्रेश्रुत्वापौराणिकींकथाम् । शबरस्तुततोभार्यामिदं वचनमब्रवीत्
दीपार्थं गृह्यतां स्नेहो यथालाभेन सुन्दरि !।
कृत्वा दीपं ततस्तौ तु कृत्वा पूजां हरेः शुभाम् ॥ १०८ ॥
चक्रतुर्जागरंरात्रौध्यायन्तो धरणीधरम् । ततः प्रभातसमये दृष्ट्वास्नानोत्सुकं जनम्

स्नाति वै शूलभेदे तु देवनद्यांतथाऽपरे । सरस्वत्यां नराःकेचिन्मार्कण्डस्यह्रदेऽपरे
चक्रतीर्थे गताश्चक्रुः स्नानं केचिद्विधानतः ।
शुचयस्ते जनाः सर्व्वे स्नात्वा देवशिलोपरि ॥ १११ ॥
श्राद्धं चक्रुः प्रयत्नेनश्रद्धयापूतचेतसा । तान्दृष्ट्वा शबरो बिल्वैः पिण्डांश्चक्रेप्रयत्नतः
भानुमत्या तथा भर्त्तुः पिण्डनिर्वपणं कृतम् ।
अनिन्द्या भोजिता विप्रा दम्भवार्धुष्यवर्जिताः ॥ ११३ ॥
हविष्यान्नैस्तथा दध्ना शर्करामधुसर्पिषा । पायसेनतु गव्येन कृतान्नेनविशेषतः॥
भोजयित्वा तथा राज्ञी ददौ दानं यथाविधि ।
पादुकोपानहौ छत्रं शय्यां गोवृषमेव च ॥ ११५ ॥
विविधानि च दानानिहेमरत्नधनानि च । चक्रतीर्थेमहाराजकपिलांयःप्रयच्छति
पृथ्वी तेन भवेद्दत्ता सशैलवनकानना ॥ ११६ ॥

उत्तानपाद उवाच

यानि यानि च दत्तानि शस्तानि जगतीपतेः ।
तानि सर्वाणि देवेश! कथयस्व प्रसादतः ॥ ११७ ॥

ईश्वर उवाच

तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् । भूमिदः स्वर्गमाप्नोति दीर्घमायुर्हिरण्यदः
गृहदो रोगरहितो रूप्यदो रूपवान्भवेत् । वासोदश्चन्द्रसालोक्यमर्कसायुज्यमश्वदः
वृषदस्तु श्रियंपुष्टां गोदाताच त्रिविष्टपम् । यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः
धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्म शाश्वतम् ।
वार्यन्नपृथिवीवासस्तिलकाञ्चनसर्पिषाम् ॥ १२१ ॥
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते । येनयेन हि भावेन यद्यद्दानं प्रयच्छति ॥
तेनतेन सभावेन प्राप्नोतिप्रतिपूजितम् । दृष्ट्वा दानानिसर्वाणिराज्ञीदत्तानियानिच
उवाच शबरो भार्यां यत्तच्छृणु नरेश्वर । पुराणं पठितं भद्रे ब्राह्मणैर्वेदपारगैः ॥
श्रुतश्च तन्मया सर्वं दानधर्मफलं शुभम । पूर्वजन्मार्जितं पापं स्नानदानव्रतादिभिः

शरीरं दुस्त्यजं मुक्त्वा लभते गतिमुत्तमाम् ।
संसारसागराद्भीतः सत्यं भद्रे! वदामि ते ॥ १२६ ॥
अनेकानि च पापानि कृतानि बहुशो मया ।
घातिता जन्तवो भद्रे निर्दग्धाः पर्वताः सदा ॥ १२७ ॥
तेन पापेन दग्धोऽहं दारिद्र्यं न निवर्त्तते ।
तीर्थावगाहनं पूर्वं पापेन न कृतं मया ॥ १२८ ॥
तेनाऽहं दुःखितो भद्रे !दारिद्र्यमनिवर्त्तकम् ।
मातुर्गृहं प्रयाहि त्वं त्यज स्नेहं ममोपरि ॥
नगशृङ्गं समारुह्य मोक्तुमिच्छाम्यहं तनुम् ॥ १२९ ॥

शबर्युवाच

मात्रा पित्रा न मे कार्यं नाऽपि स्वजनबान्धवैः ।
या गतिस्तव जीवेश! सा ममापि भविष्यति ॥ १३० ॥
न स्त्रीणामीदृशो धर्मो विना भर्त्रा स्वजीवितम् ।
श्रूयन्ते बहवो दोषा धर्मशास्त्रेष्वनेकधा ॥ १३१ ॥
पारणं कुरुभोजेन्द्रव्रतंयेननननश्यति । यत्तेऽभिवाञ्छितं किञ्चिद्विष्णवेकर्त्तुमर्हसि
भार्याया वचनं श्रुत्वा मुमुदे शबरस्ततः ।
गृहीत्वा श्रीफलं शीघ्रं होमं कृत्वा यथाविधि ॥ १३३ ॥
सर्वदेवान्नमस्कृत्य भुक्तोऽपि च तया सह ।
चैत्र्यां तु विषुवं ज्ञात्वा तस्थौ तत्र दिनत्रयम् ॥ १३४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे सगङ्गावतरणव्याधवाक्योपदेशकथनपूर्वकंदानादिफलवर्णनं नाम
षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

सप्तपञ्चाशत्तमोऽध्यायः

व्याधस्वर्गगमनवर्णनम्

ईश्वर उवाच

भानुमतीद्विजान्भोज्य बुभुजेभुक्तशेषतः । भुक्त्वा सुसुखमास्थायतदन्नंपरिणाम्यच
त्रयोदश्यां ततो गत्वा मदनाख्यतिथौ तदा ।
मार्कण्डस्य ह्रदे स्नात्वाऽऽनर्च्य देवं गुहाशयम् ॥ २ ॥
कृतोपवासनियमा स्नापयित्वा महेश्वरम् । पञ्चामृतसुगन्धेन धूपदीपनिवेदनैः ॥
आर्चयद्विविधैः पुष्पैर्नैवेद्यैश्च सुशोभितैः ।
क्षपाजागरणं कृत्वा श्रुत्वा पौराणिकीं कथाम् ॥ ४ ॥
नृत्यगीतैस्तथास्तोत्रैर्दध्यौदेवंमहेश्वरम् । अन्नंविस्तारितंसर्वंदेवस्याऽग्रेयथाविधि
चातुर्वर्ण्यसुताः सर्वे भोजिताः सपरिच्छदाः ।
चतुर्दश्यां दिनं यावत्सम्पूज्य वृषभध्वजम् ॥ ६ ॥
शङ्खवादित्रभेरीभिः पटहध्वनिनादितम् । क्षपाजागरणं कृत्वा प्रभूतजनसङ्कुलम्
नृत्यगीतैस्तथा स्तोत्रैः प्रेरिता सा निशा तदा ।
प्रभाते भोजिता विप्राः पायसैर्मधुसर्पिषा ॥ ८ ॥
दत्त्वा दानानि विप्रेभ्यः शक्त्या विप्रानुसारतः ।
अर्चयित्वा महापुष्पैः सुगन्धैर्मदनेन च ॥ ९ ॥
विचित्रैः सूक्ष्मवस्त्रैश्च देवः सम्पूज्यवेष्टितः । स्रग्दामलम्बमानैश्चबहुदीपसमुज्ज्वलैः
पक्वान्नैर्विविधैर्भक्ष्यैःसुवृत्तैर्मोदकादिभिः । यतस्तेब्राह्मणाःसर्व्वेवेदाध्ययनतत्पराः
तत्पर्व कीर्त्तयाञ्चक्रुः पद्मकं नाम नामतः ।
आदित्यस्य दिनं त्वद्य तिथिः पञ्चदशी तथा ॥ १२ ॥
त्वाष्ट्रमेव न नक्षत्रं संक्रान्तिर्विषुवंतथा ।

व्यतीपातस्तथा योगः करणं विष्टिरेव च ॥ १३ ॥
पद्मकंनाम पर्वैतदयनादिचतुर्गुणम् । अत्र दत्तं हुतं जप्तं सर्वं भवति चाऽक्षयम् ॥
ते द्विजा भानुमत्याऽथ शूलभेदं गताः सह ।
ददृशुः शबरं कुण्डे भार्यया सह संस्थितम् ॥ १५ ॥
ऐशानीं स दिशंगत्वा पर्वते भृगुमूर्द्धनि । पतितुं च समारूढोभार्ययासहपार्थिव

भानुमत्युवाच

तिष्ठतिष्ठ महासत्त्व शृणुष्ववचनंमम । किमर्थंत्यजसि प्राणानद्यापिचयुवाभवान्
कः सन्तापः क उद्वेगः किं दुःखं व्याधिरेव च ।
शिशुः संदृश्यसेऽद्याऽपि कारणं कथ्यतामिदम् ॥ १८ ॥

शबर उवाच

कारणं नास्ति मे किंचिन्न दुःखं किञ्चिदेव तु ।
संसारभयभीतोऽहं नान्याः बुद्धिः प्रवर्त्तते ॥ १९ ॥
दुःखेनलभ्यतेयस्मान्मानुष्यंजन्मभाग्यतः । मानुष्यंजन्मचासाद्ययोनधर्मंसमाचरेत्
स गच्छेन्निरयं घोरमात्मदोषेण सुन्दरि !।
तस्मात्पतितुमिच्छामि तीर्थेऽस्मिन्पापनाशने ॥ २१ ॥

राज्युवाच

अद्यापि वर्त्तते कालो धर्मस्योपार्जनेतव । कृतापकृतकर्मावै व्रतदानैर्विशुद्ध्यति ॥
अहं दास्यामि धान्यं वा वासांसि द्रविणं बहु ।
नित्यमाचर धर्मं त्वं ध्यायन्नित्यं महेश्वरम् ॥ २३ ॥

शबर उवाच

नैवाहं कामये वित्तं न धान्यं वस्त्रमेव च ।
यो यस्यैवान्नमश्नाति स तस्याऽश्नाति किल्बिषम् ॥ २४ ॥

राज्युवाच

कन्दमूलफलाहारो भ्रमित्वा भैक्ष्यमुत्तमम् । अवगाह्यसुतीर्थानि सर्वपापैःप्रमुच्यते

ततो विमुक्तपापस्तु यत्किञ्चित्कुरुते शुचिः ।
कर्मणा तेन पूतस्त्वं सद्गतिं प्राप्स्यसि ध्रुवम् ॥ २६ ॥

शबर उवाच

अन्नमद्यमयात्यक्तंप्राणेभ्योऽपिमहत्तरम् । सत्यं न लोपयेद्देवेविनिश्चिताऽत्रमतिर्मम प्रसादःक्रियतांदेवि क्षमस्वाऽद्य जनैः सह । अर्धोत्तरीयवस्त्रेणसंयम्यात्मानमुद्यतः

भार्यया सहितो व्याधो हरिं ध्यात्वा पपात ह ।
नगार्द्धात्पतितो यावद्गतजीवो नराधिप !॥ २६ ॥
चूर्णीभूतौ हि तौ दृष्ट्वा कुण्डस्योपरि भूमिप !।
त्रिमुहूर्त्ते गते काले शबरो भार्यया सह ॥ ३० ॥
दिव्यं विमानमारूढो गतश्चानुत्तमां गतिम् ॥ ३१ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे व्याधस्वर्गगमनवर्णनंनाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशत्तमोऽध्यायः

शूलभेदतीर्थमाहात्म्यवर्णनम्

उत्तानपाद उवाच

अथाता देवदेवेश भानुमत्यकरोच्च किम् । एष मे संशयोदेव कथयस्व प्रसादतः ॥

ईश्वर उवाच

चिन्तयित्वा मुहूर्त्तं सा गता कुण्डस्य सन्निधौ ।
दृष्ट्वा कुण्डस्य माहात्म्यं राज्ञी हर्षेण पूरिता ॥ २ ॥
विप्रान्बहून्समाहूय पूजयामास तत्क्षणात् ।

दत्त्वा तु विधिवद्दानं ब्राह्मणेभ्यो नृपात्मज !॥ ३ ॥

निश्चयंपरमंकृत्वास्थिताशान्तेनचेतसा । ततःसम्पूज्यविधिवत्पितृन्देवान्नराधिप क्षपयित्वापक्षमेकंमधुमासस्यसास्थिता । अमावास्यांततोराज्ञीगतापर्वतसन्निधौ नगशृङ्गं समारुह्यकृत्वामुकुलितौ करौ । विज्ञाप्य ब्राह्मणान्सर्वानिदं वचनमब्रवीत्

मम माता पिता भ्राता ये चान्ये सखिबान्धवाः ।
क्षमापयित्वा सर्वांस्तान्वचनं मम कथ्यताम् ॥ ७ ॥
त्वत्पुत्री शूलभेदे तु तपः कृत्वा स्वशक्तितः ।
विसृज्य चैव साऽऽत्मानं तस्मिंस्तीर्थे दिवं ययौ ॥ ८ ॥

ब्राह्मणा ऊचुः

सन्देशंकथयिष्यामस्त्वयोक्तं शोभनव्रते ।मातापितृभ्यांसुश्रोणिमातेभूऽद्त्रसंशयः ततोविसृज्यताँल्लोकान्स्थिताःपर्वतमूर्द्धनि । अर्धोत्तरीयवस्त्रेणगाढंबद्ध्वापुनःपुनः

ततश्चिक्षेप साऽऽत्मानमेकचित्ता नराधिप !।
नगार्द्धे पतिता यावत्तावद्दृष्टाः सुराङ्गनाः ॥ ११ ॥
भोभो वत्से महाभागे! भानुमत्यतितापसि ।
दिव्यं विमानमारुह्य कैलासम्प्रतिगम्यताम् ॥ १२ ॥
ततः सा पश्यतां तेषां जनानां त्रिदिवं गता ॥ १३ ॥

मार्कण्डेय उवाच

इति ते कथितः सर्वः शूलभेदस्यविस्तरः । यःश्रुतःशङ्करात्पूर्वमृषिदेवसमागमे ॥ यइदं पठतेभक्त्यातीर्थेदेवकुलेऽपिवा । स मुच्यते महापापादपिजन्मशतार्जितात् ब्रह्महाच सुरापीच स्तेयी च गुरुतल्पगः । गोघातीस्त्रीविघातीचदेवब्रह्मस्वहारकः

स्वामिद्रोही मित्रघाती तथा विश्वासघातकः ।
परन्यासापहारी च परनिक्षेपलोपकः ॥ १७ ॥
रसभेदी तुलाभेदी तथा वार्द्धुषिकस्तु यः ।
यः कन्याविघ्नकर्त्ता च तथा विक्रयकारकः ॥ १८ ॥

परभार्यां भ्रातृभार्यां गौः स्नुषाकन्यका तथा । अभिगामीपरद्वेषीतथाधर्मप्रदूषकः

मुच्यन्ते सर्व एवैते शूलभेदप्रभावतः ॥ २० ॥

य इदंश्रावयेच्छ्राद्धे विप्राणांभुञ्जतांनृप । मुदं प्रयान्ति संहृष्टाःपितरस्तस्यसर्वशः

यश्चेदं शृणुयाद्भक्त्या पठ्यमानं नरोवशी ।

स मुक्तः सर्वपापेभ्यः सर्वकल्याणभाग्भवेत ॥ २२ ॥

इदं यशस्यमायुष्यमिदं पावनमुत्तमम् । पठतांशृण्वतां नृणामायुःकीर्त्तिविवर्द्धनम्

इति कथितमिदं ते शूलभेदस्य पुण्यं महिम न हि मनुष्यैः श्रूयतेः यत्सपापैः ।

मदनरिपुतटिन्या याम्यकूलस्थितस्य प्रबलदुरितकन्दोच्छेदकुद्दालकल्पम् ॥२४॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे शूलभेदतीर्थमाहात्म्यवर्णनंनामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

शूलभेदमाहात्म्यं समाप्तम्

एकोनषष्टितमोऽध्यायः

पुष्करिण्यामादित्यतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः पुष्करिणीं गच्छेत्सर्वपापप्रणाशिनीम् ।

श्रुते यस्याः प्रभावे तु सर्वपापैः प्रमुच्यते ॥ १ ॥

रेवाया उत्तरे कूले तीर्थं परमशोभनम् । यत्राऽस्ते सर्वदा देवो वेदमूर्त्तिर्दिवाकरः

कुरुक्षेत्रे यथापुण्यं सार्वकामिकमुत्तमम् । इदं तीर्थं तथा पुण्यं सर्वकामफलप्रदम्

कुरुक्षेत्रे यथावृद्धिर्दानस्य जगतीपते । पुष्करिण्यांतथा नाऽत्र वर्द्धते नाऽत्रसंशयः

यवमेकं तु यो दद्यात्सौवर्णं मस्तके नृप ।

पुष्करिण्यां तथा स्थानं यथा स्थानं नरे स्मृतम् ॥ ५ ॥

सूर्यग्रहे तु यः स्नात्वा दद्याद्दानं यथाविधि ।

हस्त्यश्वरथरत्नादि गृहं गाश्च युगन्धरान् ॥ ६ ॥

सुवर्णरजतं वाऽपि ब्राह्मणेभ्योददाति यः । त्रयोदशदिनं यावत्त्रयोदशगुणम्भवेत्

तिलमिश्रेण तोयेन तर्पयेत्पितृदेवताः । द्वादशाब्दं भवेत्प्रीतिस्तत्र तीर्थे महीपते!

यस्तत्र कुरुते श्राद्धं पायसैर्मधुसर्पिषा । श्राद्धदो लभते स्वर्गं पितॄणां दत्तमक्षयम्

अक्षतैर्बदरैर्बिल्वैरिङ्गुदैर्वा तिलैः सह । अक्षयं फलमाप्नोति तस्मिंस्तीर्थे न संशयः

तत्र स्नात्वा तु यो देवं पूजयेच्च दिवाकरम् ।

आदित्यहृदयं जप्त्वा पुनरादित्यमर्चयेत् ॥

स गच्छेत्परमं लोकं त्रिदशैरपि वन्दितम् ॥ ११ ॥

ऋचमेकां जपेद्यस्तु यजुर्वासामएव च । स समग्रस्य वेदस्य फलमाप्नोति वै नृप

यस्त्र्यक्षरं जपेन्मत्रं ध्याधमानो दिवाकरम् ।

आदित्यहृदयं जप्त्वा मुच्यते सर्वपातकैः ॥ १३ ॥

यस्तत्र विधिवत्प्राणांस्त्यजते नृपसत्तम ।

स गच्छेत्परमं स्थानं यत्र देवो दिवाकरः ॥ १४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे पुष्करिण्यामादित्यतीर्थमाहात्म्यवर्णनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः

आदित्येश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

भूयोऽप्यहं प्रवक्ष्यामि आदित्येश्वरमुत्तमम् । सर्वदुःखहरंपार्थसर्वविघ्नविनाशनम्
आयुःश्रीवर्द्धनंनित्यंपुत्रदंस्वर्गदंशिवम् । यस्यतीर्थस्यचाऽन्यानितीर्थानिकुरुनन्दन

नालभन्त श्रियं नाके मर्त्ये पातालगोचरे ।
कुरुक्षेत्रं गया गङ्गा नैमिषं पुष्करं तथा ॥ ३ ॥

वाराणसी च केदारं प्रयागं रुद्रनन्दनम् । महाकालं सहस्राक्षं शुक्रतीर्थं नृपोत्तम

रवितीर्थस्य सर्वाणि कलां नार्हन्ति षोडशीम् ।
रवितीर्थे हि यद्वृत्तं तच्छृणुष्व नृपोत्तम !॥ ५ ॥

स्नेहात्तेकथयिष्यामिवार्द्धकेनातिपीडितः । शृण्वन्तुऋषयःसर्वेतपोनिष्ठामहौजसः

श्रुतं मे रुद्रसानिध्ये नन्दिस्कन्दगणैः सह ।
पार्वत्या पृष्टः शम्भुश्च रवितीर्थस्य यत्फलम् ॥ ७ ॥
शम्भुना च यदाख्यातं गिरिजायाः ससम्भ्रमम् ।
तत्सर्वमेकचित्तेन रुद्रोद्गीतं श्रुतं मया ॥ ८ ॥

तत्तेऽहं सम्प्रवक्ष्यामि शृणुयत्नेनपाण्डव । दुर्भिक्षोपहताविप्रानर्मदांतुसमाश्रिताः

उद्दालको वशिष्ठश्च माण्डव्यो गौतमस्तथा ।
याज्ञवल्क्योऽथ गर्गश्च शाण्डिल्यो गालवस्तथा ॥ १० ॥
नाचिकेतो विभाण्डश्च बालखिल्यादयस्तथा ।
शातातपश्च शङ्खश्च जैमिनिर्गोभिलस्तथा ॥ ११ ॥

जैगीषव्यःशतानीकःसर्व एवसमागताः । तीर्थयात्राकृतातैस्तु नर्मदायाःसमन्ततः
आदित्येश्वरमायाताःप्रसङ्गादृषिपुङ्गवाः । वृक्षैःसञ्छादितं शुभ्रंधवतिन्दुकपाटलैः

जम्बीरैरर्जुनैःकुब्जैःशमीकेशरकिंशुकैः । तस्मिंस्तीर्थेमहापुण्ये सुगन्धिकुसुमाकुले
पुन्नागनारिकेलैश्च खदिरैः कल्पपादपैः । अनेकश्वापदाकीर्णं मृगमार्जारसङ्कुलम् ॥
ऋक्षहस्तिसमाकीर्णं चित्रकैश्चोपशोभितम् । प्रविष्टाऋषयः सर्वे वनेपुष्पसमाकुले

वनान्ते च स्त्रियो दृष्ट्वा रक्ता रक्ताम्बरान्विताः ।
रक्तमाल्यानुशोभाढ्या रक्तचन्दनचर्चिताः ॥ १७ ॥
रक्ताभरणसंयुक्ताः पाशहस्ताभयावहाः ।
तासां समीपगा दृष्टाः कृष्णजीमूतसन्निभाः ॥ १८ ॥
महाकाया भीमवक्त्राः पाशहस्ता भयावहाः ।
अनावृष्ट्युपमा दृष्टा आतुराः पिङ्गलोचनाः ॥ १९ ॥
दीर्घजिह्वा करालास्या तीक्ष्णदंष्ट्रा दुरासदा ।
वृद्धानारी कुरुश्रेष्ठ दृष्टाऽन्या ऋषिपुङ्गवैः ॥ २० ॥
ततः समीपगा वृद्धा तस्य वृन्दस्य भारत !।
स्वाध्यायनिरता विप्रा दृष्टास्तैः पापकर्मभिः ॥ २१ ॥
ऊचुस्ते तु समूहेन ब्राह्मणांस्तपसि स्थितान् ।
अस्माकं स्वामिनः सर्वे तिष्ठन्ते तीर्थमध्यतः ॥
ते प्रस्थाप्या महाभागाः सर्वथैव त्वरान्विताः ॥ २२ ॥

तच्छ्रुत्वा वचनं तेषांसर्वेचैवत्वरान्विताः । जग्मुस्तेनर्मदाकक्षंदृष्ट्वारेवांद्विजोत्तमाः

ततः केचित्स्तुवन्त्यन्ये जय देवि! नमोऽस्तु ते ॥ २४ ॥

नमोऽस्तु ते सिद्धगणैर्निषेविते! नमोऽस्तु ते सर्वपवित्रमङ्गले !।
नमोऽस्तु ते विप्रसहस्रसेविते! नमोऽस्तु रुद्राङ्गसमुद्भवे! वरे !॥ २५ ॥
नमोऽस्तु ते सर्वपवित्रपावने! नमोऽस्तु ते देवि! वरप्रदे! शिवे !।
नमामि ते शीतजले! सुखप्रदे! सरिद्वरे! पापहरे! विचित्रिते !॥ २६ ॥
अनेकभूतौघसुसेविताङ्गे !गन्धर्वयक्षोरगपाविताङ्गे !।
महागजौघैर्महिषैर्वराहैरापीयसे तोयमहोर्मिमाले !॥ २७ ॥

नमामि ते सर्ववरे! सुखप्रदे! विमोचयास्मानघपाशबद्धान् ॥ २८ ॥
भ्रमन्ति तावन्नरकेषु मर्त्या यावत्तवाम्भो नहि संश्रयन्ति ।
स्पृष्टं करैश्चन्द्रमसो रवेश्चेत्तद्देवि दद्यात्परमं परमं पदं तु ॥ २९ ॥
अनेकसंसारभयार्दितानां पापैरनेकैरभिवेष्टितानाम् ।
गतिस्त्वमम्भोजसमानवक्त्रे! द्वन्द्वैरनेकैरभिसम्वृतानाम् ॥ ३० ॥
नद्यश्च पूता विमला भवन्ति त्वां देवि! सम्प्राप्य न संशयोऽत्र ।
दुःखातुराणामभयं ददासि शिष्टैरनेकैरभिपूजिताऽसि ॥ ३१ ॥
विण्मूत्रदेहाश्च निमग्नदेहा भ्रमन्ति तावन्नरकेषु मर्त्याः ।
महाबलध्वस्ततरङ्गभङ्गं जलं न यावत्तव संस्पृशंति ॥ ३२ ॥
म्लेच्छाः पुलिन्दास्त्वथ यातुधानाः पिबन्ति येऽम्भस्तवदेवि! पुण्यम् ।
तेऽपि प्रमुच्यन्ति भयाच्च घोरात्किमत्र विप्रा भवपाशभीताः ॥ ३३ ॥
सरांसि नद्यः क्षयमभ्युपेता घोरे युगेऽस्मिन्कलिनावसृष्टे ।
त्वं भ्राजसे देवि जलौघपूर्णा दिवीव नक्षत्रपथे च गङ्गा ॥ ३४ ॥
तव प्रासादाद्वरदे विशिष्टे कालं यथेमं परिपालयित्वा ।
यास्याम मोक्षं तव सुप्रसादाद्वयं यथा त्वं कुरु नः प्रसादम् ॥ ३५ ॥
त्वामाश्रिता ये शरणं गताश्च गतिस्त्वमम्बेव पितेव पुत्रान् ।
त्वत्पालिता यावदिमं सुघोरं कालं त्वनावृष्टिहतं क्षिपामः ॥ ३६ ॥
एवंस्तुता तदादेवी नर्मदासरितां वरा । प्रत्यक्षासापरामूर्ध्निर्ब्राह्मणानांयुधिष्ठिर

श्रीमार्कण्डेय उवाच

पठन्ति ये स्तोत्रमिदं नरेन्द्र! शृण्वन्ति भक्त्या परया प्रशान्ताः ।
ते यान्ति रुद्रं वृषसंयुतेन यानेन दिव्याम्बरभूषिताङ्गाः ॥ ३८ ॥
ये स्तोत्रमेतत्सततं जपन्ति स्नात्वा च तोयेन तु नर्मदायाः ।
तेभ्योऽन्तकाले सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ ३९ ॥
प्रातः समुत्थाय तथा शयानो यः कीर्तयेतानुदिनं स्तवेन्द्रम् ।

देहक्षयं स्वे सलिले ददाति समाश्रयं तस्य महानुभाव ! ॥ ४० ॥
पापैर्विमुक्ता दिवि मोदमानाः सम्भोगिनश्चैव तु नान्यथा च ॥ ४१ ॥
प्रसन्नानर्मदादेवीस्तोत्रेणाऽनेनभारत । जलेनाप्यायितान्विप्रान्दक्षिणापथवाहिनी
अमृतत्वं तु वो दद्मि योगिभिर्यन्नगम्यते । दुर्लभं यत्सुरैःसर्वैर्मत्प्रसादाल्लभिष्यथ
इति ते ब्राह्मणाराजलँब्धा वरमनुत्तमम् । गमिष्यन्तःप्रीतचित्तादद्दशुश्चित्रमद्भुतम्

श्रीमार्कण्डेय उवाच

दृष्टास्तैः पुरुषाःपार्थनर्मदातटसंस्थिताः । स्नानदेवार्चनासक्ताःपञ्चएवमहाबलाः
ते दृष्टा ब्राह्मणैः सर्वैर्वेदवेदाङ्गपारगैः । सम्पृष्टास्तैर्महाराज यथा तदवधारय ॥

विप्रा ऊचुः

वनान्ते स्त्रीयुगं दृष्ट्वा महारौद्रं भयावहम् । वृद्धाश्चपुरुषास्तत्रपाशहस्ताभयावहाः
दुर्धर्षा दुर्निरीक्ष्याश्च इतश्चेतश्च,चञ्चलाः । व्याहरन्तःशुभांवाचं न तत्रगतिरस्तिवै
अपरस्परयोः सर्वे निरीक्षन्तः पुनः पुनः ।
तैस्तु तद्वचनं प्रोक्तं तत्सर्वं कथ्यतामिति ॥ ४९ ॥
अस्माकं,पुरुषाः पञ्च तिष्ठन्ति तत्र सत्तमाः ।
ते प्रस्थाप्या महाभागाः सर्वथैव त्वरान्विताः ॥ ५० ॥
अथ ते पुरुषाः पञ्च श्रुत्वा वाक्यमिदं शुभम् ।
परस्परं निरीक्षन्तो वदन्ति च पुनः पुनः ॥ ५१ ॥
क्व ते कस्य कुतो याताः किमुक्तं तैर्भयावहैः ॥ ५२ ॥

पुरुषा ऊचुः

तीर्थावगाहनंसर्वैः पूर्वदक्षिणपश्चिमैः । उत्तरैश्चकृतंभक्त्या न पापं तैर्व्यपोहितम्
निष्पापाश्चाथ सञ्जातास्तीर्थस्याऽस्य प्रभावतः ।
शृण्वन्तु ऋषयः सर्वे वह्निकालोपमा द्विजाः ॥ ५४ ॥
पातकानि च घोराणि यान्यचिन्त्यानि देहिनाम् ।
पापिष्ठेन तु चैकेन गुरुदारा निषेविता ॥ ५५ ॥

हतंचाऽन्येनमित्रस्वंसुवर्णंच धनन्तथा । ब्रह्महत्यामहारौद्राकृताचाऽन्येनपातकम्
सुरापानं तु चान्यस्य सञ्जातं चाप्यकामतः ।
गोवध्या चाप्यकामेन कृता चैकेन पापिना ॥ ५७ ॥
अकामतोऽपि सर्वेषां पातकानि नराधिप !।
ब्राह्मणानां तु ते श्रुत्वा वाक्यं तद्विस्मयान्विताः ॥ ५८ ॥
सद्यएवतदाजातापापिष्ठागतकल्मषाः । तीर्थस्याऽस्यप्रभावेणनर्मदायाःप्रभावतः
न कश्चित्पातकानां तु प्रवेशश्चाऽत्रजायते । एवंसञ्चिंत्यतेसर्वेपापिष्ठाश्चपरस्परम्
चित्रभानुः स्मृतस्तैस्तु विचिन्त्य हृदये हरिम् ।
स्नात्वा रेवाजले पुण्ये तर्पिताः पितृदेवताः ॥ ६१ ॥
नत्वा तु भास्करं देवं हृदि ध्यात्वा जनार्द्दनम् ।
प्रदक्षिणं तु तं भक्त्या ज्वलन्तं जातवेदसम् ॥ ६२ ॥
पतिताः पाण्डवश्रेष्ठ! पापोद्विग्ना महीपते !।
सात्त्विकीं वासनां कृत्वा त्यक्त्वा रजस्तमस्तथा ॥ ६३ ॥
हतं तैः पावके सर्व्वैरेवायाउत्तरे तटे । विमानस्थास्तदादृष्टाब्राह्मणैस्तैर्युधिष्ठिर!
आश्चर्यमतुलं दृष्टमृषिभिर्नर्मदातटे । तदाप्रभृति ते सर्वे रागद्वेषविवर्जिताः ॥६५॥
रवितीर्थं द्विजा हृष्टाः सेवन्ते मोक्षकाङ्क्षया ।
तीर्थस्याऽस्य च यत्पुण्यं तच्छृणुष्व नराधिप !॥ ६६ ॥
पीडितो वृद्धभावेन भक्त्या प्रीतो नरेश्वर !।
उद्देशं कथयिष्यामि द्विक्रोशाभ्यन्तरे स्थितः ॥ ६७ ॥
कुरुक्षेत्रं यथा पुण्यं रवितीर्थं श्रुतं मया । ईश्वरेण पुराख्यातं षण्मुखस्य नराधिप
श्रुतं रुद्राच्च तैः सर्व्वैरहं तत्र समीपगः ।

ईश्वर उवाच

मार्तण्डग्रहणे प्राप्ते ये व्रजन्ति षडानन !। रवितीर्थे कुरुक्षेत्रे तुल्यमेतत्फलं लभेत् ॥
स्नाने दाने तथा जप्ये होमे चैव विशेषतः ।

कुरुक्षेत्रे समं पुण्यं नाऽत्र कार्या विचारणा ॥ ७० ॥
ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्रनर्मदा । रवितीर्थेविशेषेण रेवा पुण्यफलप्रदा
षष्ठ्यां सूर्यदिने भक्त्या व्यतीपाते च वैधृतौ ।
सङ्क्रान्तौ ग्रहणेऽमायां ये व्रजन्ति जितेन्द्रियाः ॥ ७२ ॥
कामक्रोधैर्विमुक्ताश्चरागद्वेषैस्तथैवच । उपोष्यपरया भक्त्या देवस्याऽग्रेनराधिप
रात्रौजागरणं कृत्वा दीपंदेवस्यबोधयेत् । कथां वै वैष्णवींपार्थ वेदाभ्यसनमेवच
ऋग्वेदं वा यजुर्वेदं सामवेदमथर्वणम् । ऋचमेकां जपेद्यस्तु स वेदफलमाप्नुयात्
गायत्र्या च चतुर्वेदफलमाप्नोति मानवः । प्रभाते पूजयेद्विप्रानन्नदानहिरण्यतः ॥
भूमिदानेन वस्त्रेण अन्नदानेन शक्तितः । छत्रोपानहशय्यादि गृहदानेनपाण्डव! ॥
ग्रामधूर्वहदानेन गजकन्याहयेन च । विद्याशकटदानेन सर्वेषामभयं भवेत् ॥ ७८॥
शत्रुश्च मित्रतां याति विषं चैवाऽमृतं भवेत् ।
ग्रहा भवन्ति सुप्रीताः प्रीतस्तस्य दिवाकरः ॥ ७९ ॥
एतत्ते सर्वमाख्यातंरवितीर्थफलंनृप । ये शृण्वन्ति नराभक्त्या रवितीर्थफलंशुभम्
तेऽपि पापविनिर्मुक्ता रविलोके वसन्ति हि । गोदानेनचयत्पुण्यं यत्पुण्यंभृगुदर्शने
केदार उदकं पीत्वा तत्पुण्यं जायते नृणाम् ।
अब्दमश्वत्थसेवायां तिलपात्रप्रदो भवेत् ॥ ८२ ॥
तत्फलं समवाप्नोति आदित्येश्वरकीर्त्तनात् ।
श्रुते यस्य प्रभावे न जायते यन्नृपात्मज !॥ ८३ ॥
तत्सर्वंकथयिष्यामिभक्त्यातव महीपते । पापानिचप्रलीयन्तेभिन्नपात्रेयथाजलम्
तीर्थस्याऽभिमुखोनित्यंजायतेनाऽत्रसंशयः । गुह्याद्गुह्यतरंतीर्थंकथितंतवपाण्डव
पापिष्ठानां कृतघ्नानां स्वामिमित्रावघातिनाम् ।
तीर्थाऽख्यानं शुभं तेषां गोपितव्यं सदा बुधैः ॥ ८६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे आदित्येश्वरतीर्थमाहात्म्यवर्णनंनाम षष्टितमोऽध्यायः ॥६०॥

एकषष्टितमोऽध्यायः

शक्रेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्परंपुण्यं नर्मदादक्षिणेतटे। शक्रतीर्थं सुविख्यातमशेषाघविनाशनम्॥
पुराशक्रेण तत्रैव तपो वै दुरितक्रमम्। प्रारब्धं परया भक्त्या देवं प्रति महेश्वरम्
ततः सन्तोषितो देव उमापतिर्नराधिप। देवेन्द्रत्वं वरं राज्यं दानवानां वधं ददौ

लब्धं शक्रेण नृपते नर्मदातीर्थभावतः।
ततः पुण्यतमं तीर्थं सञ्जातं वसुधातले॥ ४॥
कार्त्तिकस्य तु मासस्य कृष्णपक्षे त्रयोदशीम्।
उपोष्य वै नरो भक्त्या सर्वपापैः प्रमुच्यते॥ ५॥

दुःस्वप्नसम्भवैः पापैर्दुर्निमित्तसमुद्भवैः। ग्रहशाकिनिसम्भूतैर्मुच्यते पाण्डुनन्दन
शक्रेश्वरं नृपश्रेष्ठ ये प्रपश्यन्ति भक्तितः। तेषां जन्मकृतं पापं नश्यते नाऽत्रसंशयः
अगम्यागमने चैव अवाह्ये चैववाहिते। स्वामिमित्रविघातेयन्नश्यते नाऽत्रसंशयः
गोप्रदानं प्रकर्त्तव्यं शुभं ब्राह्मणपुङ्गवे। धुर्यं वा दापयेत्तस्मिन्सर्वाङ्गरुचिरं नृप॥

दातव्यं परया भक्त्या स्वर्गे वासमभीप्सता।
एतत्ते सर्वमाख्यातं शक्रेश्वरफलं नृप॥ १०॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शक्रेश्वरतीर्थमाहात्म्यवर्णननामैकषष्टितमोऽध्यायः॥ ६१॥

द्विषष्टितमोऽध्यायः

करोडीश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तराजेन्द्रकरोडीश्वरमुत्तमम्। यत्र वै निहतास्तात दानवाःसपदानुगाः
इन्द्रादिदेवैः संहृष्टैः सततं जयबुद्धिभिः। तेषां ये पुत्रपौत्राश्च पूर्ववैरमनुस्मरम्॥

क्रुद्धैर्देवसमूहैश्च दानवा निहता रणे।
तेषां शिरांसि संगृह्य सर्वे देवाः सवासवाः॥ ३॥
निक्षिप्य नर्मदातोये बन्धुभावमनुस्मरम्।
तत्र स्नात्वा सुराः सर्वे स्थापयित्वा उमापतिम्॥ ४॥

इन्द्रेणसहिताःसर्वेऽपूजयँल्लोकसिद्धये। हृष्टचित्ताःसुराःसर्वे जग्मुराकाशमण्डलम्

दानवानां महाभाग सूदिता कोटिरुत्तमा।
तदाप्रभृति तत्तीर्थं करोडीति महीतले॥ ६॥
विख्यातं तु तदा लोके पापघ्नं पाण्डुनन्दन॥
अष्टम्यां च चतुर्दश्यामुभौ पक्षौ च भक्तितः।
उपोष्य शूलिनश्चाग्रे रात्रौ कुर्वीत जागरम्॥ ७॥

सत्कथापाठसंयुक्तो वेदाध्ययनसंयुतः। प्रभाते विमले प्राप्ते पूजयेत्त्रिदशेश्वरम्॥
पञ्चामृतेन संस्नाप्य श्रीखण्डेन च गुण्ठयेत्। शस्तैः पल्लवपुष्पैश्च पूजयेत्तु प्रयत्नतः
बहुरूपंजपन्मन्त्रंदक्षिणाशांव्यवस्थितः। यथोक्तेन विधानेन नाभिमात्रेजलेक्षिपेत्

तिलाञ्जलिं तु प्रेताय दक्षिणाशामुपस्थितः।
श्राद्धं तत्रैव विप्राय कारयेद्विजितेन्द्रियः॥ ११॥

विप्रैरग्रजातैश्च वेदाध्ययनतत्परैः। गोहिरण्येन सम्पूज्य ताम्बूलैर्भोजनैस्तथा॥

भूषणैःपादुकाभिश्च ब्राह्मणान्पाण्डुनन्दन।

भवेत्कोटिगुणं तस्य नात्र कार्या विचारणा ॥ १३ ॥
तस्मिंस्तीर्थे तु यः कश्चित्त्यजेद्देहं विधानतः ।
तस्य भवति यत्पुण्यं तच्छृणुष्व नराधिप !॥ १४ ॥
यावदस्थीति तिष्ठन्ति मर्त्यस्य नर्मदाजले ।
तावद्वसति धर्मात्मा शिवलोके सुदुर्लभे ॥ १५ ॥
ततः कालाच्च्युतस्तस्मादिह मानुषतां गतः ।
कोटीधनतिः श्रीमाञ्जायते राजपूजितः ॥ १६ ॥

सर्वधर्मसमायुक्तो मेधावी बीजपुत्रकः । विख्यातो वसुधापृष्ठेदीर्घायुर्मानवोभवेत् पुनःस्मरति तत्तीर्थंतत्र गत्वा नृपोत्तम !। करोडीश्वरमभ्यर्च्यप्राप्नोतिपरमांगतिम् इन्द्रचन्द्रयमै रुद्रैरादित्यैर्वसुभिस्तथा । विश्वेदेवैस्तथासर्वैः स्थापितस्त्रिदशेश्वरः

रेवाया उत्तरे कूले लोकानां हितकाम्यया ।
मानवो भक्तिसंयुक्तः प्रासादं कारयेत्तु यः ॥ २० ॥

तस्मिंस्तीर्थे नरश्रेष्ठ सद्गतिं समवाप्नुयात् । न्यायोपात्तधनेनैवदारुपाषाणकेष्टकैः

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिश्च शक्तितः ।
तेऽपि यान्ति नरा लोके शाङ्करे सुरपूजिते ॥ २२ ॥
यः शृणोति सदा भक्त्या माहात्म्यं तीर्थजं नृप !।
तस्य पापं प्रणश्येत षण्मासाभ्यन्तरं च यत् ॥ २३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेरेवाखण्डे करोडीश्वरतीर्थमाहात्म्यवर्णनंनाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥

——————

त्रिषष्टितमोऽध्यायः

कुमारेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तुराजेन्द्र! कुमारेश्वरमुत्तमम् । प्रसिद्धं सर्वतीर्थानामगस्त्येश्वरसन्निधौ

षण्मुखेन पुरा तात! सर्वपातकनाशनम् ।
आराध्य परया भक्त्या सिद्धिः प्राप्ता नराधिप ! ॥ २ ॥
देवसैन्याधिपो जातः सर्वशत्रुनिबर्हणः ।
उग्रतेजा महात्माऽसौ सञ्जातस्तीर्थसेवनात् ॥ ३ ॥

तदाप्रभृतितत्तीर्थंसञ्जातं नर्मदातटे । तत्रतीर्थे तु यो गत्वा एकचित्तो जितेन्द्रियः कार्तिकस्य चतुर्दश्यामष्टम्यांचविशेषतः । स्नापयेद्गिरिजानाथंदधिदुग्धेनसर्पिषा गीतं तत्रप्रकर्त्तव्यं पिण्डदानं यथाविधि । ब्राह्मणैःश्रोत्रियैःपार्थषट्कर्मनिरतैःशुभैः यत्किञ्चिद्दीयते तत्र अक्षयं पाण्डुनन्दन । सर्वतीर्थमयंतीर्थ निर्मितं शिखिना नृप एतत्तेसर्वमाख्यातं कुमारेश्वरजं फलम् । कुमारदर्शनात्पुण्यं प्राप्यते पाण्डुनन्दन!

मृतः स्वर्गमवाप्नोति सत्यमीश्वरभाषितम् ॥ ६ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे कुमारेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

——————

चतुःषष्टितमोऽध्यायः

अगस्त्येश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र तीर्थं परमशोभनम् । नराणांपापनाशायअगस्त्येश्वरमुत्तमम्
तत्रस्नात्वा नरोराजन्मुच्यते ब्रह्महत्यया । कार्त्तिकस्यतुमासस्यकृष्णपक्षेचतुर्दशी
घृतेन स्नापयेद् देवं समाधिस्थो जितेन्द्रियः ।
एकविंशतिकुलोपेतो न च्यवेदैश्वरात्पदात् ॥ ३ ॥
धनं चोपानहौ छत्रं दद्याच्च घृतकम्बलम् । भोजनं चैव सर्वेषांसर्वं कोटिगुणं भवेत्
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
अगस्त्येश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः

आनन्देश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तु राजेन्द्र! आनन्देश्वरमुत्तमम् । रुद्रस्य परमानन्दो यत्रजातो युधिष्ठिर
तत्तीर्थं कथयिष्यामि सर्वपापक्षयं करम् ॥ १ ॥

युधिष्ठिर उवाच

आनन्दश्चैव सञ्जातो रुद्रस्य द्विजसत्तम । कथ्यतांमेचतत्सर्वंसङ्क्षेपात्सहबान्धवैः

श्रीमार्कण्डेय उवाच

कथयामि नृपश्रेष्ठ ! आनन्देश्वरमुत्तमम् । दानवानांवधं कृत्वा देवदेवोमहेश्वरः ॥

पूजितो दैवतैः सर्वैः किन्नरैर्यक्षपन्नगैः । आनन्दसंयुतो देवो ननर्त वृषवाहनः ॥
भैरवंरूपमास्थाय गौर्याचार्द्धाङ्गसंस्थितः । भूतवेतालकङ्कालैर्भैरवैर्भैरवो वृतः ॥
ननर्त नर्मदातीरे दक्षिणेपाण्डुनन्दन ! । तुष्टैर्मरुद्गणैः सर्वैः स्थापितः कमलासनः
तदाप्रभृति तत्तीर्थमानन्देश्वरमुच्यते । अष्टम्यां च चतुर्दश्यां पौर्णमास्यांनराधिप
विधिवच्चार्च्चयेद्देवं सुगन्धेन विलेपयेत् । ब्राह्मणान्पूजयेत्तत्रयथाशक्त्यायुधिष्ठिर
गोदानं तत्र कर्त्तव्यं वस्त्रदानं शुभावहम् । वसन्तस्यत्रयोदश्यांश्राद्धं तत्रैव कारयेत्
इङ्गुदैर्बदरैर्बिल्वैरक्षतैश्च जलेन वा । प्रेतानां कारयेच्छ्राद्धमानन्देश्वर उत्तमे ॥ १०॥
आनन्दिताभवेयुस्तेयावदाभूतसम्प्लवम् । सन्ततेर्वै न विच्छेदः सप्तजन्मसुजायते
आनन्दोहि भवेत्तेषां प्रतिजन्मनि भारत ॥ ११ ॥
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
आनन्देश्वरमाहात्म्यवर्णनंनाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः

मातृतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तु राजेन्द्र! मातृतीर्थमनुत्तमम् । सङ्गमस्य समीपस्थं नर्मदादक्षिणे तटे
मातरस्तत्र राजेन्द्र! सञ्जाता नर्मदा तटे । उमार्द्धनारिर्देवेशो व्यालयज्ञोपवीतधृक्
उवाचयोगिनीवृन्दं कष्टं कष्टमहो हर । अजेयाः सर्वदेवानां त्वत्प्रसादान्महेश्वर ॥
तीर्थमत्र विधानेन प्रख्यातं वसुधातले ।
एवं भवतु योगिन्य इत्युक्त्वाऽन्तरधाच्छिवः ॥ ४ ॥

श्रीमार्कण्डेय उवाच

तत्र तीर्थे तु यो भक्त्या नवम्यां नियतः शुचिः ।

उपोष्य परया भक्त्या पूजयेन्मातृगोचरम् ॥ ५ ॥

तस्यस्युर्मातरःप्रीताप्रीतोऽयंवृषवाहनः । वन्ध्यायामृतवत्सायाअपुत्रायायुधिष्ठिर

स्नापनंचारभेत्तत्र मन्त्रशास्त्रविदुत्तमः । सहिरण्येन कुम्भेन पञ्चरत्नफलान्वितः

स्नापयेत्पुत्रकामायाः कांस्यपात्रेण देशिकः ।

पुत्रं सा लभते नारी वीर्यवन्तं गुणान्वितम् ॥ ८ ॥

योयं काममभिध्यायेत्ततः सलभते नृप । मातृतीर्थात्परंतीर्थं न भूतं न भविष्यति

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्त्र्यां संहितायांपञ्चमेऽवन्तीखण्डे

मातृतीर्थमाहात्म्यवर्णनंनाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः

लुङ्केश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं तात! जलमध्ये व्यवस्थितम् ।

लुङ्केश्वरमितिख्यातं सुरासुरनमस्कृतम् ॥ १ ॥

इदंतीर्थं महापुण्यं नानाश्चर्यं महीतले । अस्यतीर्थस्यमाहात्म्यमुत्पत्तिश्शृणुभारत

आसीत्पुरामहावीर्यो दानवोबलदर्पितः । कालपृष्ठ इतिख्यातः सुतोब्रह्मसुतस्य च

गङ्गातटं समाश्रित्य चचार विपुलं तपः ॥

अधोमुखोऽपि संस्थित्वाऽपिबद् धूममहर्निशम् ॥ ४ ॥

ततश्चानन्तरं देवस्तिष्ठतेह्य मयासह । दृष्ट्वा तं पार्वती सा तु तपस्युग्रेव्यवस्थितम्

पश्यपश्य महादेव धूमाशी तिष्ठते नरः । प्रसीद तं कुरुष्वाऽद्यदेहि शीघ्रं वरं विभो!

ईश्वर उवाच

यदुक्तं वचनं देवि! नतन्मेरोचते प्रिये । स्वकार्यं च सदाचिन्त्यं परकार्यं विसर्जयेत्

मूर्खस्त्रीबालशत्रूणां यश्छन्देनाऽनुवर्त्तते । व्यसने पतते घोरे सत्यमेतदुदीरितम्

देव्युवाच

भार्यायाऽभ्यर्थितो भर्त्ता कारणं बहु भाषते ।

लघुत्वं याति सा नारी एवं शास्त्रेषु पठ्यते ॥ ६ ॥

प्राणत्यागं करिष्यामि यदि मां त्वं न मन्यसे ।

पार्वत्या प्रेरितो देवो गतोऽसौ दानवं प्रति ॥ १० ॥

ईश्वर उवाच

किमर्थं पिबसेधूमं किमर्थंतप्यसेतपः । किं दुःखंकिंनुसन्तापोवदकार्यमभीप्सितम्

युवा त्वं दृश्यसेऽद्यापिवर्षविंशतिरेवच । तदाचक्ष्व हि मे सर्वं तपसः कारणंमहत्

दानव उवाच

अचला दीयतां भक्तिर्मम स्थैर्य्यं तवोपरि । अपरं वर्षसाहस्रं निर्विघ्नं मेगतंविभो

दिवसानां सहस्रे द्वे पूर्णे त्वत्तपसा मम ॥ १४ ॥

ईश्वर उवाव

याचयाऽभीप्सितंकार्यंतुष्टोऽहं तव सुव्रत । देवस्यवचनंश्रुत्वाचिन्तयामासदानवः

किं नाकं याचयाम्यद्य किमद्य सकलां महीम् ।

एवं सचिन्तयामास कामबाणेन पीडितः ॥ १६ ॥

दानव उवाच

यदि तुष्टोऽसि मे देव वरं दास्यसि मे प्रभो ।

संग्रामैस्तु न तुष्टोऽहं बलं नास्तीति किञ्च न ॥ १७ ॥

यस्य मूर्द्धन्यहंदेवपाणिनासमुपस्पृशे । देवदानवगन्धर्वोभस्मसाद्यातु तत्क्षणात्

ईश्वर उवाच

यत्त्वया चिन्तितं किञ्चित्तत्सर्वं सफलं तव । उत्तिष्ठ गच्छशीघ्रंत्वंभवनंप्रतिदानव

दानव उवाच

स्थीयतां देवदेवेश! यावज्ज्ञास्यामि ते वरम् ।

युष्मन्मूर्धिन न्यसे पाणिं प्रत्ययो मे भवेद्यथा ॥ २० ॥
ततश्चानन्तरं देवश्चिन्तयानो महेश्वरः । नस्कदोनहरिर्ब्रह्मा यः कार्येषु क्षमोऽधुना
ज्ञात्वाचैवापदं प्राप्तां देवः प्रार्थयते वृषम् । अनेन सह पापेन युध्यस्वसांप्रतंक्षणम्
कर प्रासारयद्दैत्यो देवं मूर्धिन किल स्पृशेत् ।
लांगूलेनाऽहतो दैत्यो विषण्णः पतितो भुवि ॥ २३ ॥
देवस्तु दक्षिणामाशां गतश्चैवोमयासह । भयभीतो निरीक्षेत ग्रीवां भज्यपुनःपुनः
गते चाऽदर्शनं देवे युयुधे वृषभेण सः । द्वावेतौ बलिनां श्रेष्ठौ युयुधातेमहाबलौ
प्रहारैर्वज्रसदृशैः कोपेन घटिकात्रयम् ।
पाणिभ्यां नस्पृशेद्यो वै वृषभस्य शिरस्तथा ॥ २६ ॥
हत्वा लांगूलपातेन आगतो वृषभस्तदा । उत्थितश्चाप्यसौ दैत्यो व्रजते वृषपृष्ठतः
वायुवेगेन संप्राप्तो यत्र देवो महेश्वरः । आगतं दानवं दृष्ट्वा वृषो वचनमब्रवीत् ॥
आरुह्य पृष्ठे मे देव! शीघ्रमेव हि गम्यताम् ।
आरुह्य वृषभं देवो जगाम चोमया सह ॥ २९ ॥
नाकं प्राप्तस्ततो देवो गतःशक्रस्यमन्दिरम् । नात्यजद्देवपृष्ठं तु दानवोबलदर्पितः
इन्द्रलोकं परित्यज्य ब्रह्मलोकंगतस्तदा । यत्रयत्र व्रजेद् देवो भयात्सहदिवौकसैः
अपश्यत्तत्रतत्रैवपृष्ठे लग्नंतुदानवम् । सर्वांल्लोकान्भ्रमित्वा तु देवो विस्मयमागतः
न स्थानं विद्यते किञ्चिद्यत्र विश्रम्यते क्षणम् ।
देवदानवयोस्तत्र युद्धं ज्ञात्वा सुदारुणम् ॥ ३३ ॥
हर्षितात्मा मुनिस्तत्र चिरं नृत्यति नारदः ।
धन्योऽहमद्य मे जन्म जीवितं च सुजीवितम् ॥ ३४ ॥
महान्तं च कलिं दृष्टा सन्तोषः परमोऽभवत् ।
देवदानवयोस्तत्र युद्धं त्यक्त्वा च नारदः ॥ ३५ ॥
आजगाम ततो विप्रो यत्रदेवोमहेश्वरः । दृष्ट्वा देवोथ तं विप्रं प्रतिपूज्याब्रवीदिदम्
भो नारद मुनिश्रेष्ठजानीषेकेशवं क्वचित् । गत्वा तत्रचशीघ्रं त्वं केशवाय निवेदय

नारद उवाच

देवदानवसिद्धानां गन्धर्वोरगरक्षसाम् । सर्वेषामेव देवेशो हरते ध्रुवमापदम् ॥
असंभाव्यं न वक्तव्यंमनसापि न चिन्तयेत् । ईदृशीनैवबुद्धयामिआपदंचविभोतव

ईश्वर उवाच

गच्छ नारद शीघ्रं त्वं यत्र देवो जनार्द्दनः । विदितं च त्वया सर्वं यत्कृतंदानवेनतु
अवध्यो दानवो ह्येष सेन्द्रैरपि मरुद्गणैः । गत्वा तु केशवं देवं निवेदय महामुने !॥

नारद उवाच

न तु गच्छाम्यहं देव सुप्तः क्षीरोदधौसुखी । केशवःप्रेरणे ह्येषामादेशोदीयतांप्रभो
मात्रा स्वस्रा दुहित्रा वा राजानं च तथा प्रभुम् ।
गुरुं चैवाऽदितः कृत्वा शयानं न प्रबोधयेत् ॥ ४३ ॥

ईश्वर उवाच

यदि क्वचिदगारेषु वह्निरुत्पद्यते महान् । निधनंयान्ति तत्रस्था यद्बुद्ध्येरन्नसूरयः

नारद उवाच

शीघ्रं गच्छ महादेवआत्मानं रक्ष सुप्रभो । गच्छाम्यहं न सन्देहो यत्रदेवोजनार्द्दनः
ततो नन्दिमहाकालौ स्तम्भहस्तौ भयानकौ ।
जघ्नतुर्दानवं तत्र मुद्गरादिभिरायुधैः ॥ ४६ ॥
त्रयोऽपि च महाकायाः सप्ततालप्रमाणकाः ।
न शमो जायते तेषां युध्यतां च परस्परम् ॥ ४७ ॥
ततश्चानन्तरंविप्रोऽगच्छत्तंकेशवं प्रति । सुप्तं क्षीरार्णवेऽपश्यच्छेषपर्यङ्कसंस्थितम्
लक्ष्म्या पादयुगं गृह्य ऊरूपरि निवेशितम् ।
अप्सरोगीयमानं तु भक्त्याऽऽनम्य च केशवम् ॥ ४९ ॥
अद्य मे सफलंजन्मजीवितंचसुजीवितम् । उत्थापयस्वदेवेशंलक्ष्मित्वमविशंकिता
नारदस्यवचः श्रुत्वा पदाङ्गुष्ठं व्यमर्द्दयत् । नारदस्तिष्ठतेद्वारिउत्तिष्ठमधुसूदन
देवोऽपि नारदं दृष्ट्वापरंहर्षमुपागतः । स्वागतं तु मुनिश्रेष्ठ ! सुप्रभाताऽद्यशर्वरी ॥

नारद उवाच

अद्य मे सफलं देवप्रभातं तवदर्शनात् । कुशलं च न देवानां शीघ्रमुत्तिष्ठगम्यताम्

श्रीविष्णुरुवाच

ब्रह्माचेन्द्रश्च रुद्रश्च ये चान्ये तु मरुद्गणाः । आपदः कारणंयच्चतत्समाख्यातुमर्हसि

नारद उवाच

दानवेन महातीव्रं तपस्तप्तं सुदारुणम् । रुद्रेण च वरो दत्तोभस्मत्वं मनसेप्सितम्

वरदानबलेनैव स देवं हन्तुमर्हति । ईदृशं चेष्टितं ज्ञात्वा नीतो देवोऽमरैः सह ॥

नारदस्य वचः श्रुत्वाजगामसमुनिर्हरिः । दृष्ट्वा देवस्तमीशानंगच्छन्तंदिशमुत्तराम्

दृष्ट्वा देवं च रुद्रोऽथ परिष्वज्य पुनः पुनः । नमस्कृत्य जगन्नाथं देवं च मधुसूदनः

विष्णुरुवाच

भयस्य कारणं देव! कथ्यतां च महेश्वर । देवदानवयक्षाणां प्रेषयेयं यमालयम् ॥

ललाटे च कृतो धर्म्मो युष्माकश्च महेश्वर !।
छित्वा शिरस्तथाङ्गानि इन्द्रियाणि न संशयः ॥ ६० ॥

ईश्वर उवाच

नास्ति सौख्यं च मूर्खेषु नास्ति सौख्यं च रोगिषु ।
पराधीने न सौख्यं तु स्त्रीजिते च विशेषतः ॥ ६१ ॥
स्त्रीजितेन मया विष्णो! वरो दत्तस्तु दानवे ।
यस्य मूर्ध्नि न्यसेत्पाणिं स भवेद्भस्मपुञ्जवत् ॥ ६२ ॥

अजेयश्चामरश्चैव मया ह्युक्तः स केशव!। हन्तुमिच्छतिमां पापउपायस्तवविद्यते

विष्णुरुवाच

गच्छन्तु अमराः सर्वे युष्माभिः सहशङ्कर । उपायं सर्जयाम्यथ वधार्थंदानवस्यच

रेवायाश्च तटे तिष्ठ देव त्वममरैः सह । कालक्षेपो न कर्त्तव्योगम्यतांत्वरितम्प्रभो

दक्षिणा यत्र गङ्गा च रेवा चैव महानदी ।
यत्र यत्र च दृश्येत प्राचीचैव सरस्वती ॥ ६६ ॥

तत्समं च महातीर्थं न मर्त्येचैव दृश्यते । स्नानं ये तत्रकुर्वन्तिदानञ्चैवतुभक्तितः

सप्तजन्मकृतं पापं नश्यते नात्र संशयः । एतत्तीर्थं महापुण्यं सर्वपातकनाशनम् ॥

गम्यतां तत्र देवेश! लुङ्केशं त्वं सहामरैः ।
विष्णोस्तु वचनादेव प्रविष्टो ह्रदमुत्तमम् ॥ ६९ ॥

रतिं सुमहतीञ्चक्रे सह तत्र मरुद्गणैः । ततश्चानन्तरं देवो मायां कृत्वा ह्यनेकधा ॥

वसन्तमासं संसृज्य उद्यानवनशोभितम् । अशोकैर्बकुलैश्चैव ब्रह्मवृक्षैः सुशोभनैः ॥

श्रीवृक्षैश्च कपित्थैश्च शिरीषै राजचम्पकैः ।
श्रीफलैश्च तथा तालैः कदम्बोदुम्बरैस्तथा ॥ ७२॥

अश्वत्थादिद्रुमैश्चैव नानावृक्षैरनेकशः । नानापुष्पैःसुगन्धाढ्यैर्भ्रमरैश्चनिनादितम्

तस्मिन्मध्ये महावृक्षो न्यग्रोधश्च सुशोभनः ।
बहुपक्षिसमायुक्तः कोकिलारावनादिनः ॥ ७४ ॥
कृष्णेन च कृतं तस्मिन्कन्यारूपं च तत्क्षणात् ।
न तस्याः सदृशी कन्या त्रैलोक्ये सचराचरे ॥ ७५ ॥
अन्याश्च कन्यकाः सप्त सुरूपाः शुभलोचनाः ।
दिव्यरूपधराः सर्वा दिव्याभरणभूषिताः ॥ ७६ ॥
पुमांसमभिकाङ्क्षन्त्यो यद्येकः कामयेत्स्त्रियः ।
मौक्तिकै रत्नमाणिक्यैर्वैडूर्यैश्च सुशोभनैः ॥ ७७ ॥

कामहारैश्चवंशैश्चबद्धोहिन्दोलकःकृतः । आरूढाश्च महाकन्या गायन्ते सुस्वरंतदा

मारुतः शीतलो वाति वनं स्पृष्ट्वा सुशोभनम् ।
वातेन प्रेरितो गन्धो दानवो घ्राणपीडितः ॥ ७९ ॥

ततः कुसुमगन्धेन विस्मयं परमंगतः । आघ्राय चेदृशं पुण्यं न दृष्टं न श्रुतं मया

वने चिन्तयतः किञ्चिद्‌ध्वनिगीतं सुशोभनम् ।
गीतस्य च ध्वनिं श्रुत्वा मोहितो मायया हरेः ॥ ८१ ॥
व्याधस्यैव महाकूटे पतन्ति च यथा मृगाः ।

कालस्पृष्ट (कालपृष्ठ) स्तथा कृष्णे पतितश्च नराधिप ॥ ८२ ॥
दृष्ट्वा कन्यां च तां दैत्यो मूर्च्छया पतितो भुवि ।
पतितेन तु दृष्टैका कन्या वटतले स्थिता ॥ ८३ ॥
आस्यं दृष्ट्वा तु नारीणां पुनः कामेन पीडितः ।
गृहीत्वा हेमदण्डं तु तां पातयितुमिच्छति ॥ ८४ ॥

कन्योवाच

मा मानुस्पर्शय त्वं हि कुमार्यहं कुलोत्तम !।
भो मुञ्चमुञ्च मां शीघ्रं यावद्गच्छाम्यहं गृहम् ॥ ८५ ॥

दानव उवाच

अहं विवाहमिच्छामि त्वयासहसुशोभने । भूपृष्ठे सकले राज्ञी भवस्येवंनसंशयः

कन्योवाच

पितारक्षति कौमार्ये भर्त्तारक्षतियौवने । पुत्रोरक्षतिवृद्धत्वे न स्त्रीस्वातन्त्र्यमर्हति
न स्वातन्त्र्यं ममैवास्ति उत्पन्नाऽहं महत्कुले ।
याच्यस्तु मत्पिता भ्राता मातापि हि तथैव च ॥ ८८ ॥

दानव उवाच

यदि मां नेच्छसे त्वद्य स्वातन्त्र्यं नावलम्बसे ।
ममापि च तदा हत्या सत्यं च शुभलोचने !॥ ८६ ॥

कन्योवाच

विश्वासो नैव कर्तव्यो यादृशे तादृशे नरे ।
नराः स्त्रीषु विचित्राश्च लम्पटाः काममोहिताः ॥ ६० ॥
परिणीय तु मां त्वं हि भुङ्क्ष्व भोगान्मया सह ।
जन्मनाशो भवेत्पश्चान्न त्वं नान्यो भवेन्मम ॥ ६१ ॥
ब्राह्मणी क्षत्रिणी वैशी शूद्री यावत्तथैव च ।
द्वितीयो न भवेद्भर्त्ता एकाकी चेह जन्मनि ॥ ६२ ॥

दानव उवाच

यत्त्वया गदितं वाक्यं तन्मया धारितं हृदि ।
प्रत्ययं मे कुरुष्वाऽद्य यत्ते मनसि रोचते ॥ ६३ ॥

कन्योवाच

जानीष्व गोपकन्यां मां क्रीडामि सखिभिः सह ।
अस्मत्कुलेषु यद्दिव्यं तत्कुरुष्व यथाविधि ॥ ६४ ॥
न तद्दिव्यं कुलेऽस्माकं विषं कोशं न तत्तुला ।
गोपान्वयेषु सर्वेषु हस्तः शिरसि दीयते ॥ ६५ ॥
कामान्धेनैव राजेन्द्र! निक्षिप्तो मस्तके करः ।
तत्क्षणाद्भस्मसाद्भूतो दग्धस्तृणचयो यथा ॥ ६६ ॥
केशवोपरिदेवैस्तुपुष्पवृष्टिः शुभाकृता । हृष्टाःसर्वेऽगमन्देवास्वस्थानंविगतज्वराः
क्षीरोदं केशवोऽगच्छत्कालपृष्ठे निपातिते । यइदंशृणुयाद्भक्त्याचरितंदानवस्यच
स जयी जायते नित्यं शङ्करस्य वचोयथा ।
एतस्मात्कारणाद्राजँल्लिङ्केश्वर (लुङ्केश्वर) मितिश्रुतम् ॥ ६६ ॥
लीनं च पातकं यस्मात्स्नानमात्रेण नश्यति ।
त्वगस्थिशोणितं मांसं मेदस्नायुस्तथैव च ॥ १०० ॥
मज्जाशुक्रगतंपापं नश्यते जन्मकोटिजम् । लुङ्केश्वरे महाराज तोयं पिबति भक्तितः
त्रिभिःप्रसृतिमात्राभिः पापं याति सहस्रधा ।
विशेषेण चतुर्दश्यामुभौ पक्षौ तु चाष्टमी ॥ १०२ ॥
उपोष्य यो नरो भक्त्या पितृणां पाण्डुनन्दन !।
उद्धृतान ते सर्वे नारकीयाःपितामहाः ॥ १०३ ॥
काकिणीं चैव यो दद्याद्ब्राह्मणेवेदपारगे । तेन दानफलंसर्वंकुरुक्षेत्रादिकं च यत्
प्राप्तं तु नान्यथा राजञ्च्छङ्करो वदते त्विदम् ।
स्पर्शलिङ्गमिदं राजञ्च्छङ्करेण तु निर्मितम् ॥ १०५ ॥

स्पर्शमात्रे मनुष्याणांरुद्रवासोऽभिजायते। तेन दानफलंसर्वंकुरुक्षेत्रादिकंच यत्

एतस्मात्कारणाद्राजँल्लोकपालाश्च रक्षकाः।

दुर्गा च रक्षणे सृष्टा चतुर्हस्तधरा शुभा॥ १०७॥

धनदो लोकपालेशो रक्षकश्चेश्वरस्य च। रक्षति च सदा कालं ग्रहव्यापाररूपतः॥

पुत्रभ्रातृसमारूपैःस्वामिसम्बन्धरूपिभिः। लुङ्केश्वरं चराजेन्द्रदेवैर्नाऽद्यापिमुच्यते

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे-

रेवाखण्डे लुङ्केश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तषष्टितमोऽध्यायः॥ ६७॥

अष्टषष्टितमोऽध्यायः

धनदतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

धनदस्य तु तत्तीर्थं ततो गच्छेद्युधिष्ठिर। नर्मदादक्षिणे कूले सर्वपापक्षयङ्करम्॥

सर्वतीर्थफलं तत्र प्राप्यते नात्र संशयः। चैत्रमासत्रयोदश्यां शुक्लपक्षे जितेन्द्रियः

उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरम्।

पञ्चामृतेन राजेन्द्र! स्नापयेद्धनदं बुधः॥ ३॥

दीपं घृतेन दातव्यं गीतं वाद्यंचकारयेत्। प्रभातेपूजयेद्विप्रानात्मनः श्रेय इच्छति

प्रतिग्रहसमर्थांश्च विद्यासिद्धान्तवादिनः।

श्रौतस्मार्त्तक्रियायुक्तान्परदारपराङ्मुखान्॥ ५॥

पूजयेद्गोहिरण्येन वस्त्रोपानहभोजनैः। छत्रशय्याप्रदानेन सर्वपापक्षयोभवेत्॥

त्रिजन्मजनितं पापंधनदस्यप्रभावतः। स्वर्गदं दुर्विनीतानांविनीतानांचमोक्षदम्

अन्नदं च दरिद्राणांभवेज्जन्मनिजन्मनि। कुलीनत्वंदुःखहानिः स्वभावाज्जायतेनरे

व्याधिध्वंसो भवेत्तेषां नर्मदोदकसेवनात्।

धनदस्य तु यस्तीर्थे विद्यादानं प्रयच्छति॥ ६॥

स याति भास्करे लोके सर्वव्याधिविवर्जिते।

देवद्रोणीं च तत्रैव स्वशक्त्या पाण्डुनन्दन!॥ १०॥

ये प्रकुर्वन्ति भूयिष्ठां रेवाया दक्षिणे तटे। तेयान्ति शाङ्करे लोकेसर्वदुःखविवर्जिते

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे

रेवाखण्डे धनदतीर्थमाहात्म्यवर्णनंनामाष्टषष्टितमोऽध्यायः॥ ६८॥

एकोनसप्ततितमोऽध्यायः

मङ्गलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तुराजेन्द्रमङ्गलेश्वरमुत्तमम्। स्थापितंभूमिपुत्रेणलोकानांहितकाम्यया

तोषितः परया भक्त्या शङ्करः शशिशेखरः।

चतुर्द्दश्यां गुरुर्देवः प्रत्यक्षो मङ्गलेश्वरः॥ २॥

ब्रूहि पुत्र! वरं शुभ्रं तत्ते दास्यामि मङ्गल!॥ ३॥

मङ्गल उवाच

प्रसादं कुरु मे शम्भो प्रतिजन्मनि शङ्कर। त्वदङ्गस्वेदसम्भूतो ग्रहमध्येवसाम्यहम्

त्वत्प्रसादेन ईशान पूज्योऽहं सर्वदैवतैः। कृतार्थोह्यद्य सञ्जातस्तव दर्शनभाषणात्

स्थानेऽस्मिन्देवदेवेश मम नाम्ना महेश्वरः। एवं भवतुतेपुत्रेत्युक्त्वाचान्तरधीयत

मङ्गलोऽपि महात्मा वै स्थापयित्वा महेश्वरम्।

आत्मयोगबलेनैव शूलिनाऽपूजयत्ततः। ७॥

सर्वदुःखहरंलिङ्गंनाम्नावै मङ्गलेश्वरम्। तत्र तीर्थेतु वैराजन्ब्राह्मणान्प्रीणयेत्सुधीः

सपत्नीकान्नृपश्रेष्ठ चतुर्थ्यङ्गारके व्रते। पत्नीभर्तारसंयुक्तं विद्वांसं श्रोत्रियं द्विजम्

व्रतान्ते चैव गौर्धुर्यैः शिवमुद्दिश्य दीयते ।
प्रीयतां मे महादेवः सपत्नीको वृषध्वजः ॥ १० ॥
वस्त्रयुग्मं प्रदातव्यंलोहितं पाण्डुनन्दन । धूर्वहौ रक्तवर्णौ च शुभ्रं कृष्णं तथैव च
छत्रं शय्यां शुभां चैव रक्तमाल्यानुलेपनम् ।
दातव्यं पाण्डवश्रेष्ठ,विशुद्धेनान्तरात्मना ॥ १२ ॥
चतुर्थ्यान्तु तथाऽष्टम्यां पक्षयोः शुक्लकृष्णयोः ।
श्राद्धं तत्रैव कर्त्तव्यं वित्तशाठ्येन वर्जितः ॥ १३ ॥
प्रेता भवन्तिसुप्रीता युगमेकं महीपते । सपुत्रो जायते मर्त्यः प्रतिजन्म नृपोत्तम
तस्य तीर्थस्य भावेन सर्वाङ्गरुचिरो नृप । मङ्गलंभवते वंशेनाऽशुभं विद्यते क्वचित्
भक्त्या यः कीर्त्तयेन्नित्यं तस्य पापं व्यपोहति ॥ १६ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे मङ्गलेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः

रवितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

रेवाया उत्तरे कूले तीर्थं परमशोभनम् । रविणा निर्मितं पार्थ! सर्वपापक्षयङ्करम्
स्वांशेन भास्करस्तत्र तिष्ठते चोत्तरे तटे ।
सर्वव्याधिहरः पुंसां नर्मदायां व्यवस्थितः ॥ २ ॥
षष्ठ्यांषष्ठ्यांनृपश्रेष्ठह्यष्टम्यांचचतुर्दशीम् । स्नानंयः कारयेन्मर्त्यःश्राद्धंप्रेतेषु भक्तितः
तस्य पापक्षयः पार्थ सूर्यलोके महीयते ॥ ३ ॥
ततः स्वर्गाच्च्युतः सोऽपि जायते विमले कुले ।

धनाढ्योव्याधिनिर्मुक्तो जीवेज्जन्मनि जन्मनि ॥ ४ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे रवितीर्थमाहात्म्यवर्णनंनाम सप्ततितमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः

कामेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

कामेश्वरंततश्चान्यच्छृणु पाण्डवसत्तम । सिद्धोयत्रगणाध्यक्षोगौरीपुत्रोमहाबलः
तत्रतीर्थे तु यो भक्त्या भक्तियुक्तो जितेन्द्रियः ।
पञ्चामृतेन संस्नाप्य धूपनैवेद्यपूजनैः ॥ २ ॥
प्रसाद्यजगतामीशं सर्वपापः प्रमुच्यते । अष्टम्यां मार्गशीर्षस्यतत्र स्नात्वायुधिष्ठिर
यो येन यजते तत्र स तं काममवाप्नुयात् ॥ ४ ॥
इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कामेश्वरतीर्थमाहात्म्यवर्णनंनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः

मणिनागेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र मणिनागेश्वरंशुभम् । उत्तरे नर्मदाकूले सर्वपापक्षयङ्करम् ॥
स्थापितं मणिनागेन लोकानां हितकाम्यया ॥ १ ॥

युधिष्ठिर उवाच

आशीविषेण सर्पेण ईश्वरस्तोषितः कथम् ।
क्षुद्राःसर्वस्य लोकस्य भयदा विषशालिनः ॥ २ ॥

कथयतांतात मे सर्वं पातकस्योपशान्तिदम् । मम सन्तापजंदुःखंदुर्योधनसमुद्भवम्
कर्णभीष्मोद्भवं रौद्रं दुःखं पाञ्चालिसम्भवम् ।
तव वक्त्राम्बुजौघेन प्लावितं निर्वृतिं गतः ॥ ४ ॥
श्रुत्वा तव मुखोद्गीतां कथां वै पापनाशिनीम् ।
अयुक्तमिदमस्माकं द्विज! क्लेशो न शाम्यति ॥ ५ ॥
अथवाप्राप्स्यतेतातविद्यादानस्ययत्फलम् । तत्फलंप्राप्यतेनित्यंकथाश्रवणतोहरेः

श्रीमार्कण्डेय उवाच

यथा यथा त्वं नृप! भाषसे च तथा तथा मे सुखमेति भारती ।
शैथिल्यता वा जरयान्वितस्य त्वत्सौहृदं नश्यति नैव तात !॥
शृणुष्व तस्मात्सह बान्धवैश्च कथामिमां पापहरां प्रशस्ताम् ॥ ७ ॥
कथयामि यथावृत्तमितिहासं पुरातनम् ॥ ८ ॥
कथितं पूर्वतो वृत्तैः पारम्पर्येण भारत !॥ ६ ॥

द्वे भार्ये कश्यपस्यास्तांसर्वलोकेष्वनुत्तमे । गरुत्मन्तं च विनताऽसूतकद्रूरहीनथ
सन्तोषेण च ते तात तिष्ठतः कश्यपे गृहे । कद्रूश्च विनतानाम हृष्टेच वनिते सदा

ताभ्यां सार्द्धं क्रीडते च कश्यपोऽपि प्रजापतिः ।
ततस्त्वेकदिने प्राप्ते आश्रमस्था शुभानना ॥ १२ ॥
उच्चैःश्रवं हयं दृष्ट्वा मनोवेगसमन्वितम् । पश्यपश्य हि तन्वङ्गीहयंसर्वत्रपाण्डुरम्
धावमानमविश्रान्तंजवेनमनसोपमम् । तं दृष्ट्वासहसाचाऽश्वमीर्ष्याभावेनचाब्रवीत्

कद्रूरुवाच

ब्रूहिभद्रेसहस्रांशोरश्वःकिंवर्णकोभवेत् । अहंब्रवीमि कृष्णोऽयं त्वं किं वदसितद्वद

विनतोवाच

पश्यसे ननु नेत्रैश्च कृष्णंश्वेतं न पश्यसि । असत्यभाषणाद्भद्रे यमलोकंगमिष्यसि
सत्यानृते तु वचने पणस्तव ममैव तु । सहस्रं चैव वर्षाणां दास्यहं तव मन्दिरे ॥
असत्या यदि मे वाणी कृष्ण उच्चैःश्रवा यदि ।
तदाऽहं त्वद्गृहे दासी भवामि सर्पमातृके !॥ १८ ॥
यदिउच्चैश्रवाःश्वेतोऽहंदासीचतवैवतु । एवं परस्परंताभ्यां सम्वादोऽयंव्यवर्द्धत
आश्रमेषु गता बाला रात्रौ चिन्तापरा स्थिता ।
बन्धुवर्गस्य कथितं समस्तं तद्विचेष्टितम् ॥ २० ॥
पुत्राणांकथितंपार्थपणञ्चैवमयाकृतम् । हाहाकारःकृतःसर्पैःश्रुत्वामात्रापणंकृतम्
जातादासीनसन्देहःश्वेतोभास्करवाहनः। उच्चैःश्रवाहयःश्वेतोनकृष्णोविद्यतेक्वचित्

कद्रूरुवाच

यथाऽहंनभवेदासीतत्कार्यंच विचिन्त्यताम् । विषध्वंरोमकूपेषुह्य च्चैःश्रवहयस्यतु
एकं मुहूर्त्तमात्रं तु यावत्कृष्णःस दृश्यते । क्षणमात्रेणचैकेन दासीसा भवते मम
दासीं कृत्वा तु तां तन्वीं विनतां सत्यगर्विताम् ।
ततः स्वस्थानगाः सर्वे भविष्यथ यथासुखम् ॥ २५ ॥

सर्पा ऊचुः

यथात्वंजननीचाम्बसर्वेषांभुवि पूजिता । तथासाऽपिविशेषेणवश्चिव्यानमातरः
माता च पितृभार्या च मातृमाता पितामही ।

कर्मणा मनसा वाचा हितं तासां समाचरेत् ॥ २७ ॥
सातनस्तेन वाक्येन क्रुद्धाकालानलोपमा । ममवाक्यमकुर्वाणायेकेचिद्धुविपन्नगाः
हव्यवाहमुखेसर्वेते यास्यन्त्यविचारितम् । मातुस्तद्वचनंश्रुत्वासर्वेचैवभुजङ्गमाः
केचित्प्रविष्टा रोमेषु उच्चैःश्रवहयस्य च । नष्टाःकेचिद्दशदिशं कद्रूशापभयात्ततः ॥
केचिद्गङ्गाजले नष्टाः केचिन्नष्टाः सरस्वतीम् ।
केचिन्महोदधौ लीनाः प्रविष्टा विन्ध्यकन्दरे ॥ ३१ ॥
आश्रित्य नर्मदातोये मणिनागोत्तमो नृप । तपश्चचार विपुलमुत्तरे नर्मदातटे ॥
मातृशापभयात्पार्थ! ध्यायते कामनाशनम् ।
अच्छेद्यमप्रतर्क्यं च विनाशोत्पत्तिवर्ज्जितम् ॥ ३३ ॥
वायुभक्षः शतं साग्रं तदर्धं रविवीक्षकः । एवं ध्यानरतस्यैव प्रत्यक्षस्त्रिपुरान्तकः
साधुसाधुमहाभागसत्त्ववांस्तुभुजङ्गम । त्वयाभक्त्यागृहीतोऽहंप्रीतस्तेह्य रगेश्वर
वरं याचय मे क्षिप्रं यत्ते मनसि वर्त्तते ॥ ३५ ॥

मणिनाग उवाच

मातृशापभयान्नाथक्लिष्टोऽहं नर्मदातटे । त्वत्प्रसादेन मे नाथ मातृशापोभवेद्वृथा

ईश्वर उवाच

हव्यवाहमुखं वत्स! न प्राप्स्यसि ममाऽज्ञया ।
मम लोके निवासश्च तव पुत्र! भविष्यति ॥ ३७ ॥

मणिनाग उवाच

अत्र स्थाने महादेव स्थीयतामंशभागतः । सहस्रांशेन भागेन स्थीयतांनर्मदाजले
उपकाराय लोकानां मम नाम्नैव शङ्कर! ॥ ३८ ॥

ईश्वर उवाच

स्थापस्व परंलिङ्गमाज्ञया मम पन्नग । इत्युक्त्वान्तर्हितो देवो जगामह्य मयासह

मार्कण्डेय उवाच

तत्रतीर्थे तु येगत्वाशुचिप्रयतमानसाः । पञ्चम्यांवाचतुर्द्दश्यामष्टम्यांशुक्लकृष्णयोः

अर्चयन्ति सदा पार्थ नोपसर्पन्ति ते ममम् ।
दध्ना च मधुना चैव घृतेन क्षीरयोगतः ॥ ४१ ॥
स्नापयन्ति विरूपाक्षमुमादेहार्धधारिणम् । कामाङ्गदहनं देवमन्धासुरनिषूदनम् ॥
स्नाप्यमानश्च ये भक्त्या पश्यन्ति परमेश्वरम् ।
ते यान्ति च परे लोके सर्वपापविवर्जिते ॥ ४३ ॥
श्राद्धं प्रेतेषु ये पार्थ चाष्टम्यां पञ्चमीषु च । ब्राह्मणैश्चसदायोग्यैर्वेदपाठकचिन्तकैः
स्वदारनिरतैः श्लक्ष्णैः परदारविवर्जितैः । षट्कर्मनिरतैस्तात शूद्रप्रेषणवर्जितैः
खञ्जाश्च दर्दुराः षण्ढा वाद्र्धुष्याश्च कृषीवलाः ।
भिन्नवृत्तिकराः पुत्र! नियोज्या न कदाचन ॥ ४६ ॥
वृषली मन्दिरे यस्य महिषीं यस्तु पालयेत् ।
स विप्रो दूरतस्त्याज्यो व्रते श्राद्धे नराधिप !॥ ४७ ॥
काणाष्टुण्टाश्च मण्टाश्च वेदपाठविवर्ज्जिताः ।
नते पूज्या द्विजाः पार्थ! मणिनागेश्वरे शुभे ॥ ४८ ॥
यदीच्छेदूर्ध्वगमनमात्मनः पितृभिः सह ।
सर्वाङ्गरुचिरां धेनुं यो दद्यादग्रजन्मने ॥ ४९
स याति परमं लोकं यावदाभूतसंप्लवम् ।
ततः स्वर्गाच्च्युतः सोऽपि जायते विमले कुले ॥ ५० ॥
ये पश्यन्ति परं भक्त्या मणिनागेश्वरं नृप !।
न तेषां जायते वंशे पन्नगानां भयं नृप !॥ ५१ ॥
पन्नगः शङ्कते तेषां मणिनागप्रदर्शनात् । सौपर्णरूपिणस्ते वै दृश्यन्ते नागमण्डले
फलानि चैवदानानांश्रृणुष्वाऽथनृपोत्तम । अन्नंसंस्कारसंयुक्तं ये ददन्तेनरोत्तमाः
तोयं शय्यां तथा छत्रं कन्यां दासीं सुभाषिणीम् ।
पात्रे देयं यतो राजन्यदीच्छेच्छ्रेय आत्मनः ॥ ५४ ॥
सुरभीणि च पुष्पाणि गन्धवस्त्राणि दापयेत् ।

दीपं धान्यं गृहं शुभ्रं सर्वोपस्करसंयुतम् ॥ ५९ ॥

येदद्न्तेपरं भक्त्या ते व्रजन्ति त्रिविष्टपम्। मणिनागे नृपश्रेष्ठ! यच्चदानंप्रदीयते

तस्य दानस्य भावेन स्वर्गे वासो भवेद्ध्रुवम्।

पातकानि प्रलीयन्ते आमपात्रे यथा जलम् ॥ ५७ ॥

नर्मदातोयसंसिद्धंभोज्यं विप्रेददातियः। सोऽपिपापैर्विनिर्मुक्तःक्रीडते दैवतैःसह

ततः स्वर्गच्युतानां हि लक्षणं प्रवदाम्यहम्।

दीर्घायुषोजीवपुत्राधनवन्तः सुशोभनाः ॥ ५९ ॥

सर्वव्याधिविनिर्मुक्ताः सुतभृत्यैः समन्विताः।

त्यागिनो भोगसंयुक्ता धर्माख्यानरताः सदा ॥ ६० ॥

देवद्विजगुरोर्भक्तास्तीर्थसेवापरायणाः।

मातापितृवशा नित्यं द्रोहक्रोधविवर्जिताः ॥ ६१ ॥

एभिरेवगुणैर्युक्तायेनराःपाण्डुनन्दन!। सत्यन्तेस्वर्गादायाताःस्वर्गवासंव्रजन्तिते

सर्वतीर्थवरं तीर्थं मणिनागं नृपोत्तम!। तीर्थाख्यानमिदं पुण्यंयः पठेच्छृणुयादपि

सोऽपि पापैर्विनिर्मुक्तःशिवलोकेमहीयते। न विघ्नंक्रमते तेषांविचरन्ति यथेच्छया

भाद्रपद्यां च यत्षष्ठ्यांपुण्यं सूर्यस्यदर्शने। तत्फलंसमवाप्नोतिआख्यानश्रवणेनतु

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

रेवाखण्डेमणिनागेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः

गोपारेश्वरमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले तीर्थं परमशोभनम्। सर्वपापहरं पार्थ! गोपारेश्वरमुत्तमम्

गोदेहान्निःसृतं लिङ्गं पुण्यं भूमितले नृप!॥ १ ॥

युधिष्ठिर उवाच

गोदेहान्निः सृतं कस्माल्लिङ्गं पापक्षयङ्करम्।

दक्षिणे नर्मदाकूले मणिनागसमीपतः ॥

संक्षेपात्कथ्यतां विप्र! गोपारेश्वरसम्भवम् ॥ २ ॥

श्रीमार्कण्डेय उवाच

कामधेनुस्तपस्तत्र पुरा पार्थ चकार ह। ध्यायते परया भक्त्या देवदेवं महेश्वरम्

तुष्टस्तस्या जगन्नाथःकपिलायामहेश्वरः। निःसृतो देहमध्यात्तुअच्छेद्यःपरमेश्वरः

तुष्टो देवि! जगन्मातः कपिले परमेश्वरि। आराधनं कृतंयस्मात्तद्वदाऽऽशुशुभानने

सुरभ्युवाच

लोकानामुपकाराय सृष्टाऽहं परमेष्ठिना।

लोककार्याणि सर्वाणि सिद्ध्यन्ति मत्प्रसादतः ॥ ६ ॥

लोकाः स्वर्गं प्रयास्यन्ति मत्प्रसादेन शङ्कर!।

तीर्थे त्वं भव मे शम्भो! लोकानां हितकाम्यया ॥ ७ ॥

तथेति भगवानुक्त्वा तीर्थे तत्रावसन्मुदा।

तदाप्रभृति तत्तीर्थं विख्यातं वसुधातले।

स्नानेनैकेन राजेन्द्र! पापसङ्घं व्यपोहति ॥ ८ ॥

गोपारेश्वरगोदानं यस्तु भक्त्या च कारयेत्।

योग्ये द्विजोत्तमे देया योग्या धेनुः सकाञ्चना ॥ ६ ॥
सवत्सा तरुणी शुभ्रा बहुक्षीरासवस्त्रका । कृष्णपक्षे चतुर्द्दश्यामष्टम्यांवाप्रदापयेत्
सर्वेषुचैव मासेषुकार्त्तिके चविशेषतः । दापयेत्परयाभक्त्या द्विजेस्वाध्यायतत्परे
विधिना चप्रदद्याद्योविधिनायस्तुगृह्णते । तावुभौपुण्यकर्माणौप्रेक्षकःपुण्यभाजनम्
पिण्डदानंप्रकुर्याद्यः प्रेतानांभक्तिसंयुतः । पिण्डेनैकेनराजेन्द्र प्रेतायान्तिपरांगतिम्
भक्त्या प्रणामं रुद्रस्य ये कुर्वन्ति दिनेदिने । तेषांपापंप्रलीयेतभिन्नपात्रेजलं यथा
तत्र तीर्थे तुयो राजन्वृषभं च समुत्सृजेत् । पितरश्चोद्धृतास्तेनशिवलोकेमहीयते

युधिष्ठिर उवाच

वृषोत्सर्गे कृते तात फलं यज्जायते नृणाम् । तत्सर्वंकथयस्वाशु प्रयत्नेन द्विजोत्तम

श्रीमार्कण्डेय उवाच

सर्वलक्षणसंपूर्णे वृषे चैव तु यत्फलम् । तदहं संप्रवक्ष्यामि शृणुष्व धर्मनन्दन ॥
कार्त्तिके चैव वैशाखे पूर्णिमायां नराधिप !।
रुद्रस्य सन्निधौ भूत्वा शुचिः स्नातो जितेन्द्रियः ॥ १८ ॥
वृषस्यैवसमुत्सर्गं कारयेत्प्रीयतांहरः । सान्निध्येकारयेत्पु त्रचतस्त्रोवत्सिकाःशुभाः
दत्वा तु विप्रमुख्याय सर्वलक्षणसंयुताः । प्रीयतांचमहादेवो ब्रह्मा विष्णुर्महेश्वरः
वृषभे रोमसङ्ख्या या सर्वाङ्गेषु नराधिप । तावद्वर्षप्रमाणं तु शिवलोके महीयते
शिवलोके वसित्वा तु यदामर्त्येषु जायते । कुले महतिसम्भूतिर्धनधान्यसमाकुले
नीरोगो रूपवांश्चैव विद्याढ्यः सत्यवाक्छुचिः ।
गोपारेश्वरमाहात्म्यं मया ख्यातं युधिष्ठिर !॥
गोदेहान्निःसृतं लिङ्गं नर्मदादक्षिणे तटे ॥ २३ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे गोपारेश्वरमाहात्म्यवर्णनंनाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

चतुःसप्ततितमोऽध्यायः

गौतमेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

रेवाया उत्तरे कूले तीर्थं परमशोभनम् । सर्वपापहरं मर्त्ये नाम्ना वै गौतमेश्वरम्
स्थापितं गौतमेनैव लोकानां हितकाम्यया ।
स्वर्गसोपानरूपं तु तीर्थं पुंसां युधिष्ठिर !॥ २ ॥
तत्र गच्छ परंभक्त्यायत्रदेवोजगद्गुरुः । पातकस्यविनाशार्थं स्वर्गवासप्रदस्तथा
सौभाग्यवर्द्धनं तीर्थं जयदं दुःखनाशनम् । पिण्डदानेन चैकेन कुलानामुद्धरेत्त्रयम्
यत्किञ्चिद्द दीयते भक्त्या स्वल्पं वा यदि वा बहु ।
तत्सर्वं शतसाहस्रमाज्ञया गौतमस्य हि ॥ ५ ॥
तीर्थानां परमं तीर्थं स्वयं रुद्रेण भाषितम् ॥ ६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे गौतमेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः

शङ्खचूडतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले तीर्थं पामशोभनम् । शङ्खचूडस्य नाम्ना वै प्रसिद्धं भूमिमण्डले
शङ्खचूडः स्वयं तत्र संस्थितः पाण्डुनन्दन । वैनतेयभयात्पार्थ! सुखदं नर्मदातटे
तत्र तीर्थे तु यो भक्त्या शुचिर्भूत्वा समाहितः ।
स्नापयेच्छङ्खचूडं तु क्षीरक्षौद्रेण सर्पिषा ॥ ३ ॥
रात्रौजागरणंकुर्याद्देवस्याग्रे नराधिप ।दधिभक्तेनसंपूज्यब्राह्मणाञ्छंसितव्रतान्
गोप्रदाने द्विजेन्द्रोऽयं सर्वपापक्षयङ्करः ॥ ४ ॥
तस्मिंस्तीर्थे तुयः पार्थ! सर्प्पदष्टंप्रतर्प्पयेत् । सयातिपरमंलोकं शङ्करस्यवचोयथा
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शङ्खचूडतीर्थमाहात्म्यवर्णनंनाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

———

षट्सप्ततितमोऽध्यायः

पारेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तु राजेन्द्र पारेश्वरमनुत्तमम् । पराशरो महात्मा वै नर्मदायास्तटे शुभे
तपश्चचार विपुलं पुत्रार्थं पाण्डुनन्दन !। हिमवद्दुहिता तेन गौरी नारायणी नृप
तोषिता परया भक्त्यानर्मदोत्तरके तटे । तस्य तुष्टा महादेवी शङ्करार्द्धाङ्गधारिणी
भोभोऋषिवर श्रेष्ठ! तुष्टाऽहं तव भक्तितः । वरं याचयमेविप्र पराशर महामते!॥

पराशर उवाच

परितुष्टाऽसि मे देवियदिदेयोवरोमम । देहि पुत्रं भगवतिसत्यशौचगुणान्वितम्
वेदाभ्यसनशीलं हि सर्वशास्त्रविशारदम् ।
तीर्थे चाऽत्र भवेद्व देवि! सन्निधानवरेण तु ॥ ६ ॥
लोकोपकारहेतोश्च स्थीयतां गिरिनन्दिनि !। पराशराभिधानेन नर्मदादक्षिणेतटे

श्रीदेव्युवाच

एवं भवतु ते विप्र! तत्रैवान्तरधीयत । पराशरोमहात्मावै स्थापयामास पार्वतीम्
शङ्करं स्थापयामास सुरासुरनमस्कृतम् । अच्छेद्यमप्रतर्क्यं च देवानां तुदुरासदम्
पराशरो महात्मा वै कृतार्थो ह्यभवन्नृप !॥ १० ॥
तत्र तीर्थे तु यो भक्त्या शुचिः प्रयतमानसः ।
स्त्र्यथवा पुरुषो वाऽपि कामक्रोधविवर्जितः ॥ ११ ॥
माघे चैत्रेऽथ वैशाखेश्रावणे नृपदन्दन !। मासिमार्गशिरे चैव शुक्लपक्षे तुसर्वदा
तत्र गत्वा शुभे स्थाने नर्मदादक्षिणे तटे ॥ १३ ॥
उपोष्य परया भक्त्या व्रतमेतत्समाचरेत् ।
रात्रौ जागरणं कृत्वा दीपदानं स्वशक्तितः ॥ १४ ॥
गीतं नृत्यं तथा वाद्यं कामक्रोधविवर्जितः ।
प्रभाते विमले प्राप्ते द्विजाः पूज्याः स्वशक्तितः ॥ १५ ॥
संपूज्य ब्राह्मणान्पार्थ धनदानहिरण्यतः । वस्त्रेण छत्रदानेनशय्याताम्बूलभोजनैः
प्रीणयेन्नर्मदातीरे ब्राह्मणाञ्छंसितव्रतान् । श्राद्धं कार्यं नृपश्रेष्ठआमैः पक्वैर्जलेनच
स्त्रीणां चैव तुशूद्राणामामश्राद्धं प्रशस्यते । आमंचतुर्गुणंदेयं ब्राह्मणानांयुधिष्ठिर
वेदोक्तेनविधानेन द्विजाः पूज्याः प्रयत्नतः । हस्तमात्रैः कुशैश्चैवतिलैश्चैवाक्षतैर्नृप
विप्रा उदङ्मुखाः कार्याः स्वयं वै दक्षिणामुखः ।
दर्भेषु निक्षिपेदन्नमित्युच्चार्य द्विजाग्रतः ॥ २० ॥
प्रेता यान्तु परेलोके तीर्थस्याऽस्य प्रभावतः । पापं मेप्रशमं यातुएतुवृद्धि शुभंसदा

वृद्धिं यातु सदा वंशो ज्ञातिवर्गोद्विजोत्तम। एवमुच्चार्यविप्राय दानंदेयंस्वशक्तितः।
गोभूतिसहिरण्यादि चान्नं वस्त्रंस्वशक्तितः। दातव्यंपाण्डवश्रेष्ठ! पारेश्वरवराश्रमे
ये शृण्वन्ति परं भक्त्या मुच्यन्ते सर्वपातकैः ॥ २४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे पारेश्वरतीर्थमाहात्म्यवर्णनंनामषट्सप्ततितमोऽध्यायः ॥ ७६ ॥

सप्तसप्ततितमोऽध्यायः

भीमेश्वरतीर्थ माहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

भीमेश्वरं ततो गच्छेत्सर्वपापक्षयङ्करम्। सेवितं ऋषिसङ्घैश्चभीमव्रतधरैः शुभैः॥
तत्र तीर्थे तु यः स्नात्वा सोपवासो जितेन्द्रियः।
जपेदेकाक्षरं मन्त्रमूर्ध्वबाहुर्दिवाकरे ॥ २ ॥
तस्यजन्मार्जितंपापंतत्क्षणादेव नश्यति। सप्तजन्मार्जितं पापंगायत्र्यानश्यतेध्रुवम्
दशभिर्जन्मभिर्जातंशतेनतुपुराकृतम्। सहस्रेण त्रिजन्मोत्थंगायत्रीहन्तिकिल्बिषम्
वैदिकं लौकिकं वापिजाप्यं जप्तं नरेश्वर। तत्क्षणाद्दहते सर्वं तृणन्तुज्वलनोयथा
न देवबलमाश्रित्य कदाचित्पापमाचरेत्। अज्ञानान्नश्यतेक्षिप्रं नोत्तरं तु कदाचन
तत्र तीर्थे तु यो दानंशक्तिमाश्रित्य चाचरेत्। तदक्षय्यफलंसर्वंजायतेपाण्डुनन्दन!

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे भीमेश्वरतीर्थमाहात्म्यवर्णनंनामसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः

नारदेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्रनारदेश्वरमुत्तमम्। तीर्थानां परमं तीर्थं निर्मितं नारदेन तु ॥

युधिष्ठिर उवाच

नारदेन मुनिश्रेष्ठ कस्मात्तीर्थं विनिर्मितम्। एतदाख्याहिमे सर्वंप्रसन्नोयदिसत्तम!

श्रीमार्कण्डेय उवाच

परमेष्ठिसुतः पार्थ!नारदो मुनिसत्तमः। रेवायाश्चोत्तरे कूले तपस्तेन पुरा कृतम् ॥
नवनाडीनिरोधेन काष्ठावत्यां गतेन च। तोषितः पशुभर्त्ता वै नारदेन युधिष्ठिर !

ईश्वर उवाच

तुष्टोऽहं तव विप्रेन्द्र! योगिनाथ अयोनिज !। वरंप्रार्थय मे वत्स यत्ते मनसिवर्त्तते

नारद उवाच

त्वत्प्रसादेन मे शम्भो योगश्चैव प्रसिध्यतु। अचलातेभवेद्भक्तिः सर्वकालं ममैव तु
स्वेच्छाचारी भवे देव वेदवेदाङ्गपारगः। त्रिकालज्ञोजगन्नाथगीतज्ञोऽहं सदा भवे
दिनेदिने यथा युद्धं देवदानवमानुषैः। पातालेमर्त्यलोके वा स्वर्गे वाऽपि महेश्वर
पश्येयं त्वत्प्रसादेन भवन्तं पार्वतीं तथा। तीर्थं लोकेषुविख्यातं सर्वपापक्षयङ्करम्

ईश्वर उवाच

एवं नारद! सर्वं तु भविष्यति न संशयः। चिन्तितंमत्प्रसादेनसिद्ध्यतेनात्रसंशयः
स्वेच्छाचारो भवेर्वत्स स्वर्गे पातालगोचरे।
मर्त्ये वा भ्रम वै योगिन्न केनाऽपि निवार्यसे ॥ ११ ॥
सप्त स्वरास्त्रयो ग्रामा मूर्च्छनाश्चैकविंशतिः।
ताना एकोनपञ्चाशत्प्रसादान्मे तव ध्रुवम् ॥ १२ ॥

मम प्रियङ्करं दिव्यं नृत्यगीतं भविष्यति । कलिं च पश्यसेनित्यं देवदानवकिन्नरैः
त्वत्तीर्थं भूतले पुण्यं मत्प्रसादाद्भविष्यति । वेदवेदाङ्गतत्त्वज्ञो ह्यशेषज्ञानकोविदः ॥
एकस्त्वमसि निःसङ्गो मत्प्रसादेन नारद ॥ १४ ॥
इत्युक्त्वान्तर्दधे देवो नारदस्तत्र शूलिनम् ।
स्थापयामास राजेन्द्र सर्वसत्त्वोपकारकम् ॥ १५ ॥
पृथिव्यामुत्तमं तीर्थं निर्मितंनारदेन तु । तत्र तीर्थे नृपश्रेष्ठ यो गच्छेद्विजितेन्द्रियः
मासि भाद्रपदे पार्थ! कृष्णपक्षे चतुर्दशी ।
उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरम् ॥ १७ ॥
छत्रं तत्र प्रदातव्यं ब्राह्मणे शुभलक्षणे । शस्त्रेणतु हता येवै तेषां श्राद्धं प्रदापयेत् ॥
ते यान्ति परमं लोकं पिण्डदानप्रभावतः ॥ १८ ॥
कपिलातत्रदातव्यापितृनुदिश्यभारत !। इत्युच्चार्यद्विजेदेव्यायान्तु ते परमांगतिम्
अस्य श्राद्धस्य भावेन ब्राह्मणस्यप्रसादतः । नर्मदातोयभावेनन्यायार्जितधनस्यच
तेषां चैव प्रभावेण प्रेता यान्तु परां गतिम् ॥ २० ॥
इत्युच्चार्य द्विजे देया दक्षिणा च स्वशक्तितः ।
हविष्यान्नं विशालाक्ष! द्विजानां चैव दापयेत् ॥ २१ ॥
दीपं भक्त्या प्रदातव्यं नृत्यं गीतं च कारयेत् ।
अवाप्तं तेन वै सर्वं यः करोतीश्वरालये ॥ २२ ॥
स याति रुद्रसान्निध्यमिति रुद्रः स्वयं जगौ ।
विद्यादानेन चैकेन अक्षयां गतिमाप्नुयात् ॥ २३ ॥
धूर्वहास्तत्रदातव्याभूमिःसस्यवती नृप । चित्रभानुं शुभैर्मन्त्रैःप्रीणयेत्तत्रभक्तितः
आज्येन सुप्रभूतेन होमद्रव्येणभारत । ये यजन्ति सदा भक्त्या त्रिकालंनृत्यमेवच
तीर्थे नारदनामाख्ये रेवायाश्चोत्तरे तटे । चित्रभानुमुखादेवाः सर्वदेवमयो ऋषिः
ऋषिणा प्रीणिताः सर्वे तस्मात्प्रीतयो* हुताशनः ।

* प्रीतयः—प्रीणनीयः—इत्यर्थः ।

पूजिते हव्यवाहे तु दारिद्र्यं नैव जायते ॥ २७ ॥
धनेन विपुला प्रीतिर्जायते प्रतिजन्मनि । कुलीनाश्च सुवेषाश्च सर्वकालं धनेन तु
प्लवो नदीनां पतिरङ्गनानां राजा च सद्वृत्तरतः प्रजानाम् ।
धनं नराणामृतवस्तरूणां गतं गतं यौवनमानयन्ति ॥ २९ ॥
धनदत्वं धनेशेन तस्मिंस्तीर्थे ह्युपार्जितम् । यमेनच यमत्वं हि इन्द्रत्वंचैववज्रिणा
अन्यैरपि महीपालैः पार्थिवत्वमुपार्जितम् ।
नारदेश्वरमाहात्म्याद् ध्रुवो निश्चलतां गतः ॥ ३१ ॥
सर्वतीर्थवरं तीर्थं निर्मितं नारदेन तु । पृथिव्यां सागरान्तायां रेवायाश्चोत्तरे तटे
तद्वरं सर्वतीर्थानां महापातकनाशनम् ॥ ३२ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नारदेश्वरतीर्थमाहात्म्यवर्णनंनामाष्टसप्ततितमोऽध्यायः ॥७८॥

एकोनाशीतितमोऽध्यायः

दधिस्कन्दमधुस्कन्दतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! तीर्थद्वयमनुत्तमम् । दधिस्कन्दंमधुस्कन्दं सर्वपापक्षयङ्करम्
दधिस्कन्दे नरः स्नात्वा यस्तु दद्याद् द्विजे दधि ।
उपतिष्ठेत्ततस्तस्य सप्तजन्मनि भारत !॥ २ ॥
न व्याधिर्न जरा तस्य न शोको नैव मत्सरः ।
दशचन्द्रशतं यावज्जायते विमले कुले ॥ ३ ॥
मधुस्कन्देऽपि मधुना मिश्रितान्यस्तिलान्ददेत् ।
नाऽसौ वैवस्वतं देवं पश्येद्वै जन्मसप्ततिम् ॥ ४ ॥

मधुनासह सम्मिश्रं पिण्डंयस्तुप्रदापयेत् । तस्यपौत्रप्रपौत्रेभ्योदारिद्रंयनैवजायते

दधिभिःसहसंमिश्रं पिण्डं यस्तु प्रदापयेत् ।

तस्मिंस्तीर्थे नरः स्नात्वा विधिवद्दक्षिणामुखः ॥ ६ ॥

पिता पितामहश्चैव तथैव प्रपितामहः ।

द्वादशाब्दानि तुष्यन्ति नाऽत्र कार्या विचारणा ॥ ७ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे दधिस्कन्दमधुस्कन्दतीर्थमाहात्म्यवर्णनं नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥

अशीतितमोऽध्यायः

नन्दिकेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र नन्दिकेश्वरमुत्तमम् । यत्रसिद्धो महानन्दीतत्तेसर्ववदाम्यहम् रेवायां पुरतः कृत्वा पुरा नन्दीगणेश्वरः । तपस्तपंजयं कुर्वंस्तीर्थात्तीर्थंजगाम ह

दधिस्कन्दं मधुस्कन्दं यावत्त्यक्त्वा तु गच्छति ।

तावत्तुष्टो महादेवो नन्दिनाथमुवाच ह ॥ ३ ॥

ईश्वर उवाच

भोभोः प्रसन्नो नन्दीश वरंवृणुयथेप्सितम् । तपसातेनतुष्टोऽहं तीर्थयात्राकृतेन ते

नन्दीश्वर उवाच

न चाऽहं कामये वित्तं न चाऽहं कुलसन्ततिम् ।

मुक्त्वा न कामये कामं तव पादाम्बुजात्परम् ॥ ५ ॥

कृमिकीटपतङ्गेषु तिर्यग्योनिं गतस्य वा ।

जन्म जन्मान्तरेऽप्यस्तु भक्तिस्त्वयि ममाऽचला ॥ ६ ॥

तथेत्युक्त्वा महादेवः परया कृपया नृप ! ।

गृहीत्वा तं करे सिद्धं जगाम निलयं हरः ॥ ७ ॥

तस्मिंस्तीर्थे तु यः स्नात्वा भक्त्या त्र्यक्षं प्रपूजयेत् ।

अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ८ ॥

तत्र तीर्थे तु यः स्नात्वा प्राणत्यागं करोति चेत् ।

शिवस्याऽनुचरो भूत्वा मोदते कल्पमक्षयम् ॥ ९ ॥

ततः कालेन महता जायते विमले कुले । वेदवेदाङ्गतत्त्वज्ञो जीवेच्च शरदां शतम् एतत्तेकथितंतात! तीर्थमाहात्म्यमुत्तमम् । दुर्लभं मर्त्यसञ्ज्ञस्य सर्वपापक्षयंकरम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नन्दिकेश्वरतीर्थमाहात्म्यवर्णनं नामाशीतितमोऽध्यायः ॥८०॥

एकाशीतितमोऽध्यायः

वरुणेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज वरुणेश्वरमुत्तमम् । यत्र सिद्धो महादेवो वरुणो नृपसत्तम

पिण्याकशाकपर्णैश्च कृच्छ्रचान्द्रायणादिभिः ।

आराध्य गिरिजानाथं ततः सिद्धिं परां गतः ॥ २ ॥

तत्र तीर्थे तु यः स्नात्वा सन्तर्प्य पितृदेवताः ।

पूजयेच्छङ्करं भक्त्या स याति परमां गतिम् ॥ ३ ॥

कुण्डिकांवर्द्धनीं वाऽपि महद्वा जलभाजनम् । अन्नेनसहितंपार्थतस्यपुण्यफलंशृणु यत्फलं लभतेमर्त्त्यःसत्रेद्वादशवार्षिके । तत्फलंसमवाप्नोतिनाऽत्रकार्याविचारणा सर्वेषामेव दानानामन्नदानं परंस्मृतम् । सद्यःप्रीतिकरंतोयमन्नंच नृपसत्तम !॥ ६॥

तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ।
वरुणस्य पुरे वासो यावदाभूतसंप्लवम् ॥ ७ ॥
पश्चात्पूर्णे ततः काले मर्त्यलोके प्रजायते । अन्नदानप्रदो नित्यं जीवेद्वर्षशतं नरः ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे वरुणेश्वरतीर्थमाहात्म्यवर्णनंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥

द्व्यशीतितमोऽध्यायः

दधिस्कन्दादिपञ्चतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपालवह्नितीर्थमनुत्तमम् । यत्रसिद्धोमहातेजास्तपःकृत्वाहुताशनः
सर्वभक्ष्यः कृतो योऽसौ दण्डके मुनिना पुरा ।
नर्मदातटमाश्रित्य पूतो जातो हुताशनः ॥ २ ॥
तत्र तीर्थे तु यः स्नात्वा पूजयित्वा महेश्वरम् ।
अग्निप्रवेशं कुरुते स गच्छेदग्निसाम्यताम् ॥ ३ ॥
भक्त्या स्नात्वा तु यस्तत्र तर्प्पयेत्पितृदेवताः ।
अग्निष्टोमस्य यज्ञस्य फलमाप्नोत्यसंशयम् ॥ ४ ॥
तस्यैवाऽनन्तरंराजन्कौबेरंतीर्थमुत्तमम् । कुबेरोयत्र संसिद्धोयक्षाणामधिपः पुरा
तत्र तीर्थे नरः स्नात्वा समभ्यर्च्य जगद्गुरुम् ।
उमया सहितं भक्त्या सर्वपापैः प्रमुच्यते ॥ ६ ॥
तत्र तीर्थे तु यः स्नात्वा दद्याद्विप्राय काञ्चनम् ।
नाभिमात्रे जले तिष्ठन्स लभेतार्बुदं फलम् ॥ ७ ॥
दधिस्कन्दे मधुस्कन्दे नन्दीशे वरुणालये ।

आग्नेये यत्फलंतात स्नात्वा तत्फलमाप्नुयात् ॥ ८ ॥
ते वन्द्या मानुषे लोके धन्याःपूर्णमनोरथाः । यैस्तुदृष्टंमहापुण्यंनर्मदातीर्थपञ्चकम्
ते यान्ति भास्करे लोके परमे दुःखनाशने । भास्करादैश्वरेलोकेचैश्वरादनिवर्त्तके
नीयतेसपरेलोकेयावदिन्द्राश्चतुर्द्दश । ततःस्वर्गाच्च्युतोमर्त्यो राजाभवतिधार्मिकः
सर्वरोगविनिर्मुक्तोभुनक्तिसचराचरम् । विष्णुश्च देवता येषांनर्मदातीर्थसेविनाम्
अखण्डितप्रतापास्ते जायन्ते नाऽत्र संशयः ।
गङ्गा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ १३ ॥
ग्रामे वा यदिवाऽरण्ये पुण्यासर्वत्रनर्मदा । रेवातीरेवसेन्नित्यं रेवातोयंसदापिवेत्
स स्नातः सर्वतीर्थेषुसोमपानंदिनेदिने । गङ्गाद्याःसरितःसर्वाःसमुद्राश्चसरांसिच
कल्पान्ते सङ्क्षयं यान्ति न मृता तेन नर्मदा ॥ १५ ॥
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्ताखण्डे
रेवाखण्डे दधिस्कन्दादिपञ्चतीर्थमाहात्म्यवर्णनंनाम द्व्यशीतितमोऽध्यायः

त्र्यशीतितमोऽध्यायः

हनूमन्तेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज तीर्थं परमशोभनम् । ब्रह्महत्याहरं प्रोक्तं रेवातटसमाश्रयम् ॥
हनूमताभिधं ह्यत्र विद्यते लिङ्गमुत्तमम् ॥ १ ॥

युधिष्ठिर उवाच

हनूमन्तेश्वरं नाम कथं जातं वदस्व मे । ब्रह्महत्याहरं तीर्थं रेवादक्षिणसंस्थितम्

श्रीमार्कण्डेय उवाच

साधुसाधु महाबाहो! सोमवंशविभूषण !।

गुह्याद् गुह्यतरं तीर्थं नाख्यातं कस्यचिन्मया ॥ ३ ॥
तव स्नेहात्प्रवक्ष्यामि पीडितो वार्द्धकेन तु । पूर्वं जातं महद्युद्धं रामरावणयोरपि
पुलस्त्यो ब्रह्मणः पुत्रो विश्रवास्तस्य वै सुतः ।
रावणस्तेन सञ्जातो दशास्यो ब्रह्मराक्षसः ॥ ५ ॥
त्रैलोक्यविजयीभूतः प्रसादाच्छूलिनः स च ।
गीर्वाणा विजिताः सर्वे रामस्य गृहिणी हृता ॥ ६ ॥
वारितः कुम्भकर्णेन सीतां मोचयमोचय । विभीषणेन वै पापोमन्दोदर्यापुनःपुनः
त्वं जितः कार्तवीर्येणरैणुकेयेनसोऽपि च । सरामोरामभद्रेणतस्यसङ्ख्येकथंजयः

रावण उवाच

वानरैश्च नरैर्ऋक्षैर्वराहैश्च निरायुधैः । देवासुरसमूहैश्च न जितोऽहं कदाचन ॥

श्रीमार्कण्डेय उवाच

सुग्रीवहनुमद्भ्यां च कुमुदेनाङ्गदेन च । एतैरन्यैः सहायैश्च रामचन्द्रेण वै जितः
रामचन्द्रेण पौलस्त्यो हतः सङ्ख्ये महाबलः । वनंभग्नंहताःशूराः प्रभञ्जनसुतेन च
रावणस्य सुतो जन्येहतश्चाक्षकुमारकः । आयामोरक्षसां भीमःसंपिष्टोवानरेणतु
एवं रामायणे वृते सीतामोक्षे कृते सति । अयोध्यांतुगतेरामेहनुमान्समहाकपिः
कैलासाख्यं गतः शैलं प्रणामाय महेशितुः ।
तिष्ठतिष्ठेत्यऽसौ प्रोक्तो नन्दिना वानरोत्तमः ॥ १४ ॥
ब्रह्महत्यायुतस्त्वं हि राक्षसानां वधेन हि । भैरवस्य सभानूनं नद्रष्टव्यात्वयाकपे

हनुमानुवाच

नन्दिनाथ! हरं पृच्छ पातकस्योपशान्तिदम् ।
पापोऽहं प्लवगो यस्मात्सञ्जातः कारणान्तरात् ॥ १६ ॥

नन्द्युवाच

रुद्रदेहोद्भवाकिं ते न श्रुताभूतलेस्थिता । श्रवणाज्जन्मजनितं द्विगुणंकीर्तनाद्व्रजेत्
त्रिशज्जन्मार्जितंपापं न श्येद्रेवावगाहनात् । तस्मात्त्वंनर्मदातीरंगत्वाचरतपोमहत्

गन्धवाहसुतोऽप्येवंनन्दिनोक्तंनिशम्य च । प्रयातोनर्मदातीरमौर्व्यादक्षिणसङ्गमम्
दध्यौ सुदक्षिणे देवं विरूपाक्षंत्रिशूलिनम् । जटामुकुटसंयुक्तंव्यालयज्ञोपवीतिनम्
भस्मोपचितसर्वाङ्गंडमरुस्वरनादितम् । उमार्द्धाङ्गहरंशांतंगोनाथासनसंस्थितम्
वत्सरान्सुबहून्यावदुपासाञ्चक्र ईश्वरम् । तावत्तुष्टो महादेव आजगामसहोमया
उवाच मधुरां वाणीं मेघगम्भीरनिस्वनाम् ।
साधुसाध्वित्युवाचेशः कष्टं वत्स त्वया कृतम् ॥ २३ ॥
नचपूर्वंत्वयापापंकृतंरावणसङ्क्षये । स्वामिकार्यरतस्त्वंहिसिद्धोऽसिममदर्शनात्
हनुमांश्च हरं दृष्ट्वा उमार्द्धाङ्गहरं स्थितम् ।
साष्टाङ्गं प्रणयोऽवोचज्जय शम्भो! नमोऽस्तु ते ।
जयाऽन्धकविनाशाय जय गङ्गाशिरोधर !॥ २५ ॥
एवं स्तुतो महादेवो वरदो वाक्यमब्रवीत् । वरं प्रार्थय मे वत्स प्राणसम्भवसम्भव

श्रीहनूमानुवाच

ब्रह्मरक्षोवधाज्जाता मम हत्या महेश्वर । न पापोऽहंभवेदेव युष्मत्सम्भाषणेक्षणात्

ईश्वर उवाच

नर्मदातीर्थमाहात्म्याद्धर्मयोगप्रभावतः । मन्मूर्त्तिदर्शनात्पुत्र निष्पापोऽसिनसंशयः
अन्यश्च ते प्रयच्छामि वरं वानरपुङ्गव !। उपकारायलोकानां नामानितव मारुते
हनूमानञ्जनिसुतोवायुपुत्रोमहाबलः । रामेष्टःफाल्गुनोगोत्रःपिङ्गाक्षोऽमितविक्रमः
उदधिक्रमणश्रेष्ठो दशग्रीवस्य दर्पहा । लक्ष्मणप्राणदाता च सीताशोकनिवर्त्तनः
इत्युक्त्वाऽन्तर्दधेदेव! उमयासह शङ्करः । हनूमानीश्वरंतत्र स्थापयामासभक्तितः
आत्मयोगबलेनैव ब्रह्मचर्यप्रभावतः । ईश्वरस्य प्रसादेन लिङ्गं कामप्रदं हि तत् ॥
अच्छेद्यमप्रतर्क्यं च विनाशोत्पत्तिवर्जितम् ॥ ३३ ॥

श्रीमार्कण्डेय उवाच

हनूमन्तेश्वरे पुत्र! प्रत्यक्षप्रत्ययं शृणु । यद्वृत्तं द्वापरस्यादौ त्रेतान्ते पाण्डुनन्दन
सुपर्वा नाम भूपालो बभूव वसुधातले ।

तस्य राज्ञः सदा सौख्यं नरा दीर्घायुषः सदा ॥ ३५ ॥

स पुत्रधनसंयुक्तश्चौरोपद्रववर्जितः । शतबाहुर्बभूवाऽस्यः पुत्रो भीमपराक्रमः ॥

आसक्तोऽसौ सदा कालं पापधर्मैर्नरेश्वर ।
अटाट्यत धरां सर्वां पर्वतांश्च वनानि च ॥ ३७ ॥
वधार्थं मृगयूथानामागतो विन्ध्यपर्वतम् ।
तरुजातिसमाकीर्णे हस्तियूथसमाचिते ॥ ३८ ॥

सिंहचित्रकशोभाढ्ये मृगवाराहसङ्कुले । क्रीडित्वासवनेराजा नर्मदामानतःक्वचित्
हनूमन्तवनेप्राप्तः शतक्रोशप्रमाणके । चिंचिणीवनशोभाढ्ये कदम्बतरुसङ्कुले ॥

नित्यं पालाशजम्बीरैः करञ्जखदिरैस्तथा ।
पाटलैर्बदरैर्युक्तैः शमीतिन्दुकशोभितम् ॥ ४१ ॥
मृगयूथैः समाच्छन्नशिखण्डिस्वरनादितम् ।
पारावतकसङ्घानां समन्तात्स्वरशोभितम् ॥ ४२ ॥
शरत्कालेऽरमद्राजा बहुले चाऽश्विनस्य सः ।
वनमध्यं गतोऽद्राक्षीद् भ्रमन्तं पिङ्गलद्विजम् ॥ ४३ ॥
पुस्तिकाकरसंस्थं च पप्रच्छ चपलं द्विजम् ॥ ४४ ॥

शतबाहुरुवाच

एकाकी त्वं वने कस्माद् भ्रमसे पुस्तिकाकरः ।
इतस्तोऽपि सम्पश्यन्कथयस्व द्विजोत्तम !॥ ४५ ॥

ब्राह्मण उवाच

कान्यकुब्जात्समायातः प्रेषितो राजकन्यका ।
अस्थिक्षेपाय वै राजन्हनूमन्तेश्वरे जले ॥ ४६ ॥

राजोवाच

अस्थिक्षेपो जले कस्माद्धनूमन्तेश्वरे द्विज !।
क्रियते केन कार्येण साश्चर्यं कथ्यतां मम ॥ ४७ ॥

सुपर्वणः सुतो यानं त्यक्त्वा भूमौ प्रणम्य च ।

कृताञ्जलिपुटोभूत्वाब्राह्मणायनरेश्वर ! । समस्तं कथयामासवृत्तान्तंस्वं पुरातनम्

ब्राह्मण उवाच

शिखण्डीनाम राजाऽस्ति कान्यकुब्जे प्रतापवान् ।
अपुत्रोऽसौ महीपालः कन्या जाता मनोरथैः ॥ ४९ ॥
जातिस्मरा सुचार्वङ्गी नर्मदायाः प्रभावतः ।
पित्रा च सैकदा कन्या विवाहाय प्रजल्पिता ॥ ५० ॥
अनित्ये पुत्रि! संसारे कन्यादानं ददाम्यहम् ।
श्वः कृत्यमद्य कुर्वीत पूर्वाह्णे चाऽपराह्णिकम् ॥
न हि प्रतीक्षते मृत्युः कृतं चास्य न चाकृतम् । ॥ ५१ ॥

कन्योवाच

इच्छेयं यत्र काले हि तत्र देया त्वया पितुः ।
पुत्रीवाक्यादसौ राजा विस्मितो वाक्यमब्रवीत् ॥ ५२ ॥

शिखण्ड्युवाच

कथ्यतां मे महाभागे! साश्चर्यं भाषितं त्वया ।
पितुर्वाक्येन सा बाला उत्तमा ह्यागतान्तिकम् ॥ ५३ ॥

कथयामास यद्वृत्तं हनूमन्तेश्वरे नृप । कलापिनी ह्यहं तात युता भर्त्रावसं तदा
रेवौर्व्यासंगमान्तिस्था रेवायादक्षिणेतटे । हनूमन्तवनेपुण्येचिक्रीडाहं यदृच्छया
भर्तृयुक्ता च संसुप्तारजन्यां सरलेनगे । आगतालुब्धकास्तत्र क्षुधार्त्तावनमुत्तमम्
भर्तृयोगयुता पापैर्दृष्टाऽहंवधच्छिन्तकैः । पाशबन्धंसमादाय बद्धाहं स्वामिनासह

ग्रीवां ते मोटयामासुः पिच्छाच्छोटनकं कृतम् ।
हुताशनमुखे तैस्तु सह कान्तेन लुब्धकैः ॥ ५८ ॥
परिभर्ज्याथयोर्मांसं भक्षयित्वा यथेष्टतः ।
सुप्ताः स्वस्थेन्द्रिया रात्रौ सा गता शर्वरी क्षयम् ॥ ५९ ॥

प्रभाते मांसशेषञ्च जम्बुकैर्गृध्रघातिभिः।
मच्छरीरोद्भवं चास्थि स्नायुमांसेन चावृतम् ॥ ६० ॥
गृहीतं घातिनैकेन चाकाशात्पतितं तदा।
तं मांसभक्षणं दृष्ट्वा परे पक्षिण आगताः ॥ ६१ ॥
दृष्ट्वा पक्षिसमूहं तु अस्थिखण्डं व्यसर्जयत्।
विहगानां समस्तानां धावतां चैव पश्यताम् ॥ ६२ ॥

पतितं नर्मदातोये हनूमन्तेश्वरे नृप। मदीयमस्थिखण्डं च पतितं नर्मदाजले ॥६३ तस्यतीर्थस्यपुण्येनजाताऽहंपुत्रिका तव। भूपकन्यात्वहंजातापूर्णचन्द्रनिभानना जातिस्मरानरेन्द्रस्यसञ्जाताभवतःकुले। तस्माद्विवाहं नेच्छामिममभर्त्तानृपोत्तम

विषमे वर्त्ततेऽद्यापि शकुन्तमृगजातिषु।
तस्यास्थिशेषं राजेन्द्र! तस्मिंस्तीर्थे भविष्यति ॥ ६६ ॥

तत्क्षेपणार्थं वै तात प्रेषयाऽद्य द्विजोत्तमम्। एतत्ते सर्वमाख्यातं कारणंनृपसत्तम मद्भर्त्ता विषमे स्थाने शकुन्तमृगजातिषु। यदि प्रेषयसे तात कश्चित्त्वं नर्मदातटे

तस्याहं कथयिष्यामि स्थानैश्चिह्नैश्चलक्षितम्।
शिखण्डिनाऽप्यहं तत्र ह्याहूतो ह्यवनीपते !॥ ६६ ॥

दास्यामिविंशतिग्रामान्गच्छत्वं नर्मदातटे। प्रेषणंमेप्रतिज्ञातमलक्ष्म्यापीडितेननु

कन्योवाच

गच्छ त्वं नर्मदांपुण्यांसर्वपापक्षयङ्करीम्। आग्नेय्यांसोमनाथस्यहनूमन्तेश्वरःपरः अर्द्धक्रोशेन रेवाया विस्तीर्णो वटपादपः। करञ्जः कटहश्चैव सन्निधाने वटस्य च

न्यग्रोधमूलसान्निध्ये सूक्ष्माण्यस्थीनि द्रक्ष्यसि।
समूह्य तानि संगृह्य गच्छ रेवां द्विजोत्तम !॥ ७३ ॥
आश्विनस्याऽसिते पक्षे त्रिपुरारेस्तु वै तिथौ।
स्नाप्य त्रिशूलिनं भक्त्या रात्रौ त्वं कुरु जागरम् ॥ ७४ ॥
क्षिपेः प्रभाते तानि त्वं नाभिमात्रजलस्थितः।

इत्युच्चार्य द्विजश्रेष्ठ! विमुक्तिस्तस्य जायताम् ॥ ७१ ॥
क्षिप्त्वाऽस्थीनि पुनः स्नानं कर्त्तव्यं त्वघनाशनम्।
एवं कृते तु राजेन्द्र! गतिस्तस्य भविष्यति ॥ ७६ ॥
कथितं कन्यया यच्च तत्सर्वं पुस्तिकाकृतम्।
आगतोऽहं नृपश्रेष्ठ! तीर्थेऽत्र दुरितापहे ॥ ७७ ॥

सोऽभिज्ञानंततोदृष्ट्वानीत्वाऽस्थीनिनरेश्वरः! पूर्वोक्तेनविधानेनप्राक्षिपंनर्मदाम्भसि

पुष्पवृष्टिःपपाताऽऽशु साधुसाध्विति पाण्डव !।
विमानं च ततो दिव्यमागतं बर्हिणस्तदा ॥ ७६ ॥
दिव्यरूपधरो भूत्वा गतो नाके कलापवान्।
एवं तु प्रत्ययं दृष्ट्वा हनूमन्तेश्वरे नृप ॥ ८० ॥

चकारानशनं विप्रः शतबाहुश्च भूपतिः। शोषयामासतुस्तौ स्वमीश्वराराधनेरतौ ध्यायन्तौ तस्थतुर्देवं शतबाहुद्विजोत्तमौ। मासार्धेनमृतोराजा शतबाहुर्महामनाः किङ्कणीजालशोभाढ्यं विमानं तत्रचागतम्। साधुसाधुनृपश्रेष्ठविमानारोहणंकुरु

शतबाहुरुवाच

नायामि स्वर्गमार्गाग्रं विप्रो यावन्न संस्थितः।
उपदेशप्रदो मह्यं गुरुरूपी द्विजोत्तमः ॥ ८४ ॥

अप्सरस ऊचुः

लोभावृतो ह्ययं विप्रो लोभात्पापस्य संग्रहः।
हनूमन्तेश्वरे राजन्! ये मृताः सत्त्वमास्थिताः ॥ ८५ ॥

ते यान्ति शाङ्करेलोके सर्वपापक्षयङ्करे। नैवपापक्षयश्चास्य ब्राह्मणस्य नरेश्वर !॥ गृहं च गृहिणीचित्तेब्राह्मणस्य प्रवर्त्तते। शतबाहुस्ततो विप्रमुवाच विनयान्वितः त्यजमूलमनर्थस्यलोभमेनंद्विजोत्तम। इत्युक्त्वास्वर्ययौराजास्वर्गकन्यासमावृतः

दिव्यैः कैश्चिद्वृतो विप्रः स्वर्गं वैतालिकैर्वृतः।
बर्ही च काशीराजस्य पुत्रस्तीर्थप्रभावतः ॥ ८६ ॥

आत्मानं कन्यया दत्तं पूर्वजन्म व्यचिन्तयन् ।
सा च तं प्रौढमालोक्य पितुराज्ञामवाप्य च ॥
स्वयम्वरे स्वभर्त्तारं लेभे साध्वी नृपात्मजम् ॥ ६० ॥

श्रीमार्कण्डेय उवाच

एतद्वृत्तान्तमभवत्तस्मिंस्तीर्थे नृपोत्तम । एतस्मात्कारणान्मेध्यं तीर्थमेतत्सदा नृप
अष्टम्यां वा चतुर्द्दश्यां सर्वकालं नरेश्वर । विशेषाच्चाश्विने मासि कृष्णपक्षे चतुर्द्दशीम्
स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्पिषा ।
दध्ना च खण्डयुक्तेन कुशतोयेन वै पुनः ॥ ६३ ॥
श्रीखण्डेन सुगन्धेन गुण्ठयेच्च महेश्वरम् । ततः सुगन्धपुष्पैश्च बिल्वपत्रैश्च पूजयेत्
मुचुकुन्देन कुन्देन जातीकाशकुशोद्भवैः । उन्मत्तमुनिपुष्पौघैः पुष्पैस्तत्कालसम्भवैः
अर्चयेत्परया भक्त्या हनूमन्तेश्वरं शिवम् । घृतेन दापयेद्दीपं तैलेन तदभावतः
श्राद्धं च कारयेत्तत्र ब्राह्मणैर्वेदपारगैः । सर्व्वलक्षणसम्पूर्णैः कुलीनैर्गृहपालकैः
तर्पयेद् ब्राह्मणान् भक्त्या वसनान्नहिरण्यतः ।
नरकस्था दिवं यान्तु प्रोच्येति प्रणमेद् द्विजान् ॥ ६८ ॥
पतितान्वर्जयेद् विप्रान्वृषली यस्य गेहिनी । स्ववृषश्चापरित्यज्य वृषैरन्यैर्वृषायते
वृषलीं तां विदुर्द्देवा न शूद्री वृषली भवेत् । ब्रह्महत्या सुरापानं गुरुदारनिषेवणम्
सुवर्णहरणन्यास मित्रद्रोहोद्भवं तथा । नश्यते पातकं सर्वमित्येवं शङ्करोऽब्रवीत्

श्रीमार्कण्डेय उवाच

वाक्प्रलापेन भो वत्स बहुनोक्तेन किं मया । सर्वपातकसंयुक्तो दद्याद्दानं द्विजन्मने
गोदानञ्च प्रकर्त्तव्यमस्मिंस्तीर्थे विशेषतः ।
गोदानं हि यतः पार्थ! सर्वदानाधिकं स्मृतम् ॥ १०३ ॥
सर्वदेवमया गावः सर्वे देवास्तदात्मकाः । शृङ्गाग्रेषु महीपाल शक्रो वसति नित्यशः
उरः स्कन्दः शिरो ब्रह्मा ललाटे वृषभध्वजः । चन्द्रार्कौ लोचने देवौ जिह्वायाञ्च सरस्वता
मरुद्गणाः सदा साध्या यस्या दन्ता नरेश्वर !।

हुङ्कारे चतुरो वेदान्विद्यात्साङ्गपदक्रमान् ॥ १०५ ॥
ऋषयो रोमकूपेषु ह्यसङ्ख्यातास्तपस्विनः ।
दण्डहस्तो महाकायः कृष्णो महिषवाहनः ॥ १०६ ॥
यमः पृष्ठस्थितो नित्यं शुभाशुभपरीक्षकः ।
चत्वारः सागराः पुण्याः क्षीरधाराः स्तनेषु च ॥ १०७ ॥
विष्णुपादोद्भवा गङ्गा दर्शनात्पापनाशिनी ।
प्रस्रावे संस्थिता यस्मात्तस्माद्वन्द्या सदा बुधैः ॥ १०८ ॥
लक्ष्मीश्च गोमये नित्यं पवित्रा सर्वमङ्गला ।
गोमयालेपनं तस्मात्कर्त्तव्यं पाण्डुनन्दन !॥ १०९ ॥
गन्धर्वाप्सरसो नागाः खुराग्रेषु व्यवस्थिताः ।
पृथिव्यां सागरान्तायां यानि तीर्थानि भारत !।
तानि सर्वाणि जानीयाद्गोर्गव्यं तेन पावनम् ॥ ११० ॥

युधिष्ठिर उवाच

सर्वदेवमयी धेनुर्गीर्वाणाद्यैरलङ्कृता । एतत्कथय मे तात कस्माद्गोषु समाश्रिताः

श्रीमार्कण्डेय उवाच

सर्वदेवमयो विष्णुर्गावो विष्णुशरीरजाः ।
देवास्तदुभयात्तस्मात्कल्पिता विविधा जनैः ॥ ११२ ॥
श्वेता वा कपिला वापि क्षीरिणी पाण्डुनन्दन ।
सवत्सा च सुशीला च सितवस्त्राऽवगुण्ठिता ॥ ११३ ॥
कांस्यदोहनिका देया स्वर्णशृङ्गी सुभूषिता ।
हनूमन्तेश्वरस्याऽग्रे भक्त्या विप्राय दापयेत् ॥ ११४ ॥
नियमस्थेन सा देया स्वर्गमानन्त्यमिच्छता । असमर्थाययेद्युर्विष्णुलोके प्रयान्ति ते
असौ लोके च्युतो राजन्भूतले द्विजमन्दिरे । कुशलो जायते पुत्रो गुणविद्याधनर्द्धिमान्
सर्वपापहरं तीर्थं हनूमन्तेश्वरं नृप !। शृण्वन्विमुच्यते पापाद्वर्णसङ्करसम्भवात् ॥

दूरस्थश्चिन्तयन्पश्यन्मुच्यते नाऽत्र संशयः ॥ ११८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे हनूमन्तेश्वरतीर्थमाहात्म्यवर्णनं नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

चतुरशीतितमोऽध्यायः

कपितीर्थरामेश्वरलक्ष्मणेश्वरकुम्भेश्वरमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
कैलासे पृच्छते भक्त्या षण्मुखाय शिवोदितम् ॥ १ ॥

ईश्वर उवाच

पूर्वंत्रेतायुगेस्कन्द! हतोरामेणरावणः । चतुर्दश तदा कोट्यो निहता ब्रह्मरक्षसाम् हतेषु तेषु वै तत्र रक्षणाय दिवौकसाम् । महानन्दस्तदा जातस्त्रिषु लोकेषु पुत्रक ततः सीतांसमासाद्यसमंवानरपुङ्गवैः । रामोऽप्ययोध्यामायातो भरतेनकृतोत्सवः

तस्मै समर्पयामास स राज्यं लक्ष्मणाग्रजः ॥ ४ ॥
तस्मिन्प्रशासति ततो राज्यं निहतकण्टकम् ।
कृतकार्योऽथ हनुमान्कैलासमगत्पुरा ॥ ५ ॥

ततो नन्दीप्रतीहारोरुद्रांशमपि तं कपिम् । नचसङ्गमयामासरुद्रेणाऽघौघहारिणा

तेन पृष्टस्तदा नन्दी किं मया पातकं कृतम् ।
येन रुद्रवपुः पुण्यं न पश्याम्यम्बिकान्वितम् ॥ ७ ॥

नन्द्युवाच

त्वयाऽवतरणं चक्रे कपीन्द्राऽमरहेतुना । तथाऽपि हि कृतं पापमुपभोगेनशाम्यति

हनुमानुवाच

किं मयाऽकारि तत्पापं नन्दिन्देवार्थकारिणा ।
राक्षसाश्च हता दुष्टा विप्रयज्ञाङ्गघातिनः ॥ ९ ॥
ततस्तदालापकुतूहली हरो निजांशभाजं कपिमुग्रतेजसम् ।
उवाच द्वारान्तरदत्तदृष्टिः पुरः स्थितं प्रेक्ष्य कपीश्वरं पुनः ॥ १० ॥

ईश्वर उवाच

गङ्गा गया कपे! रेवा यमुना च सरस्वती । सर्वपापहरानद्यस्तासुस्नानं समाचर नर्मदादक्षिणे कूले तीर्थं परमशोभनम् । सोमनाथसमीपस्थं तत्र त्वं गच्छ वानर

तत्र स्नात्वा महापापं गमिष्यति ममाऽऽज्ञया ।
उत्पत्य वेगाद्धनुमाञ्छ्रीरेवादक्षिणे तटे ॥ १३ ॥

जगाम सुमहानादस्तपश्चक्रे सुदुष्करम् । तस्य वै तप्यमानस्य रक्षोवधकृतं तमः बिलीनं पार्थ कालेन कियतेशप्रसादतः । ततो देवैः समं देवस्तत्तीर्थमगमद्धरः ॥ कपिमालिङ्गयामास वरं तस्मैप्रदत्तवान् । अद्यप्रभृति ते तीर्थंभविष्यति न संशयः कपितीर्थं ततो जातं तस्थौ तत्र स्वयं हरः । हनूमन्तेश्वरोनाम्नासर्वहत्याहरस्तदा

तत्र तीर्थे तु यः स्नात्वा भक्त्या लिङ्गं प्रपूजयेत् ।
सर्वपापानि नश्यन्ति हरस्य वचनं यथा ॥ १८ ॥
तत्राऽस्थीनि विलीयन्ते पिण्डदानेऽक्षया गतिः ।
यत्किञ्चिद्दीयते तत्र तद्धि कोटिगुणं भवेत् ॥ १९ ॥

हनुमानप्ययोध्यायां रामंद्रष्टुमथाऽगमत् । चकार कुशलप्रश्नंस्वस्वरूपंन्यवेदयत्

श्रीराम उवाच

कुर्वतोदेवकार्यं तेममकार्यंच कुर्वतः । ततोऽहमपिपापीयांस्तपस्तप्स्याम्यसंशयम् नत्रैव दक्षिणे कूले रेवायाः पापहारिणि । चतुर्विंशतिवर्षाणि तपस्तेपेऽथराघवः

ज्योतिष्मतीपुरीसंस्थः श्रीरेवास्नानमाचरन् ।
तस्य शुश्रूषणं चक्रे लक्ष्मणोऽपि तदाज्ञया ॥ २३ ॥

स्थापयामासतुर्लिङ्गं तौ तदारामलक्ष्मणौ । प्रभावात्तस्यतपसोरेवातीरेमहामती

निष्पापतां तदा वीरौ जग्मतू रामलक्ष्मणौ ॥ २४ ॥

ततस्तदा देवपुरोगमो हरो गतो हि वै पुण्यमुनीश्वरैः सह ।

आगत्य तीर्थं च वरं ददौ तदा निजां कलां तत्र विमुच्य तीर्थे ॥ २५ ॥

मुनिभिः सर्वतीर्थानां क्षिप्तं कुम्भोदकं भुवि ।

एकस्थं लिङ्गनामाथ कलाकुम्भस्तथाऽभवत् ॥ २६ ॥

कुम्भेश्वर इति ख्यातस्तदा देवगणार्चितः ।

रामोऽपि पूजयामास तल्लिङ्गं देवसेवितम् ॥ २७ ॥

ततो वरं ददौ देवो रामकीर्त्यभिवृद्धये । चतुर्विंशतिमे वर्षे रामो निष्पापतांगतः

यदा कन्यागतः पङ्गुर्गुरुणा सहितो भवेत् । तदेवदेवयात्रेयमिति देवा जगुर्मुदा ॥

यथा गोदावरीतीर्थे सर्वतीर्थफलं भवेत् । तथात्ररेवास्नानेनलिङ्गानांदर्शनैर्नृणाम्

करिष्यन्त्यत्र ये श्राद्धंपितॄणांनर्मदातटे । कुम्भेश्वरसमीपस्थास्तत्फलंशृणुषण्मुख

यावन्तो रोमकूपाः स्युःशरीरेसर्वदेहिनाम् । तावद्वर्षप्रमाणेनपितॄणामक्षयागतिः

पृथिव्यां देवताः सर्वा सर्वतीर्थानि यानि तु ।

लभन्ते तत्फलं मर्त्या लिङ्गत्रयविलोकनात् ॥ ३३ ॥

अपुत्रो लभतेपुत्रंनिर्द्धनोधनमाप्नुयात् । सरोगोमुच्यतेरोगान्नाऽत्रकार्याविचारणा

सिंहराशिगते जीवे यत्स्याद्गोदावरीफलम् ।

तद्द्वादशगुणं स्कन्द! कुम्भेश्वरसमीपतः ॥ ३५ ॥

ये जानन्ति न पश्यन्ति कुम्भशम्भुमुमापतिम् ।

नर्मदादक्षिणे कूले तेषां जन्म निरर्थकम् ॥ ३६ ॥

यथा गोदावरीयात्राकर्त्तव्यामुनिशासनात् । चतुर्विंशतिमे वर्षेतथेयंदेवभाषितम्

यावच्चन्द्रश्च सूर्यश्च यावद्वै दिवि तारकाः । तावत्तदक्षयं दानंरेवाकुम्भेश्वरान्तिके

महादानानि देयानि तत्र लौकैर्विचक्षणैः । गोदानमत्रशंसन्ति सौवर्णं राजतंतथा

यस्याः स्मरणमात्रेण नश्यते पापसञ्चयः ।

स्नानेन किं पुनः स्कन्द ब्रह्महत्यां व्यपोहति ॥ ४० ॥

तत्र तीर्थेतुयःस्नात्वाश्राद्धं कुर्याद्युधिष्ठिर । एकोत्तरंकुलशतमुद्धरेच्छिवशासनात्

यानि कानि च तीर्थानि चासमुद्रसरांसि च ।

शिवलिङ्गार्च्चनस्येह कलां नार्हन्ति षोडशीम् ॥ ४२ ॥

एवं देवा वरं दत्त्वाहरीश्वरपुरोगमाः । स्वस्थानमगमन्पूर्वमुक्त्वातन्नामचोत्तमम्

तीर्थस्याऽस्य वरं दत्वा स रामो लक्ष्मणाग्रजः ।

अयोध्यां प्रविवेशाऽसौ निष्पापो नर्मदाजलात् ॥ ४४ ॥

सौवर्णीं च ततः कृत्वा सीतां यज्ञं चकार सः ।

अनुमन्त्र्य मुनींल्लोकान्देवताश्च निजं कुलम् ॥ ४५ ॥

पुरा त्रेतायुगे जातं तत्तीर्थं स्कन्दनामकम् ।

नियमेन ततो लोकैः कर्त्तव्यं लिङ्गदर्शनम् ॥ ४६ ॥

तावत्पापानि देहेषु महापातकजान्यपि । यावन्नप्रेक्षते जन्तुस्तत्तीर्थं देवसेवितम्

ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ।

ज्योतिष्मतीपुरीसंस्थं ये द्रक्ष्यंति हरं परम् ॥ ४८ ॥

तस्मान्मोहं परित्यज्य जनैर्गन्तव्यमादरात् ।

तीर्थाऽशेषफलावाप्त्यै तीर्थं कुम्भेश्वराह्वयम् ॥ ४९ ॥

मार्कण्डेय उवाच

श्रुत्वेति शम्भुवचसा स षडाननोऽथ नत्वा पितुःपदयुगाम्बुजमादरेण ।

सम्प्राप्य दक्षिणतटं गिरिशस्रवन्त्याःकीशाग्रग्रामकलशाख्यशिवान् ददर्श

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे

रेवाखण्डे कपितीर्थरामेश्वरलक्ष्मणेश्वरकुम्भेश्वरमाहात्म्यवर्णनंनाम-

चतुरशीतितमोऽध्यायः ॥ ८४ ॥

———

पञ्चाशीतितमोऽध्यायः

सोमनाथतीर्थमाहात्म्यवर्णमम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्रनर्मदायाः पुरातनम् । ब्रह्महत्याहरंतीर्थंवाराणस्यासमंहितत्

युधिष्ठिर उवाच

आश्चर्यं कथ्यतां ब्रह्मन्यद्वृत्तंनर्मदातटे । वाराणस्या समं कस्मादेतत्कथयमे प्रभो

निमग्नो दुःखसंसारे हृतराज्यो द्विजोत्तम !।

युष्मद्वाणीजलस्नातो निर्दुःखः सह बान्धवैः ॥ ३ ॥

श्रीमार्कण्डेय उवाच

साधुसाधु महाबाहोसोमवंशविभूषण । पृष्टोऽस्मिदुर्लभंतीर्थं गुह्याद्गुह्यतरंपरम्

आदौ पितामहस्तावत्समस्तजगतः प्रभुः ।

मनसा तस्य सञ्जाता दशैव ऋषिपुङ्गवाः ॥ ५ ॥

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वसिष्ठं च भृगुं नारदमेव च

जज्ञे प्राचेतसं दक्षं महातेजाः प्रजापतिः ।

दक्षस्याऽपि तथा जाताः पञ्चाशद् दुहिताः किल ॥ ७ ॥

ददौ स दश धर्माय कश्यपाय त्रयोदश । तथैव स महाभागः सप्तविंशतिमिन्दवे

रोहिणी नाम या तासामभीष्टा साऽभवद्विधोः ।

शेषासु करुणां कृत्वा शप्तो दक्षेण चन्द्रमाः ॥ ६ ॥

क्षयरोग्यभवच्चन्द्रो दक्षस्यायं प्रजापतेः । सच शापप्रभावेणनिस्तेजाःशर्वरीपतिः

गतः पितामहं सोमो वेपमानोऽमृतांशुमान् ।

पद्मयोने! नमस्तुभ्यं वेदगर्भ नमोऽस्तु ते ॥

शरणं त्वां प्रपन्नोऽस्मि पाहि मां कमलासन !॥ ११ ॥

ब्रह्मोवाच

निस्तेजाः शर्वरीनाथ कलाहीनश्च दृश्यसे । उद्विग्नमानसस्तात सञ्जातःकेनहेतुना

सोम उवाच

दक्षशापेन मे ब्रह्मन्निस्तेजस्त्वंजगत्पते । निर्हारश्चाऽस्यशापस्यकथ्यतांमेपितामह

ब्रह्मोवाच

सर्वत्र सुलभा रेवा त्रिषु स्थानेषु दुर्लभा । ओङ्कारेऽथभृगुक्षेत्रेतथाचैवौर्विसङ्गमे

तत्र गच्छ क्षपानाथयत्र रेवान्तरं तटम् । त्वरितोऽसौ गतस्तत्रयत्ररेवौर्वसङ्गमः

काष्ठावस्थः स्थितः सोमो दध्यौ त्रिपुरवैरिणम् ।

यावद्वर्षशतं पूर्णं तावत्तुष्टोमहेश्वरः ॥ १६ ॥

प्रत्यक्षः सोमराजस्य वृषासन उमापतिः ।

साष्टाङ्गं प्रणिपत्योच्चैर्जय शम्भो! नमोऽस्तुते ॥ १७ ॥

जय शङ्कर! पापहराय! नमोजय ईश्वर ते जगदीश! नमः ।

जय वासुकिभूषणधार! नमो जय शूलकपालधराय नमः ॥ १८ ॥

जय अन्धकदेहविनाश! नमो जय दानववृन्दवधाय नमः ।

जय निष्कलरूप! सकलाय नमो जय काल कामदहाय नमः ॥ १६ ॥

जय मेचककण्ठधराय नमो जय सूक्ष्मनिरञ्जनशब्द! नमः ।

जय आदिरनादिरनन्त! नमो जय शङ्कर! किङ्करमीश भज ॥ २० ॥

एवं स्तुतोमहादेवःसोमराजेनपाण्डव । तुष्टस्तस्य नृपश्रेष्ठ! शिवयाशङ्करोऽब्रवीत्

ईश्वर उवाच

वरं प्रार्थय मे भद्र! यत्ते मनसि वर्त्तते । साधुसाधुमहासत्त्व तुष्टोऽहं तपसा तव

सोम उवाच

दक्षशापेन दग्धोऽहं क्षीणसत्वो महेश्वर । शापस्योपशमं देव कुरु शर्म मम प्रभो !॥

ईश्वर उवाच

तव भक्तिगृहीतोऽहमुमया सह तोषितः ।

निष्पापः सोमनाथस्त्वं सञ्जातस्तीर्थसेवनात् ॥ २४ ॥
इत्यूचे देवदेवेशः क्षणं ध्यात्वेन्दुना ततः ।
स्थापितं परमं लिङ्गं कामदं प्राणिनां भुवि ॥
सर्वदुःखहरं तत्तु ब्रह्महत्याविनाशनम् ॥ २५ ॥

युधिष्ठिर उवाच

सोमनाथप्रभावं मे संक्षेपात्कथयप्रभो । दुःखार्णवनिमग्नानांत्राताप्राप्तोद्विजोत्तम

श्रीमार्कण्डेय उवाच

शृणु तीर्थप्रभावं ते संक्षेपात्कथयाम्यहम् । यद्वृत्तमुत्तरे कूले रेवाया उरिसङ्गमे
शम्बरोनामराजाभूत्तस्यपुत्रस्त्रिलोचनः । त्रिलोचनसुतःकण्वःसपापर्द्धिपरोऽभवत्
वने नित्यंभ्रमन्सोऽथमृगयूथं ददर्शह । मृगयूथं हतं तत्तु त्रिलोचनसुतेन च ॥ २६ ॥
मृगरूपी द्विजोमध्येचरतेनिर्जने वने । स हतस्तेन संगेनकण्वेन मुनिसत्तम !॥ ३०॥
ब्रह्महत्यान्वितः कण्वो निस्तेजा व्यचरन्महीम् ।
व्यचरंश्चैव सम्प्राप्तो नर्मदामुरिसङ्गमे ॥ ३१ ॥
किंशुकाशोकबहुले जम्बीरपनसाकुले । कदम्बपाटलाकीर्णे बिल्वनारङ्गशोभिते ॥
चिञ्चिणीचम्पकोपेते ह्यगस्तितरुछादिते । प्रभूतभूतसंयुक्तं वनं सर्वत्र शोभितम् ॥
चित्रकैर्मृगमार्जारैर्हिस्रैः शम्बरशूकरैः । शमैर्गवयसंयुक्तैः शिखण्डिखरमण्डितम् ॥
प्रविष्टस्तु वने कण्वस्तृषार्त्तःश्रमपीडितः । स्नातो रेवाजलेपुण्ये सङ्गमेपापनाशने
अर्चितः परया भक्त्या सोमनाथो युधिष्ठिर !।
पपौ सुविमलं तोयं सर्वपापक्षयङ्करम् ॥ ३६ ॥
फलानि चविचित्राणिचखादसहकिङ्करैः । सुप्तःपादपच्छायायांश्रान्तोमृगवधेनच
तावत्तीर्थवरं विप्रःस्नानार्थसङ्गमं गतः। मार्गगो ब्राह्मणोहर्षोद्युक्तस्तद्गतमानसः
अबला तमुवाचेदं तिष्ठतिष्ठ द्विजोत्तम । त्रस्तो निरीक्षते यावद्दिशःसर्वानरेश्वर
तावद्वृक्षसमारूढांस्त्रियंरक्ताम्बरावृताम् रक्तमाल्यांतदाबालांरक्तचन्दनचर्चिताम्
रक्ताभरणशोभाढ्यां पाशहस्तां ददर्श ह ॥ ४० ॥

स्त्र्युवाच

सन्देशं श्रूयतां विप्र! यदि गच्छसि सङ्गमे ।
मद्भर्त्ता तिष्ठते तत्र शीघ्रमेव विसर्जय ॥ ४१ ॥
[ए]काकिनी च ते भार्या तिष्ठते वनमध्यगा । इत्याकर्ण्यगतोविप्र सङ्गमे सुरदुर्लभे
वृक्षच्छायान्वितः कण्वो ब्राह्मणेनाऽवलोकितः ।
उवाच तं प्रति तदा वचनं ब्राह्मणोत्तमः ॥ ४३ ॥

ब्राह्मण उवाच

वनान्तरे मया दृष्टा बाला कमललोचना । रक्ताम्बरधरा तन्वी रक्तचन्दनचर्चिता
रक्तमाल्या सुशोभाढ्या पाशहस्तामृगेक्षणा ।
वृक्षारूढाऽवदद्वाक्यं मद्भर्त्ताप्रेष्यतामिति ॥ ४५ ॥

कण्व उवाच

कस्मिन्स्थानेतु विप्रेन्द्रविद्यते मृगलोचना । कस्यसाकेनकार्येणसर्वमेतद्वदाशु मे

ब्राह्मण उवाच

सङ्गमादर्द्धक्रोशे सा उद्यानान्तेहिविद्यते । वचनाद्ब्राह्मणस्यै[त]ानज्ञातापार्थिवेनतु
तदा स कण्वभूपालः स्वकं दूतं समादिशत् ।

कण्व उवाच

गच्छ त्वं पृच्छतां तां काऽऽगता क्व गमिष्यसि ।
प्रेषितस्त्वरितो दूतो गतो नारीसमीपतः ॥ ४८ ॥
वृक्षस्थां ददृशे बालामुवाच नृपसत्तम !।
मन्नाथः पृच्छति त्वां तु काऽसि त्वं क्व गमिष्यसि ॥ ४६ ॥

कन्योवाच

गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ।
इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ५० ॥
ब्रह्महत्याचसञ्जाता मृगरूपधरद्विजात् । मयायुक्तोऽपितेराजामुक्तस्तीर्थप्रभावतः

अर्द्धक्रोशान्तरान्मध्ये ब्रह्महत्या न सम्विशेत् ।
सोमनाथप्रभावोऽयं वाराणस्याः समः स्मृतः ॥ ५२ ॥
गच्छत्वं प्रेष्यतां राजाशीघ्रमत्र न संशयः । गतोभृत्यस्ततःशीघ्रंवेपमानःसुविह्वलः
समस्तंकथयामासयद्वृत्तंहि पुरातनम् । तस्यवाक्यादसौराजापतितोधरणीतले

भृत्य उवाच

कस्मात्त्वं शोचसे नाथ! पूर्वोपात्तं शुभाशुभम् ।
इत्याकर्ण्य वचस्तस्य राजा वचनमब्रवीत् ॥ ५५ ॥
प्राणत्यागं करिष्यामि सोमनाथसमीपतः ।
शीघ्रमानीयतां वह्निरिन्धनानि वहूनि च ॥ ५६ ॥
आनीतं तत्क्षणात्सर्वं भृत्यैस्तद्वशवर्त्तिभिः । स्नानंकृत्वाशुभेतोयेसङ्गमेपापनाशने
अर्चितः परया भक्त्या सोमनाथो महीभृता ।
त्रिःप्रदक्षिणतः कृत्वा ज्वलन्तं जातवेदसम् ॥ ५८ ॥
प्रविष्टः कण्वराजाऽसौ हृदि ध्यात्वा जनार्दनम् ।
पीताम्बरधरं देवं जटामुकुटधारिणम् ॥ ५६ ॥
श्रियायुक्तं सुपर्णस्थं शङ्खचक्रगदाधरम् । सुरारिसूदनं दध्यौ सुगतिर्मे भवत्विति
पपात पुष्पवृष्टिस्तु साधुसाधु नृपात्मज !।
आश्चर्यमतुलं दृष्ट्वा निरीक्ष्य च परस्परम् ॥ ६१ ॥
मृतं तैः पावके भृत्यैर्हृदि ध्यात्वा गदाधरम् ।
विमानस्थास्ततः सर्वे सञ्जाताः पाण्डुनन्दन !॥ ६२ ॥
निष्पापास्तेदिवंयाताःसोमनाथप्रभावतः । ब्राह्मणेसङ्गमेतत्रध्यायमानेवृषध्वजम्

श्रीमार्कण्डेय उवाच

सोमनाथप्रभावोऽयंशृणुष्वैकमनाविधिम् । अष्टम्यां वा चतुर्दश्यांसर्वकालंरवेर्दिने
विशेषाच्छुक्लपक्षेचेत्सूर्यवारेणसप्तमी । उपोष्य योनरोभक्त्यारात्रौकुर्वीतजागरम्
पञ्चामृतेन गव्येन स्नापयेत्परमेश्वरम् । श्रीखण्डेन ततो गुण्ठ्यपुष्पधूपादिकं ददेत्

घृतेनबोधयेद्दीपंनृत्यंगीतं च कारयेत् ।सोमवारे तथाऽष्टम्यांप्रभातेपूजयेद्द्विजान्
जितक्रोधानात्मवतः परनिन्दाविवर्जितान् ।
सर्वांरुचिराञ्छस्तान् स्वदारपरिपालकान् ॥ ६८ ॥
गायत्रीपाठमात्रांश्च विकर्मविरतान्सदा । पुनर्भू वृषली शूद्री चरेयुर्यस्य मन्दिरे ॥
दूरतोऽसौ द्विजस्त्याज्य आत्मनः श्रेय इच्छता ।
हीनाङ्गाऽनतिरिक्तांगान्येषां पूर्वापरं न हि ॥ ७० ॥
व्रजे श्राद्धे तथा दाने दूरतस्तान्विवर्जयेत् ।
आयसीतरुणीतुल्या द्विजाः स्वाध्यायवर्जिताः ॥ ७१ ॥
आत्मानं सह याज्येन पातयन्ति न संशयः ।
शाल्मलीनावतुल्याः स्युः षट्कर्मनिरता द्विजाः ॥ ७२ ॥
दातारंचतथाऽऽत्मानंतारयन्तितरन्ति च । श्राद्धंसोमेश्वरेपार्थ!यःकुर्याद्गतमत्सरः
प्रेतास्तस्य हि सुप्रीता यावदाभूतसम्प्लवम् ।
अन्नं वस्त्रं हिरण्यं च यो दद्यादग्रजन्मने ॥ ७४ ॥
स यातिशाङ्करेलोक इतिमेसत्यभाषितम् । हयंयोयच्छते तत्र सम्पूर्णंतरुणंसितम्
रक्तं वा पीतवर्णं वा सर्वलक्षणसंयुतम् । कुङ्कुमेन विलिप्ताङ्गावग्रजन्महयावपि ॥
स्रग्दामभूषितौ कार्यौ सितवस्त्रावगुण्ठितौ ।
अङ्घ्रिः प्रदीयतां स्कन्धे मदीये हयमारुह ॥ ७७ ॥
आरूढे ब्राह्मणेब्रूयाद्भास्करःप्रीयतामिति । स यातिशाङ्करंलोकंसर्व्वपापविवर्जितः
उपरागे तु सोमस्य तीर्थं गत्वा जितेन्द्रियः ।
सत्यलोकाच्च्युतश्चाऽपि राजा भवति धार्मिकः ॥ ७६ ॥
तस्यवासःसदाराजन्न नश्यति कदाचन । दीर्घायुर्जायते पुत्रो भार्या च वशवर्तिनी
जीवेद्वर्षशतंसाग्रं सर्वदुःखविवर्जितः । सोपवासोजितक्रोधो धेनुं दद्याद्द्विजन्मने
सवत्सां क्षीरसंयुक्तां श्वेतवस्त्रावलोकिताम् ।
शबलां पीतवर्णां च धूम्रां वा नीलकर्बुराम् ॥ ८२ ॥

कपिलां वा सवत्सां च घण्टाभरणभूषिताम् ।

रूप्यखुरां कांस्यदोहां स्वर्णशृङ्गीं नरेश्वर ॥ ८३ ॥

श्वेतयावर्द्धतेवंशोरक्तासौभाग्यवर्द्धिनी । शबलापीतवर्णाच दुःखघ्न्यौसम्प्रकीर्तिते

कपिलानाशयेत्पापं सप्तजन्मसमुद्भवम् । सत्यलोकमवाप्नोति गोप्रदायी नरेश्वर ॥

पक्षान्तेऽथव्यतीपातेवैधृतौरविसङ्क्रमे । दिनक्षये गजच्छायां ग्रहणेभास्करस्यच

ये व्रजन्ति महात्मानः सङ्गमेसुरदुर्ल्लभे । मृदावगुण्ठयित्वातुचात्मानंसङ्गमेविशेत्

हृदयान्तर्जलेजाप्याप्राणायामोऽथवानृप । गायत्रीवैष्णवीचैवसौरीशैवीयदृच्छया

तेऽपि पापैः प्रमुच्यन्त इत्येवं शङ्करोऽब्रवीत् ॥ ८८ ॥

जगतीं सोमनाथस्य यस्तु कुर्यात्प्रदक्षिणाम् ।

प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥ ८९ ॥

ब्रह्महत्या सुरापानंगुरुदारनिषेवणम् । भ्रूणहा स्वर्णहर्त्ता च मुच्यन्तेनाऽत्रसंशयः

तीर्थाख्यानमिदं पुण्यं यः शृणोति जितेन्द्रियः ।

व्याधितो मुच्यते रोगी चारोगी सुखमाप्नुयात् ॥ ९१ ॥

यत्ते सन्दह्यते चेतः शृणु तन्मे युधिष्ठिर !।

नैकाऽपि नृप! लोकेऽस्मिन्भ्रूणहत्या सुदुस्त्यजा ॥ ९२ ॥

किमु षड्विंशतिं पार्थ! प्राप याः क्षणदाकरः ।

सोऽपि तीर्थमिदं प्राप्य तपस्तप्त्वा सुदुश्चरम् ॥ ९३ ॥

विमुक्तः सर्वपापेभ्यःशीतरश्मिरभूत्सुखी । श्रूयतेनृपपौराणीगाथागीतामहर्षिभि

लिङ्गं प्रतिष्ठितंह्येकंदशभ्रूणहनं भवेत् । अतोलिङ्गत्रयंसोमः स्थापयामासभारत

रेवोरिसङ्गमे ह्याद्यं द्वितीयंभृगुकच्छके । ततःसिद्धिं परां प्राप्यप्रभासे तुतृतीयकम्

इति ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ।

धर्म्यं यशस्यमायुष्यं स्वर्ग्यं संशुद्धिकृन्नृणाम् ॥ ९७ ॥

पुत्रार्थी लभते पुत्रान्निष्कामः स्वर्गमाप्नुयात् ।

मुच्यते सर्वपापेभ्यस्तीर्थं कृत्वा परं नृप !॥ ९८ ॥

एतत्ते सर्वमाख्यातं सोमनाथस्य यत्फलम् ।

श्रुत्वा पुत्रमवाप्नोति स्नात्वा चाऽष्टौ नसंशयः ॥ ९९ ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे सोमनाथतीर्थमाहात्म्यवर्णनंनाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

षडशीतितमोऽध्यायः

पिङ्गलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज पिङ्गलावर्त्तमुत्तमम् । सङ्गमस्य समीपस्थं रेवायाउत्तरेतटे

हव्यवाहेन राजेन्द्र! स्थापितः पिङ्गलेश्वरः ॥ १ ॥

युधिष्ठिर उवाच

हव्यवाहेन भगवन्नीश्वरःस्थापितःकथम् । एतदाख्याहि मेसर्वंप्रसादाद्वक्तुमर्हसि

मार्कण्डेय उवाच

शम्भुना रेतसाराजंस्तर्पितोहव्यवाहनः । प्राप्तसौख्येनरौद्रेणगौर्याक्रीडनचेतसा

हव्यवाहमुखे क्षिप्तं रुद्रेणामिततेजसा । रुद्रस्य रेतसा दग्धस्तीर्थयात्राकृतादरः ॥

सागरांश्च नदीर्गत्वाक्रमाद्रेवां समागतः । चचारपरयाभक्त्याध्यानमुग्रं हुताशनः

वायुभक्षः शतं साग्रं यावत्तेपे हुताशनः । तावत्तुष्टो महादेवो वरदो जातवेदसः ॥

सन्निधौ समुपेत्याथ वचनं चेदमब्रवीत् ॥ ६॥

ईश्वर उवाच

वरं वृणीष्व हव्याश! यत्ते मनसि वर्तते ॥ ७ ॥

वह्निरुवाच

नमस्ते सर्वलोकेश! उग्रमूर्ते नमोऽस्तु ते । रेतसा तव सन्दग्धःकुष्ठीजातो महेश्वर

कृपां कुरु महादेव! मम रोगं विनाशय ॥ ८ ॥

ईश्वर उवाच

हव्यवाह! भवारोगो मत्प्रसादाच्च सत्वरम् ।

अत्रतीर्थे कृतस्नानः स्वरूपं प्रतिपत्स्यसे ॥ ६ ॥

इत्युक्त्वा च महादेवस्तत्रैवान्तरधीयत । अनन्तरंहव्यवाहः सस्नौरेवाजलेत्वरन् तदैवरोगनिर्मुक्तोऽभवद्दिव्यस्वरूपवान् । स्थापयामासदेवेशंसवह्निःपिङ्गलेश्वरम् नाम्नासम्पूजयामासतुष्टावस्तुतिभिर्मुदा । ततोजगामदेशं स्वं देवानांहव्यवाहनः हव्यवाहेन भूपैवं स्थापितः पिङ्गलेश्वरः । जितक्रोधोहियस्तत्र उपवासंसमाचरेत्

अतिरात्रफलं तस्य अन्ते रुद्रत्वमाप्नुयात् ।

गुणान्विताय विप्राय कपिलां तत्र भारत !॥ १४ ॥

अलङ्कृत्य सवत्सां च शक्त्याऽलङ्कारभूषिताम् ।

यः प्रयच्छति राजेन्द्र! स गच्छेत्परमां गतिम् ॥ १५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे पिङ्गलेश्वरतीर्थमाहात्म्यवर्णनंनाम षडशीतितमोऽध्यायः ॥ ८६ ॥

सप्ताशीतितमोऽध्यायः

ऋणत्रयमोचनतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल तीर्थं परमशोभनम् । स्थापितंमुनिसङ्घैर्यद्ब्रह्मवंशसमुद्भवैः ऋणमोचनमित्याख्यंरेवातटसमाश्रितम् । षण्मासंमनुजोभक्त्यातर्पयन्पितृदेवताः

देवैः पितृमनुष्यैश्च ऋणमात्मकृतं च यत् ।

मुच्यते तत्क्षणान्मर्त्यः स्नातो वै नर्मदाजले ॥ ३ ॥

प्रत्यक्षं दुरितं तत्र दृश्यते फलरूपतः । तत्र तीर्थे तु यो राजन्नेकचित्तो जितेन्द्रियः

स्नात्वा दानं च वै दद्यादर्चयेद्गिरिजापतिम् ।

ऋणत्रयविनिर्मुक्तो नाके दीप्यति देववत् ॥ ५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां पञ्चमेऽवन्तीखण्डे रेवाखण्डे रेवाखण्डेऋणत्रयमोचनतीर्थमाहात्म्यवर्णनंनामसप्ताशीतितमोऽध्यायः ॥ ८७ ॥

अष्टाशीतितमोऽध्याय.

कपिलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कंडेय उवाच

तस्यैवानन्तरंपार्थ कापिलंतीर्थमाश्रयेत् । स्थापितं कपिलेनैवसर्वपातकनाशनम्

अष्टम्यां च सिते पक्षे चतुर्दश्यां नरेश्वर !।

स्नापयेत्परया भक्त्या कपिलाक्षीरसर्पिषा ॥ २ ॥

श्रीखण्डेन सुगन्धेन गुण्ठयेतमहेश्वरम् । ततःसुगन्धपुष्पैश्चश्वेतैश्चनृपसत्तम !॥ ३॥

येऽर्चयन्ति जितक्रोधा न ते यान्ति यमालयम् ।

असिपत्रवनं घोरं यमचुल्ली सुदारुणा ॥ ४ ॥

दृश्यते नैव विद्वद्भिः कपिलेश्वरपूजनात् ।

स्नात्वा रेवाजले पुण्ये भोजयेद् ब्राह्मणाञ्छुभान् ॥ ५ ॥

गोप्रदानेन वस्त्रेण तिलदानेन भारत । छत्रशय्या प्रदानेन राजा भवति धार्मिकः तीव्रतेजाविघोरश्चजीवत्पुत्रःप्रियम्वदः । शत्रुवर्गोनतस्यस्यात्कदाचित्पाण्डुनन्दन

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे कपिलेश्वरतीर्थमाहात्म्यवर्णनंनामाऽष्टाशीतितमोऽध्यायः ॥ ८८ ॥

एकोननवतितमोऽध्यायः

पूतिकेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! पूतिकेश्वरमुत्तमम्। नर्मदादक्षिणेकूले सर्वपापक्षयङ्करम्

स्थापितं जाम्बवन्तेन लोकानां तु हितार्थिना।

राजा प्रसेनजिन्नाम तस्यां वक्षस्थलान्मणौ॥ २॥

समुत्क्षिप्ते तु तेनैव सपूतिरभवद्व्रणः। तत्र तीर्थे तपस्तप्त्वा निर्व्रणः समजायत

तेन तत्स्थापितं लिङ्गं पूतिकेश्वरमुत्तमम्। यस्तत्रमनुजोभक्त्यास्नायाद्भरतसत्तम

सर्वान्कामानवाप्नोति सम्पूज्य परमेश्वरम्।

कृष्णाष्टम्यां चतुर्दश्यां सर्वकालं नराधिप!।

येऽर्च्चयन्ति सदा देवं ते न यान्ति यमालयम्॥ ५॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे पूतिकेश्वरतीर्थमाहात्म्यवर्णनं नामैकोननवतितमोऽध्यायः॥८९॥

नवतितमोऽध्यायः

जलाशायितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

रेवायाउत्तरेकूलेवैष्णवं तीर्थमुत्तमम्। जलशायीति वै नाम विख्यातं वसुधातले

दानवानां वधं कृत्वा सुप्तस्तत्र जनार्दनः। चक्रं प्रक्षालितेतत्र देवदेवेन चक्रिणा

सुदर्शनं च निष्पापं रेवाजलसमाश्रयात्॥ २॥

युधिष्ठिर उवाच

चक्रतीर्थं समाचक्ष्व मुनिसङ्घैश्च वन्दितम्।

विष्णोः प्रभावमतुलं रेवायाश्चैव यत्फलम्॥ ३॥

श्रीमार्कण्डेय उवाच

साधुसाधु महाप्राज्ञ! विरक्तस्त्वं युधिष्ठिर!।

गुह्याद्गुह्यतरं तीर्थं निर्मितं चक्रिणा स्वयम्॥ ४॥

तत्तेहं सम्प्रवक्ष्यामि कथां पापप्रणाशिनीम्।

आसीत्पुरा महादैत्यस्तालमेघ इति श्रुतः॥ ५॥

तेनदेवा जिताःसर्वेहृतराज्यानराधिप। यज्ञभागान्स्वयंभुङ्क्तेअहंविष्णुर्नसंशयः

धनदस्य हृतं वित्तं हृतः शक्रस्य वारणः। इन्द्राणीं वाञ्छतेपापो हयरत्नंरवेरपि

तालमेघभयात्पार्थरविरुद्राःसवासवाः। यमःस्कन्दोजलेशोऽग्निर्वायुर्देवोधनेश्वरः

सवाक्पतिमहेशाश्चनष्टचित्ताःपितामहम्। गतादेवाब्रह्मलोकं तत्र दृष्ट्वापितामहम्

तुष्टुवुर्विविधैः स्तोत्रैर्वागीशप्रमुखाः सुराः। गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे

दृष्ट्वा देवान्निरुत्साहान्विवर्णानवनीपते। प्रसादाभिमुखोदेवः प्रत्युवाचदिवौकसः

ब्रह्मोवाच

स्वागतं सुरसङ्घस्यकान्तिर्नष्टापुरातनी। हिमक्लिष्टप्रभावेणज्योतींषीवमुखानिवः

प्रशमादर्चिषामेतदनुद्गीर्णं सुरायुधम्।

वृत्रस्य हन्तुः कुलिशं कुण्ठितश्रीव लक्ष्यते॥ १३॥

किं चायमरिदुर्वारः पाणौ पाशः प्रचेतसः।

मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः॥ १४॥

कुबेरस्य मनः शल्यं शंसतीव पराभवम्। अपविद्धगतो वायुर्भग्नशाख इवद्रुमः॥

यमोऽपि विलिखन्भूमिं दण्डेनास्तमितत्विषा।

कुरुतेऽस्मिन्नमोघोऽपि निर्वाणालातलाघवम्॥ १६॥

अमी च कथमादित्याः प्रतापक्षतिशीतलाः।

चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥ १७ ॥
तद्ब्रूत वत्सा किमितः प्रार्थयध्वं समागताः ।
किमागमनकृत्यं वो ब्रूत निःसंशयं सुराः ॥ १८ ॥
मयि सृष्टिर्हिलोकानां रक्षा युष्मास्ववस्थिता ।
ततो मन्दानिलोद्भूतकमलाकरशोभिना ॥ १९ ॥
गुरुं नेत्रसहस्रेण प्रेषयामास वृत्रहा । स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम् ॥
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम् ।
युष्मद्वंशोद्भवस्तात! तालमेघो महाबलः ॥ २१ ॥
उपतापयते देवान्धूमकेतुरिवोच्छ्रितः । तेनदेवगणाःसर्वे दुःखितादानवेन च ॥२२
तालमेघो दैत्यपतिः सर्वान्नो बाधते बली ।
तस्मात्त्वां शरणं प्राप्ताः शरणं नो विधे भव ॥ २३ ॥
ततः प्रसन्नो भगवान्वेधास्तानब्रवीद्वचः ॥ २४ ॥

ब्रह्मोवाच

तालमेघेन वो मध्ये बली तेन समः सुराः । विनामाधवदेवेनसाध्योमे नैवदानवः
ततःसुरगणाःसर्वेविरञ्चिप्रमुखा नृप । क्षीरोदंप्रस्थिताःसर्वे दुःखितास्तेनवैरिणा
त्वरिताः प्रस्थिता देवाः केशवं द्रष्टुकाम्यया ।
क्षीरोदं सागरं गत्वाऽस्तुवंस्ते जलशायिनम् ॥ २७ ॥

देवा ऊचुः

जगदादिरनादिस्त्वं जगदन्तोऽप्यनन्तकः ।
जगन्मूर्त्तिरमूर्त्तिस्त्वं जय गीर्वाणपूजित! ॥ २८ ॥
जय क्षीरोदशयन जय लक्ष्म्या सदावृत !। जय दानवनाशाय जय देवकिनन्दन!
जय शङ्खगदापाणे जय चक्रधरप्रभो! । इति देवस्तुतिं श्रुत्वा प्रबुद्धोजलशाय्यथ
उवाच मधुरांवाणीं मेघगम्भीरनिस्वनाम् ।
किमर्थं बोधितो ब्रह्मन्समर्थैर्वः सुरासुरैः ॥ ३१ ॥

ब्रह्मोवाच

तालमेघभयात्कृष्ण! सम्प्राप्ता तव मन्दिरम् ।
न वध्यः कस्यचित्पापतालमेघो जनार्दन !॥ ३२ ॥
त्वमेव जहि तं दुष्टं मृत्युं यास्यति नान्यथा ॥ ३३ ॥

श्रीकृष्ण उवाच

स्वस्थानं गम्यतां देवाः स्वकीयां लभत प्रजाम् ।
दुष्टात्मानं हनिष्यामि तालमेघं महाबलम् ॥ ३४ ॥
स्थानं ब्रुवन्तु मे देवा! वसेद्यत्र स दानवः ॥ ३५ ॥

देवा ऊचुः

हिमाचलगुहायां सवसते दानवेश्वरः । चतुर्विंशतिसाहस्रैः कन्याभिःपरिवारितः
तुरङ्गैः स्यन्दनैः कृष्ण! सङ्ख्या तस्य न विद्यते ।
नटा नानाविधास्तत्र असङ्ख्यातगुणा हरे !॥ ३७ ॥
द्विरदाः पर्वताकारा हयाश्च द्विरदोपमाः । महाबलो वसेत्तत्र गीर्वाणभयदायकः
श्रुत्वादेवोवचस्तेषांदेवानामातुरात्मनाम् । अचिन्तयद्गरुत्मन्तंशत्रुसङ्घविनाशनम्
चक्रं करेण संगृह्य गदाचक्रधरः प्रभुः । शार्ङ्गं च मुशलं सीरं करैर्गृह्य जनार्दनः ॥
आरूढः पक्षिराजेन्द्रं वधार्थं दानवस्य च । दानवस्य पुरेपेतुरुत्पाता घोररूपिणः
गोमायुर्गृध्रमध्ये तु कपोतैः सममाविशत् । विनापातेनतस्यैवध्वजदण्डःपपातह
सर्पमूषकयोर्युद्धं तथा केसरिनागयोः । उन्मार्गाःसरितस्तत्रावहन्रक्तविमिश्रिताः
अकालतरुपुष्पाणि दृश्यन्ते स्म समन्ततः ॥ ४३ ॥
ततः प्राप्तोजगन्नाथो हिमवन्तंनगेश्वरम् । पाञ्चजन्यश्च सहसा पूरितः पुरसन्निधौ
तेन शब्देन महता ह्यारूढो दानवेश्वरः ।
उवाच च तदा वाक्यं तालमेघो महाबलः ॥ ४५ ॥

तालमेघ उवाच

कोऽयं मृत्युवशं प्राप्तो ह्यज्ञात्वा मम विक्रमम् ।

धुन्धुमाराज्ञया ह्याशु स्वसैन्यपरिवारितः ॥ ४६ ॥
बलादानय तं बद्ध्वा ममाग्रे बाहुशालिनम् ॥ ४७ ॥

धुन्धुमार उवाच

आनयामि न संदेहःसुरोयक्षोऽथकिन्नरः। स्यन्दनौघैःसमायुक्तोगजवाजिभटैःसह हृष्टस्ततो जगद्योनिःसुपर्णस्थो महाबलः। गृह्यतां गृह्यतामेवइत्युक्तास्तेनकिङ्कराः चतुर्दिक्षु प्रधावन्त इतश्चेतश्च सर्वतः। सुपर्णेनाऽग्निरूपेण दग्धास्ते शलभा यथा धुन्धुमारोऽपिकृष्णेनशरघातेन ताडितः। हतोवक्षस्थले पापोमृतावस्थोरथोपरि हाहाकारं ततः सर्वे दानवाश्चकुरातुराः। तालमेघस्ततःक्रुद्धोरथारूढो विनिर्गतः
दद्दृशे केशवं पार्थ! शङ्खचक्रगदाधरम् ॥ ५२ ॥

तालमेघ उवाच

अन्ये ते दानवाः कृष्ण! ये हताः समरे त्वया।
हिरण्यकशिपुप्रख्या न पुमांसो हि तेऽच्युत ॥ ५३ ॥
इत्युक्त्वा दानवः पार्थ! वर्षयामास सायकैः।
दानवस्य शरान्मुक्तांश्छेदयामास केशवः ॥ ६४ ॥
गरुत्मानवधीत्सैन्यमवध्यं यत्सुरासुरैः।
कृष्णेन द्विगुणास्तस्य प्रेषिताः स्वशिलीमुखाः ॥ ५५ ॥
द्विगुणं द्विगुणीकृत्य प्रेषयामास दानवः।
तानप्यष्टगुणैः कृष्णश्च्छादयामास सायकैः ॥ ५६ ॥
ततः क्रुद्धेन दैत्येन ह्याग्नेयं बाणमुत्तमम् ॥ ५७ ॥

वारुणं प्रेरयामास त्वाग्नेयं शमितं ततः। वारुणेनैववायव्यं तालमेघो व्यसर्जयत् सार्पं चैवहृषीकेशोवायव्यस्यप्रशान्तये। नारसिंहं नृसिंहोऽपिप्रेषयामासपाण्डव! नारसिंहं ततो दृष्ट्वातालमेघोमहाबलः। उत्तीर्य स्यन्दनाच्छीघ्रंगृहीत्वाखड्गचर्मणी
कृष्ण त्वां प्रेषयिष्यामि यममार्गं सुदारुणम्।
इत्युक्त्वा दानवः पार्थ! आगतः केशवं प्रति ॥ ६१ ॥

खड्गेनाताडयद्दैत्यो गदापाणिंजनार्द्दनम्। मण्डलाग्रं ततो गृह्य केशवोहृष्टमानसः जघनोरःस्थले पार्थ तालमेघं महाहवे। जनार्दनस्तदा दैत्यंदैत्यो हरिमहन्मृधे ॥ जनार्द्दनस्ततः क्रुद्धस्तालमेघाय भारत!। अमोघं चक्रमादाय मुक्तं तस्यच मूर्द्धनि निपपातशिरस्तस्यपर्वताश्चचकम्पिरे। समुद्राःक्षुभिताःपार्थनद्यउन्मार्गगामिनीः पुष्पवृष्टिं ततो देवा मुमुचुः केशवोपरि। अवध्यः सुरसङ्घानां सूदितः केशवत्वया
स्वस्थाश्चैव ततो देवास्तालमेघे निपातिते।
जनार्द्दनोऽपि कौन्तेय! नर्मदातटमाश्रितः ॥ ६७ ॥

क्षीरोदां नर्मदांमत्वाअनन्तभुजगोपरि। लक्ष्म्यासमन्वितःकृष्णोनिलीनश्चोत्तरेतटे
चक्रं विभीषणं मर्त्यै ज्वालामालासमन्वितम्।
पतितं नर्मदातोये जलशायिसमीपतः ॥ ६९ ॥

निर्द्धूतकल्मषं जातं नर्मदातोययोगतः। तालमेघवधोत्पन्नं यत्पापं नृपनन्दन!॥ तत्सर्वंक्षालितं सद्योनर्मदाम्भसि भारत!। तदाप्रभृतिलोकेऽस्मिञ्जलशायीमहीपते चक्रतीर्थं वदन्त्यन्येकेचित्कालाघनाशनम्। विख्यातं भारते वर्षेनर्मदायां महीपते
तत्तीर्थस्य प्रभावोऽयं श्रूयतामवनीपते!।
यथाऽनन्तो हि नागानां देवानां च जनार्द्दनः ॥ ७३ ॥
मासानां मार्गशीर्षोऽस्ति नदीनां नर्मदा यथा।
मासि मार्गशिरे पार्थ! ह्येकादश्यां सितेऽहनि ॥ ७४ ॥
गत्वा यो मनुजो भक्त्या कामक्रोधविवर्जितः।
वैष्णवीं भावनां कृत्वा जलेशं तु व्रजेत वै ॥ ७५ ॥

एकभुक्तं च नक्तं चतथैवाऽयाचितं नृप। उपवासं तथा दानंब्राह्मणानांचभोजनम् करोति च कुरुश्रेष्ठ! नसयातियमालयम्। यमलोकभयाद्भीतायेलोकाःपाण्डुनन्दन तेपश्यन्तुश्रियःकान्तंनागपर्यंकशायिनम्। गोपीजनसमावृत्तंयोगनिद्रांसमाश्रितम्
विश्वरूपं जगन्नाथं संसारभयनाशनम् ॥ ७८ ॥

स्नापयेत्परया भक्त्याक्षौद्रक्षीरेण सर्पिषा। खण्डेनतोयमिश्रेणजगद्योनिंजनार्द्दनम्

स्नाप्यमानं च पश्यन्ति ये लोका गतमत्सराः ।
ते यान्ति परमं लोकं सुरासुरनमस्कृतम् ॥ ८० ॥
घृतेन बोधयेद्दीपमथवा तैलपूरितम् । रात्रौजागरणं कृत्वा देवस्याग्रे विमत्सराः
ये कथां वैष्णवीं भक्त्या शृण्वन्ति च नृपोत्तम !।
ब्रह्महत्यादिपापानि नश्यन्ते नाऽत्र संशयः ॥ ८२ ॥
प्रदक्षिणन्ति ये मर्त्या जलशायिजगद्गुरुम् ।
प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ॥ ८३ ॥
ततःप्रभातेविमलेपितॄन्संतर्प्पयेज्जलैः । श्राद्धंचब्राह्मणैस्तत्रयोग्यैः पाण्डव!मानवाः
स्वदारनिरतैः शान्तैः परदारविवर्जकैः । वेदाभ्यसनशीलैश्च स्वकर्मनिरतैः शुभैः
नित्यं यजनशीलैश्च त्रिसन्ध्यापरिपालकैः ।
श्रद्धया कारयेच्छ्राद्धं यदीच्छेच्छ्रेय आत्मनः ॥ ८६ ॥
ते धन्या मानुषे लोके वन्द्या हि भुवि मानवाः ।
ये वसन्ति सदाकालं पादपद्माश्रया हरेः ॥ ८७ ॥
जलशायं प्रपश्यन्ति प्रत्यक्षं सुरनायकम् ।
पक्षोपवासं पाराकं व्रतं चान्द्रायणं शुभम् ॥ ८८ ॥
मासोपवासमुग्रं चषष्ठान्नंपञ्चमंव्रतम् । तत्रतीर्थेतुयःकुर्यात्सोऽक्षयांगतिमाप्नुयात्

श्रीमार्कण्डेय उवाच

अतः परं प्रवक्ष्यामि तिलधेनोश्च यत्फलम् ।
यथा यस्मिन्यदा देया दाने तस्याः शुभं फलम् ॥ ९० ॥
एतत्कथान्तरंपुण्यमृषेर्द्वैपायनात्पुरा । श्रुतं हि नैमिषे पुण्ये नारदाद्यैरनेकधा ॥
इदं परममायुष्यंमङ्गल्यंकीर्त्तिवर्द्धनम् । विप्राणांश्रावयन्विद्वान्फलानन्त्यंसमश्नुते
बहुभ्यो नप्रदेयानिगौर्गृहं शयनंस्त्रियः । विभक्तदक्षिणाह्येतादातारंनाप्नुवन्तिच
एकमेतत्प्रदातव्यं न बहूनां युधिष्ठिर । सा च विक्रयमापन्ना दहत्यासप्तमं कुलम्
तिलाः श्वेतास्तिलाः कृष्णास्तिला गोमूत्रसन्निभाः ।

तिलानां तु विचित्राणां धेनुं वत्सं च कारयेत् ॥ ९५ ॥
यथालाभा तु सर्वेषां चतुर्द्रोणा तु गौः स्मृता ।
द्रोणस्य वत्सकः कार्यो बहुना वाऽपि कामतः ॥ ९६ ॥
यस्मिन्देशे तु यन्मानं विषये वा विचारितम् ।
तेन मानेन तां कुर्वन्नक्षयं फलमश्नुते ॥ ९७ ॥
सुखपूर्वं शुचौ भूमौ पुष्पधूपाक्षतैस्तथा । कर्णाभ्यांरत्नेदातव्ये दीपौनेत्रद्वये तथा
श्रीखण्डमुरसिस्थाप्यंताभ्यांचैवतुकाञ्चनम् । उद्ध्वेमधुघृतंदेयंकुर्यात्सर्षपरोमकम्
कम्बलेकम्बलंदद्याच्छ्रोण्यां मधुघृतंतथा । यवसं पायसंदद्याद्घृतं क्षौद्रसमन्वितम्
स्वर्णशृङ्गीरुप्यशिफारुक्मलांगूलसंयुता । रत्नपृष्ठीतुदातव्याकांस्यपात्रावदोहिनी
यत्स्याद्बाल्यकृतं पापं यद्वा कृतमजानता ।
वाचा कृतं कर्मकृतं मनसा यद्विचिन्तितम् ॥ १०२ ॥
जले निष्ठीवितं चैव मुशलं वापि लङ्घितम् ।
वृषलीगमनञ्चैव गुरुदारनिषेवणम् ॥ १०३ ॥
कन्याया गमनञ्चैव सुवर्णस्तेयमेव च । सुरापानं तथा चान्यत्तिलधेनुःपुनातिहि
अहोरात्रोपवासेनविधिवत्तां विसर्जयेत् । या सा यमपुरेघोरे नदीवैतरणीस्मृता
वालुकाऽयोऽश्मस्थला च पच्यतेयत्रदुष्कृती । अवीचिर्नरकोयत्रयत्रायामलपर्वतौ
यत्र लोहमुखाःकाका यत्र श्वानो भयङ्कराः । असिपत्रवनञ्चैवयत्रसाकूटशाल्मली
तान्सुखेन व्यतिक्रम्य धर्मराजालयं व्रजेत् । धर्मराजस्तु तं दृष्ट्वा सूनृतं वक्तिभारत
विमानमुत्तमं योग्यं मणिरत्नविभूषितम् । अत्रारुह्य नरश्रेष्ठ! प्रयाहि परमां गतिम्
मा च चाटु भटे देहि मैव देहि पुरोहिते ।
मा च काणे विरूपे च न्यूनाङ्गे न च देवले ॥ ११० ॥
अवेदविदुषे नैव ब्राह्मणे सर्वविक्रये । मित्रघ्ने च कृतघ्ने च मन्त्रहीने तथैव च ॥
वेदान्तगाय दातव्या श्रोत्रियाय कुटुम्बिने । वेदान्तगसुते देयाश्रोत्रिये गृहपालके
सर्वाङ्गरुचिरे विप्रे सद्वृत्ते च प्रियम्वदे ।

पूर्णिमायां तु माघस्य कार्त्तिक्यामथ भारत !॥ ११३ ॥
वैशाख्यां मार्गशीर्ष्यां वाऽऽषाढ्यां चैत्र्यामथाऽपिवा ।
अयने विषुवे चैव व्यतीपाते च सर्वदा ॥ ११४ ॥
षडशीतिमुखे पुण्ये छायायां कुञ्जरस्य वा ।
एष ते कथितः कल्पस्तिलधेनोर्मयाऽनघ ॥ ११५ ॥
व्रजन्ति वैष्णवं लोकं दत्त्वा पादं यमोपरि ।
प्राणत्यागात्परं लोकं वैष्णवं नात्र संशयः ॥
भित्त्वाऽशु भास्करं यान्ति नाऽत्र कार्या विचारणा ॥ ११६ ॥
एतत्ते सर्वमाख्यातं चक्रतीर्थफलं नृप !।
यच्छ्रुत्वा मानवो भक्त्या सर्वपापैः प्रमुच्यते ॥ ११७ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे जलाशायितीर्थमाहात्म्यवर्णनं नाम नवतितमोऽध्यायः ॥ ९० ॥

एकनवतितमोऽध्यायः

चण्डादित्यतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल! तीर्थं परमपावनम् ।
चण्डादित्यं नृपश्रेष्ठ! स्थापितं चण्डमुण्डयोः ॥ १ ॥
आस्तां पुरा महादैत्यौ चण्डमुण्डौ सुदारुणौ ।
नर्मदातीरमाश्रित्य चेरतुर्विपुलं तपः ॥ २ ॥
ध्यायन्तौ भास्करं देवं तमोनाशंजगत्त्रये । तुष्टस्तत्तपसादेवः सहस्रांशुरुवाच ह

साधुसाध्विवतितौ पार्थनर्मदायाःशुभेतटे । वरंप्रार्थयतौवीरौ यथेष्टंचेतसेच्छितम्
चण्डमुण्डावूचतुः
अजेयो सर्वदेवानां भूयास्वावांसमाहितौ । सर्वरोगैःपरित्यक्तौसर्वकालंदिवाकर
एवमस्त्विवतितौप्राह भास्करो वारितस्करः ।
इत्युक्त्वान्तर्दधे भानुर्दैत्याभ्यां तत्र भास्करः ॥ ६ ॥
स्थापितः परया भक्त्या तं गच्छेदात्मसिद्धये ।
गीर्वाणांश्च मनुष्यांश्च पितॄंस्तत्राऽपि तर्पयेत् ॥ ७ ॥
स वसेद्भास्करे लोके विरञ्चिदिवसं नृप । घृतेन बोधयेद्दीपं षष्ठ्यां स च नरेश्वर
मुच्यते सर्वपापैस्तु प्रतियाति पुरं रवेः ॥ ८ ॥
उत्पत्तिंचण्डभानोर्यःश्रृणोतिभरतर्षभ । विजयी ससदानूनमाधिव्याधिविवर्जितः
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे चण्डादित्यतीर्थमाहात्म्यवर्णनं नामैकनवतितमोऽध्यायः ॥९१॥

द्विनवतितमोऽध्यायः

यमहास्यतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तुराजेन्द्र यमहास्यमनुत्तमम् । सर्वपापहरं तीर्थं नर्मदातटमाश्रितम् ॥
युधिष्ठिर उवाच
यमहास्यं कथं जातं पृथिव्यां द्विजपुङ्गव !। एतत्सर्वंसमाख्याहिपरंकौतूहलं हिमे
श्रीमार्कण्डेय उवाच
साधुसाधु महाप्राज्ञ पृष्टोऽहं नृपनन्दन । स्नानार्थंनर्मदांपुण्यामागतस्तेपितापुरा
रजकेनयथाधौतंवस्त्रं भवति निर्मलम् । तथाऽसौनिर्मलोजातो धर्मराजोयुधिष्ठिर!

स पश्यन्निर्मलं देहं हसन्प्रोवाच विस्मितः ॥ ५ ॥

यम उवाच

मत्पुरंकथमायान्तिमनुजाःपापवृंहिताः । स्नानेनैकेनरेवायाः प्राप्यतेवैष्णवम्पदम्

समर्था ये न पश्यन्ति रेवां पुण्यजलां शुभाम् ।

यात्यन्धैस्ते समाज्ञेया मृतैः पङ्गुभिरेव वा ॥ ७ ॥

समर्था ये न पश्यन्ति रेवां पुण्यजलां नदीम् ।

एतस्मात्कारणाद्राजन्हसितो लोकशासनः ॥ ८ ॥

स्थापयित्वायमस्तत्रदेवस्वर्गंजगाम ह । यमहासेश्वरे राजञ्जितक्रोधोजितेन्द्रियः

विशेषाच्चाऽऽश्विनेमासि कृष्णपक्षे चतुर्दशीम् ।

उपोष्य परया भक्त्या सर्वपापैः प्रमुच्यते ॥ १० ॥

रात्रौ जारणंकुर्याद्दीपं देवस्य बोधयेत् । घृतेनचैवराजेन्द्र! श्रृणुतत्राऽस्तियत्फलम्

मुच्यते पातकैः सर्वैरगम्यागमनोद्भवैः । अभक्ष्यभक्षणोद्भूतैरपेयापेयजैरपि ॥ १२॥

अवाह्यवाहितेयत्स्याददोह्यादोहनेयथा। स्नानमात्रेणतस्यैवंयान्तिपापान्यनेकधा

यमलोकं न वीक्षेत मनुजः स कदाचन। पितृणां परमं गुह्यमिदं भूमौ नरेश्वर !॥

ददतामक्षयं सर्वं यमहास्ये न संशय । अमावास्यांजितक्रोधोयस्तुपूजयतेद्विजान्

हिरण्यभूमिदानेन तिलदानेन भूयसा । कृष्णाजिनप्रदानेन तिलधेनुप्रदानतः ॥

विधानोक्तद्विजाग्र्याय ये प्रदास्यन्ति भक्तितः ।

हयं वा कुञ्जरं वाऽथ धूर्वहौ सीरसंयुतौ ॥ १७ ॥

कन्यां वसुमतीं गां च महिषीं वा पयस्विनीम् ।

ददते ये नृपश्रेष्ठ !नोपसर्पन्ति ते यमम् ॥ १८ ॥

यमोऽपिभवतिप्रीतःप्रतिजन्मयुधिष्ठिर । यमस्यवाहोमहिषो महिष्यस्तस्यमातरः

तासांदानप्रभावेणयमःप्रीतोभवेद्ध्रुवम् । नाऽसौयममवाप्नोतियदिपापैःसमावृतः

एतस्मात्कारणादत्रमहिषीदानमुत्तमम् । तस्याःश्रृङ्गे जलंकार्यं धूम्रवस्त्रानुवेष्टिता

आयसस्य खुराः कार्यास्ताम्रपृष्ठाः सुभूषिताः ।

लवणाचलं पूर्वस्यामाग्नेय्यां गुडपर्वतम ॥ २२ ॥

कार्पासं याम्यभागं तु नवनीतं तु नैर्ऋते ।

पश्चिमे सप्तधान्यानि वायव्ये तन्दुलाः स्मृताः ॥ २३ ॥

सौम्ये तु काञ्चनं दद्यादीशाने घृतमेवच । प्रदद्याद्यमराजो मे प्रीयतामित्युदीरयन्

इत्युच्चार्य द्विजस्याग्रे यमलोकं महाभयम् । असिपत्रवनं घोरं यमचुल्लीसुदारुणा

रौद्रावैतरणी चैव कुम्भीपाको भयावहः । कालसूत्रो महाभीमस्तथायमलपर्वतौ

क्रकचं तैलयन्त्रं च श्वानो गृध्राः सुदारुणाः ।

निरुच्छ्वासा महानादा भैरवो रौरवस्तथा ॥ २७ ॥

एते घोरा याम्यलोके श्रूयन्ते द्विजसत्तम !।

त्वत्प्रसादेन ते सौम्यास्तीर्थस्याऽस्य प्रभावतः ॥ २८ ॥

दानस्याऽस्य प्रभावेण यमराजप्रसादतः ।

नरकेऽहं न यास्यामि द्विज! जन्मनि जन्मनि ॥ २९ ॥

यमहास्यस्य चाख्यानमिदं श्रृण्वन्ति ये नराः ।

तेऽपि पापविनिर्मुक्ता न पश्यन्ति यमालयम् ॥ ३० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे यमहास्यतीर्थमाहात्म्यवर्णनंनाम द्विनवतितमोऽध्यायः ॥ ९२ ॥

त्रिनवतितमोऽध्यायः

कल्होडीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! कल्होडीतीर्थमुत्तमम् ।
विख्यातं भारते लोके गङ्गायाः पापनाशनम् ॥ १ ॥

दुर्लभं मनुजैः पार्थ रेवातटसमाश्रितम् । प्राणिनां पापनाशाय ऊषरं पुष्करं तथा
तत्तु तीर्थमिदं पुण्यमित्येवं शूलिनोवचः । जाह्नवी पशुरूपेण तत्र स्नानार्थमागता
अतस्तद्विश्रुतंलोके कल्होडीतीर्थमुत्तमम् । त्रिरात्रंकारयेत्तत्र पूर्णिमायांयुधिष्ठिर

रजस्तमस्तथा क्रोधं दम्भं मात्सर्यमेव च ।
एतांस्त्यजति यः पार्थ तेनाप्तं मोक्षजं फलम् ॥ ५ ॥

पयसास्नापयेद्देवंत्रिसन्ध्यंचत्र्यहंतथा । पयोगोसम्भवं सद्यः सवत्साजीवपुत्रिणी

कृत्वा तत्ताम्रजे पात्रे क्षौद्रेण चैव योजिते ।
ॐ नमः श्रीशिवायेति स्नानं देवस्य कारयेत् ॥ ७ ॥

स याति त्रिदशस्थानं नाकस्त्रीभिः समावृतः ।
यस्तत्र विधिवत्स्नात्वा दानं प्रेतेषु यच्छति ॥ ८ ॥

शुक्लां गां दापयेत्तत्रप्रीयन्तां मे पितामहाः । ब्राह्मणेशौचसम्पन्नेस्वदारनिरतेसदा

सवत्सां वस्त्रसंयुक्तां हिरण्योपरि संस्थिताम् ।
सत्त्वयुक्तो ददद्राजञ्च्छाम्भवं लोकमाप्नुयात् ॥ १० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कल्होडीतीर्थमाहात्म्यवर्णनं नाम त्रिनवतितमोऽध्यायः ॥९३॥

चतुर्नवतितमोऽध्यायः

नन्दिकेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरंराजन्नन्दितीर्थं व्रजेच्छुभम् । सर्वपापहरंपुंसां नन्दिनानिर्मितम्पुरा
पापौघहतजन्तूनां मोक्षदं नर्मदातटे । अहोरात्रोषितो भूत्वा नन्दिनाथे युधिष्ठिर
पञ्चोपचारपूजायामर्च्चयेन्नन्दिकेश्वरम् । रत्नानि चैव विप्रेभ्यो यो दद्याद्धर्मनन्दन!

स याति परमं स्थानं यत्र वासः पिनाकिनः ।
सर्वसौख्यसमायुक्तोऽप्सरोभिः सह मोदते ॥ ४ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे नन्दिकेश्वरतीर्थमाहात्म्यवर्णनं नाम
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

पञ्चनवतितमोऽध्यायः

नारायणीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! बदर्याश्रममुत्तमम् । सर्वतीर्थवरं पुण्यं कथितं शम्भुना पुरा

यश्चैष भारतस्याऽर्थे तत्र सिद्धः किरीटभृत् ।
भ्राता ते फाल्गुनो नाम विद्धयेनं नरदैवतम् ॥ २ ॥

नरनारायणौ द्वौ तावागतौ नर्मदातटे । ज्ञानंतस्यैव यो राजन्भक्तिमान्वैजनार्दने
समम्पश्यति सर्वेषु स्थावरेषु चरेषु च । ब्राह्मणं श्वपचं चैव तत्र प्रीतो जनार्द्दनः

ऐकात्म्यं पश्य कौन्तेय! मयि चाऽऽत्मनि नान्तरम् ।
नरनारायणाभ्यां हि कृतं बदरिकाश्रमम् ॥ ५ ॥
स्थापितं शङ्करस्तत्र लोकानुग्रहकारणात् ।
त्रिमूर्त्तिस्थापितं लिङ्गं स्वर्गमार्गानुमुक्तिदम् ॥ ६ ॥
तत्र गत्वा शुचिर्भूत्वा ह्येकरात्रोपवासकृत् ।
रजस्तमस्तथा त्यक्त्वा सात्त्विकं भावमाश्रयेत् ॥ ७ ॥
रात्रौ जागरणं कृत्वामधुमासाष्टमीदिने । अथवाच चतुर्दश्यामुभौपक्षौचकारयेत् ।
आश्विनस्य विशेषेण कथितं तव पाण्डव !।
स्नापयेत्परया भक्त्या क्षीरेण मधुना सह ॥ ९ ॥
दध्नाशर्करया युक्तं घृतेन समलङ्कृतम् । पञ्चामृतमिदंपुण्यं स्नापयेद्वृषभध्वजम्
स्नाप्यमानं शिवं भक्त्या वीक्षते यो विमत्सरः ।
तस्य वासः शिवोपान्ते शक्रलोके न संशयः ॥ ११ ॥
शाठ्येनाऽपि नमस्कारः प्रयुक्तः शूलपाणिने ।
संसारमूलबद्धानामुद्वेष्टनकरो हि यः ॥ १२ ॥
तेनाधीतं श्रुतं तेन तेनसर्वमनुष्ठितम् । येनोंनमःशिवायेतिमन्त्राभ्यासःस्थिरीकृतः
यः पुनः स्नापयेद्भक्त्या एकभक्तो जितेन्द्रियः ।
तस्याऽपि यत्फलं पार्थ! वक्ष्ये तल्लेशतस्तव ॥ १४ ॥
पीडितो वृद्धभावेन तव भक्त्या वदाम्यहम् ।
ते यान्ति परमं स्थानं भित्त्वा भास्करमण्डलम् ॥ १५ ॥
संसारे सर्वसौख्यानां निलयास्ते भवन्ति च ।
आश्चर्यं ज्ञातिवर्गाणां धर्माणां निलयास्तु ते ॥ १६ ॥
सम्पन्नाःसर्वकामैस्तेपृथिव्यांपृथिवीपते । श्राद्धंतत्रैव यः कुर्यान्नर्मदोदकमिश्रितम्
योग्यैश्च ब्राह्मणै राजन्कुलीनैर्वेदपारगैः । सुरूपैश्च सुशीलैश्च स्वदारनिरतैः शुभैः
आर्यदेशप्रसूतैश्च श्लक्ष्णैश्चैव सुरूपिभिः । कारयेत्पिण्डदानं वै भास्करेकुतपस्थिते

पितॄणांपरमंलोकंयदीच्छेद्धर्मनन्दन । वर्जयेत्तान्प्रयत्नेन काणान्दुष्टांश्चदाम्भिकान्
पुरुषान्क्रूरषण्ढांश्च ब्राह्मणानां च निन्दकान् ।
एतांश्च वर्जयेद्विप्रान्यदीच्छेच्छ्रेय आत्मनः ॥ २१ ॥
तस्मात्सर्वप्रयत्नेनयोग्यंविप्रंसमाश्रयेत् । नरकान्मोचयेत्प्रेतान्कुम्भीपाकपुरोगमान्
मोक्षो भवति सर्वेषां पितॄणां नृपनन्दन !।
विप्रेभ्यः काञ्चनं दद्यात्प्रीयतां मे पितामहः ॥ २३ ॥
अन्नं च दापयेत्तत्रभक्त्या वस्त्रं च भारत । गां वृषंमेदिनीं दद्याच्छत्रंशस्तंनृपोत्तम!
स पुमान्स्वर्गमाप्नोति इत्येवं शङ्करोऽब्रवीत् ।
प्राणत्यागं तु यः कुर्याच्छिखिना सलिलेन वा ॥ २५ ॥
अनाशकेन वा भूयः स गच्छेच्छिवमन्दिरम् ।
नरनारायणीतीरे देवद्रोण्यां च यो नृप !॥ २६ ॥
स वसेदीश्वरस्याग्रे यावदिन्द्राश्चतुर्दश ।
पुनः स्वर्गाच्च्युतः सोऽपि राजा भवति वीर्य्यवान् ॥ २७ ॥
सर्व्वैश्वर्यगुणैर्युक्तः प्रजापालनतत्परः । ततः स्मरति तत्तीर्थं पुनरेवाऽऽगमिष्यति

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नारायणीतीर्थमाहात्म्यवर्णनं नाम
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

षण्णवतितमोऽध्यायः

कोटीश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तुराजेन्द्रतीर्थंकोटीश्वरं परम् । ऋषिकोटिः समायाता यत्र वैकुरुनन्दन
कृष्णद्वैपायनस्यैव क्षेमार्थं मुनिपुङ्गवाः । मन्त्रयित्वाद्विजैः सर्वैर्वेदमङ्गलपाठकैः

स्थापितः शङ्करस्तत्र कारणं बन्धनाशनम् ।
संसारच्छेदकरणं प्राणिनामार्त्तिनाशनम् ॥ ३ ॥

कोटीश्वरमितिप्रोक्तंपृथिव्यांनृपनन्दन । स्नापयेत्तंतु योभक्त्या पूर्णिमायांनृपोत्तम

पितॄणां तर्प्पणं कृत्वा पिण्डदानं यथाविधि ।
श्रावणस्य विशेषेण पूर्णिमायां युधिष्ठिर ॥ ५ ॥

पितॄणामक्षया तृप्तिर्यावदाभूतसम्प्लवम् । पितॄणांपरमं गुह्यं रेवातटसमाश्रितम्

मोक्षदं सर्वजन्तूनां निर्मितं मुनिसत्तमैः ॥ ६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कोटीश्वरतीर्थमाहात्म्यवर्णनंनाम षण्णवतितमोऽध्यायः ॥ ९६ ॥

सप्तनवतितमोऽध्यायः

व्यासतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपालव्यासतीर्थमनुत्तमम् । दुर्ल्लभंमनुजैःपुण्यमन्तरिक्षेव्यवस्थितम्

युधिष्ठिर उवाच

कस्माद्वै व्यासतीर्थं तदन्तरिक्षे व्यवस्थितम् ।
एतदाख्याहि संक्षेपात्त्यज ग्रन्थस्य विस्तरम् ॥ २ ॥

श्रीमार्कण्डेय उवाच

साधुसाधुमहाबाहो धर्मवान्साधुवत्सल । स्वकर्मनिरतः पार्थतीर्थयात्राकृतादरः
दुर्ल्लभं सर्वजन्तूनां व्यासतीर्थं नरेश्वर । पीडितोवृद्धभावेन अकल्पोऽहंनृपात्मज

विसञ्ज्ञो गतवित्तस्तु सञ्जातः स्मृतिवर्जितः ।
गुह्याद् गुह्यतरं तीर्थं नाऽऽख्यातं कस्यचिन्मया ॥ ५ ॥
कलिस्तत्रैव राजेन्द्र न विशेद् व्याससंश्रयात् ।
अन्तरिक्षे तु सञ्जातं रेवायाश्चेप्सितेन तु ॥ ६ ॥
विरिञ्चिर्नैव शक्नोति रेवाया गुणकीर्त्तनम् ।
कथं ज्ञास्याम्यहं तात रेवामाहात्म्यमुत्तमम् ॥ ७ ॥

व्यासतीर्थंविशेषेण लवमात्रं ब्रवीम्यतः । प्रत्यक्षः प्रत्ययो यत्र दृश्यतेऽद्यकलौयुगे
विहङ्गोगच्छतेनैवभित्त्वाशूलंसुदारुणम् । तस्योत्पत्तिसमासेनकथयामिनृपात्मज
आसीत्पूर्वंमहीपालमुनिर्मान्यःपराशरः । तेनात्युग्रंतपश्चीर्णं गङ्गाम्भसिमहाफलम्
प्राणायामेन सन्तस्थौप्रविष्टोजाह्नवीजले । पूर्णेद्वादशमेवर्षे निष्क्रान्तोजलमध्यतः

भिक्षार्थी सञ्चरेद् ग्रामं नावा यत्रैव तिष्ठति ।
तत्र तेन परा दृष्टा बाला चैव मनोहरा ॥ १२ ॥

तां दृष्ट्वा स च कामार्त्त उवाच मधुरं तदा ।
मां नयस्व परं पारं काऽसि त्वं मृगलोचने !॥ १३ ॥
नावारूढे नदीतीरे मम चित्तप्रमाथिनि । एवमुक्ता तु सा तेन प्रणम्यऋषिपुङ्गवम्
कथयामास चाऽऽत्मानं दृष्ट्वा तं काममोहितम् ।
कैवर्त्तानां गृहे दासी कन्याऽहं द्विजसत्तम ॥ १५ ॥
नावा संरक्षणार्थाय आदिष्टा स्वामिना विभो !।
मया विज्ञपितं वृत्तमशेषं ज्ञातुमर्हसि ॥ १६ ॥
एवमुक्तस्तथा सोऽथ क्षणं ध्यात्वाऽब्रवीदिदम् ॥ १७ ॥

पराशर उवाच

अहंज्ञानबलाद्भद्रेतवजानामिसम्भवम् । कैवर्त्तपुत्रिका न त्वंराजकन्याऽसिसुन्दरि

कन्योवाच

कः पिता कथ्यतां ब्रह्मन्कस्या वा ह्युदरोद्भवा ।
कस्मिन्वंशे प्रसूताऽहं कैवर्त्ततनया कथम् ॥ १९ ॥

पराशर उवाच

कथयामि समस्तंयत्त्वया पृष्टमशेषतः । वसुर्नामेतिभूपालः सोमवंशविभूषणः ॥
जम्बूद्वीपाधिपो भद्रे शत्रूणां भयवर्धनः । शतानि सप्तभार्याणां पुत्राणांचदशैवतु
धर्मेण पालयेल्लोकानीशवत्पूज्यते सदा ।
म्लेच्छास्तस्याविधेयाश्च क्षीरद्वीपनिवासिनः ॥ २२ ॥
तेषामुत्सादनार्थाययथावुल्लङ्घ्यसागरम् । संयुक्तःपुत्रभृत्यैश्चपौरुषेमहति स्थितैः
समरंतैःसमारब्धंम्लेच्छैश्चवसुनासह । जिताम्लेछाःसमस्तास्ते वसुनामृगलोचने
करदास्ते कृतास्तेन सपुत्रबलवाहनाः । प्रधाना तस्य साराज्ञी तवमातामृगेक्षणे
प्रवासस्थे महीपाले सञ्जाता सा रजस्वला ।
नारीणां तु सदाकालं मन्मथो ह्यधिको भवेत् ॥ २६ ॥
विशेषण ऋतोः काले भिद्यन्ते कामसायकैः ।

मन्मथेन तु सन्तप्ताऽचिन्तयत्सा शुभेक्षणा ॥ २७ ॥
दूतं वै प्रेषयाम्यद्य वसुराज्ञः समीपतः । आहूतः सत्वरं दूत! गच्छत्वं नृपसन्निधौ

दूत उवाच

परतीरं गतो देवि वसुराजाऽरिशासनः । तत्र गन्तुमशक्येत जलयानैर्विना शुभे
तानि यानानि सर्वाणि गृहीतानि परे तटे ।
दूतवाक्येन सा राज्ञी विषण्णा कामपीडिता ॥ ३० ॥
तत्सखी तामुवाचाऽथ कस्मात्त्वं परितप्यसे ।
स्वलेखः प्रेष्यतां देवि ! शुकहस्ते यथार्थतः ॥ ३१ ॥
समुद्रं लङ्घयित्वा तु शकुन्ता यान्ति सुन्दरि !।
सखिवाक्येन सा राज्ञी स्वस्था जाता नराधिप !॥ ३२ ॥
व्याहृतोलेखकस्तत्रलिखलेखं ममाज्ञया । त्वद्धीनासत्यभामाद्यवसोराजन्नजीवति
ऋतुकालोऽद्यसञ्जातो लिखलेखं तु लेखक !। लिखितेभूर्जपत्रे तु लेखे वै लेखकेनतु
शुकः पञ्जरमध्यस्थ आनीतोऽद्यैव सन्निधौ ॥ ३५ ॥

सत्यभामोवाच

नीत्वालेखं गच्छशीघ्रंवसुराज्ञःसमीपतः । शकुनिःप्रणतोभूत्वागृहीत्वालेखमुत्तमम्
उत्पत्य सहसाराजञ्जगामाऽऽकाशमण्डलम् । ततःपक्षीगतःशीघ्रंवसुराजसमीपतः
क्षिप्ते लेखेशुकेनैव सत्यभामाविसर्जिते । वसुराज्ञा ततो लेखोगृह्यहस्तेऽवधारितः
लेखार्थं चिन्तयित्वातुगृह्यवीर्यं नरेश्वरः । अमोघंपुटिकांकृत्वाप्रतिलेखेनमिश्रितम्
शुकस्य सोऽर्पयामास गच्छराज्ञीसमीपतः । प्रणम्यवसुराजानं बीजंगृह्योत्पपातह
समुद्रोपरि सम्प्राप्तः शुकः श्येनेन वीक्षितः ।
सामिषं तं शुकं ज्ञात्वा श्येनस्तमभ्यधावत ॥ ४१ ॥
हतश्चञ्चुप्रहारेण शुकः श्येनेन भारत! । मूर्च्छया तस्यतद्बीजंपतितंसागराम्भसि
मत्स्येन गिलितंतच्च बीजंवसुमहीपतेः । कन्यामत्स्योदरेजातातेन बीजेन सुन्दरि
प्राप्तोऽसौ लुब्धकैर्मत्स्य आनीतः स्वगृहं ततः ।

यावद्विदारितो मत्स्यस्तावद् दृष्टा त्वमुत्तमे ॥ ४४ ॥

शशिमण्डलसङ्काशा सूर्यतेजः समप्रभा । दृष्ट्वा त्वां हर्षिताःसर्वे कैवर्त्ताजाह्नवीतटे

हर्षितास्तेगताःसर्वे प्रधानस्यचमन्दिरम् । स्त्रीरत्नंकथयामासुर्गृहाणत्वंमहाप्रभम्

गृहीता तेन तन्वङ्गीह्यपुत्रेणमृगेक्षणा । भार्यां स्वामाहतन्वङ्गिपालयस्वमृगेक्षणे

ततः सा चिन्तयामास पराशरवचस्तदा ।

एवमुक्त्वा तु सा तेन दत्ताऽऽत्मानं नरेश्वर ॥ ४८ ॥

उवाच साधु मे ब्रह्मन् ! मत्स्यगन्धोऽनुवर्त्तते ।

ततस्तेन तु सा बाला दिव्यगन्धाधिवासिता ॥ ४६ ॥

कृतायोगबलेनैव ज्वालयित्वा विभावसुम् । कृत्वाप्रदक्षिणंवह्निमूढातेनरसात्तदा

जलयानस्य मध्ये तु कामस्थानान्यसंस्पृशत् ।

ज्ञात्वा कामोत्सुकं विप्रं भीता सा धर्मनन्दन !॥ ५१ ॥

हसन्तीतमुवाचाऽथदेव!त्वंलोकसन्निधौ । नलज्जसेकथंधीमन्कुर्वाणःपामरोचितम्

ततस्तेन क्षणं ध्यात्वा संस्मृता हृदि तामसी ।

आगता तामसी माया यया व्याप्तं चराचरम् ॥ ५३ ॥

ततः साविस्मितातेन कर्मणैवतुरञ्जिता । ब्रह्मचर्याभितप्तेनस्त्रीसौख्यंक्रीडितंतदा

ततः सा तत्क्षणादेव! गर्भभारेणपीडिता । प्रसूताबालकंतत्रजटिलंदण्डधारिणम्

कमण्डलुधरं शान्तं मेखलाकटिभूषितम् ।

उत्तरीयकृतस्कन्धं विष्णुमायाविवर्जितम् ॥ ५६ ॥

ततोऽपि शङ्किता पार्थ! दृष्ट्वा तं कलबालकम् ।

वेपमाना ततो बाला जगाम शरणं मुनेः ॥ ५७ ॥

रक्ष रक्ष मुनिश्रेष्ठ ! पराशर महामते !। जातं मेऽत्यद्भुतं पुत्रं कौपीनवरमेखलम् ॥

दण्डहस्तं जटायुक्तमुत्तरीयविभूषितम् ॥ ५८ ॥

पराशर उवाच

मा भैषीःस्वसुते जाते कुमारी त्वं भविष्यसि ।

नाम्ना योजनगन्धेति द्वितीयं सत्यवत्यपि ॥ ५६ ॥

शन्तनुर्नाम राजा यः स ते भर्त्ता भविष्यति ।

प्रथमा महिषी तस्य सोमवंशविभूषणा ॥ ६० ॥

गच्छत्वंस्वाश्रयंशुभ्रे पूर्वरूपेणसंस्थिता । माविषादंकुरुष्वाऽत्रदृष्टं ज्ञानस्यमेबलम्

इत्युक्त्वा प्रययौ विप्रः सा बाला पुत्रमाश्रिता ।

नत्वोचे मातरं भक्त्या साष्टाङ्गं विनयानतः ॥ ६२ ॥

क्षम्यतां मातरुक्तं मे प्रसादः क्रियतामपि । ईश्वराराधने यत्नंकरिष्याम्यहमम्बिके

ततः सा पुत्रवाक्येन विषण्णा वाक्यमब्रीत् ॥ ६४ ॥

योजनगन्धोवाच

मा त्यक्त्वा गच्छ वत्साद्य मातरं मामनागसम् ।

त्वद्वियोगेन मे पुत्र! पञ्चत्वं भाव्यसंशयम् ॥ ६५ ॥

नास्ति पुत्रसमः स्नेहो नास्ति मातृसमं कुलम् ।

नाऽस्ति सत्यपरो धर्मो नानृतात्पातकं परम् ॥ ६६ ॥

बालभावे मयाजात आधारःकिलजायसे । न मे भर्त्ता नमेपुत्रःपश्यकर्मविडम्बनम्

व्यास उवाच

मा विषादं कुरुष्वान्तः सत्यमेतन्मयेरितम् ।

आपत्कालेऽस्मि ते देवि ! स्मर्त्तव्यः कार्यसिद्धये ॥ ६८ ॥

आपदस्तारयिष्यामि क्षम्यतां मे दुरुत्तरम् ।

इत्युक्त्वा प्रययौ व्यासः कन्या साऽपि गता गृहम् ॥ ६६ ॥

पराशरसुतस्तत्र विषण्णो वनमध्यतः । त्रेतायुगावसाने तु द्वापरादौ नरेश्वर ॥

व्यासार्थं चिन्तयामासुर्देवाःशक्रपुरोगमाः । आख्यातोनारदेनैवपुत्रःपराशरस्यसः

कैवर्त्तपुत्रिकाजातो ज्ञानीजह्नुसुतातटे । ततोनारदवाक्येन आगताः सुरसत्तमाः

रामः पितामहः शक्रो मुनिसङ्घैः समावृताः ।

आस्यादिकं पृथग् दत्त्वा साध्विसाध्वित्युदीरयन् ॥ ७३ ॥

पितामहेन वै बालो गर्भाधानादिसंस्कृतः ।
द्वीपायनो द्वीपजन्मा पाराशर्यः पराशरात् ॥ ७४ ॥
कृष्णांशात्कृष्णनामायं व्यासो वेदान्व्यसिष्यति ।
विरञ्चिनाऽभिषिक्तोऽसौ मुनिसङ्घैः पुनः पुनः ॥ ७५ ॥
व्यासस्त्वं सर्वलोकेषु इत्युक्त्वा प्रययुः सुराः ।
तीर्थयात्रा समारब्धा कृष्णद्वैपायनेन तु ॥ ७६ ॥
गङ्गावगाहितातेन केदारश्च सपुष्करः । गयाच नैमिषं तीर्थं कुरुक्षेत्रं सरस्वती ॥
उज्जयिन्यां महाकालं सोमनाथं प्रभासके ।
पृथिव्यां सागरान्तायां स्नात्वा यातो महामुनिः ॥ ७८ ॥
अमृतां नर्मदांप्राप्तो रुद्रदेहोद्भवांशुभाम् । साह्लादोनर्मदांदृष्ट्वाचित्तविश्रान्तिमापच
तपश्चचारविपुलं नर्मदातटमाश्रितः । ग्रीष्मेपञ्चाग्निमध्यस्थोवर्षासुस्थण्डिलेशयः
सार्द्रवासाश्च हेमन्ते तिष्ठन्दध्यौ महेश्वरम् ।
स्वान्तर्हृत्कमले स्थाप्य ध्यायते परमेश्वरम् ॥ ८१ ॥
सृष्टिसंहारकर्त्तारमच्छेद्यं वरदं शुभम् । नित्यं सिद्धेश्वरं लिङ्गं पूजयेद्ध्यानतत्परः
अर्चनात्सिद्धलिङ्गस्यध्यानयोगप्रभावतः । प्रत्यक्षःशङ्करोजातःकृष्णद्वैपायनस्य सः

ईश्वर उवाच

तोषितोऽहं त्वया वत्स! वरं वरय शोभनम् ॥ ८४ ॥

व्यास उवाच

यदितुष्टोऽसि मे देव यदि देयो वरोमम । प्रत्यक्षो नर्म्मदातीरे स्वयमेवभविष्यसि
अतीतानागतज्ञोऽहं त्वत्प्रसादादुमापते !॥ ८५ ॥

ईश्वर उवाच

एवं भवतु ते पुत्र ! मत्प्रसादादसंशयम् । त्वयिभक्तिगृहीतोऽहं प्रत्यक्षो नर्मदातटे
सहस्रांशार्द्धभावेन प्रत्यक्षोऽहं त्वदाश्रमे । इत्युक्त्वाप्रययौदेवः कैलासंनगमुत्तमम्
पत्नीसंग्रहणं जातं कृष्णद्वैपायनस्य तु । शास्त्रोक्तेन विधानेन पत्नीं पालयतस्तथा

पुत्रो जातो ह्यपुत्रस्य पराशरसुतस्य च । देवैर्वर्द्धापितः सर्वैर्विरिञ्चेन्द्रपुरोगमैः
पुत्रजन्मन्यथाजग्मुर्वशिष्ठाद्या मुनीश्वराः । तीर्थयात्राप्रसङ्गेन पराशरपुरोगमाः ॥
मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।
यमापस्तम्बसम्वर्त्ता कात्यायनबृहस्पती ॥ ९१ ॥
एवमादिसहस्राणिलक्षकोटिशतानिच । सशिष्याश्चमहाभागानर्मदातटमाश्रिताः
व्यासाश्रमे शुभे रम्ये सन्तुष्टा आययुर्नृप ।
दृष्ट्वा तान्सोऽपि विप्रेन्द्रानभ्युत्थानकृतोद्यमः ॥ ९३ ॥
पितुःपूर्वंप्रणम्याऽदौसर्वेषांचयथाविधि । आसनानिददौभक्त्यापाद्यमर्घ्यंन्यवेदयत्
कृताञ्जलिपुटोभूत्वावाक्यमेतदुवाचह । उद्धृतोऽहं नसन्देहोयुष्मत्सम्भाषणार्चनात्
आरण्यानि च शाकानि फलान्यारण्यजानि च ।
तानि दास्यामि युष्माकं सर्वेषां प्रीतिपूर्वकम् ॥ ९६ ॥
न्यमन्त्रयत तान्सर्वान्प्रत्येकं प्रणिपत्य च । ततस्ते प्रणतं दृष्ट्वा कृष्णद्वैपायनंमुनिम्
वर्द्धयित्वा जयाशीर्भिरवलोक्य परस्परम् । पराशरःसमस्तैश्च वीक्षितोमुनिपुङ्गवैः
उत्तरं दीयतां तात कृष्णद्वैपायनस्य च । एवमुक्तस्तु तैः सर्वैर्भगवान्स पराशरः ॥
प्रोवाच स्वात्मजंव्यासमृषीणां यच्चिकीर्षितम् ॥ ९९ ॥

श्रीपराशर उवाच

नेच्छन्ति दक्षिणे कूले व्रतभङ्गभयादथ । भोजनं भोक्तुकामास्ते श्राद्धेचैवविशेषतः

व्यास उवाच

करोमिभवतामुक्तमत्रैवस्थीयतां क्षणम् । यावत्प्रसाद्यसरितं करोमिविधिमुत्तमम्
एवमुक्त्वा शुचिर्भूत्वा नर्मदातटमास्थितः ।
स्तोत्रं जगाद सहसा तन्निबोध नरेश्वर !॥ १०२ ॥
जय भगवति! देवि! नमो वरदे! जय पापविनाशिनि! बहुफलदे !॥
जय शुम्भनिशुम्भकपालधरे! प्रणमामि तु देवनरार्त्तिहरे !॥ १०३ ॥
जय चन्द्रदिवाकरनेत्रधरे! जय पावकभूषितवक्त्रवरे !॥

जय भैरवदेहनिलीनपरे! जय अन्धकरक्तविशोषकरे !॥ १०४ ॥
जय महिषविमर्दिनि! शूलकरे जय लोकसमस्तकपापहरे !।
जय देवि! पितामहरामनते! जय भास्करशक्रशिरोऽवनते !॥ १०५ ॥
जय षण्मुखसायुधईशनुते! जय सागरगामिनि! शम्भुनुते !।
जय दुःखदरिद्रविनाशकरे! जय पुत्रकलत्रविवृद्धिकरे !॥ १०६ ॥
जय देवि! समस्तशरीरधरे! जय नाकविदर्शिनि! दुःखहरे !।
जय व्याधिविनाशिनि! मोक्षकरे! जय वाञ्छितदायिनि!सिद्धवरे !॥१०७

एतद्व्यासकृतंस्तोत्रंयः पठेच्छिवसन्निधौ । गृहे वाशुद्धभावेनकामक्रोधविवर्जितः
तस्य व्यासो भवेत्प्रीतः प्रीतश्च वृषवाहनः । प्रीतास्यान्नर्मदादेवीसर्वपापक्षयङ्करी

न ते यान्ति समालोकं यैः स्तुता भुवि नर्मदा ।
पितामहोऽपि मुह्येत देवि! त्वद्गुणकीर्त्तनात् ॥ ११० ॥

वाक्पतिर्नैव ते वक्तुं स्वरूपं वेद नर्मदे !। कथं गुणानहं देवि त्वदीयाञ्ज्ञातुमुत्सहे
इति ज्ञात्वा शुचिर्भावंवाङ्मनःकायकर्मभिः । प्रसन्नानर्मदादेवी ततोवचनमब्रवीत्

सत्यवादेन तुष्टाऽहं भोभो व्यास महामुने !।
यदीच्छसि वरं किञ्चित्तं ते सर्वं ददाम्यहम् ॥ ११३ ॥

व्यास उवाच

यदि तुष्टासि मे देवि यदि देयो वरो मम । आतिथ्यमुत्तरेकूलेऋषीणांदातुमर्हसि

नर्मदोवाच

अयुक्तंयाचित व्यास विमार्गेयत्प्रवर्तनम् । इन्द्रचन्द्रयमैःशक्यामुन्मार्गेनप्रवर्त्तितुम्

याचस्वान्यं वरं पुत्र! यत्किञ्चिद्भुवि दुर्लभम् ।
एतच्छ्रुत्वा वचो देव्या व्यासो मूर्च्छां गतस्तदा ॥ ११६ ॥
वृथा क्लेशोऽद्य मे जात इति मत्वा पपात ह ।
धरणी चलिता सर्वा सशैलवनकानना ॥ ११७ ॥
मूर्च्छापन्नं ततो व्यासं दृष्ट्वा देवाः सवासवाः ।

हाहाकारमुखाः सर्वे तत्राऽऽजग्मुः सहस्रशः ॥ ११८ ॥
व्यासमुत्थापयामासुर्वेदव्यसनतत्परम् ।
ब्राह्मणार्थे च संक्लिष्टो नात्महेतोः सरिद्वरे ॥ ११९ ॥
गवार्थे ब्राह्मणार्थे च सद्यः प्राणान्परित्यजेत् ।
एवं सा नर्मदा प्रोक्ता ब्रह्माद्यैः सुरसत्तमैः ॥ १२० ॥
सुशीतलैस्तं बहुभिश्चवातै रेवाऽभिषिञ्चत्स्वजलेन भीता ।
सचेतनः सत्यवतीसुतोऽपि प्रणम्य देवान्सरितं जगाद ॥ १२१ ॥

व्यास उवाच

तीर्थैः समस्तैः किल सेवनाय फलं प्रदिष्टं मम मन्दभाग्यात् ।
यद्देवि पुण्या विफला ममाशा आरण्यपुष्पाणि यथा जनानाम् ॥ १२२ ॥

नर्मदोवाच

यतो यतो मां हि महानुभाव! निनीषसे चित्तमिलातलेऽत्र ।
विन्ध्येन सार्द्धं तव मार्गमद्य यास्याम्यहं दण्डधरस्य पृष्ठे ॥ १२३ ॥

एवमुक्तो महातेजाः व्यासः सत्यवतीसुतः ।
दक्षिणे चालयामास स्वाश्रमस्य सरिद्वराम् ॥ १२४ ॥
दण्डहस्तो महातेजा हुङ्कारमकरोन्मुनिः ।
व्यासहुङ्कारभीता सा चलिता रुद्रनन्दिनी ॥ १२५ ॥

दण्डेन दर्शयन्मार्गं देवीतत्र प्रवर्त्तिता । व्यासमार्गं गता देवी दृष्टाशक्रपुरोगमैः
पुष्पवृष्टिं ततोदेवा व्यमुञ्चन्सहकिङ्करैः । प्रोत्फुल्लनयनाजाताःपराशरमुखाद्द्विजाः

किं कुर्मो ब्रूहि मे पुत्र ! कर्मणा ते स्म रञ्जिताः ॥ १२७ ॥

व्यास उवाच

तपश्च विपुलं कृत्वा दानंदत्त्वा महाफलम् । एतदेवनरैः कार्यंसाधूनांयत्सुखावहम्
यदि तुष्टा महाभागअनुग्राह्योह्यहंयदि । तस्मान्ममाश्रमेसर्वैःस्थीयतांनाऽत्रसंशयः
आतिथ्यं शाकपर्णेन रेवामृतविमिश्रितम् । प्रतिपन्नं समस्तैर्वः पराशरमुखैर्मम

स्थातव्यं स्वाश्रमे सर्वै रेवाया उत्तरे तटे ॥ १३० ॥

मार्कण्डेय उवाच

स्नानतर्पणनित्यानि कृतानि द्विजसत्तमैः ।
व्यासकुण्डे ततो गत्वा होमः सर्वैः प्रकल्पितः ॥ १३१ ॥
श्रीफलैर्बिल्वपत्रैश्च जुहुवुर्जातवेदसम् । गौतमो भृगुर्माण्डव्यो नारदोलोमशस्तथा
पराशरस्तथा शङ्खः कौशिकश्च्यवनो मुनिः ।
पिप्पलादो वसिष्ठश्च नाचिकेतो महातपाः ॥ १३३ ॥
विश्वामित्रोऽप्यगस्त्यश्च उद्दालकयमौ तथा ।
शाण्डिल्यो जैमिनिः कण्वो याज्ञवल्क्योशनोङ्गिराः ॥ १३४ ॥
शातातपो दधीचिश्चकपिलोगालवस्तथा । जैगीषव्यस्तथादक्षोभरतोमुद्गलस्तथा
वात्स्यायनो महातेजाः सम्वर्त्तः शक्तिरेव च ।
जातूकर्ण्यो भरद्वाजो वालखिल्यारुणिस्तथा ॥ १३६ ॥
एवमादिसहस्राणि जुह्वतेजातवेदसम् । अक्षमालाकरोत्कीर्णाध्यानयोगपरायणाः
एकचित्ता द्विजाःसर्वे चक्रुर्होमक्रियां तदा ।
ततःसमुत्थितं लिङ्गं मोक्षदं व्याधिनाशनम् ॥ १३८ ॥
अच्छेद्यं परमं देवंदृष्ट्वाव्यासस्तुतोषु च । पुष्पवृष्टिंददुर्देवा आशीर्वादान्द्विजोत्तमाः
साष्टाङ्गं प्रणतो व्यासो देवं दृष्ट्वा त्रिलोचनम् ।
ब्राह्मणान्पूजयामास शाकमूलफलेन च ॥ १४० ॥
पितृपूर्वं द्विजाः सर्वे भोजिता पाण्डुनन्दन! ।
आशीर्वादांस्ततः पुण्यान्दत्त्वा विप्रा ययुः पुनः ॥ १४१ ॥
तदा प्रभृति तत्तीर्थं व्यासाख्यं प्रोच्यते बुधैः ॥ १४२ ॥

युधिष्ठिर उवाच

व्यासतीर्थस्य यत्पुण्यं तत्सर्वं कथयस्व मे ।
स्नानदानविधानं च यस्मिन्काले महाफलम् ॥ १४३ ॥

श्रीमार्कण्डेय उवाच

कथयामिसमस्तंतेभ्रातृभिःसहपाण्डव । कार्त्तिकस्यसितेपक्षेचतुर्दश्यांजितेन्द्रियः
उपोष्य यो नरो भक्त्या रात्रौ कुर्वीत जागरम् ।
स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्पिषा ॥ १४५ ॥
दध्ना च खण्डयुक्तेन कुशतोयेन वै पुनः । श्रीखण्डेन सुगन्धेन गुण्ठयेत्परमेश्वरम्
ततः सुगन्धकुसुमैर्बिल्वपत्रैश्च पूजयेत् । मुचुकुन्देन कुन्देन कुशजातीप्रसूनकैः ॥
उन्मत्तमुनिपुष्पैश्च तथान्यैः कालसम्भवैः । अर्चयेत्परयाभक्त्या द्वीपेश्वरमनुत्तमम्
इक्षुगडुकदानेन तुष्यते परमेश्वरः । गडुकाष्टकदानेन पातकं यात्यहोर्जितम् ॥ १४६
मासार्जितं च नश्येत गडुकाष्टशतेन च । षाण्मासिकं सहस्रेण द्विगुणैरब्दिकंतथा
आजन्मजनितं पापमयुतेन प्रणश्यति । द्विगुणैर्नश्यतेव्याधिस्त्रिगुणैःस्याद्धनागमः
षड्गुणैर्जायते वाग्मी सिद्धस्तद्द्विगुणैस्तथा ।
रुद्रत्वं दशलक्षैश्च जायते नाऽत्र संशयः ॥ १५२ ॥
पौर्णमास्यां नृपश्रेष्ठ! स्नानं कुर्वीतभक्तितः । मन्त्रोक्तेन विधानेनसर्वपापक्षयङ्करम्
वारुणंच तथाग्नेयंब्राह्मयं चैवाक्षयङ्करम् । देवान्पितॄन्मनुष्यांश्चविधिवत्तर्पयेद्बुधः
ऋचा ऋग्वेदजं पुण्यं साम्ना सामफलं लभेत् ।
यजुर्वेदस्य यजुषा गायत्र्या सर्वमाप्नुयात् ॥ १५५ ॥
अक्षरं च जपेन्मन्त्रं सौरं वा शिवदैवतम् । अथवावैष्णवंमन्त्रंद्वादशाक्षरसञ्ज्ञितम्
पूजयेद् ब्राह्मणान्भक्त्या सर्वलक्षणलक्षितान् ।
स्वदारनिरतान्विप्रान्दम्भलोभविवर्जितान् ॥ १५७ ॥
भिन्नवृत्तिकरान्पापान्पतिताञ्छूद्रसेवनान् ।
शूद्रीग्रहणसंयुक्तान्वृषली यस्य मन्दिरे ॥ १५८ ॥
परोक्षवादिनो दुष्टान्गुरुनिन्दापरायणान् । वेदद्वेषणशीलांश्चहैतुकान्बकवृत्तिकान्
ईदृशान्वर्जयेच्छ्राद्धे दाने सर्वव्रतेषु च । गायत्रीसारमात्रोऽपिवरंविप्रःसुयन्त्रितः
नायन्त्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी । ईदृशान्पूजयेद्विप्रानन्नदानहिरण्यतः

उपानहौ च वस्त्राणि शय्यां छत्रमथासनम्।
यो दद्याद् ब्राह्मणे भक्त्या सोऽपि स्वर्गे महीयते ॥ १६२ ॥
प्रत्यक्षा सुरभी तत्र जलधेनुस्तथाघृता। तिलधेनुः प्रदातव्या महिष्यश्च तथैव च
कृष्णाजिनप्रदाता यो दाता यस्तिलसर्पिषोः।
कन्यापुस्तकयोर्दाता सोऽक्षयं लोकमाप्नुयात् ॥ १६४ ॥
धूर्वाहौ खुरसंयुक्तौ धान्योपस्करसंयुतौ।
दापयेत्स्वर्गकामस्तु इति मे सत्यभाषितम् ॥ १६५ ॥
सूत्रेण वेष्टयेद् द्वीपमथवा जगतीं शुभाम्।
मन्दिरं परया भक्त्या परमेशमथापि वा ॥ १६६ ॥
प्रदक्षिणां विधानेन यः करोत्यत्र मानवः।
जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चाऽपरो नृप ॥ १६७ ॥
कुशः क्रौञ्चस्तथा काशः पुष्करश्चैव सप्तमः। सप्तसागरपर्यन्ता वेष्टितातेन भारत
द्वीपेश्वरे महाराजवृषोत्सर्गं च कारयेत्। वृषेणाऽरुणवर्णेन माहेशंलोकमाप्नुयात्
यस्तु वै पाण्डुरो वक्त्रे ललाटे पादयोस्तथा।
लाङ्गूले यस्तु वै शुभ्रः स वै नाकस्य दर्शकः ॥ १७० ॥
नीलोऽयमीदृशः प्रोक्तो यस्तु द्वीपेश्वरे त्यजेत्।
स समा रोमसङ्ख्याता नाके वसति भारत ॥ १७१ ॥
सौरं च शाङ्करं लोकं वैरञ्चं वैष्णवं क्रमात्।
भुनक्ति स्वेच्छया राजन्व्यासतीर्थप्रभावतः ॥ १७२ ॥
सपत्नीकं ततो विप्रं पूजयेत्तत्र भक्तितः। सितरक्तानिवस्त्राणि योदद्यादग्रजन्मने ॥
कृत्वा प्रदक्षिणं युग्मं प्रीयतां मे जगद्गुरुः। नास्तिविप्रसमो बन्धुरिहलोकेपरत्रच
यमलोके महाघोरे पतन्तं योऽभिरक्षति। इतिहासपुराणज्ञंविष्णुभक्तं जितेन्द्रियम्
पूजयेत्परया भक्त्या सामगं वा विशेषतः।
द्वीपेश्वरं च ये भक्त्या संस्मरन्ति गृहे स्थिताः ॥ १७६ ॥

न तेषां जायते शोको न हानिर्न च दुष्कृतम्। प्रथमंपूजयेत्तत्र लिङ्गं सिद्धेश्वरं ततः
यत्र सिद्धो महाभागा व्यासः सत्यवतीसुतः।
अस्यैव पूजनात्सिद्धो धारासर्पो महामतिः ॥ १७८ ॥
तत्र तीर्थे तु यो राजन्प्राणत्यागं करोति च।
सूर्यलोकमसौ भित्त्वा प्रयाति शिवसन्निधौ ॥ १७९ ॥
समाःसहस्राणि च सप्त वै जले दशैकमग्नौ पतने च षोडश।
महाहवे षष्टिरशीति गोग्रहे ह्यनाशके भारत! चाक्षया गतिः ॥ १८० ॥
पिता पितामहश्चैव तथैवप्रपितामहः। वायुभूतं निरीक्षन्ते ह्यागच्छन्तंस्वगोत्रजम्
अस्मद्गोत्रेऽस्ति कः पुत्रो यो नो दद्यात्तिलोदकम्।
कार्त्तिक्यां च विशेषेण वैशाख्यां वा तथैव च ॥ १८२ ॥
स्वर्गतिं च प्रयास्यामस्तत्र तीर्थोपसेवनात्।
एतत्ते कथितं सर्वं द्वीपेश्वरमनुत्तमम् ॥ १८३ ॥
यः पठेत्परया भक्त्या शृणुयात्तद्गतो नृप !।
सोऽपि पापविनिर्मुक्तो मोदते शिवमन्दिरे ॥ १८४ ॥
ऊषरं सर्वतीर्थानां निर्मितं मुनिपुङ्गवैः। कामप्रदं नृपश्रेष्ठ! व्यासतीर्थं न संशयः ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे व्यासतीर्थमाहात्म्यवर्णनं नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥

अष्टनवतितमोऽध्यायः

प्रभासतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्रप्रभासेश्वरमुत्तमम् । विख्यातंत्रिषुलोकेषुस्वर्गसोपानमुत्तमम्

युधिष्ठिर उवाच

प्रभासं तात! मे ब्रूहि कथंजातंमहाफलम् । स्वर्गसोपानदं दृश्यंसंक्षेपात्कथयाशुमे

श्रीमार्कण्डेय उवाच

दुर्भगा रविपत्नी च प्रभा नामेति विश्रुता ।
तया चाऽऽराधितः शम्भुरुग्रेण तपसा पुरा ॥ ३ ॥

वायुभक्षा स्थिता वर्षंवर्षंध्यानपरायणा । ततस्तुष्टोमहादेवःप्रभायाःपाडुनन्दन

ईश्वर उवाच

कस्मात्संक्लिश्यसे बाले! कथ्यतां यद्विवक्षितम् ।
अहं हि भास्करोऽप्येको नानात्वं नैव विद्यते ॥ ५ ॥

प्रभोवाच

नान्यो देवः स्त्रियः शम्भो! विना भर्त्रा कचित्प्रभो !।
सगुणो निर्गुणो वाऽपि धनाढ्यो वाऽप्यकिञ्चनः ॥ ६ ॥

प्रियो वा यदि वा द्वेष्यःस्त्रीणांभर्त्तैव दैवतम् । दुर्भगत्वेनदग्धाहं सखीमध्येसुरेश्वर
भर्त्तर्यलब्धसौख्यास्मि तेन क्लिश्याम्यहं भृशम् ॥ ७ ॥

ईश्वर उवाच

वल्लभा भास्करस्यैव मत्प्रसादाद्भविष्यसि ॥ ८ ॥

पार्वत्युवाच

अप्रमाणं भवद्वाक्यं भास्करोऽपि करिष्यति ।

वृथा क्लेशो भवेदस्याः प्रभायाः परमेश्वर !॥ ९ ॥
उमावाक्यान्महेशान ध्यातस्तिमिरनाशनः ।
आगतो गगनाद्भानुर्नर्मदोत्तररोधसि ॥ १० ॥

भानुरुवाच

आहूतोऽस्मि कथं देव! ह्यन्धासुरनिषूदन ॥ ११ ॥

ईश्वर उवाच

प्रभां पालय भो भानो! सन्तोषेण परेण हि ॥ १२ ॥

उमोवाच

प्रभायामन्दिरेनित्यंस्थीयतांहिमनाशन । अग्रपत्नीसमस्तानांभार्याणांक्रियतांरवे

भानुरुवाच

एवंदेविकरिष्यामितववाक्यम्वरानने । एतच्छ्रुत्वाप्रभाऽऽहूता प्रत्युवाचमहेश्वरम्

प्रभोवाच

स्वांशेन स्थीयतां देव! मन्मथारे! उमापते !।
एकांशः स्थाप्यतामत्र तीर्थस्योन्मीलनाय च ॥ १५ ॥

श्रीमार्कण्डेय उवाच

सर्वदेवमयं लिङ्गं स्थापितं तत्र पाण्डव! । प्रभासेशइतिख्यातं सर्वलोकेषुदुर्लभम्
अन्यानि यानि तीर्थानि काले तानि फलन्ति वै ।
प्रभासेशस्तु राजेन्द्र सद्यः कामफलप्रदः ॥ १७ ॥

माघमासे सितेपक्षे सप्तम्यां च विशेषतः । अश्वं यः स्पर्शयेत्तत्र यथोक्तब्राह्मणेनृप
इन्द्रत्वं प्राप्यते तेन भास्करस्याऽथवा पदम् ।
स्नात्वा परमया भक्त्या दानं दद्याद्द्विजातये ॥ १९ ॥

गोप्रदातालभेत्स्वर्गंसत्यलोकंवरेश्वर । सर्वाङ्गसुन्दरीं शुभ्रां क्षीरिणींतरुणींशुभाम्
सवत्सां घण्टासंयुक्तां कांस्यपात्रावदोहिनीम् ।
ददते ये नृपश्रेष्ठ! न ते यान्ति यमालयम् ॥ २१ ॥

अथ यः परया भक्त्या स्नानं देवस्य कारयेत् ।
स प्राप्नोति परं लोकं यावदाभूतसम्प्लवम् ॥ २२ ॥
दौर्भाग्यं नाशमायाति स्नानमात्रेण पाण्डव !।
तत्र तीर्थे तु यो भक्त्या कन्यादानं प्रयच्छति ॥ २३ ॥
ब्राह्मणाय विवाहेन दापयेत्पाण्डुनन्दन । समानवयसे देया कुलशीलधनैस्तथा
ये ददन्ते महाराज ह्यपि पातकसंयुताः । तेषां पापानि लीयन्ते ह्युदकेलवणंयथा
स्वामिद्रोहकृतं पापं निक्षेपस्याऽपहारिणी ।
मित्रघ्ने च कृतघ्ने च कूटसाक्ष्यसमुद्भवम् ॥ २६ ॥
तद् ग्रामोद्यानभेदोत्थं परदारनिषेवणम् ।
वार्द्धुषिकस्य यत्पापं यत्पापं स्तैयसम्भवम् ॥ २७ ॥
कूपभेदोद्भवं यच्च बैडालव्रतधारिणः ।
दाम्भिकं वृक्षच्छेदोत्थं विवाहस्य निषेधजम् ॥ २८ ॥
आरामस्थतरुच्छेदमगम्यागमनोद्भवम् । स्वभार्यात्यजने यच्च परभार्यासमीहनात्
ब्रह्मस्वहरणे यच्च गरदे गोविघातिनि । विद्याविक्रयणोत्थं च संसर्गाद्यच्चपातकम्
श्वबिडालवधाद्धोरं सर्पशूद्रोद्भवं तथा ।
भूमिहर्त्तुश्च यत्पापं भूमिहारिणि चैव हि ॥ ३१ ॥
माददस्वेतियत्पापंगोवह्निब्राह्मणेषु च । तत्पापं याति विलयं कन्यादानेनपाण्डव
स गत्वा भास्करं लोकं रुद्रलोके शुभे व्रजेत् ।
क्रीडते रुद्रलोकस्थो यावदिन्द्राश्चतुर्दश ॥ ३३ ॥
सर्वपापक्षये जाते शिवे भवति भावना । एतद्व्रजतियस्तीर्थं प्रभासं पाण्डुनन्दन
सर्वतीर्थफलं प्राप्य सोऽश्वमेधफलं लभेत् । गोप्रदानं महापुण्यं सर्वपापक्षयं परः
प्रशस्तं सर्वकालं हि चतुर्दश्यां विशेषतः ॥ ३५ ॥
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे प्रभासतीर्थमाहात्म्यवर्णनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥

एकोनशततमोऽध्यायः

नागेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपालनर्मदादक्षिणे तटे । स्थापितंवासुकीशंतु समस्ताघौघनाशनम्

युधिष्ठिर उवाच

कस्माच्च कारणात्तात रेवाया दक्षिणे तटे ।
वासुकीशः स्थापितो वै विस्तराद्वद मे गुरो !॥ २ ॥

श्रीमार्कण्डेय उवाच

एतत्सर्वं समास्थाय नृत्यं शम्भुश्चकार वै ॥ ३ ॥
श्रमादजायत स्वेदो गङ्गातोयविमिश्रितम् ।
पतन्तमुरगोऽश्नाति हरमौलिविनिर्गतम् ॥ ४ ॥
मन्दाकिनी ततः क्रुद्धा व्यालस्योपरि भारत !।
प्राप्नुह्यजगरत्वं हि भुजङ्ग क्षुद्रजन्तुकः ॥ ५ ॥

वासुकिरुवाच

अनुग्राह्योऽस्मिते पापोदुर्नयोऽहंहराद्गते । त्रैलोक्यपावनीपुण्यासरित्त्वंशुभलक्षणा
संसारच्छेदनकरीह्यार्त्तानामार्त्तिनाशनी । स्वर्गद्वारेस्थितात्वंहिदयांकुरुमयीश्वरि

गङ्गोवाच

कुरुष्व विपुलं विन्ध्यं तपस्त्वं शङ्करं प्रति ।
ततः प्राप्स्यसि स्वं स्थानं पन्नगत्वं ममाज्ञया ॥ ८ ॥

श्रीमार्कण्डेय उवाच

ततोऽसौ त्वरितो विन्ध्यं नागो गत्वा नगं शुभम् ।
तपस्तप्तुं समारेभे शङ्कराराधनोद्यतः ॥ ९ ॥

नित्यं दध्यौ महादेवं त्र्यक्षंडमरुकोद्यतम्। ततो वर्षशतेपूर्ण उपरुद्धो जगद्गुरुः॥
आगतस्तत्समीपं तु श्लक्ष्णां वाणीमुदाहरत्॥ १०॥
वरं वरय मे वत्स! पन्नग! त्वं कृपादर॥ ११॥

वासुकिरुवाच

यदि तुष्टोऽसि मे देव वरं दास्यसिशङ्कर। प्रसादात्तव देवेश भूयान्निष्पापतामम
तीर्थं किञ्चित्समाख्याहि सर्वपापप्रणाशनम्॥ १२॥

ईश्वर उवाच

पन्नगत्वंमहाबाहोरेवांगच्छशुभङ्करीम्। याम्येतस्यास्तटेपुण्ये स्नानंकुरुयथाविधि
इत्युक्त्वान्तर्दधेदेवोवासुकिस्त्वरयान्वितः। रूपेणाऽजगरेणैवप्रविष्टोनर्मदाजलम्
मार्गेण तस्य सञ्जातं जाह्नव्याः स्रोत उत्तमम्।
निर्द्धूतकल्मषः सर्पः सञ्जातो नर्मदाजले॥ १५॥
स्थापितः शङ्करस्तत्रनर्मदायांयुधिष्ठिर। ततो नागेश्वरंलिङ्गंप्रसिद्धं पापनाशनम्
अष्टम्यां वा चतुर्द्दश्यां स्नापयेन्मधुना शिवम्।
विमुक्तकल्मषः सद्यो जायते नाऽत्र संशयः॥ १७॥
अपुत्रा ये नराः पार्थ! स्नानं कुर्वन्ति सङ्गमे।
ते लभन्ते सुताञ्छ्रेष्ठान्कार्त्तवीर्योपमाञ्छुभान्॥ १८॥
श्राद्धं तत्रैव यः कुर्यादुपवासपरायणः। कुर्वन्प्रमोचयेत्प्रेतान्नरकान्नृपनन्दन!॥१९
सर्पाणां च भयं वंशे ज्ञातिवर्गे न जायते। निर्दोषं नन्दते तस्य कुलंनागप्रसादतः
एतत्ते सर्वमाख्यातं तव स्नेहान्नृपोत्तम!॥ २०॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्ताखण्डे-
रेवाखण्डे नागेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनशततमोऽध्यायः॥ ९९॥

शततमोऽध्यायः

मार्कण्डेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल तीर्थं परमरोचनम्। मार्कण्डेशमिति ख्यातं नर्मदादक्षिणेतटे
उत्तमं सर्वतीर्थानां गीर्व्वाणैर्वन्दितं शिवम्।
गुह्याद्गुह्यतरं पुत्र! नाख्यातं कस्यचिन्मया॥ २॥
स्थापितं तु मया पूर्वं स्वर्गसोपानसन्निभम्।
ज्ञानं तत्रैव मे जातं प्रसादाच्छङ्करस्य च॥ ३॥
अन्यस्तत्रैव यो गत्वा द्रुपदामन्तर्जलेजपेत्। स पातकैरशेषैश्च मुच्यतेपाण्डुनन्दन
वाचिकैर्मानसैश्चैव कर्मजैरपि पातकैः।
पिण्डिकां चाप्यवष्टभ्य याम्यामाशां च संस्थितः॥ ५॥
योजयेच्छूलिनंभक्त्याद्वात्रिंशद्बहुरूपिणम्। देहपातेशिवं गच्छेदितिमेनिश्चयोनृप
आज्येनबोधयेद्दीपमष्टम्यांनिशिभारत। स्वर्गलोकमवाप्नोति इत्येवं शङ्करोऽब्रवीत्
श्राद्धं तत्रैवयोभक्त्याकुर्व्वीतनृपनन्दन। पितरस्तस्यतृप्यन्तियावदाभूतसम्प्लवम्
इङ्गुदैर्बदरैर्बिल्वैरक्षतेनजलेन वा। तर्प्ययेत्तत्र यो वंश्यानाप्नुयाज्जन्मनः फलम्॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे मार्कण्डेश्वरतीर्थमाहात्म्यवर्णनंनाम शततमोऽध्यायः॥१००॥

एकाधिकशततमोऽध्यायः

सङ्कर्षणतीर्थमाहात्म्यवणनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! तीर्थं परमशोभनम् । उत्तरे नर्मदाकूले यज्ञवाटस्य मध्यतः
सङ्कर्षणमितिख्यातं पृथिव्यां पापनाशनम् । तपश्चीर्णं पुरा राजन्बलभद्रेणतत्र वै
गीर्वाणा अपि तत्रैव सन्निधौनृपनन्दन !। उमयासहितःशम्भुःस्थितस्तत्रैवकेशवः
बलभद्रेणराजेन्द्रप्राणिनामुपकारतः । स्थापितःपरया भक्त्या शङ्करः पापनाशनः

यस्तत्र स्नाति वै भक्त्या जितक्रोधो जितेन्द्रियः ।
एकादश्यां सिते पक्षे मधुना स्नापयेच्छिवम् ॥ ५ ॥
श्राद्धं तत्रैव यो भक्त्या पितॄणामथ दापयेत् ।
स याति परमं स्थानं बलभद्रवचो यथा ॥ ६ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्रयां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे सङ्कर्षणतीर्थमाहात्म्यवर्णनंनामैकाधिकशततमोऽध्यायः ॥ १०१ ॥

द्व्यधिकशततमोऽध्यायः

मन्मथेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

मन्मथेशं ततो गच्छेत्सर्वदेवनमस्कृतम् । स्नानमात्रान्नरो राजन्यमलोकंनपश्यति
अनपत्या या च नारी स्नायाद्वैपाण्डुनन्दन । पुत्रंसालभतेपार्थ सत्यसन्धंदृढव्रतम्

तत्र स्नात्वा नरोराजञ्छुचिः प्रयतमानसः ।

उपोष्य रजनीमेकां गोसहस्रफलं लभेत् ॥ ३ ॥

कामिकंतीर्थराजंतु तादृशं न भविष्यति । त्रिरात्रंकुरुतेराजन् स गोलक्षफलंलभेत्
तत्र नृत्यं प्रकर्त्तव्यं तुष्यते परमेश्वरः । गीतवादित्रनिर्घोषै रात्रौ जागरणेन च ॥

एरण्ड्यां च महादेवो दृष्टोमे मन्मथेश्वरः ।
किं समर्था यमो रुष्टो भद्रो भद्राणि पश्यति ॥ ६ ॥
कामेन स्थापितः शम्भुरेतस्मात्कामदो नृप !।
सोपानः स्वर्गमार्गस्य पृथिव्यां मन्मथेश्वरः ॥ ७ ॥

विशेषश्चात्रसन्ध्यायांश्राद्धदाने च भारत । अन्नदानेनराजेन्द्र !कीर्त्तितंफलमुत्तमम्

एतत्ते सर्वमाख्यातं तव भक्त्या तु भारत !।
पृथिव्यां सागरान्तायां प्रख्यातो मन्मथेश्वरः ॥ ९ ॥

गोदानं पाण्डवश्रेष्ठत्रयोदश्यांप्रकारयेत् । चैत्रेमासिसितेपक्षे तत्रगत्वाजितेन्द्रियः

रात्रौ जागरणं कृत्वा देवस्याग्रे नृपोत्तम !।
दीपं भक्त्या घृतेनैव देवस्याग्रे निवेदयेत् ॥ ११ ॥
स्त्र्यथवा पुरुषो वाऽपि सममेतत्फलं स्मृतम् ॥ १२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे मन्मथेश्वरतीर्थमाहात्म्यवर्णनं नाम
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

त्र्यधिकशततमोऽध्यायः

एरण्डीसङ्गमतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपालएरण्डीसङ्गमंपरम् । यच्छ्रुतं वै मया राजञ्छिवस्यवदतःपुरा

एतदेव पुरा प्रश्नं गौर्या पृष्टस्तु शङ्करः । प्रोवाचनृपशार्दूल गुह्याद्गुह्यतरं शुभम्

ईश्वर उवाच

शृणुदेविपरंगुह्यंनाऽऽख्यातं कस्यचिन्मया । रेवायाश्चोत्तरेकूलेतीर्थंपरमशोभनम्

भ्रूणहत्याहरं देवि! कामदं पुत्रवर्द्धनम् ॥ ३ ॥

पार्वत्युवाच

कथयस्व महादेव तीर्थं परमशोभनम् । भ्रूणहत्याहरं कस्मात्कामदं स्वर्गदर्शनम्

ईश्वर उवाच

अत्रिर्नाम महादेवि मानसो ब्रह्मणः सुतः । अग्निहोत्ररतोनित्यं देवतातिथिपूजकः

सोमसंस्थाश्च सप्तैव कृता विप्रेण पार्वति ।

अनसूयेतिविख्याता भार्या तस्य गुणान्विता ॥ ६ ॥

पतिव्रता पतिप्राणा पत्युः कार्यहिते रता ।

एवं याति ततः काले न पुत्रो न च पुत्रिका ॥ ७ ॥

अपराह्ने महादेविसुखासीनौ तु सुन्दरि । वदन्तौसुखदुःखानिपूर्ववृत्तानियानिच

अत्रिरुवाच

सौम्ये शुभे प्रिये कान्ते चारुसर्वाङ्गसुन्दरि । विद्याविनयसम्पन्ने पद्मपत्रनिभेक्षणे

पूर्णचन्द्रनिभाकारे पृथुश्रोणिभरालसे । न त्वया सदृशीनारी त्रैलोक्ये सचराचरे

रतिपुत्रफलानारीपठ्यते वेदवादिभिः । पुत्रहीनस्य यत्सौख्यंतत्सौख्यंममसुन्दरि

यथाऽहं न तथा पुत्रः समर्थः सर्वकर्मसु । पुन्नामनरकाद्भद्रे जातमात्रेण सुन्दरि !

पतन्तं रक्षयेद्देवि महापातकिनं यदि । महाघोरे गता वापि दुष्टकर्मपितामहाः ॥

तद्धरन्ति सुपुत्राश्च वैतरण्यां गतानपि ।

पुत्रेण लोकाञ्जयति पौत्रेण परमा गतिः ॥ १४ ॥

अथ पुत्रस्य पौत्रेण प्रगच्छेद् ब्रह्म शाश्वतम् ।

नास्ति पुत्रसमो बन्धुरिह लोके परत्र च ॥ १५ ॥

अहश्चमध्यरात्रे च चिन्तयानस्य सर्वदा । शुष्यन्तिममगात्राणि ग्रीष्मेनद्युदकंयथा

अनसूयोवाच

यत्त्वया शोचितं विप्र! तत्सर्वं शोचयाम्यहम् ।

तवोद्वेगकरं यच्च तन्मे दहति चेतसि ॥ १७ ॥

येन पुत्रा भविष्यन्ति आयुष्मन्तो गुणान्विताः ।

तत्कार्यं च समीक्षस्व येन तुष्येत्प्रजापतिः ॥ १८ ॥

अत्रिरुवाच

तपस्तप्तं मया भद्रे जातमात्रेण दुष्करम् । व्रतोपवासनियमैः शाकाहारेणसुन्दरि

क्षीणदेहस्तु तिष्ठामि ह्यशक्तोऽहंमहाव्रते । तेन शोचामिचात्मानंरहस्यंकथितंमया

अनसूयोवाच

भर्त्तुः पतिव्रतानारीरतिपुत्रविवर्धिनी । त्रिवर्गसाधनासाच श्लाघ्याचविदुषांजने

जपस्तपस्तीर्थयात्रा मृडेज्यामन्त्रसाधनम् ।

देवताराधनं चैव स्त्रीशूद्रपतनानि षट् ॥ २२ ॥

ईदृशं तु महादोषं स्त्रीणां तु व्रतसाधने । वदन्ति मुनयः सर्वे यथोक्तं वेदभाषितम्

अनुज्ञाता त्वया ब्रह्मंस्तपस्तप्स्यामि दुष्करम् ।

पुत्रार्थित्वं समुद्दिश्य तोषयामि सुरोत्तमान् ॥ २४ ॥

अत्रिरुवाच

साधुसाधु महाप्राज्ञे ममसन्तोषकारिणि । आज्ञाता त्वं महाभद्रेपुत्रार्थंतपआश्रय

देवतानां मनुष्याणां पितृणामनृणोभवे । न भार्यासदृशो बन्धुस्त्रिषुलोकेषुविद्यते

तेन देवाः प्रशंसन्ति न भार्यासदृशं सुखम् ।
सन्मुखे मन्मुखाः पुत्राः विलोमे तु पराङ्मुखाः ॥ २७ ॥
तेन भार्यां प्रशंसन्ति सदेवासुरमानुषाः । महाव्रते महाप्राज्ञे सत्त्ववति शुभेक्षणे
तपस्तपस्व शीघ्रं त्वं पुत्रार्थं तु ममाज्ञया ।
एतद्वाक्यावसाने तु साष्टाङ्गं प्रणताऽब्रवीत् ॥ २६ ॥
त्वत्प्रसादेन विप्रेन्द्र! सर्वान्कामानवाप्नुयाम् ।
हंसलीलागतिः सा च मृगाक्षी वरवर्णिनी ॥ ३० ॥
नियमस्था ततो भूत्वा सम्प्राप्ता नर्मदां नदीम् ।
शिवस्वेदोद्भवां देवीं सर्वपापप्रणाशनीम् ॥ ३१ ॥
यस्यादर्शनमात्रेण नश्यते पापसञ्चयः । स्नानमात्रेण वै यस्या अश्वमेधफलंलभेत्
ये पिबन्ति महादेवि ! श्रद्दधानाः पयः स्वयम् ।
सोमपानेन तत्तुल्यं नाऽत्र कार्या विचारणा ॥ ३३ ॥
ये स्मरन्तिदिवारात्रौयोजनानां शतैरपि । मुच्यन्तेसर्वपापेभ्योरुद्रलोकंप्रयान्तिते
नर्मदायाः समीपेतु तावुभौ योजनद्वये । न पश्यन्ति यमं तत्र ये मृतावरवर्णिनि
ततस्तदुत्तरे कूले एरण्ड्याः सङ्गमे शुभे ।
नियमस्था विशालाक्षी शाकाहारेण सुन्दरि !॥ ३६ ॥
तोषयन्ती त्रींश्च देवाञ्छुभैः स्तोत्रैर्व्रतैस्तथा ।
ग्रीष्मेषु च महादेवि ! पञ्चाग्निं साधयेत्ततः ॥ ३७ ॥
वर्षाकाले चार्द्रवासाश्चरेच्चान्द्रायणानि च ।
हेमन्ते तु ततः प्राप्ते तोयमध्ये वसेत्सदा ॥ ३८ ॥
प्रातस्नानंततःसन्ध्यां कुर्याद्देवर्षितर्पणम् । देवानामर्चनंकृत्वा होमंकुर्याद्यथाविधि
यजते वैष्णवाँल्लोकान्स्नानजाप्यहुतेन च । एवं वर्षशते प्राप्ते रुद्रविष्णुपितामहाः
सम्प्राप्ता द्विजरूपैस्तु ऐरण्ड्याः सङ्गमे प्रिये !।
पुरतः संस्थितास्तस्या वेदमभ्युद्धरन्ति च ॥ ४१ ॥

अनसूया जपं त्यक्त्वा निरीक्ष्य तान्मुहुर्मुहुः !
उत्थिता सा विशालाक्षी अर्घं दत्त्वा यथाविधि ॥ ४० ॥
अद्य मे सफलं जन्म अद्य मे सफलं तपः । दर्शनेन तु विप्राणां सर्वपापैः प्रमुच्यते
प्रदक्षिणं ततः कृत्वा साष्टाङ्गं प्रणताऽब्रवीत् ।
कन्दमूलफलं शाकं नीवारानपि पावनान् ।
प्रयच्छाम्यहमद्यैव मुनीनां भावितात्मनाम् ॥ ४४ ॥

विप्रा ऊचुः

तपसा तु विचित्रेण तपःसत्येनसुव्रते । तृप्ताः स्म सर्वकामैस्तु सुव्रते तवदर्शनात्
अस्माकंकौतुकं जातंतापसेनव्रतेनय । स्वर्गमोक्षसुतस्याऽर्थेतपस्तपसिदुष्करम्

अनसूयोवाच

तपसा सिध्यतेस्वर्गस्तपसापरमागतिः । तपसाचार्थकामौचतपसागुणवान्सुतः
तप एव च मे विप्राः सर्वकामफलप्रदम् ॥ ४७ ॥

विप्रा ऊचुः

तन्वी श्यामा विशालाक्षी स्निग्धाङ्गी रूपसंयुता ।
हंसलीलागतिगमा त्वं च सर्वाङ्गसुन्दरी ॥ ४८ ॥
किं च ते तपसा कार्यमात्मानं शोच्यसे कथम् ॥ ४६ ॥

अनसूयोवाच

यदिरुद्रश्च विष्णुश्च स्वयंसाक्षात्पितामहः । गूढरूपधराः सर्वे तच्चिह्नमुपलक्षये ॥
तस्या वाक्यावसाने तु स्वरूपं दर्शयन्ति ते ।
स्वस्वरूपैः स्थिता देवाः सूर्यकोटिसमप्रभाः ॥ ५१ ॥
चतुर्भुजो महादेवि! शङ्खचक्रगदाधरः । अतसीपुष्पवर्णस्तु पीतवासा जनार्दनः
गरुत्मान्वाहनं यस्यश्रियाचसहितोहरिः । प्रसन्नवदनःश्रीमान्स्वयंरूपोव्यवस्थितः
पीतवासा महादेवि! चतुर्वदनपङ्कजः । हंसोपरि समारूढो ह्यक्षमालाकरोद्यतः ॥
आगतो नर्मदातीरे ब्रह्मा लोकपितामहः ।

योऽसौ सर्वजगद्व्यापी स्वयं साक्षान्महेश्वरः ॥ ५५ ॥
वृषभं तु समारूढोदशबाहुसमन्वितः । भस्माङ्गरागशोभाढ्यःपञ्चवक्त्रस्त्रिलोचनः
जटामुकुटसंयुक्तः कृतचन्द्रार्द्धशेखरः । एवंरूपधरो देवः सर्वव्यापी महेश्वरः ॥ ५७
अनसूया निरीक्ष्यैतद्देवानां दर्शनं परम् । वेपमाना ततःसाध्वीसुरान्दृष्ट्वा मुहुर्मुहुः

अनसूयोवाच

किंव्यापारस्वरूपास्तुविष्णुरुद्रपितामहाः । एतद्वैश्रोतुमिच्छामिह्यशेषंकथयन्तुमे

ब्रह्मोवाच

प्रावृट्कालोह्यहंब्रह्मा आपश्चैव प्रकीर्त्तिताः । मेघरूपो ह्यहंप्रोक्तोवर्षयामि च भूतले
अहं सर्वाणि बीजानि प्राक्सन्ध्यासूदिते रवौ ।
एतद्वै कारणं सर्वं रहस्यं कथितं परम् ॥ ६१ ॥

विष्णुरुवाच

हेमन्तश्च भवेद्विष्णुर्विश्वरूपंचराचरम् । पालनायजगत्सर्वं विष्णोर्माहात्म्यमुत्तमम्

रुद्र उवाच

ग्रीष्मकालोह्यहं प्रोक्तः सर्वभूतक्षयङ्करः । कर्षयामि जगत्सर्वं रुद्ररूपस्तपस्विनि
एवं ब्रह्मा चविष्णुश्चरुद्रश्चैवमहाव्रते । त्रयोदेवास्त्रयःसन्ध्यास्त्रयःकालास्त्रयोऽग्नयः
तथा ब्रह्मा च विष्णुश्च रुद्रश्चैकात्मतां गतः ।
वरंद्द्युश्च ते भद्रे! यत्त्वया मनसेप्सितम् ॥ ६५ ॥

अनुसूयोवाच

धन्या पुण्या ह्यहं लोके श्लाघ्या वन्द्या च सर्वदा ।
ब्रह्मा विष्णुश्च रुद्रश्च प्रसन्नवदनाः शुभाः ॥ ६६ ॥
यदि तुष्टास्त्रयो देवा दयां कृत्वा ममोपरि ।
अस्मिंस्तीर्थे तु सान्निध्याद्वरदाः सन्तु मे सदा ॥ ६७ ॥

रुद्र उवाच

एवं भवतु ते वाक्यं यत्त्वयाप्रार्थितंशुभे । प्रत्यक्षावैष्णवीमायाएरण्डीनामनामतः

यस्यादर्शनमात्रेण नश्यतेपापसञ्चयः । चैत्रमासे तु सम्प्राप्तेअहोरात्रोषितो भवेत्
एरण्ड्याः सङ्गमे स्नात्वा ब्रह्महत्यां व्यपोहति ।
रात्रौ जागरणं कुर्यात्प्रभाते भोजयेद् द्विजान् ॥ ७० ॥
यथोक्तेनविधानेनपिण्डंदद्याद्यथाविधि । प्रदक्षिणां ततो दद्याद्धिरण्यं वस्त्रमेव च
रजतं च तथा गावो भूमिदानमथाऽपिवा ।
सर्वं कोटिगुणं प्रोक्तमिति स्वायम्भुवोऽब्रवीत् ॥ ७२ ॥
ये म्रियन्ति नरा देवि! एरण्ड्याः सङ्गमे शुभे । यावद्युगसहस्रंतु रुद्रलोकेवसन्ति ते
अहोरात्रोषितो भूत्वा जपेद्रुद्रांश्च वैदिकान् ।
एकादशैकसञ्ज्ञांश्च स याति परमां गतिम् ॥ ७४ ॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्राँल्लभेत्कामान्यथेप्सितान् ॥ ७५ ॥
एरण्ड्याः सङ्गमे स्नात्वा रेवाया विमले जले ।
महापातकिनो वाऽपि ते यान्ति परमां गतिम् ॥ ७६ ॥

अनसूयोवाच

यदितुष्टास्त्रयोदेवा मम भक्तिप्रचोदिताः । मम पुत्रा भवन्त्वेव हरिरुद्रपितामहाः

विष्णुरुवाच

पूज्या यत्पुत्रतां यान्ति न कदाचिच्छ्रुतं मया ।
शुभे ददामि पुत्रांस्ते देवतुल्यपराक्रमान् । रूपवन्तो गुणोपेतान्यज्विनश्चबहुश्रुतान्

अनसूयोवाच

ईप्सितंतच्च दातव्यं यन्मया प्रार्थितंहरे !। नान्यथाचैव कर्त्तव्याममपुत्रैषणा तु या

विष्णुरुवाच

पूर्वं तु भृगुसम्वादे गर्भवासउपार्जितः ।। तस्याहं नैवपारंतु नैव पश्यामि शोभने
स्मरमाणः पुरावृत्तं चिन्तयामि पुनः पुनः । एवंसञ्चिन्त्यतेदेवाः पितामहमहेश्वराः
अयोनिजाभविष्यामस्तव पुत्रा वरानने !। योनिवासेमहाप्राज्ञिदेवानैवव्रजन्तिच

सान्निध्यात्सङ्गमे देवि! लोकानां तु वरप्रदा ।
एरण्डी वैष्णवी माया प्रत्यक्षा त्वं भविष्यसि ॥ ८३ ॥
त्रयो देवाः स्थिताः पार्थ! रेवाया उत्तरे तटे ।
वरप्राप्ता तु सा देवी गता माहेन्द्रपर्वतम् ॥ ८४ ॥
क्षीणाङ्गीशुक्लदेहा च रूक्षकेशी सुदारुणा । कृतयज्ञोपवीतासातपोनिष्ठाशुभेक्षणा
शिलातलनिविष्टोऽसौ दृष्टः कान्तो महायशाः ।
हृष्टचित्तोऽभवद्देवि उत्तिष्ठोत्तिष्ठ साऽऽब्रवीत् ॥ ८६ ॥

अत्रिरुवाच

साधुसाधु महाप्राज्ञे! ह्यनसूये महाव्रते !।
अचिन्त्यं गालवादीनां वरं प्राप्ताऽसि दुर्लभम् ॥ ८७ ॥

अनसूयोवाच

त्वत्प्रसादेनदेवर्षे वरंप्राप्तास्मिदुर्लभम् । तेनदेवाःप्रशंसन्ति सिद्धाश्चऋषयोऽमलाः
एवमुक्ता तु सा देवी हर्षेण महता युता । आलोकयेत्ततःकान्तंतेनाऽपि शुभदर्शना
ईक्षणाच्चैव सञ्जातं ललाटे मण्डलं शुभम् । नवयोजनसाहस्रंमण्डलंरश्मिभिर्वृतम्
कदम्बगोलकाकारंत्रिगुणं परिमण्डलम् । तस्यमध्ये तु देवेशि पुरुषोदिव्यरूपधृक्
हेमवर्णोऽमृतमयःसूर्यकोटिसमप्रभः । आद्यःपुत्रोऽनुसूयायाःस्वयंसाक्षात्पितामहः
चन्द्रमा इतिविख्यातः सोमरूपो नृपात्मज ।
इष्टापूर्त्ते च सम्पाति कलाषोडशकेन तु ॥ ९३ ॥
प्रतिपच्च द्वितीया च तृतीया च महेश्वरि !।
चतुर्थी पञ्चमा चैव अव्यया षोडशी कला ॥ ९४ ॥
चतुर्विधस्य लोकस्य सूक्ष्मो भूत्वा वरानने !।
आप्रीणाति जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ ९५ ॥
सर्वे ते ह्युपजीवन्ति हुतं दत्तं शशिस्थितम् । वनस्पतिगतेसोमे धनवांश्च वरानने
भुञ्जन्परगृहे मूढो दहेदब्दकृतं शुभम् । वनस्पतिगते सोमे यस्तु छिन्द्याद्वनस्पतीन्

तेन पापेन देवेशि! नरा यान्ति यमालयम् ॥ ९७ ॥
वनस्पतिगते सोमे मैथुनं यो निषेवते । ब्रह्महत्यासमं पापं लभते नाऽत्र संशयः ॥
वनस्पतिगते सोमे मन्थानं योऽभिवाहयेत् ।
गावस्तस्य प्रणश्यन्ति याश्च वै पूर्वसञ्चिताः ॥ ९९ ॥
वनस्पतिगते सोमे ह्यध्वानं योऽभिगच्छति ।
भवन्ति पितरस्तस्य तं मासं रेणुभोजनाः ॥ १०० ॥
अमावास्यां महादेवि! यस्तु श्राद्धप्रदो भवेत् ।
अब्दमेकं विशालाक्षि! तृप्तास्तत्पितरो ध्रुवम् ॥ १०१ ॥
हिरण्यं रजतं वस्त्रं यो ददाति द्विजातिषु । सर्वंलक्षगुणं देवि लभते नाऽत्रसंशयः
एवं गुणविशिष्टोऽसौ सोमरूपः प्रजापतिः । सञ्जातःप्रथमःपुत्रो ह्यनसूयासुनन्दनः
द्वितीयस्तुमहादेविदुर्वासानामनामतः । सृष्टिसंहारकर्त्ता च स्वयंसाक्षान्महेश्वरः
ऋषिमध्यगतोदेवितपस्तपतिदुष्करम् । सोऽपि रुद्रत्वमायातिसम्प्राप्तेभूतविप्लवे
इन्द्रोऽपि शप्तस्तेनैव दुर्वाससा वरानने !।
द्वितीयस्य तु पुत्रस्य सम्भवः कथितो मया ॥ १०६ ॥
दत्तात्रेयस्वरूपेण भगवान्मधुसूदनः । जयद्व्यापी जगन्नाथः स्वयंसाक्षाज्जनार्द्दनः
एते देवास्त्रयः पुत्रा अनसूयाया महेश्वरि । वरदानेन ते देवा ह्यवतीर्णा महीतले
पुत्रप्राप्तिकरंतीर्थं रेवायाश्चोत्तरे तटे । अनसूयाकृतं पार्थ ! सर्वपापक्षयं परम् ॥

श्रीमार्कण्डेय उवाच

आश्चर्यभूतं लोकेऽस्मिन्नर्मदायां पुरातनम् ।
भ्रूणहत्या गतास्तत्र ब्राह्मणस्य नराधिप !॥ ११० ॥

युधिष्ठिर उवाच

इतिहासं द्विजश्रेष्ठ कथयस्व ममाऽनघ । सर्वपापहरंलोके दुःखार्त्तस्यचकथ्यताम्

श्रीमार्कण्डेय उवाच

सुवर्णशिलके ग्रामे गौतमान्वयसम्भवः । कृषीवलो महादेवि! भार्यापुत्रसमन्वितः

वसते तत्र गोविन्दः सञ्जातो विपुले कुले। पुत्रदारसमोपेतो गृहक्षेत्ररतः सदा॥
शकटं पूरयित्वा तु काष्ठानामगमद् गृहम्।
प्रक्षिप्तानि च काष्ठानि ह्येकाकी क्षुधयाऽन्वितः॥ ११४॥
रिङ्गमाणस्तदा पुत्रः पितुः शब्दात्समागतः।
न दृष्टस्तेन वै पुत्रः काष्ठैः सञ्छादितोऽवशः॥ ११५॥
आगतस्त्वरितो गेहे पिपासार्त्तो नराधिप !।
शकटं मोच्य तद्द्वारि सवृषं रज्जुसंयुतम्॥ ११६॥
भार्यातस्यैवयाद्दृष्टाचित्तज्ञा वशवर्त्तिनी। दृष्टानिपातितंपुत्रंकाष्ठैर्निर्भिन्नमस्तकम्
अजल्पमाना करुणं निक्षिप्तं झोलिकां शिशुम्।
शुश्रूषणे रता साध्वी प्रियस्य च नराधिप !॥ ११८॥
ततः स्नानादिकं कृत्वा भोजनाच्छयनं शुभम्।
पुत्रं पुत्रवतां श्रेष्ठा ह्युत्थापयति सा शनैः॥ ११९॥
यदाचनोत्थितः सुप्तः पुत्रःपञ्चत्वमागतः। तदा सा दीनवदना रुरोद च मुमोह च
तच्छ्रुत्वा रुदितं शब्दं गोविन्दस्त्रस्तमानसः।
किमेतदिति चोक्त्वा तु पतितो धरणीतले॥ १२१॥
द्वावेतौमुक्तकेशौतुभूमौनिपतितौनृप। विलेपातेचराजेन्द्रनिःश्वासोच्छ्वासितेनच
कं पश्ये प्राङ्गणे पुत्रं दृष्ट्वा क्रीडन्तमातुरम्। संधारयिष्येहृदयं स्फुटितं तव कारणे
त्वज्जन्मान्तं यशो नित्यमक्षयां कुलसन्ततिम्।
दृष्ट्वा किमनृणीभूतो यास्यामि परमां गतिम्॥ १२४॥
मम वृद्धस्य दीनस्य गतिस्त्वं किल पुत्रक !।
एते मनोरथाः सर्वे चिन्तिता विफला गताः॥ १२५॥
इमां तु विकलां दीनां विहीनां सुतबान्धवैः।
रुदन्तीं पतितां पाहि मातरं धरणीतले॥ १२६॥
पुन्नाम्नो नरकाद्यस्मात्पितरंत्रायते सुतः। तेन पुत्र इतिप्रोक्तःस्वयमेवस्वयम्भुवा

अपुत्रस्य गृहं शून्यं दिशः शून्या ह्यबान्धवाः।
मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रता॥ १२८॥
मृषाऽयं वदतेलोकश्चन्दनंकिल शीतलम्। पुत्रगात्रपरिष्वङ्गश्चन्दनादपि शीतलः
श्मश्रुग्रहणक्रीडन्तंधूलिधूसरिताननम् पुण्यहीनानपश्यन्तिनिजोत्सङ्गसमास्थितम्
दिगम्बरं गतव्रीडं जटिलं धूलिधूसरम्।
पुण्यहीना न पश्यन्ति गङ्गाधरमिवात्मजम्॥ १३१
वीणावाद्यस्वरो लोके सुस्वरः श्रूयते किल।
रुदितं बालकस्यैव तस्मादाह्लादकारकम्॥ १३२॥
मृगपक्षिषु काकेषु पशूनां स्वरयोनिषु। पुत्रं तेषु समस्तेषु वल्लभं ब्रुवते बुधाः॥
मत्स्याश्वप्रकाराश्चैव कूर्मग्राहादयोऽपि वा।
पुत्रोत्पत्तौ च हृष्यन्ति विपत्तौ यान्ति दुःखिताम्॥ १३४॥
देवगन्धर्वयक्षाश्च हृष्यन्तेपुत्रजन्मनि। पञ्चत्वेतेऽपिशोचन्तिमन्दभाग्योऽस्मिपुत्रक
ऋषिमेलापकं चक्रे पुत्रार्थे राघवो नृप। इन्द्रस्थानेस्थितस्तस्यप्रोक्षतेह्यासनंयतः
स्वर्गवासं सुताद्बाह्यं विद्यते न तु पाण्डव !।
चक्रे दशरथस्तस्मात्पुत्रार्थं यज्ञमुत्तमम्॥ १३७॥
रामोलक्ष्मणशत्रुघ्नौ भरतस्तत्र सम्भवात्।
कार्त्तवीर्यो जितो येन रामेणाऽमिततेजसा॥ १३८॥
स रामो रामचन्द्रेण अष्टवर्षेण निर्जितः। एकाकिनाहतोबाली प्लवगः शत्रुदुर्जयः
रावणो ब्रह्मपुत्रो यस्त्रैलोक्यं यस्य शङ्कते। हतः स रामचन्द्रेण सपुत्रःसहबान्धवः
एवं पुत्रं विना सौख्यं मर्त्यलोके न विद्यते।
वंशार्थे मैथुनं यस्य स्वर्गार्थे यस्य भारती॥ १४१॥
मृष्टान्नं ब्राह्मणस्यार्थे स्वर्गे वासं तु यान्ति ते।
ब्रह्महत्याश्वमेधाभ्यां न परं पापपुण्ययोः॥ १४२॥
पुत्रोत्पत्तिविपत्तिभ्यां न परं सुखदुःखयोः।

किं ब्रवीमीति भो वत्स! न तु सौख्यं सुतं विना ॥ १४३ ॥

एवं बहुविधं दुःखं प्रलपित्वापुनः पुनः । जनैश्चाश्वासितोविप्रो बालंगृह्यबहिर्गतः

ततः संस्कृत्य तं बालं विधिदृष्टेनकर्मणा । समवेतौतुदुःखार्त्तावागतौस्वगृहं पुनः

एवंगृहागते विप्रेरात्रिर्जाता युधिष्ठिर । भूमौ प्रसुप्तो गोविन्दः पुत्रशोकेनपीडितः

यावन्निरीक्षते भार्या भर्त्तारं दुःखपीडितम् ।
कृमिराशिगतं सर्वं गोविन्दं समपश्यत ॥ १४७ ॥

दुःखाद् दुःखतरे मग्ना दृष्ट्वा तं पातकान्वितम् ।
एवं दुःखनिमग्नायाः शर्वरी विगता तदा ॥ १४८ ॥

पशुपालस्तु महिषी मुक्त्वाऽरण्येऽगमद् गृहात् ।
अरण्ये महिषीः सर्वा रक्षयित्वा गृहागतः ॥ १४६ ॥

विज्ञप्तः पशुपालेन गोविन्दो ब्राह्मणोत्तमः ।
यावद्भोक्ष्याम्यहं स्वामिन्महिषीस्त्वं च रक्षसे ॥ १५० ॥

ततःसत्वरितोविप्रोजगाममहिषीःप्रति । नतत्रमहिषीपश्येत्पश्चात्क्षेत्राभिसन्मुखम्

धावमानश्च विप्रस्तु एरण्डीसङ्गमे गतः । ततः प्रविष्टस्तुजले रेवैरण्ड्योस्तुसंगमे

तज्जलं पीतमात्रं तु त्वरया चातितर्षितः ।
अकामात्सलिलं पीत्वा प्रक्षाल्य नयने शुभे ॥ १५३ ॥

आजगामततः पश्चाद्भवनंदिवसक्षये । भुक्त्वादुःखान्वितोरात्रौगोविन्दःशयनंययौ

निद्राभिभूतः शोकेन श्रमेणैवतुखेदितः । पुनस्तच्चार्धरात्रे तु तस्य भार्यायुधिष्ठिर

कृमिभिर्वेष्टितं गात्रं कच्चित्पश्यत्यवेष्टितम् ।
पुनः सा विस्मयाऽविष्टा तस्य भार्या गुणान्विता ॥
उवाच दुष्कृतं तस्य साध्वसाविष्टचेतसा ॥ १५६ ॥

भार्योवाच

अतीतेपश्चमेचाह्नित्विन्धनंक्षिपतस्तुते । गृहपश्चाद्गतोबालो ह्यज्ञानाद्घातितस्त्वया

मया तत्पातकं घोरं रहस्यं न प्रकाशितम् ।

तेन प्रच्छन्नपापेन दह्यमाना दिवानिशम् ॥ १५८ ॥

न सुखं तव गात्रस्य पश्यामि न हि चात्मनः ।
निद्रा मम शमं याता रतिश्चैव त्वया सह ॥ १५६ ॥

श्रूयते मानवे शास्त्रे श्लोको गीतो महर्षिभिः ।
स्मृत्वा स्मृत्वा तु तं चित्ते परितापो न शाम्यति ॥ १६० ॥

कीर्त्तनान्नश्यते धर्म्मो वर्धतेऽसौ निगूहनात् ।
इह लोके परे चैव पापस्याऽप्येवमेव च ॥ १६१ ॥

एवं सञ्चिन्त्यमानाऽहं स्थिता रात्रौ भयातुरा ।
कृमिराशिगतं त्वां हि कस्याऽहं कथयामि किम् ॥ १६२ ॥

पुनस्त्वंचाऽद्यमेदृष्टोभ्रूणहत्याकृमिश्रितः । कश्चिद्भिन्दन्तितेगात्रंकश्चिन्नष्टाःसमन्ततः

एतत्संस्मृत्य संस्मृत्य विमृशामि पुनः पुनः ।
न जाने कारणं किञ्चित्पृच्छन्त्याः कथयस्व मे ॥ १६४ ॥

तडागं वा सरिद्वाऽपि तीर्थं वा देवतार्च्चनम् ।
यं गतोऽसि प्रभावोऽयं तस्य नाऽन्यस्य मे स्थितम् ॥ १६५ ॥

एवमुक्तस्तुविप्रोऽसौकथयामास भारत । भार्याया यद्दिवावृत्तं शङ्कमानोनृपोत्तम

अद्य... महिषीसार्थंएरण्डीसङ्गमं गतः । नाभिमात्रे जले गत्वापीतवान्सलिलंबहु

नान्यत्तीर्थं विजानामि सरितं सर एव वा ।
सत्यं सत्यं पुनः सत्यं कथितं तव भामिनि !॥ १६८ ॥

एवं ज्ञात्वा सा सर्वमुपवासकृतक्षणा । सपत्नीको गतस्तत्र सङ्गमे वरवर्णिनि !॥

स्नात्वा तत्र जले रम्ये नत्वा देवं तु भास्करम् ।
स्नापयामास देवेशं शङ्करं चोमया सह ॥ १७० ॥

पञ्चगव्यघृतक्षीरैर्दधिक्षौद्रघृतैर्जलैः । गन्धमाल्यादिधूपैश्च नैवेद्यैश्च सुशोभनैः ॥

पूज्यत्रयीमयंलिङ्गं देवींकात्यायनींशुभाम् । रात्रौजागरणंकृत्वापत्यासहपतिव्रता

ततः प्रभाते विमले द्विजान्सम्पूज्य यत्नतः । गोदानेन हिरण्येन वस्त्रेणान्नेन भारत

गोविन्दः पूजयामास स्वशक्त्या ब्राह्मणाञ्छुभान् ।
मुक्तपापो गृहायातः स्वभार्यासहितो नृप ॥ १७४ ॥
एवं यः शृणुते भक्त्या गोविन्दाख्यानमुत्तमम् ।
पठते परया भक्त्या भ्रूणहत्या प्रणश्यति ॥ १७५ ॥
क्रीडते शाङ्करे लोके यावदाभूतसम्प्लवम् । यश्चैवाश्वयुजे मासि चैत्रेवा नृपसत्तम
सप्तम्यां च सिते पक्षे सोपवासो जितेन्द्रियः ।
सात्विकीं वासनां कृत्वा यो वसेच्छिवमन्दिरे ॥ १७७ ॥
ध्यायमानो विरूपाक्षं त्रिशूलकरसंस्थितम् ।
कंसासुरनिहन्तारं शङ्खचक्रगदाधरम् ॥ १७८ ॥
पक्षिराजसमारूढं त्रैलोक्यवरदायकम् । पितामहं ततो ध्यायेद्धंसस्थं चतुराननम्
सर्गप्रदं समस्तस्य कमलाकरशोभितम् । योह्येवं वसते तत्र त्रियमे स्थानउत्तमे
ततः प्रभाते विमलेह्यष्टम्यांच नराधिप ।। ब्राह्मणान्पूजयेद्भक्तयासर्वदोषविवर्जितान्
सर्वावयवसम्पूर्णान्सर्वशास्त्रविशारदान् ।
वेदाभ्यासरतान्नित्यं स्वदारनिरतान्सदा ॥ १८२ ॥
श्राद्धेदानेव्रते योग्यान्ब्राह्मणान्पाण्डुनन्दन! । प्रेतानां पूजनं तत्र देवपूर्वं समारभेत्
प्रेतत्वान्मुच्यते शीघ्रमेरण्ड्याः पिण्डतर्पणैः ।
दानानि तत्र देयानि ह्यन्नमुख्यानि सर्वदा ॥ १८४ ॥
हिरण्यभूमिकन्याश्च धूर्वाहौ शुभलक्षणौ ।
सीरेण सहितौ पार्थ ! धान्यं द्रोणकसङ्ख्यया ॥ १८५ ॥
अलङ्कृतां सवत्सां च क्षीरिणीं तरुणीं सिताम् ।
रक्तां वा कृष्णवर्णां वा पाटलां कपिलां तथा ॥ १८६ ॥
कांस्यदोहनसंयुक्तां रुक्मखुरविभूषणाम् ।
स्वर्णशृङ्गीं सवत्सां च ब्राह्मणायोपपादयेत् ॥ १८७ ॥
प्रीयतांमे जगन्नाथा हरकृष्णपितामहाः । संसाररक्षणीदेवी सुरभी मां समुद्धरेत्

पुत्रार्थं याः स्त्रियःपार्थ! ह्येरण्डीसङ्गमे नृप । स्नाप्यन्तेरुद्रसूक्तैश्चचतुर्वेदोद्भवैस्तथा
चतुर्भिर्ब्राह्मणैःशस्तं द्वाभ्यां योग्यैश्च कारयेत् ।
एकेन सार्द्रकुम्भेन दाम्पत्यमभिषेचयेत् ॥ १९० ॥
दैवज्ञेनैव चैकेन अथवा सामगेन वा । पञ्चरत्नसमायुक्तं कुम्भे तत्रैव कारयेत् ॥
गन्धतोयसमायुक्तं सर्वौषधिविमिश्रितम् । आम्रपल्लवसंयुक्तमश्वत्थमधुकं तथा
गुण्ठितं सितवस्त्रेणसितचन्दनचर्चितम् । सितपुष्पैस्तुसंच्छन्नंसिद्धार्थकृतमध्यमम्
कांस्यपात्रे तु संस्थाप्य पुत्रार्थी देशिकोत्तमः ।
अङ्गलग्नं तु तद्वस्त्रं कटकाभरणं तथा ॥ १९४ ॥
तत्सर्वं मण्डले त्याज्यं सिद्ध्यर्थं चात्मनस्तदा ।
प्रणम्य भास्करं पश्चादाचार्यं रुद्ररूपिणम् ॥ १९५ ॥
मधुरं च ततोऽश्नीयाद्देव्याभुवनउत्तमे । फलदानं च विप्राय छत्रं ताम्बूलमेव च
उपानहौ च यानंचसभवेद्दुःखवर्जितः । भास्करे क्रीडतेलोकेयावदाभूतसम्प्लवम्
दानं कोटिगुणं सर्वं शुभं वा यदि वाऽशुभम् ।
यथानदीनदाः सर्वे सागरे यान्ति सङ्क्षयम् ॥ १९८ ॥
एवं पापानिनश्यन्तिह्येरण्डीसङ्गमेनृणाम् । समन्ताच्छस्त्रपातेनह्येरण्डीसङ्गमेनृप
भ्रूणहत्यासमं पापं नश्यते शङ्करोऽब्रवीत् ।
प्राणत्यागं च यो भक्त्या जातवेदसि कारयेत् ॥ २०० ॥
अनाशकं नृपश्रेष्ठ! जले वा तदनन्तरम् । पञ्चसाहस्त्रिकं मानं वर्षाणां जातवेदसि
जलेत्रीणिसहस्राण्यनाशकेषष्टिभुञ्जते । काकाबकाःकपोताश्चह्युलूकाःपशवस्तथा
सङ्गमोदकसंस्पृष्टास्ते यान्ति परमां गतिम् ।
वृक्षाश्च तत्पदं ज्ञात्वा यां गतिं यान्ति योगिनः ॥ २०३ ॥
एरण्डिका मया देवी दृष्टो मे मन्मथेश्वरः । किंसमर्थोयमोरुष्टोभद्रोभद्राणिपश्यति
मृत्तिकां सङ्गमोद्भूतां ये च गुण्ठन्ति नित्यशः ।
भ्रूणहत्यादि पापानि नश्यन्ते नाऽत्र संशयः ॥ २०५ ॥

एरण्डीसङ्गमे मर्त्यो लुण्ठ्यमानोनराधिप । सर्वपापैर्विनिर्मुक्तःपदंगच्छत्यनामयम्

एरण्ड्याः सङ्गमं मर्त्याः कीर्त्तयन्त्याश्रमस्थिताः ।
विमुक्तपापा जायन्ते सत्यं शङ्करभाषितम् ॥ २०७ ॥
एरण्डीपादपाग्रैस्तु दृष्टैः पापं व्यपोहति ॥ २०८ ॥
तीर्थाख्यानमिदं पुण्यं ये पठिष्यन्ति मानवाः ।
शृण्वन्ति चाऽपरे भक्त्या मुक्तपापा भवन्ति ते ॥ २०९ ॥

एतत्ते सर्वमाख्यातमेरण्डीसङ्गमं नृप !। भूयश्चाऽन्यत्प्रवक्ष्यामि सर्वपापक्षयङ्करम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डेएरण्डीसङ्गमतीर्थफलमाहात्म्यवर्णनंनाम त्र्यधिकशततमोऽध्यायः

———

चतुरधिकशततमोऽध्यायः

सुवर्णशिलातीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपाल सौवर्णशिलमुत्तमम् । प्रख्यातमुत्तरे कूले सर्वपापक्षयंकरम् समन्ताच्छतपातेन मुनिसङ्घैः पुराकृतम् । रेवायांदुर्लभंस्थानंसङ्गमस्यसमीपतः विभक्तं हस्तमात्रं च पुण्यक्षेत्रंनराधिप । सुवर्णशिलकेस्नात्वापूजयित्वा महेश्वरम्

नत्वा तु भास्करं देवं होतव्यं च हुताशने !।
बिल्वेनाऽऽज्यविमिश्रेण बिल्वपत्रैरथाऽपिवा ॥ ४ ॥
प्रीयतां मे जगन्नाथो व्याधिर्नश्यतु मे ध्रुवम् ।
द्विजाय काञ्चने दत्ते यत्फलं तच्छृणुष्व मे ॥ ५ ॥

बहुस्वर्णस्य यत्प्रोक्तं यागस्यफलमुत्तमम् । तथाऽसौलभतेसर्वंकाञ्चनंयःप्रयच्छति तेन दानेनपूतात्मा मृतःस्वर्गमवाप्नुयात् । रुद्रस्यानुचरस्तावद्यावदिन्द्राश्चतुर्दश

ततः स्वर्गावतीर्णस्तु जायते विशदे कुले ।
धनधान्यसमोपेतः पुनः स्मरति तज्जलम् ॥ ६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे सुवर्णशिलातीर्थमाहात्म्यवर्णनंनामचतुरधिकशततमोऽध्यायः ॥

———

पञ्चाधिकशततमोऽध्यायः

करञ्जतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

करञ्जाख्ये ततो गच्छेत्सोपवासो जितेन्द्रियः ।
तत्र स्नात्वा तु राजेन्द्र! सर्वपापैः प्रमुच्यते ॥ १ ॥

अर्चयित्वामहादेवंदत्त्वादानंतुभक्तितः । सुवर्णंरजतंवाऽपि मणिमौक्तिकविद्रुमान् पादुकोपानहौ छत्रं शय्यां प्रावरणानि च । कोटिकोटिगुणंसर्वंजायतेनात्रसंशयः

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेकरञ्जतीर्थमाहात्म्यवर्णनंनाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

———

षडधिकशततमोऽध्यायः

कामदतीर्थमाहात्म्यवर्णनम्

ततो गच्छेन्महीपाल तीर्थं परमशोभनम् । सौभाग्यकरणंदिव्यं नरनारीमनोरमम् तत्रयादुर्भगानारीनरोवा नृपसत्तम । स्नात्वाऽर्चयेदुमारुद्रौसौभाग्यंतस्यजायते

तृतीयायामहोरात्रं सोपवासो जितेन्द्रियः ।

निमन्त्रयेद् द्विजं भक्त्या सपत्नीकं सुरूपिणम् ॥ ३ ॥
गन्धमाल्यैरलङ्कृत्य वस्त्रधूपादिवासितम् ।
भोजयेत्पायसान्नेन कृसरेणाऽथ भक्तितः ॥ ४ ॥
भोजयित्वायथान्यायं प्रदक्षिणमुदाहरेत् । प्रीयतां मे महादेवः सपत्नीकोवृषध्वजः
यथा ते देवदेवेश! न वियोगः कदाचन ।
ममाऽपि करुणां कृत्वा तथाऽस्त्विवति विचिन्तयेत् ॥ ६ ॥
एवं कृते ततस्तस्य यत्पुण्यं समुदाहृतम् । तत्तेसर्वं प्रवक्ष्यामि यथादेवेनभाषितम्
दौर्भाग्यं दुर्गतिश्चैव दारिद्र्यं शोकबन्धनम् ।
वन्ध्यत्वं सप्तजन्मानि जायते न युधिष्ठिर !॥ ८ ॥
ज्येष्ठमासे सिते पक्षे तृतीयायां विशेषतः ।
तत्र गत्वा यो भक्त्या पञ्चाग्निं साधयेत्ततः ॥ ६ ॥
सोऽपि पापैरशेषैस्तुमुच्यतेनाऽत्रसंशयः । गुग्गुलंदहते यस्तुद्विधाचित्तविवर्जितः
शरीरं भेदयेद्यस्तु गौर्याश्चैव समीपतः । तस्मिन्कर्मप्रविष्टस्यउत्क्रान्तिर्जायतेयदि
देहपाते व्रजेत्स्वर्गमित्येवं शङ्करोऽब्रवीत् ।
सितरक्तैस्तथा पीतैर्वस्त्रैश्च विविधैः शुभैः ॥ १२ ॥
ब्राह्मणीं ब्राह्मणं चैव पूजयित्वा यथाविधि ।
पुष्पैर्नानाविधैश्चैव गन्धपुष्पैः सुशोभनैः ॥ १३ ॥
कण्ठसूत्रकसिन्दूरैः कुङ्कुमेन विलेपयेत् । कल्पयेत स्त्रियंगौरीं ब्राह्मणंशिवरूपिणम्
तेषां तद्रूपकं कृत्वा दानमुत्सृज्यते ततः । कङ्कणंकर्णवेष्टं च कण्ठिकांमुद्रिकांतथा
सप्तधान्यं तथा चैव भोजनं नृपसत्तम !।
अन्यान्यपि च दानानि तस्मिंस्तीर्थे ददाति यः ॥ १६ ॥
सर्वदानैश्च यत्पुण्यं प्राप्नुयान्नात्र संशयः ।
सहस्रगुणितं सर्वं नात्र कार्या विचारणा ॥ १७ ॥
शङ्करेण समं तस्माद्भोगं भुङ्क्ते ह्यनुत्तमम् ।

सौभाग्यं तस्य विपुलं जायते नाऽत्र संशयः ॥ १८ ॥
अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ।
राजेन्द्र! कामदं तीर्थं नर्मदायां व्यवस्थितम् ॥ १६ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे कामदतीर्थमाहात्म्यवर्णनंनाम षडुत्तरशततमोऽध्यायः ॥१०६॥

सप्ताधिकशततमोऽध्यायः

भण्डारीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत राजेन्द्र !भण्डारीतीर्थमुत्तमम् ।
दरिद्रच्छेदकरणं युगान्येकोनविंशतिः ॥ १ ॥
धनदेन तपस्तस्तप्त्वा प्रसन्ने पद्मसम्भवे । तत्रैव स्वल्पदानेन प्राप्तं वित्तस्यरक्षणम्
तत्र गत्वा तु यो भक्त्या स्नात्वा वित्तं प्रयच्छति ।
तस्य वित्तपरिच्छेदो न कदाचिद्भविष्यति ॥ ३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे भण्डारीतीर्थमाहात्म्यवर्णनं नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

अष्टाधिकशततमोऽध्यायः

रोहिणीसोमनाथतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपाल रोहिणीतीर्थमुत्तमम् । विख्यातंत्रिषुलोकेषु सर्वपापहरम्परम्

युधिष्ठिर उवाच

रोहिणीतीर्थमाहात्म्यं सर्वपापप्रणाशनम् ।
श्रोतुमिच्छामि तत्त्वेन तन्मे त्वं वक्तुमर्हसि ॥ २ ॥

श्रीमार्कण्डेय उवाच

तस्मिन्नेकार्णवेघोरे नष्टे स्थावरजङ्गमे । उदधौ च शयानस्य देवदेवस्य चक्रिणः
नाभौसमुत्थितं पद्मं रविमण्डलसन्निभम् । कर्णिकाकेसरोपेतं पत्रैश्चसमलङ्कृतम्
तत्र ब्रह्मा समुत्पन्नश्चतुर्वदनपङ्कजः । किं करोमीति देवेश आज्ञा मे दीयतां प्रभो !
एवमुक्तस्तु देवेश! शङ्खचक्रगदाधरः । उवाच मधुरां वाणीं तदा देवं पितामहम्

सरस्वत्यां महाबाहो! लोकं कुरु ममाज्ञया ।
भूतग्राममशेषस्य उत्पादनविधिक्षयम् ॥ ७ ॥

एतच्छ्रुत्वा तं तु वचनं पद्मनाभस्यभारत । चिन्तयामास भगवान्सप्तर्षीन्हितकाम्यया

क्रमात्ते चिन्तिताः प्राज्ञाः पुलहस्त्यः पुलहः क्रतुः ।
प्राचेतसो वसिष्ठश्च भृगुर्नारद एव च ॥ ६ ॥
जज्ञे प्राचेतसो दक्षो महातेजाः प्रजापतिः ।
दक्षस्यापि तथा जाताःपञ्चाशद् दुहितरोऽनघ ॥ १० ॥

ददौ स दश धर्माय कश्यपाय त्रयोदश । तथैव स महाभागः सप्तविंशतिमिन्दवे ॥

रोहिणीनाम या तासां मध्ये तस्य नराधिप ।
अनिष्टा सर्वनारीणां भर्त्तुश्चैव विशेषतः ॥ १२ ॥

ततः सा परमं कृत्वा वैराग्यं नृपसत्तम !। आगत्य नर्मदातीरे चचार विपुलं तपः॥
एकरात्रैस्त्रिरात्रैश्च षड्द्वादशभिरेव च । पक्षमासोपवासैश्च कर्शयन्ती कलेवरम् ॥

आराधयन्ती सततं महिषासुरनाशिनीम् ।
देवीं भगवतीं तात! सर्वार्त्तिविनिवारणीम् ॥ १५ ॥
स्नात्वा स्नात्वा जले नित्यं नर्मदायाः शुचिस्मिता ।
ततस्तुष्टा महाभागा देवी नारायणी नृप !॥ १६ ॥

प्रसन्ना ते महाभागे व्रतेन नियमेन च । एतच्छ्रुत्वा तु वचनं रोहिणीशशिनःप्रिया

यथा भवामि न चिरात्तथा भवतु मानदे !।
एवमस्त्विति सा चोक्त्वा भवानी भक्तवत्सला ॥ १८ ॥

स्तूयमाना मुनिगणैस्तत्रैवान्तरधीयत । तदाप्रभृतितत्तीर्थं रोहिणीशशिनःप्रियं
सञ्जाता सर्वकालं तु वल्लभा नृपसत्तम !। तत्रतीर्थे तुयानारीनरोवास्नातिभक्तितः

वल्लभा जायते सा तु भर्त्तुर्वै रोहिणी यथा ।
तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करोति वै ॥ २१ ॥
सप्तजन्मानि दाम्पत्यवियोगो न भवेत्कचित् ॥ २२ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे रोहिणीसोमनाथतीर्थमाहात्म्यवर्णनं नामाऽ-
ष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

———

नवाधिकशततमोऽध्यायः

सेनापुरेचक्रतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपाल! चक्रतीर्थमनुत्तमम्। सेनापुरमितिख्यातं सर्वपापक्षयंकरम्
सैनापत्याभिषेकाय देवेदेवेन चक्रिणा। आनीतश्च महासेनो देवैः सेन्द्रपुरोगमैः
दानवानां वधार्थाय जयाय च दिवौकसाम्।
भूमिदानेन विप्रेन्द्रांस्तर्पयित्वा यथाविधि ॥ ३ ॥
शङ्खभेरीनिनादैश्च पटहानां च निस्वनैः। वीणावेणुमृदङ्गैश्च झल्लरीस्वरमङ्गलैः ॥
ततः कृत्वा स्वनं घोरं दानवो बलदर्पितः। रुरुर्नाम विघातार्थमभिषेकस्यचागतः
हस्त्यश्वरथपत्त्यौघैः पूरयन्वै दिशो दश। तत्र तेन महद्युद्धं प्रवृत्तं किल भारत!
शक्त्यृष्टिपाशमुशलैः खड्गैस्तोमरटङ्कनैः।
भल्लैः कर्णिकनाराचैः कबन्धपटसङ्कुलैः ॥ ७ ॥
ततस्तु तां शत्रुबलस्य सेनां क्षणेन चापच्युतबाणपातैः।
विध्वस्तहस्त्यश्वरथान्महात्मा जग्राह चक्रं रिपुसङ्घनाशनः ॥ ८ ॥
ज्वलच्च चक्रं निशितं भयङ्करं सुरासुराणां च सुदर्शनं रणे।
चकर्त दैत्यस्य शिरस्तदानीं करात्प्रमुक्तं मधुघातिनश्च तत् ॥ ९ ॥
तं दृष्ट्वा सहसा विघ्नमभिषेकेऽग्डाननः। त्यक्त्वा तु तत्र संस्थानंचचारविपुलंतपः
मुक्तं चक्रं विनाशाय हरिणा लोकधारिणा।
द्विदलं दानवं कृत्वा पपात विमले जले ॥ ११ ॥
तदा प्रभृति तत्तीर्थं चक्रतीर्थमिति श्रुतम्।
सर्वपापविनाशाय निर्मितं विश्वमूर्त्तिना ॥ १२ ॥
चक्रतीर्थे तु यः स्नात्वापूजयेद्देवमच्युतम्। पुण्डरीकस्ययज्ञस्यफलमाप्नोतिमानवः

तत्र तीर्थे तु यः स्नात्वा पूजयेद् ब्राह्मणाञ्छुभान्।
शान्तदान्तजितक्रोधान् स लभेत्कोटिजं फलम् ॥ १४ ॥
तत्र तीर्थे तु यो भक्त्या त्यजते देहमात्मनः।
विष्णुलोकं मृतो जाति जयशब्दादिमङ्गलैः ॥ १५ ॥
क्रीडयित्वा यथाकामंदेवगन्धर्वपूजितः। इहागत्य च भूयोऽपि जायतेविपुलेकुले
एतत्पुण्यं पापहरं धन्यं दुःखप्रणाशनम्।
कथितं ते महाभाग! भूयश्चान्यच्छृणुष्व मे ॥ १७ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे सेनापुरे चक्रतीर्थमाहात्म्यवर्णनं नाम
नवोत्तरशततमोऽध्यायः ॥ १०९ ॥

दशाधिकशततमोऽध्यायः

धौतपापतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

धौतपापंततोगच्छेन्महापातकनाशनम्। समीपेचक्रतीर्थस्यविष्णुनानिर्मितंपुरा
निहतैर्दानवैर्घोरैर्देवदेवो जनार्द्दनः। तत्पापस्य विनाशार्थं दानवान्तोद्भवस्य च
तत्र तीर्थे जितक्रोधश्चचार विपुलं तपः। दुश्चरं मौनमास्थाय ह्यशक्यं देवदानवैः
स्नात्वा दत्त्वा द्विजातिभ्यो दानानि विविधानि च।
तत्क्षणान्मुक्तपापस्तु गतस्तद्वैष्णवं पदम् ॥ ४ ॥
एवं युक्तस्तु यस्तत्र पापं कृत्वा सुदारुणम्।
स्नात्वा जप्त्वा विधानेन मुच्यते सर्वपातकैः ॥ ५ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे धौतपापतीर्थमाहात्म्यवर्णनंनामदशोत्तरशततमोऽध्यायः ॥ ११० ॥

एकादशाधिकशततमोऽध्यायः

स्कन्दतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले तीर्थं परमशोभनम् । स्कन्देन निर्मितं पूर्वं तपः कृत्वासुदारुणम्

युधिष्ठिर उवाच

स्कन्दस्यचरितं सर्वमाजन्मद्विजसत्तम । तीर्थस्यचविधिंपुण्यं कथयस्वयथार्थतः

श्रीमार्कण्डेय उवाच

देवदेवेन वै तप्तं तपः पूर्वं युधिष्ठिर । विज्ञप्तेनसुरैःसर्वैरुमादेवी विवाहिता ॥ ३॥

नास्ति सेनापतिः कश्चिद्देवानां सुरसत्तम !।

नीयन्ते दानवैर्घोरैः सर्वे देवाः सवासवाः ॥ ४ ॥

यथा निशा विना चन्द्रं दिवसो भास्करं विना ।

न शोभते मुहूर्तं वै तथा सेना विनायका ॥ ५ ॥

एवंज्ञात्वा महादेव परया दययाविभो । सेनानीर्दीयतांकश्चित्रिषुलांकेषुविश्रुतः

एतच्छ्रुत्वा शुभं वाक्यं देवानां परमेश्वरः ।

कामयान उमां देवीं सस्मार मनसा स्मरम् ॥ ७ ॥

तेन मूर्च्छितसर्वाङ्गः कामरूपो जगद्गुरुः ।

कामयामास रुद्राणीं दिव्यं वर्षशतं किल ॥ ८ ॥

देवराजस्ततो ज्ञात्वा महामैथुनगं हरम् । सम्मन्त्र्य दैवतैःसार्द्धं प्रैषयज्जातवेदसम्

तेन गत्वा महादेव! परमानन्दसंस्थितः ।

सहसा तेन दृष्टोऽसौ हाहेत्युक्त्वा समुत्थितः ॥ १० ॥

ततः क्रुद्धा महादेवी शापवाचमुवाच ह । वेपमाना महाराज शृणुयत्तेवदाम्यहम्

अहं यस्मात्सुरैःसर्वैर्याचितापुत्रजन्मनि । कृतारतिश्चविफलासम्प्रेष्यजातवेदसम्

तस्मात्सर्वे पुत्रहीनाभविष्यन्तिन संशयः । हरेणोक्तस्ततोवह्निरस्माकंबीजमावह

यथा भवति लोकेषु तथा त्वं कर्तुमर्हसि ।

मम तेजस्त्वया शक्यं गृहीतुं सुरसत्तम !।

देवकार्यार्थसिद्ध्यर्थं नाऽन्यः शक्तो जगत्त्रये ॥ १४ ॥

अग्निरुवाच

तेजसस्तव मे देवकाशक्तिर्धारणेविभो !। करोतिभस्मसात्सर्वंत्रैलोक्यंसचराचरम्

ईश्वर उवाच

उदरस्थेन बीजेन यदि ते जायते रुजा । तदा क्षिपस्व तत्तेजो गङ्गातोये हुताशन

एवमुक्त्वा महादेवो अमोघं बीजमुत्तमम् । हव्यवाहमुखे सर्वं प्रक्षिप्यान्तरधीयत

गते चादर्शनं देवे दह्यमानो हुताशनः । गङ्गातोये विनिक्षिप्य जगामस्वंनिवेशनम्

असहन्ती तु तत्तेजो गङ्गाऽपि सरिताम्वरा ।

शरस्तम्बे विनिक्षिप्य जगामाऽऽशु यथागतम् ॥ १६ ॥

तत्र जातं तु तद् दृष्ट्वा सर्वे देवाः सवासवाः ।

कृत्तिकां प्रेषयामासुः स्तन्यं पाययितु तदा ॥ २० ॥

दृष्ट्वा ता आगताः सर्वा गङ्गागर्भं महामतेः ।

षण्मुखैः षण्मुखो भूत्वा पिपासुरपिवत्स्तनम् ॥ २१ ॥

जातकर्मादिसंस्कारान्वेदोक्तान्पद्मसम्भवः। चकारसर्वान्राजेन्द्र विधिदृष्टेनकर्मणा

षण्मुखात्षण्मुखो नाम कार्त्तिकेयस्तु कृत्तिकात् ।

कुमारश्च कुमारत्वाद्गङ्गागर्भोऽग्निजोऽपरः ॥ २३ ॥

एवं कुमारः सम्भूतो ह्यनधीत्य स वेदवित् ।

शास्त्राण्यनेकानि वेद चचार विपुलं तपः ॥ २४ ॥

देवारण्येषु सर्वेषु नदीषु च नदेषु च । पृथिव्यां यानितीर्थानि समुद्राद्यानिभारत

ततः पर्याययोगेन नर्मदातटमाश्रितः । नर्मदादक्षिणे कूले चचार विपुलं तपः ॥ २६

ऋग्यजुःसामविहितं जपञ्जाप्यमहर्निशम् । ध्यायमानोमहादेवं शुद्धिर्धमनिसन्ततः

ततो वर्षसहस्रान्ते पूर्णे देवो महेश्वरः । उमया सहितः काले तदा वचनमब्रवीत्

ईश्वर उवाच

अहं ते वरदस्तात गौरी माता पिता ह्यहम् ।
वरं वृणीष्व यच्चेष्टं त्रिषु लोकेषु दुर्लभम् ॥ २९ ॥

षण्मुख उवाच

यदि तुष्टो महादेव! उमया सह शङ्कर । वृणोमि मातापितरौ नान्यागतिर्मतिर्मम

एतच्छ्रुत्वा शुभं वाक्यं पुत्रस्य वदनाच्च्युतम् ।
तथेत्युक्त्वा तु स्नेहेन प्रेम्णा तं परिषस्वजे ॥ ३१ ॥
ततस्तं मूर्ध्न्युपाघ्राय ह्युमयोवाच शङ्करः ॥ ३२ ॥

ईश्वर उवाच

अक्षयश्चाव्ययश्चैव सेनानीस्त्वं भविष्यसि ॥ ३३ ॥
शिखी च ते वाहनं दिव्यरूपो दत्तो मया शक्तिधरस्य सङ्ख्ये ।
सुरासुरादींश्च जयेति चोक्त्वा जगाम कैलासवरं महात्मा ॥ ३४ ॥
गते चाऽदर्शनं देवे तदा स शिखिवाहनः ।
स्थापयित्वा महादेवं जगाम सुरसन्निधौ ॥ ३५ ॥
तदाप्रभृति तत्तीर्थं स्कन्दतीर्थमिति श्रुतम् ।
सर्वपापहरं पुण्यं मर्त्यानां भुवि दुर्लभम् ॥ ३६ ॥
तत्र तीर्थे तु यो राजन्भक्त्या स्नात्वाऽर्चयेच्छिवम् ।
गन्धमाल्याभिषेकैश्च याज्ञिकं स लभेत्फलम् ॥ ३७ ॥
स्कन्दतीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ।
तिलमिश्रेण तोयेन तस्य पुण्यफलं शृणु ॥ ३८ ॥

पिण्डदानेनचैकेन विधियुक्तेन भारत । द्वादशाब्दानितुष्यन्तिपितरोनाऽत्रसंशयः
तत्र तीर्थे तु राजेन्द्र शुभं वा यदि वा शुभम् । इहलोकेपरेचैवतत्सर्वं जायतेऽक्षयम्

तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करिष्यति ।

शास्त्रयुक्तेन विधिना स गच्छेच्छिवमन्दिरम् ॥ ४१ ॥

कल्पमेकं वसित्वा तु देवगन्धर्वपूजितः । अत्र भारतवर्षे तु जायते विमले कुले ॥
वेदवेदाङ्गतत्त्वज्ञः सर्वव्याधिविवर्जितः । जीवेद्वर्षशतं साग्रं पुत्रपौत्रसमन्वितः ॥

इदं ते कथितं राजन्स्कन्दतीर्थस्य सम्भवम् ।
धन्यं यशस्यमायुष्यं सर्वदुःखघ्नमुत्तमम् ॥
सर्वपापहरं पुण्यं देवदेवेन भाषितम् ॥ ४४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे स्कन्दतीर्थमाहात्म्यवर्णनंनामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥

द्वादशाधिकशततमोऽध्यायः

अङ्गिरसतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! तीर्थमाङ्गिरसस्य तु । उत्तरे नर्मदाकूले सर्वपापविनाशनम्
पुराऽऽसीदङ्गिरानाम ब्राह्मणोवेदपारगः । पुत्रहेतोर्युगस्याऽदौचचारविपुलं तपः
नित्यं त्रिषवणस्नायीजपन्देवंसनातनम् । पूजयंश्चमहादेवं कृच्छ्रचान्द्रायणादिभिः

द्वादशाब्दे ततः पूर्णे तुतोष परमेश्वरः ।
वरेण च्छन्दयामास द्विजमाङ्गिरसं वरम् ॥ ४ ॥

वव्रे स तु महादेवं पुत्रं पुत्रवतां वरम् । वेदविद्याव्रतस्नातं सर्वशास्त्रविशारदम् ॥

देवानां मन्त्रिणं राजन्सर्वलोकेषु पूजितम् ।
ब्रह्मलक्ष्म्याः सदावासमक्षयं चाव्ययं सुतम् ॥ ६ ॥

तथाभिलषितःपुत्रः सर्वविद्याविशारदः । भविष्यति न सन्देहश्चैवमुक्त्वाययौहरः
वरैरङ्गिरसश्चाऽपि बृहस्पतिरजायत । यथाऽभिलषितः पुत्रो वेदवेदाङ्गपारगः ॥

जाते पुत्रेऽङ्गिरास्तत्र स्थापयामास शङ्करम् ।
हृष्टतुष्टमना भूत्वा जगामोत्तरपर्वतम् ॥ ९ ॥
तत्र चाङ्गिरसे तीर्थे यः स्नात्वा पूजयेच्छिवम् ।
सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ १० ॥
अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् । इच्छते यश्च यं कामं स तं लभतिमानवः

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डेऽङ्गिरसतीर्थमाहात्म्यवर्णनंनाम द्वादशाधिकशततमोऽध्यायः ॥११२॥

त्रयोदशाधिकशततमोऽध्यायः

कोटितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तुराजेन्द्रकोटितीर्थमनुत्तमम् । ऋषिकोटिर्गतातत्र परांसिद्धिमुपागता
तत्र तीर्थे तु यः स्नात्वा भोजयेद् ब्राह्मणाञ्छुचिः ।
एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ २ ॥
तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ।
पूजिते तु महादेवे वाजपेयफलं लभेत् ॥ ३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेकोटितीर्थमाहात्म्यवर्णनंनाम त्रयोदशाधिकशततमोऽध्यायः ॥११३॥

चतुर्दशाधिकशततमोऽध्यायः

अयोनिसम्भवतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र तीर्थं परमशोभनम् । अयोनिजं महापुण्यं सर्वपापप्रणाशनम्
अयोनिजे नरः स्नात्वा पूजयेत्परमेश्वरम् ।
पितृदेवार्चनं कृत्वा मुच्यते सर्वकिल्बिषैः ॥ २ ॥
तत्र तीर्थे तु विधिना प्राणत्यागं करोति यः ।
स कदाचिन्महाराज योनिद्वारं न पश्यति ॥ ३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेऽयोनिसम्भवतीर्थमाहात्म्यवर्णनं नामचतुर्दशाधिकशततमोऽध्यायः ॥

पञ्चदशाधिकशततमोऽध्यायः

अङ्गारकतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज तीर्थमङ्गारकं परम् । रूपदं सर्वलोकानां विश्रुतं नर्मदातटे
अङ्गारकेण राजेन्द्र! पुरा तप्तं तपः किल ।
अर्बुदं च निखर्वं च प्रयुतं वर्षसङ्ख्यया ॥ २ ॥
ततस्तुष्टो महादेवः परया कृपया नृप । प्रत्यक्षदर्शी भगवानुवाच क्षितिनन्दनम्
वरदोऽस्मि महाभाग दुर्लभं त्रिदशैरपि ।
वरं दास्याम्यहं वत्स ! ब्रूहि यत्ते विवक्षितम् ॥ ४ ॥

अङ्गारक उवाच

तव प्रसादाद्देवेश सर्वलोकमहेश्वर !। ग्रहमध्यगतो नित्यं विचरामि नभस्तले ॥२

यावद्धराधरो लोके यावच्चन्द्रदिवाकरौ ।
नद्यो नदाः समुद्राश्च वरो मे चाऽक्षयो भवेत् ॥ ६ ॥
एवमस्त्विवति देवेशो दत्त्वा वरमनुत्तमम् ।
जगामाऽऽकाशमाविश्य वन्द्यमानः सुरासुरैः ॥ ७ ॥
भूमिपुत्रस्ततस्तस्मिन्स्थापयामास शङ्करम् ।
गतः सुरालये लोके ग्रहभावे निवेशितः ॥ ८ ॥

तत्रतीर्थेतुयःस्नात्वा पूजयेत्परमेश्वरम् । हुतहोमो जितक्रोधः सोऽश्वमेधफलंलभेत्

चतुर्थ्यङ्गारके यस्तु स्नात्वा चाभ्यर्चयेद् ग्रहम् ।
अङ्गारकं विधानेन सप्तजन्मानि भारत !॥ १० ॥
दशयोजनविस्तीर्णे मण्डले रूपवान्भवेत् ।
तत्रैव तु मृतो जन्तुः कामतोऽकामतोऽपि,वा ॥ '
रुद्रस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥ ११ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेऽङ्गारकतीर्थमाहात्म्यवर्णनं नाम पञ्चदशोत्तरशततमोऽध्यायः ॥ ११५ ॥

षोडशाधिकशततमोऽध्यायः

पाण्डुतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

पाण्डुतीर्थं ततो गच्छेत्सर्वपापविनाशनम् ।
तत स्नात्वा नरो राजन् ! मुच्यते सर्वकिल्बिषैः ॥ १ ॥
तत्र तीर्थे तु यः स्नात्वा दापयेत्काञ्चनं शुचिः ।
भ्रूणहत्यादिपापानि नश्यन्ते नाऽत्र संशयः ॥ २ ॥
पिण्डोदकप्रदानेन वाजपेयफलं लभेत् ।
पितरः पितामहाश्च नृत्यन्ते च प्रहर्षिताः ॥ ३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे पाण्डुतीर्थमाहात्म्यवर्णनं नामषोडशाधिकशततमोऽध्यायः ॥

सप्तदशाधिकशततमोऽध्यायः

त्रिलोचनतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र पुण्यं तीर्थंत्रिलोचनम् । तत्रतिष्ठतिदेवेशःसर्वलोकनमस्कृतः

तत्र तीर्थे तु यः स्नात्वा भक्त्याऽर्चयति शङ्करम् ।
रुद्रस्य भवनं याति मृतो नास्त्यत्र संशयः ॥ २ ॥
कल्पक्षये ततः पूर्णे क्रीडित्वा च इहागतः ।

आवियोगेन तिष्ठेत पूज्यमानः शतं समाः ॥ ३ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे त्रिलोचनतीर्थमाहात्म्यवर्णनंनाम सप्तदशोत्तरशततमोऽध्यायः ॥११७॥

अष्टादशाधिकशततमोऽध्यायः

इन्द्रतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र तीर्थं परमशोभनम् । इन्द्रतीर्थेतिविख्यातं नर्मदादक्षिणे तटे

युधिष्ठिर उवाच

नर्मदादक्षिणे कूले इन्द्रतीर्थं कथम्भवेत् ।
श्रोतुमिच्छामि विप्रेन्द्र! ह्यादिमध्यान्तविस्तरैः ॥ २ ॥

एतच्छ्रुत्वा तु वचनं धर्मपुत्रस्य धीमतः। कथयायासतद्वृत्तमितिहासंपुरातनम्

श्रीमार्कण्डेय उवाच

विश्वासयित्वा शुचिरं धर्मशत्रुं महाबलम् ।
वृत्रं जित्वाऽथ हत्वा तु गच्छमानं शचीपतिम् ॥ ४ ॥

निष्काममाणंमार्गेण ब्रह्महत्यादुरासदा । अहोरात्रमविश्रान्ता जगामभुवनत्रयम्

यतोयतो ब्रह्महणं याति यानेन शोभनम् ।
दिशो भागं सुरैः सार्द्धं ततो हत्या न मुञ्चति ॥ ६ ॥

ब्रह्महत्यासुरापानंस्तेयंगुर्वङ्गनागमः । प्रातकानांगतिर्दृष्टानतु विश्वासघातिनाम्

पापकर्ममुखं दृष्ट्वा स्नानदानैर्विशुध्यति । नारीवापुरुषोवाऽपि नैवविश्वासघातिनः

एवमादीनि चाऽन्यानि शृणु वाक्यानि देवराट् ।
वचनं तद्विधैरुक्तं विषादमगमत्परम् ॥ ६ ॥

त्यक्त्वा राज्यं सुरैः सार्धं जगाम तप उत्तमम् ।
पुत्रदारगृहं राज्यं वसूनि विविधानि च ॥ १० ॥

फलान्येतानिधर्मस्यशोभयन्तिजनेश्वरम् ।फलंधर्मस्यभुञ्जेतिसुहृत्स्वजनबान्धवाः

पश्यतां सर्वमेतेषां पापमेकेन भुज्यते । परं हि सुखमुत्सृज्य कर्शयन्वै कलेवरम् ॥

देवराजो जगामाऽसौ तीर्थान्यायतनानि च ।
गङ्गातीर्थेषु सर्वेषु यामुनेषु तथैव च ॥ १३ ॥

सारस्वतेषु सर्वेषु समुद्रेषु पृथक्पृथक् । नदीषु देवखातेषु तडागेषु सरःसु च ॥

पापं न मुञ्चते सर्वं पश्चाद्देवसमागमे । रेवाप्रभवतीर्थेषु कूलयोरुभयोरपि ॥ १५ ॥

पूजयन्वै महादेवं स्कन्दतीर्थं समासदत् ।
तत्र स्थित्वोपवासैश्च कृच्छ्रचान्द्रायणादिभिः ॥ १६ ॥

कर्शयन्वैस्वकंदहंनलेभेशर्मवैक्वचित् । ग्रीष्मेपञ्चाग्निमध्यस्थो वर्षासुस्थण्डिलेशयः

आर्द्रवासास्तुहेमन्तेचचारविपुलं तपः । एवं तु तपतस्तस्य इन्द्रस्यविदितात्मनः

वत्सराणां सहस्राणि गतानि दश भारत । ततस्त्वेकादशे प्राप्ते वर्षेतु नृपसत्तम!

सहसा भगवान्देवस्तुतोष परमेश्वरः । तथा ब्रह्मर्षयः सिद्धा ब्रह्मविष्णुपुरोगमाः

तत्राऽऽजग्मुः सुराः सर्वे यत्र देवः शतक्रतुः ।
दृष्ट्वा समागतान्देवानृषींश्चैव महामतिः ॥ २१ ॥

उवाच प्रणतो भूत्वा सर्वदेवपुरोहितः । विदितं सर्वमेतेषां यथा वृत्रवधः कृतः ॥

युष्माकं चाऽऽज्ञया पूर्वं ब्रह्मविष्णुमहेश्वराः ।
तथाऽप्येवं ब्रह्महणं मत्त्वा पापस्य कारिणम् ॥ २३ ॥
भ्रमन्तं सर्वतीर्थेषु ब्रह्महत्या न मुञ्चति ।
न नन्दति जगत्सर्वं त्रैलोक्यं सचराचरम् ॥ २४ ॥

यथाविहीनचन्द्रार्कंतथाराज्यमनायकम् । तस्मात्सर्वेसुरश्रेष्ठाविज्ञाप्यंममसम्प्रति

कुर्वन्तु शक्रं निर्दोषं तथा सर्वे महर्षयः । बृहस्पतिमुखोद्गीर्णं श्रुत्वा तद्वचनंशुभम्

ततः प्रोवाच भगवान् ब्रह्मालोकपितामहः । एतत्पापं महाघोरं ब्रह्महत्यासमुद्भवम्

देवतेभ्योऽथ भूतेभ्यश्चतुर्भागं क्षिपाम्यहम् ।
एवं मुक्त्वाऽक्षिपच्चैनो जलोपरि महामतिः ॥ २८ ॥
अवगाह्यततःपेयाआपो वै नान्यथा बुधैः । धरायामक्षिपद्भागं द्वितीयं पद्मसम्भवः
अभक्ष्या तेन सञ्जाता सदाकालं वसुन्धरा ।
तदार्धमर्द्धं नारीणां द्वितीयेऽह्नि युधिष्ठिर !॥ ३० ॥
निक्षिप्यभगवान्देवः पुनरन्यज्जगाद ह । असंग्राह्या त्वसंग्राह्या तेनजातारजस्वला
चतुर्दिनानि सा प्राज्ञैः पापस्य महतो महात् ।
चतुर्थं तु ततो भागं विभज्य परमेश्वरः ॥ ३२ ॥
कृषिगोरक्ष्यवाणिज्यैः शूद्रसेवाकरे द्विजे । ततोऽभिनन्दयामासुः सर्वे देवामहर्षयः
देवेन्द्रं वाग्भिरिष्टाभिर्नर्मदाजलसंस्थितम् । वरेणच्छन्दयामासततस्तुष्टोमहेश्वरः
वरं दास्यामि देवेश! वरं वृणु यथेप्सितम् ॥ ३५ ॥

इन्द्र उवाच

यदितुष्टोऽसि देवेशयदिदेयोवरोमम । अत्र संस्थापयिष्यामि सदासन्निहितोभव
एवमस्त्विति चोक्त्वा तं ब्रह्मविष्णुमहेश्वराः ।
जग्मुराकाशमाविश्य स्तूयमाना महर्षिभिः ॥ ३७ ॥
गतेषु देवदेवेषु देवराजः शतक्रतुः । स्थापयित्वा महादेवं जगाम त्रिदशालयम् ॥
इन्द्रतीर्थे तु यः स्नात्वा तर्प्ययेत्पितृदेवताः ।
महापातकयुक्तोऽपि मुच्यते सर्वपातकैः ॥ ३९ ॥
इन्द्रतीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् ।
सोऽश्वमेधस्य यज्ञस्य पुष्कलं फलमश्नुते ॥ ४० ॥
एतत्ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् ।
श्रुतमात्रेण येनैव मुच्यन्ते पातकैर्नराः ॥ ४१ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे इन्द्रतीर्थमाहात्म्यवर्णनंनामाष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

एकोनविंशत्यधिकशततमोऽध्यायः

कह्लोडीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तुराजेन्द्र कह्लोडीतीर्थमुत्तमम् । रेवायाश्चोत्तरेकूले सर्वपापविनाशनम्
हितार्थंसर्वभूतानामृषिभिःस्थापितम्पुरा । तपसातुसमुद्धृत्यनर्मदायांमहाम्भसि
स्नात्वा तु कपिलातीर्थे कपिलां यः प्रयच्छति ।
श्रुत्वा चाऽऽख्यानकं दिव्यं ब्राह्मणाच्छृणु यत्फलम् ॥ ३ ॥
सर्वेषामेव दानानां कपिलादानमुत्तमम् । ब्राह्मणान्वेषितं पूर्वमृषिदेवसमागमे ॥
सद्यः प्रसूतां कपिलां शोभनां यः प्रयच्छति ।
सोपवासो जितक्रोधस्तस्य पुण्यफलं शृणु ॥ ५ ॥
ससमुद्रगुहा तेन सशैलवनकानना । दत्ता चैव महाबाहो पृथिवी नात्र संशयः ।
वाचिकं मानसंपापंकर्मणायत्पुराकृतम् । नश्यते कपिलां दत्त्वासप्तजन्मार्जितंनृप
भूमिदानं धनं धान्यं हस्त्यश्वकनकादिकम् ।
कपिलादानस्यैकस्य कलां नार्हन्ति षोडशीम् ॥ ८ ॥
तत्र तीर्थे नरः स्नात्वा कपिलां यः प्रयच्छति ।
मृतो विष्णुपुरं याति गीयमानोऽप्सरोगणैः ॥ ९ ॥
यावन्ति तस्या रोमाणि सवत्सायास्तु भारत !।
तावद्वर्षसहस्राणि स स्वर्गे क्रीडते चिरम् ॥ १० ॥
ततोऽवकीर्णकालेन त्विह मानुष्यतांगतः । धनधान्यसमोपेतो जायतेविपुलेकुले
वेदविद्याव्रतस्नातः सर्वशास्त्रविशारदः ।
व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ १२ ॥
एतत्ते सर्वमाख्यातं कल्होडीतीर्थमुत्तमम् ।

यत्कृत्वा सर्वपापेभ्यो मुच्यते नाऽत्र संशयः ॥ १३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे कह्लोडीतीर्थमाहात्म्यवर्णनं नामैकोनविंशत्युत्तरशततमोऽध्यायः ॥

विंशाधिकशततमोऽध्यायः

कम्बुकेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

अतः परं प्रवक्ष्यामि कम्बुकेश्वरमुत्तमम् । हिरण्यकशिपुर्दैत्योदानवो बलदर्पितः ॥
अवध्यः सर्वलोकानां त्रिषु लोकेषु विश्रुतः ।
तस्य पुत्रो महातेजाः प्रह्लादो नाम नामतः ॥ २ ॥
विष्णुप्रसादाद्भक्त्या च तस्य राज्ये प्रतिष्ठितः ।
विरोचनस्तस्य सुतस्तस्याऽपि बलिरेव च ॥ ३ ॥
बलिपुत्रोऽभवद्बाणस्तस्मादपि च शम्बरः ।
शम्बरस्याऽन्वये जातः कम्बुर्नाममहासुरः ॥ ४ ॥
ज्ञात्वा विष्णुमयं घोरं महद्भयमुपस्थितम् ।
दानवानां विनाशाय नाऽन्यो हेतुः कदाचन ॥ ५ ॥
सत्यक्त्वापुत्रदारांश्चसुहृद्बन्धुपरिग्रहान् । चचारमौनमास्थायतपःकम्बुर्महामतिः
अक्षसूत्रकरोभूत्वादण्डीमुण्डीच मेखली । शाकयावकभक्षश्च वल्कलाजिनसम्वृतः
स्नात्वा नित्यं धृतिपरो नर्मदाजलमाश्रितः । पूजयंस्तुमहादेवमबुर्दं वर्षसङ्ख्यया
ततस्तुतोष भगवान्देवदेवो महेश्वरः । उवाच दानवं काले मेघगम्भीरया गिरा ॥
भो भो कम्बो! महाभाग! तुष्टोऽहं तव सुव्रत !।
इष्टं व्रतानां परमं मौनं सर्वार्थसाधनम् ॥ १० ॥

चरितं च त्वयालोके देवदानवदुश्चरम् । वरं वृणीष्व भद्रं ते यत्ते मनसि रोचते ॥

कम्बुरुवाच

यदि प्रसन्नो देवेश यदिदेयो वरोमम । अक्षय्यश्चाव्ययश्चैव स्वेच्छयाविचराम्यहम्
दैत्यदानवसङ्घानां संयुगेष्वपलायिता । भयञ्चानन्यन्नविद्येत मुक्त्वादेवंगदाधरम्
तस्याऽहं संयुगे साध्यो येनोपायेन शङ्कर !।
भवामि न सदा कालं तं वदस्व वरं मम ॥ १४ ॥

ईश्वर उवाच

ममसन्निहितोयत्र त्वं भविष्यसिदानव । तत्रविष्णुभयंनास्तिवसात्राविगतज्वरः
तस्यदेवाधिदेवस्य वेदगर्भस्य संयुगे । शङ्खचक्रधरस्येशा नाऽहं सर्वे सुरासुराः ॥
किंपुनर्योद्धिषत्येनंलोकालोकप्रभुं हरिम् । स सुखी वर्त्तते कालं न निमेषं मतं मम
तस्मात्त्वंपरयाभक्त्यासर्वभूतहितेरतः । वसिष्यसिचिरंकालमित्युक्त्वादर्शनंगतः
गतेचाऽदर्शनंदेवे तत्र तीर्थे महामतिः । स्थापयामास देवेशं शिवंशान्तमनामयम्
तस्मिंस्तीर्थेमहादेवंस्थापयित्वादिवंगतः । तदाप्रभृतितत्पार्थकम्बुतीर्थमितिश्रुतम्
विख्यातं सर्वलोकेषु महापातकनाशनम् ॥ २० ॥
कम्बुतीर्थे नरः स्नात्वा विधिनाऽभ्यर्च्य भास्करम् ।
ऋग्यजुःसाममन्त्रैश्च स्तूयमानो नृपोत्तम !॥ २१ ॥
तस्य पुण्यं समुद्दिष्टं ब्राह्मणैर्वेदपारगैः । तत्सर्वं तु शृणुष्वाऽद्य ममैव गदतो नृप
ऋग्यजुः सामगीतेषु साङ्गोपाङ्गेषु यत्फलम् ।
तत्फलं समवाप्नोति गायत्रीमात्रमन्त्रवित् ॥ २३ ॥
तत्रतीर्थे तुयः स्नात्वा तर्पयेत्पितृदेवताः । पूजयेद्देवमीशानं सोऽग्निष्टोमफलं लभेत्
अकामो वा सकामो वा तत्र तीर्थे कलेवरम् ।
यस्त्यजेन्नात्र सन्देहो रुद्रलोकं स गच्छति ॥ २५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे कम्बुकेश्वरतीर्थमाहात्म्यवर्णनं नामविंशत्यधिकशततमोऽध्यायः ॥

एकविंशत्यधिशततमोऽध्यायः

चन्द्रहासेसोमतीर्थ माहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपाल चन्द्रहासमतःपरम्। यत्रसिद्धिपरां प्राप्तः सोमराजःसुरोत्तमः

युधिष्ठिर उवाच

कथं सिद्धिं परां प्राप्तः सोमनाथो जगत्पतिः।
तत्सर्वं श्रोतुमिच्छामि कथयस्व ममाऽनघ ॥ २ ॥

श्रीमार्कण्डेय उवाच

पुरा शप्तो मुनीन्द्रेण दक्षेणकिलभारत। असेवनाद्धि दाराणांक्षयरोगीभविष्यसि
उद्वाहितानां पत्नीनां ये न कुर्व्वन्ति सेवनम्।
या निष्ठा जायते नृणां तां शृणुष्व नराधिप !॥ ४ ॥
ऋतावृतौ हि नारीणां सेवनाज्जायते सुतः।
सुतात्स्वर्गश्च मोक्षश्च इत्येवं श्रुतिभाषितम् ॥ ५ ॥
तत्कालोचितधर्मेणवेष्टितोरौरवेपतेत्। तस्यास्तद्रुधिरंपापःपिबतेकालमीप्सितम्
ततोऽवतीर्णः कालेन यां यां योनिं प्रयास्यति।
तस्यां तस्यां स दुष्टात्मा दुर्भगो जायते सदा ॥ ७ ॥
नारीणां तु सदा कामोऽभ्यधिकः परिवर्त्तते।
विशेषेण ऋतौ काले पीड्यते कामसायकैः ॥ ८ ॥
परिभूता हि ता भर्त्रा ध्यायन्तेऽन्यं पतिं स्त्रियः
ततः पुत्रः समुत्पन्नो ह्यटते कुलमुत्तमम् ॥ ९ ॥
स्वर्गस्थास्तेनपितरःपूर्वजास्तेपितामहाः। पतन्तिजातमात्रेणकुलटस्तेनचोच्यते
तेनकर्मविपाकेनक्षयरोग्यभवच्छशी। त्यक्त्वालोकंसुरेन्द्राणां मर्त्यलोकमुपागतः

ततस्तीर्थान्यनेकानि पुण्यान्यायतनानि च।
भ्रमन्वै नर्मदां प्राप्तः सर्वपापप्रणाशनीम् ॥ १२ ॥
उपवासं च दानानि व्रतानि नियमांस्तथा।
चचार द्वादशाब्दानि ततो मुक्तः स किल्बिषैः ॥ १३ ॥
स्नापयित्वा महादेवं सर्वपातकनाशनम्। जगाम प्रभया पूर्णः स च लोकमनुत्तमम्
येनैवस्थापितो देवः पूज्यते वर्षसङ्ख्यया। तावद्वर्षसहस्राणि रुद्रलोकेसपूज्यते
तेन देवान्विधानोक्तान्स्थापयन्ति नरा भुवि।
अक्षयं चाव्ययं यस्मात्कालं भुञ्जन्ति मानवाः ॥ १६ ॥
सोमतीर्थे नरः स्नात्वा पूजयेद्देवमीश्वरम्। न भ्राजते नरोलोके सोमवत्प्रियदर्शनः
चन्द्रहासेतु योगत्वाग्रहणेचन्द्रसूर्ययोः। स्नानंसमाचरेद्भक्त्यामुच्यतेसर्वकिल्बिषैः
तत्र स्नानं च दानं च चन्द्रहासे शुभाऽशुभम्। कृतं नृपवरश्रेष्ठ! सर्वंभवतिचाक्षयम्
ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम्।
चन्द्रहासे तु ये स्नात्वा पश्यन्ति ग्रहणं नराः ॥ २० ॥
वाचिकं मानसं पापं कर्मजं यत्पुराकृतम्। स्नानमात्रेण राजेन्द्र तत्रतीर्थेप्रणश्यति
बहवस्तं न जानन्ति महामोहसमन्विताः। देहस्थमिवसर्वेषां परमानन्दरूपिणम्
पश्चिमे सागरे गत्वा सोमतीर्थे तु यत्फलम्।
तत्समग्रमवाप्नोति चन्द्रहासे न संशयः ॥ २३ ॥
सङ्क्रान्तौच व्यतीपाते अयने विषुवेतथा। चन्द्रहासे नरःस्नात्वासर्वपापैःप्रमुच्यते
ते मूढास्ते दुराचारास्तेषां जन्म निरर्थकम्।
चन्द्रहासं न जानन्ति ये रेवायां व्यवस्थितम् ॥ २५ ॥
चन्द्रहासे तु यः कश्चित्संन्यासं कुरुते द्विजः।
अनिवर्त्तिका गतिस्तस्य सोमलोकान्न संशयः ॥ २६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे चन्द्रहासतीर्थमाहात्म्यवर्णनंनामैकविंशत्यधिकशततमोऽध्यायः ॥

द्वाविंशत्यधिकशततमोऽध्यायः

कोहनतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपाल कोहनस्वेतिविश्रुतम्। सर्वपापहरंपुण्यं तीर्थंमृत्युविनाशनम्
पुरा तत्र द्विजः कश्चिद्वेदवेदाङ्गपारगः। पत्नीपुत्रसुहृद्वर्गैः स्वकर्मनिरतोऽवसत्॥

युधिष्ठिर उवाच

ब्राह्मणस्य तु यत्कर्म उत्पत्तिः क्षत्रियस्य तु।
वैश्यस्याऽपि च शूद्रस्य तत्सर्वं कथयस्व मे॥ ३॥
धर्मस्याऽर्थस्य कामस्य मोक्षस्य च परं विधिम्।
निखिलं ज्ञातुमिच्छामि नान्यो वेत्ता मतिर्मम॥ ४॥

मार्कण्डेय उवाच

उत्पत्तिकारणं ब्रह्मा देवदेवः प्रकीर्त्तितः। प्रथमं सर्वभूतानां चराचरजगद्गुरुः॥
द्विजातयो मुखाज्जाताः क्षत्रिया बाहुयन्त्रतः।
ऊरुप्रदेशाद्वैश्यास्तु शूद्राःपादेष्वथाऽभवन्॥ ६॥
ततस्त्वन्ये पृथग्वर्णाः पृथग्धर्मान्समाचरन्। पर्यायेणसमुत्पन्ना ह्यनुलोमविलोमतः
तेषां धर्मं प्रवक्ष्यामि श्रुतिस्मृत्यर्थचोदितम्।
येन सम्यक्कृतेनैव सर्वे यान्ति परां गतिम्॥ ८॥
गतिर्ध्यानं विना भक्तैर्ब्राह्मणैः प्राप्यते नृप!।
अध्यापयन्यतो वेदान्वेदं वाऽपि यथाविधि॥ ९॥
कुलजां रूपसम्पन्नां सर्वलक्षणलक्षिताम्। उद्वाहयेत्ततःपत्नीं गुरुणाऽनुमते तदा
ततः स्मार्त्तं विवाहाग्निं श्रौतं वा पूजयेत्क्रमात्।
प्रतिग्रहधनो भूत्वा दम्भलोभविवर्जितः॥ ११॥

पञ्चयज्ञविधानानि कारयेद्वै यथाविधि। वनंगच्छेत्ततःपश्चाद्द्वितीयाश्रमसेवनात्
पुत्रेषु भार्यां निक्षिप्य सर्वसङ्गविवर्जितः। इष्टाँल्लोकानवाप्नोति न चेहजायतेपुनः
क्षत्रियस्तु स्थितो राज्ये पालयित्वा वसुन्धराम्।
शश्वद्धर्ममनाश्चैव प्राप्नोति परमां गतिम्॥ १४॥
वैश्यधर्मो न सन्देहः कृषिगोरक्षणे रतः। सत्यशौचसमोपेतो गच्छते स्वर्गमुत्तमम्
न शूद्रस्यपृथग्धर्मोविहितःपरमेष्ठिना। न मन्त्रोनच संस्कारो न विद्यापरिसेवनम्
न शब्दविद्यासमयो देवताभ्यर्चनानि च। यथा जातेन सततं वर्त्तितव्यमहर्निशम्
स धर्मः सर्ववर्णानां पुरा सृष्टः स्वयम्भुवा।
मन्त्रसंस्कारसम्पन्नास्त्रयोवर्णा द्विजातयः॥ १८॥
तेषां मतमनादृत्य यदि वर्त्तेत कामतः। स मृतो जायते श्वा वै गतिरूर्ध्वानविद्यते
न तेषां प्रेषणं नित्यं तेषां मतमनुस्मरन्।
यशोभागी स्वधर्मस्थः स्वर्गभागी स जायते॥ २०॥
एवंगुणगणाकीर्णोऽवसद्विप्रःसभारत!। हनस्वेतिहनस्वेतिशृणोतिवाक्यमीदृशम्
ततो निरीक्षते चोर्ध्वमधश्चैव दिशो दश।
वेपमानः स भीतश्च प्रस्खलंश्च पदे पदे॥ २२॥
शृङ्खलायुधहस्तैश्च पाशैश्चैव सुदारुणैः। वेष्टितं महिषारूढं नरं पश्यति सन्मुखम्
कृष्णाञ्जनचयप्रख्यं कृष्णाम्बरविभूषितम्। रक्ताक्षमायतभुजंसर्वलक्षणलक्षितम्
दृष्ट्वा तं तु समायान्तं निरीक्ष्यात्मानमात्मना।
जपञ्जाप्यं च परमं शतरुद्रीयसंस्तवम्॥ २५॥
ततः प्रोवाच भगवान्यमः संयमनो महान्। शृणुवाक्यमतोब्रह्मन्यमोऽहं सर्वजन्तुषु
संहरस्वमहाभागरुद्रजाप्यंसुदुर्भिदम्। येनाऽहंकालपाशैस्त्वां संयमामिगतव्यथः
तच्छ्रुत्वा निष्ठुरं वाक्यं यमस्य मुखनिर्गतम्।
महाभयसमोपेतो ब्राह्मणः प्रपलायितः॥ २८॥
तस्यमार्गं गताः सर्वेयमेनसह किङ्कराः। तिष्ठतिष्ठेतितंविप्रमूचुस्तेसोऽप्यधावत

त्वरमाणः परिश्रान्तो हा हतोऽहं दुरात्मभिः ।
रक्ष रक्ष महादेव ! शरणागतवत्सल ! ॥ ३० ॥
एवमुक्त्वाऽपतद्भूमौ लिङ्गमालिङ्ग्य भारत !।
गतसत्त्वः स विप्रेन्द्रः समाश्रित्य सुरेश्वरम् ॥ ३१ ॥
तं दृष्ट्वा पतितं भूमौ देवदेवो महेश्वरः । को हनिष्यति मा भैस्त्वं हुङ्कारमकरोत्तदा
तेन ते किङ्कराः सर्वे यमेन सह भारत !।
हुङ्कारेण गताः सर्वे मेघा वातहता यथा ॥ ३३ ॥
तदाप्रभृति तत्तीर्थं कोहनस्वेतिविश्रुतम् । सर्वपापहरंपुण्यं सर्वतीर्थेष्वनुत्तमम्
तत्रतीर्थे तु यः स्नात्वापूजयेत्परमेश्वरम् । अग्निष्टोमस्य यज्ञस्यफलमाप्नोत्यनुत्तमम्
तत्र तीर्थे तु राजेन्द्र! प्राणत्यागं करोति यः ।
न पश्यति यमं देवमित्येवं शङ्करोऽब्रवीत् ॥ ३६ ॥
अग्निप्रवेशं यः कुर्याज्जले वा नृपसत्तम !। अग्निलोके वसेत्तावद्यावत्कल्पशतत्रयम्
एवं वरुणलोकेऽपि वसित्वा कालमीप्सितम् ।
इहलोकमनुप्राप्तो महाधनपतिर्भवेत् ॥ ३८ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कोहनतीर्थमाहात्म्यवर्णनं नाम द्वाविंशत्यधिक-
शततमोऽध्यायः ॥ १२२ ॥

त्रयोविंशत्यधिकशततमोऽध्यायः

कर्मदेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र कर्मदीतीर्थमुत्तमम् । यत्र तिष्ठतिविघ्नेशोगणनाथोमहाबलः
तत्र तीर्थे नरः स्नात्वा चतुर्थ्यां वा ह्युपोषितः ।
विघ्नं न विद्यते तस्य सप्तजन्मनि भारत !॥ २ ॥
तत्र तीर्थे हि यत्किञ्चिद्दीयते नृपसत्तम !।
तदक्षयफलं सर्वं जायते नाऽत्र संशयः ॥ ३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कर्मदेश्वरतीर्थमाहात्म्यवर्णनं नामत्रयोविंशत्यधिकशततमोऽध्यायः ॥

चतुर्विंशत्यधिकशततमोऽध्यायः

नर्मदेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल!नर्मदेश्वरमुत्तमम् । तत्रतीर्थेनरः स्नात्वा मुच्यतेसर्वकिल्बिषैः
अग्निप्रवेशश्चजलेऽथवामृत्युरनाशके । अनिवर्त्तिकागतिस्तस्ययथामेशङ्करोऽब्रवीत्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदेश्वरतीर्थमाहात्म्यवर्णनं नामचतुर्विंशाधिकशततमोऽध्यायः ॥

पञ्चविंशत्यधिकशततमोऽध्यायः
रवितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल! रवितीर्थमनुत्तमम् । यत्र देवःसहस्रांशुस्तपस्तप्त्वा दिवंगतः

युधिष्ठिर उवाच

कथं देवो जगद्धाता सर्वदेवनमस्कृतः । तपस्तपति देवेशस्तापसो भास्करो रविः
आराध्यः सर्वभूतानां सर्वदेवैश्च पूजितः । प्रत्यक्षो दृश्यते लोके सृष्टिसंहारकारकः
आदित्यत्वं कथं प्राप्तः कथं भास्कर उच्यते ।
सर्वमेतत्समासेन कथयस्व ममाऽनघ !॥ ४ ॥

मार्कण्डेय उवाच

महाप्रश्नो महाराज! यस्त्वया परिपृच्छितः ।
तत्सर्वं सम्प्रवक्ष्यामि नमस्कृत्य स्वयम्भुवम् ॥ ५ ॥
आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥ ६
ततस्तेजश्च दिव्यं च समपिण्डमनुत्तमम् ।
आकाशात्तु यथैवोल्का सृष्टिहेतोरधोमुखी ॥ ७ ॥
तत्तेजसोऽन्तः पुरुषः सञ्जातः सर्वभूषितः ।
स शिवोऽपाणिपादश्च येन सर्वमिदं ततम् ॥ ८ ॥
तस्योत्पन्नस्य भूतस्य तेजोरूपस्य भारत !।
पश्चात्प्रजापतिर्भूयः कालः कालान्तरेण वै ॥ ६ ॥
अग्निर्जातःसभूतानांमनुष्यासुररक्षसाम् । सर्वदेवाधिदेवश्च आदित्यस्तेनचोच्यते
आदौ तस्य नमस्कारोऽन्येषां च तदनन्तरम् ।
क्रियते दैवतैः सर्वैस्तेन सर्वैर्महर्षिभिः ॥ ११ ॥

तिस्रः सन्ध्यास्त्रयो देवाः सान्निध्याः सूर्यमण्डले ।
नमस्कृतेन सूर्येण सर्वे देवाः नमस्कृताः ॥ १२ ॥
न दिवा न भवेद्रात्रिः षण्मासा दक्षिणायनम् ।
अयनं चोत्तरं चाऽपि भास्करेण विना नृप !॥ १३ ॥
स्नानंदानंजपोहोमःस्वाध्यायो देवतार्चनम् । न वर्त्ततेविनासूर्यं तेनपूज्यतमोरविः
शब्दगाःश्रुतिमुख्याश्चब्रह्मविष्णुमहेश्वराः । प्रत्यक्षोभगवान्देवो दृश्यतेलोकपावनः
उत्पत्तिः प्रलयस्थानं निधानं बीजमव्ययम् ।
हेतुरेको जगन्नाथो नाऽन्यो विद्येत भास्करात् ॥ १६ ॥
एवमात्मभवंकृत्वाजगत्स्थावरजङ्गमम् । लोकानांतुहितार्थायस्थापयेद्धर्मपद्धतिम्
नर्मदातटमाश्रित्य स्थापयित्वाऽऽत्मनस्तनुम् ।
सहस्रांशुं निधिं धाम्नां जगामाऽऽकाशमव्ययम् ॥ १८ ॥
तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम् । सहस्रकिरणंदेवं नाममन्त्रविधानतः
तेन तप्तं हुतं तेन तेन सर्वमनुष्ठितम् । तेन सम्यग्विधानेन सम्प्राप्तं परमम्पदम् ॥
ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ।
स्नात्वा ये नर्मदातोये देवं पश्यन्ति भास्करम् ॥ २१ ॥
तथादेवस्यराजेन्द्र ये कुर्वन्ति प्रदक्षिणम् । अनन्यभक्त्यासततंत्रिरक्षरसमन्विताः
तेन पूतशरीरास्ते मन्त्रेण गतपातकाः । यत्पुण्यं च भवत्तेषां तदिहैकमनाः शृणु
ससमुद्रगुहा तेन सशैलवनकानना । प्रदक्षिणीकृता सर्वा पृथिवी नाऽत्र संशयः
मन्त्रमूलमिदं सर्वं त्रैलोक्यं सचराचरम् ।
तेन मन्त्रविहीनं तु कार्यं लोके न सिद्ध्यति ॥ २५ ॥
यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ।
कार्यार्थं नैव सिद्ध्येत तथा कर्म ह्यमन्त्रकम् ॥ २६ ॥
यथा भस्महुतं पार्थ! यथा तोयविवर्जितम् ।
निष्फलं जायते दानं तथा मन्त्रविवर्जितम् ॥ २७ ॥

काष्ठपाषाणलोष्टेषु मृण्मयेषु विशेषतः । मन्त्रेणलोकेपूजां तु कुर्वन्ति न ह्यमन्त्रतः

द्वादशाब्दान्नमस्काराद्भक्त्या यल्लभते फलम् ।
मन्त्रयुक्तनमस्कारात्सकृत्तल्लभते फलम् ॥ २६ ॥
सङ्क्रान्तौ च व्यतीपाते अयने विषुवे तथा ।
नर्मदाया जले स्नात्वा यस्तु पूजयते रविम् ॥ ३० ॥

द्वादशाब्देन यत्पापमज्ञानज्ञानसञ्चितम् । तत्क्षणान्नश्यते सर्वं वह्निना तु तुषं यथा

चन्द्रसूर्यग्रहे स्नात्वा सोववासो जितेन्द्रियः ।
तत्रादित्यमुखं दृष्ट्वा मुच्यते सर्वकिल्बिषैः ॥ ३२ ॥

माघमासे तु सम्प्राप्ते सप्तम्यांनृपसत्तम! । सोपवासोजितक्रोधउषित्वासूर्यमन्दिरे प्रातःस्नात्वा विधानेन दद्यादर्घंदिवाकरे । विधिनामन्त्रयुक्तेनसलभेत्पुण्यमुत्तमम् पितृदेवमनुष्याणां कृत्वाह्युदकतर्पणम् । मन्दिरे देवदेवस्य ततः पूजां समाचरेत् गन्धैः पुष्पैस्तथा धूपैर्दीपनैवेद्यशोभनैः । पूजयित्वा जगन्नाथं ततो मन्त्रमुदीरयेत्

विष्णुः शक्रो यमो धाता मित्रोऽथ वरुणस्तथा ।
विवस्वान्सविता पूषा चण्डांशुर्भग एव च ॥ ३७ ॥

इतिद्वादशनामानि जपन्कृत्वा प्रदक्षिणाम् । यत्फलंलभतेपार्थ!तदिहैकमनाःशृणु

दरिद्रो व्याधितो मूको बधिरो जड एव च ।
न भवेत्सप्तजन्मानि इत्येवं शङ्करोऽब्रवीत् ॥ ३६ ॥

एवंज्ञात्वाविधानेनजपन्मन्त्रंविचक्षणः । आराधयेद्रविंभक्त्यायइच्छेत्पुण्यमुत्तमम् मन्त्रहीनां तु यः कुर्याद्भक्तिं देवस्यभारत! । सविडम्बतिचात्मानंपशुकीटपतङ्गवत् तत्रतीर्थे तु यः कश्चित्त्यजते देहमुत्तमम् । सगतस्तत्र देवैस्तुपूज्यमानो महर्षिभिः स्वेच्छया सुचिरंकालमिहलोके नृपोभवेत् । पुत्रपौत्रसमायुक्तोहस्त्यश्वरथसङ्कुलः

दासीदासशतोपेतो जायते विपुले कुले ॥ ४४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्रयांसंहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डेरवितीर्थमाहात्म्यवर्णनंनाम पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

षड्विंशत्यधिकशततमोऽध्यायः

अयोनिप्रभवतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तुराजेन्द्र! परंतीर्थमयोनिजम् । स्नातमात्रो नरस्तत्रनपश्येद्योनिसङ्कटम् तत्र तीर्थे नरःस्नात्वा पूजयेद्देवमीश्वरम् । अयोनिजोमहादेव! यथात्वं परमेश्वर तथामोचय मांदेव सम्भवाद्योनिसङ्कटात् । गन्धपुष्पादिधूपैश्चसमुच्येत्सर्वपातकैः

तस्य देवस्य यो भक्त्या कुरुते लिङ्गपूरणम् ।
स वसेद् देवदेवस्य यावत्सिक्थस्य सङ्ख्यया ॥ ४ ॥

अयोनिजे महादेवं स्नापयेद्गन्धवारिणा । मधुक्षीरेण दध्नावासलभेद्विपुलांश्रियम्

अष्टम्यां च सिते पक्षे असितां वा चतुर्दशीम् ।
पूजयित्वा महादेवं प्रीणयेद्गीतवाद्यकैः ॥ ६ ॥
वसेत्स च शिवे लोके ये कुर्वन्ति मनोहरम् ।
ते वसन्ति शिवे लोके यावदाभूतसम्प्लवम् ॥ ७ ॥

तस्य देवस्य भक्त्या तुयःकरोतिप्रदक्षिणाम् । विज्ञापयंश्चसततंमन्त्रेणानेनभारत तस्य यत्फलमुद्दिष्टंपारम्पर्येण मानवैः । सकाशाद् देवदेवस्यतच्छृणुष्वसमाधिना

अयोनिजो महादेव ! यथा त्वं परमेश्वर !।
तथा मोचय मां शर्व! सम्भवाद्योनिसङ्कटात् ॥ १० ॥
किं तस्य बहुभिर्मन्त्रैः कण्ठशोषणतत्परैः ।
येनोङ्नमः शिवायेति प्रोक्तं देवस्य सन्निधौ ॥ ११ ॥
तेनाऽधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनोङ्नमः शिवायेति मन्त्राभ्यासः स्थिरीकृतः ॥ १२ ॥

नतत्फलमवाप्नोति सर्वदेवेषु वै द्विजः । यत्फलं समवाप्नोति षडक्षरउदीरणात् ॥

तत्र तीर्थे तु यः स्नात्वा पूजयेच्छिवयोगिनम् ।
द्विजानामयुतं साग्रं सलभेत्फलमुत्तमम् ॥ १४ ॥
अथवा भक्तियुक्तस्तु तेषां दान्ते जितेन्द्रिये ।
संस्कृत्य ददते भिक्षां फलं तस्य ततोऽधिकम् ॥ १५ ॥
यतिहस्तेजलंदद्याद्भिक्षांदत्त्वापुनर्जलम् । साभिक्षामेरुणातुल्यातज्जलंसागरोपमम्
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डेऽयोनिप्रभवतीर्थमाहात्म्यवर्णनंनाम षड्विंशत्यधिकशततमोऽध्यायः ॥

सप्तविंशत्यधिकशततमोऽध्यायः

अग्नितीर्थमाहात्म्यवर्णनम्

मार्कण्डेय उवाच

ततोगच्छेत् राजेन्द्र! अग्नितीर्थमनुत्तमम् ।
तत्र स्नात्वा तु पक्षादौ मुच्यते सर्वकिल्बिषैः ॥ १ ॥
तत्रतीर्थे तु यः कन्यां दद्यात्स्वयमलङ्कृताम् ।
तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नरोत्तम ॥ २ ॥
अग्निष्टोमातिरात्राभ्यां शतंशतगुणीकृतम् ।
प्राप्नोति पुरुषो दत्त्वा यथाशक्त्या ह्यलङ्कृताम् ॥ ३ ॥
तस्याः पुत्रप्रपौत्राणां या भवेद्रोमसङ्गतिः ।
स याति तेन मानेन शिवलोके परां गतिम् ॥ ४ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेऽग्नितीर्थमाहात्म्यवर्णनंनाम सप्तविंशत्यधिकशततमोऽध्यायः॥

अष्टाविंशत्यधिकशततमोऽध्यायः

भृकुटेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्तु राजेन्द्र! भृकुटेश्वरमुत्तमम् । यत्रसिद्धो महाभागो भृगुः परमकोपनः
तेनवर्षशतं साग्रं तपश्चीर्णं पुराऽनघ । पुत्रार्थं वरयामास पुत्रं पुत्रवताम्वरः ॥ २॥
वरोदत्तो महाभाग देवेनान्धकघातिना । तत्र तीर्थेतु यः स्नात्वापूजयेत्परमेश्वरम्
अग्निष्टोमस्ययज्ञस्य फलमष्टगुणं लभेत् । भृकुटेशं तु यः कश्चिद्घृतेन मधुना सह ॥
पुत्रार्थी स्नापयेद्भक्त्या स लभेत्पुत्रमीप्सितम् ।
तत्र तीर्थे तु यः स्नात्वा दद्याद्विप्राय काञ्चनम् ॥ ५ ॥
गोदानं वा महीं वाऽपि तस्य पुण्यफलं श्रृणु ॥ ६ ॥
ससमुद्रगुहा तेन सशैलवनकानना । दत्ता पृथ्वी न सन्देहस्तेन सर्वा नृपोत्तम ! ॥
तेन दानेन स स्वर्गे क्रीडयित्वा यथासुखम् ।
मर्त्ये भवति राजेन्द्रो ब्राह्मणो वा सुपूजितः ॥ ८ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे भृकुटेश्वरतीर्थमाहात्म्यवर्णनं नामाऽष्टाविंशत्यधिकशततमोऽध्यायः ॥

एकोनत्रिंशत्यधिकशततमोऽध्यायः

ब्रह्मतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल ब्रह्मतीर्थमनुत्तमम् । अन्येषां चैव तीर्थानां परात्परतरं महत्

तत्र तीर्थे सुरश्रेष्ठो ब्रह्मा लोकपितामहः । चतुर्णामपिवर्णानां नर्मदातटमाश्रितः

वाचिकं मानसं पापं कर्मजं यत्पुराकृतम् ।
तत्क्षालयति देवेशो दर्शनादेव पातकम् ॥ ३ ॥
श्रुतिस्मृत्युदितान्येव तत्र स्नात्वा द्विजर्षभाः ।
प्रायश्चित्तानि कुर्वन्ति तेषां वासस्त्रिविष्टपे ॥ ४ ॥

ये पुनःशास्त्रमुत्सृज्यकामलोभप्रपीडिताः । प्रायश्चित्तंवदिष्यन्तितेवैनिरयगामिनः

स्नात्वाऽदौ पातकी ब्रह्मन्नत्वा तु कीर्त्तयेदघम् ।
तस्य तन्नश्यते क्षिप्रं तमः सूर्योदये यथा ॥ ६ ॥

तत्र तीर्थे तु यः स्नात्वापूजयेत्पितृदेवताः । अग्निष्टोमस्ययज्ञस्यसलभेत्फलमुत्तमम्
तत्र तीर्थे तु यद्दानं ब्रह्मोद्दिश्य प्रयच्छति । तदक्षयफलं सर्वमित्येवं शङ्करोऽब्रवीत्
गायत्रीसारमात्रोऽपितत्र यः क्रियतेजपः । ऋग्यजुःसामसहितं स भवेन्नात्रसंशयः

तत्र तीर्थे तु यो भक्त्या त्यजेद्देहं सुदुस्त्यजम् ।
अनिवर्त्तिका गतिस्तस्य ब्रह्मलोकान्न संशयः ॥ १० ॥
यावदस्थीनि तिष्ठन्ति ब्रह्मतीर्थे च देहिनाम् ।
तावद्वर्षसहस्राणि देवलोके महीयते ॥ ११ ॥

अवतीर्णस्ततो लोके ब्रह्मज्ञो जायते कुले । उत्तमः सर्ववर्णानां देवानामिव देवता

विद्यास्थानानि सर्वाणि वेत्ति वेदाङ्गपारगः ।
जायते पूजितो लोके राजभिः स न संशयः ॥ १३ ॥

पुत्रपौत्रसमोपेतः सर्वव्याधिविवर्जितः । जीवेद्वर्षशतंशाग्रं ब्रह्मतीर्थप्रभावतः ॥
एतत्पुण्यंपापहरंतीर्थं ज्ञानवतां वरम् । ये पश्यन्ति महात्मानोह्यमृतत्वंप्रयान्तिते

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे ब्रह्मतीर्थमाहात्म्यवर्णनं नामैकोनत्रिंशदधिकशततमोऽध्यायः ॥१२९॥

त्रिंशदधिकशततमोऽध्यायः

देवतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले देवतीर्थमनुत्तमम् । तत्र देवैः समागत्य तोषितः परमेश्वरः ॥१॥

तत्र तीर्थे तु यः स्नात्वा कामक्रोधविवर्जितः ।
स लभेन्नात्र सन्देहो गोसहस्रफलं श्रुतम् ॥ २ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे देवतीर्थमाहात्म्यवर्णनं नाम त्रिंदशदधिकशततमोऽध्यायः ॥१३०॥

एकत्रिंशदधिकशततमोऽध्यायः

नागेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले नागतीर्थमनुत्तमम् । यत्र सिद्धा महानागा भये जाते ततोनृप

युधिष्ठिर उवाच

महाभयानांलोकस्यनागानां द्विजसत्तम । कथंजातंभयंतीव्रं येनतेतपसिस्थिताः
भूतं भव्यं भविष्यच्च यत्सुरासुरमानवे । तात ते विदितं सर्वं तेन मे कौतुकं महत्
ममसन्तापजं दुःखंदुर्योधनसमुद्भवम् । तव वक्त्राम्बुजौघेन प्लावितंनिर्वृतिंगतम्

श्रुत्वा तव मुखोद्गीतां कथां पापप्रणाशनीम् ।
भूयोभूयः स्मृतिर्जाता श्रवणे मम सुव्रत !॥ ५ ॥

न क्लेशत्वं द्विजे युक्तं न चान्यो जानते फलम् ।
विद्यादानस्य महतः श्रावितस्य सुतस्य च ॥ ६ ॥
एवं ज्ञात्वा यथान्यायं यः प्रश्नः पृच्छितो मया ।
कथा तु कथ्यतां विप्र! दयां कृत्वा ममोपरि ॥ ७ ॥

मार्कण्डेय उवाच

यथायथा त्वं नृप! भाषसे च तथा तथा मे सुखमेति भारती ।
शैथिल्यभावाज्जरयाऽन्वितस्य त्वत्सौहृदं नश्यति नैव तात !॥ ८ ॥
कथयामि यथावृत्तमितिहासं पुरातनम् । कथितं पूर्वतो वृद्धैः पारम्पर्येण भारत
द्वे भार्ये कश्यपस्याऽऽस्यां सर्वलोकेष्वनुत्तमे ।
गरुत्मतो वै विनता सर्पाणां कद्रुरेव च ॥ १० ॥
अश्वसन्दर्शनात्ताभ्यां कलिरूपं व्यवस्थितम् ।
प्रभातकाले राजेन्द्र! भास्कराकारकवर्चसम् ॥ ११ ॥
तंदृष्ट्वा विनतारूपमश्वंसर्वत्र पाण्डुरम् । अथ तां कद्रूमवोचत्सापश्यपश्यवरानने
उच्चैःश्रवसः सादृश्यं पश्य सर्वत्रपाण्डुरम् । धावमानमविश्रान्तं जवेनपवनोपमम्
तं दृष्ट्वासहसायान्तमीर्ष्याभावेनमोहिता । कृष्णंमत्वातथाऽजल्पत्तयासहनृपोत्तम
विनते त्वं मृषा लोके नृशंसे कुलपांसनि !।
कृष्णं चैनं वद श्वेतं नरकं यास्यसे परम् ॥ १५ ॥

विनतोवाच

सत्याऽनृते तु वचने पणोऽयं ते ममैव तु । सहस्रंवत्सरान्दासीभयेयं तव वेश्मनि
तथेति तेप्रतिज्ञायरात्रौगत्वास्वकं गृहम् । परित्यज्यउभेतेतुक्रोधमूर्च्छितमूर्च्छिते
बन्धुवर्गस्यगत्वा तु कथयामास तं पणम् । कद्रूर्विनतया सार्द्धं यद्वृत्तंप्रमदालये
तच्छ्रुत्वा बान्धवाः सर्वे कद्रूपुत्रास्तथैव च ।
न मन्यन्ते हितं कार्यं कृतं मात्रा विगर्हितम् ॥ १६ ॥
आकृष्णः कृष्णतामम्ब कथं गच्छेद्धयोत्तमः ।

दासत्वं प्राप्स्यते त्वं हि पणेनाऽनेन सुव्रते !॥ २० ॥

कद्रूरुवाच

भवेयंनयथादासीतत्कुरुध्वं हि सत्वरम् । विशध्वं रोमकूपेषु तस्याश्वस्यमतिर्मम
क्षणमात्रं कृते कार्ये सा दासी च भवेन्मम ।
ततः स्वस्थोरगाः सर्वे भविष्यथ यथासुखम् ॥ २२ ॥

सर्पा ऊचुः

यथा त्वं जननी देवि! पन्नगानां मता भुवि ।
तथाऽपि सा विशेषेण वञ्चितव्या न कर्हिचित् ॥ २३ ॥

कद्रूरुवाच

ममवाक्यमकुर्वाणायेकेचिद्वै विपन्नगाः । हव्यवाहमुखं सर्वे यास्यन्त्यविचारिताः
एतच्छ्रुत्वा तु वचनं घोरं मातृमुखोद्भवम् ।
केचित्प्रविष्टा रोमाणि तथाऽन्ये गिरिसंस्थिताः ॥ २५ ॥
केचित्प्रविष्टा जाह्नव्यामन्ये च तपसि स्थिताः ॥ २६ ॥
ततो वर्षसहस्रान्ते तुतोष परमेश्वरः । महादेवो जगद्धाताह्युवाच परया गिरा ॥
भो भोः सर्पा निवर्त्तध्वं तपसोऽस्य महत्फलम् ।
यमिच्छथ ददाम्यद्य नाऽत्र कार्या विचारणा ॥ २८ ॥

सर्पा ऊचुः

कद्रूशापभयाद्भीता देवदेव महेश्वर । तवपार्श्वे वसिष्यामो यावदाभूतसम्प्लवम्

देवदेव उवाच

एकश्चायं महाबाहुर्वासुकिर्भुजगोत्तमः । मम पार्श्वे वसेन्नित्यं सर्वेषां भयरक्षकः
अन्येषां चैव सर्पाणां भयं नाऽस्ति ममाज्ञया ।
आप्लुत्य नर्मदातोये भुजगास्ते च रक्षिताः ॥ ३१ ॥
नास्ति मृत्युभयं तेषां वसध्वं यत्र चेप्सितम् ।
कद्रूशापभयं नास्ति ह्येष मे विस्तरः परः ॥ ३२ ॥

एवं दत्त्वा वरं तेषां देवदेवो महेश्वरः ।
जगामाऽऽकाशमाविश्य कैलासं धरणीधरम् ॥ ३३ ॥
गते चादर्शनं देवे वासुकिप्रमुखा नृप । स्थापयित्वा तथा जग्मुर्देवदेवं महेश्वरम्
तत्र तीर्थे तु यः कश्चित्पञ्चम्यामर्चयेच्छिवम् ।
तस्य नागकुलान्यष्टौ न हिंसन्ति कदाचन ॥ ३५ ॥
मृतःकालेनमहता तत्रतीर्थेनरेश्वरः । शिवस्यानुचरो भूत्वा वसतेकालमीप्सितम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नागेश्वरतीर्थमाहात्म्यवर्णनंनामैकत्रिंशदधिकशततमोऽध्यायः ॥१३१॥

द्वात्रिंशदधिकशततमोऽध्यायः

आदिवाराहतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! उत्तरे नर्मदातटे । सर्वपापहरं तीर्थं वाराहं नाम नामतः ॥
तत्रदेवो जगद्धाता वाराहं रूपमास्थितः ।
स्थितो लोकहितार्थाय संसारार्णवतारकः ॥ २ ॥
तत्र तीर्थे तु यः स्नात्वा पूजयेद्धरणीधरम् ।
गन्धमाल्यविशेषैश्च जयशब्दादि मङ्गलैः ॥ ३ ॥
उपवासपरोभूत्वा द्वादश्यां नृपसत्तम । वृषलाः पापकर्माणस्तथैवान्धपिशाचिनः
आलापाद्गात्रसम्पर्कान्निःश्वासात्सहभोजनात् ।
पापं संक्रमते यस्मात्तस्मात्तान्परिवर्जयेत् ॥ ५ ॥
ब्राह्मणान्पूजयेद्भक्त्या यथाशक्त्या यथाविधि ।

रात्रौ जागरणं कार्यं कथायां तत्र भारत !॥ ६ ॥
प्रभाते विमले स्नात्वा तत्र तीर्थे जगद्गुरुम् ।
ये पश्यन्ति जितक्रोधास्ते मुक्ताः सर्वपातकैः ॥ ७ ॥
यथा तु दृष्ट्वा भुजगाः सुपर्णं नश्यन्ति मुक्त्वा विषमुग्रतेजः ।
नश्यन्ति पापानि तथैव शीघ्रं दृष्ट्वा मुखं शूकररूपिणस्तु ॥ ८ ॥
नभोगतं नश्यति चान्धकारं दृष्ट्वा रविं देववरं तथैव ।
नश्यन्ति पापानि सुदुस्तराणि दृष्ट्वा मुखं पार्थ! धराधरस्य ॥ ९ ॥
किं तस्य बहुभिर्मन्त्रैर्भक्तिर्यस्य जनार्द्दने । नमोनारायणायेतिमन्त्रःसर्वार्थसाधकः
एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ ११ ॥
ध्यायमाना महात्मानो रूपं नारायणं हरेः ।
ये त्यजन्ति स्वकं देहं तत्र तीर्थे जितेन्द्रियाः ॥ १२ ॥
ते गच्छन्त्यमलं स्थानं यत्सुरैरपि दुर्लभम् ।
क्षराक्षरविनिर्मुक्तं तद्विष्णोः परमं पदम् ॥ १३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे आदिवाराहतीर्थमाहात्म्यवर्णनं नाम
द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

त्रयस्त्रिंशदधिकशततमोऽध्यायः

कुबेरादितीर्थचतुष्टयमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल! परं तीर्थचतुष्टयम्। येषां दर्शनमात्रेण सर्वपापक्षयो भवेत्
कौबेरंवारुणंयाम्यंवायव्यंतुततःपरम्। यत्र सिद्धामहाप्राज्ञा लोकपालामहाबलाः

युधिष्ठिर उवाच

किमर्थं लोकपालैश्च तपश्चीर्णं पुराऽनघ। नर्मदातटमाश्रित्य ह्येतन्मे वक्तुमर्हसि

श्रीमार्कण्डेय उवाच

अधिष्ठानंसमिच्छन्तिह्यचलंनिर्मले सति। संसारे सर्वभूतानां तृणबिन्दुवदस्थिरे
कदलीसारनिःसारे मृगतृष्णेव चञ्चले। स्थावरे जङ्गमे सर्वे भूतग्रामे चतुर्विधे॥
धर्मो माता पिता धर्मो धर्मो बन्धुः सुहृत्तथा।
आधारः सर्वभूतानां त्रैलोक्ये सचराचरे॥ ६॥
एवं ज्ञात्वा तु ते सर्वे लोकपालाःकृतक्षणाः। तपस्तेपचक्रुरतुलं मारुताहारतत्पराः
ततस्तुष्टो महादेवः कृतस्यार्द्धे गते तदा। अनुरूपेण राजेन्द्र युगस्य परमेश्वरः॥
वरेण च्छन्दयामास लोकपालान्महाबलान्।
यो यमिच्छति कामं वै तं तं तस्य ददाम्यहम्॥ ६॥
एतच्छ्रुत्वावचस्तस्य लोकपालाजगद्धिताः। वरदं प्रार्थयामासुर्देवंवरमनुत्तमम्

कुबेर उवाच

यदि तुष्टो महादेव! यदि देयोवरो मम। यक्षाणामीश्वरश्चाहंभवामिधनदस्त्विति
ततः प्रोवाच देवेशं यमः संयमने रतः। तत्र प्रधानो भगवान्भवेयं सर्वजन्तुषु॥१२॥
वरुणोऽनन्तरं प्राह प्रणम्य तु महेश्वरम्। क्रीडेयं वारुणे लोके यादोगणसमन्वितः॥
जगादाऽऽशु ततो वायुः प्रणम्य तु महेश्वरम्।

व्यापकत्वं त्रिलोकेषु प्रार्थयामास भारत!॥ १४॥
तेषां यदीप्सितं काममुमया सह शङ्करः। सर्वेषांलोकपालानां दत्त्वाचादर्शनंगतः
गते महेश्वरे देवे यथास्थानं तु ते स्थिताः।
स्थापना च कृता सर्वैः स्वानाम्नैव पृथक्पृथक्॥ १६॥
कुबेरश्च कुबेरेशं यमश्चैव यमेश्वरम्। वरुणो वरुणेशं तु वातो वातेश्वरं नृप॥ १७॥
तर्प्पणं विदधुः सर्व्वे मन्त्रैश्च विविधैः शुभैः।
सर्वे सर्वेश्वरं देव पूजयित्वा यथाविधि॥ १८॥
आह्वयामासुस्तान्विप्रान्सर्वे सर्वेश्वरा इव।
क्षान्तदान्तजितक्रोधान्सर्वभूताभयप्रदान्॥ १६॥
वेदविद्याव्रतस्नातान्सर्वशास्त्रविशारदान्।
ऋग्यजुःसामसंयुक्तांस्तथाऽथर्व्वविभूषितान्॥ २०॥
चातुर्विध्यं तुसर्वेषांदानंदास्यामगृह्णत। एवमुक्त्वातुसर्वेषां विप्राणांदानमुत्तमम्
तत्र स्थाने ददुस्तेषां भूमिदानमनुत्तमम्। यावच्चन्द्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी
तावद्दानंतुयुष्माकं परिपन्थी न कश्चन। राजावा राजतुल्योवालोकपालैरनुत्तमम्
दत्तं लोपयते मूढःश्रूयतां तस्ययोविधिः। शोषयेद्धनदोवित्तं तस्य पापस्य भारत
शरीरंवरुणोदेवः सन्ततीञ्छ्वसनस्तथा। आयुर्न्नयतितस्याऽऽशुयमःसंयमनोमहान्
निःशेषं भस्मसात्कृत्वा हुतभुग्याति भारत!।
तस्मात्सर्वप्रयत्नेन ब्राह्मणेभ्यो युधिष्ठिर!॥
भक्तिः कार्या नृपैः सर्वैरिच्छद्भिः श्रेय आत्मनः॥ २६॥
राजा वृक्षो ब्राह्मणास्तस्य मूलं भृत्याः पर्णा मंत्रिणस्तस्य शाखाः।
तस्मान्मूलं यत्नतो रक्षणीयं मूले गुप्ते नास्ति वृक्षस्य नाशः॥ २७॥
षष्टिवर्षसहस्राणिस्वर्गेतिष्ठतिभूमिदः। आच्छेत्ताचाऽवमन्ताचतान्येवनरकेवसेत्
स्वदत्तां परदत्तां वा पालनीया वसुन्धरा।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥ २६॥

देवताज्ञामनुस्मृत्यराजानोयेऽपितांनृप । पालयिष्यन्ति सततंतेषांवासस्त्रिविष्टपे
स्वदत्ता परदत्ता वा यत्नाद्रक्ष्या युधिष्ठिर ! ।
मही महीक्षिता नित्यं दानाच्छ्रेयोऽनुपालनम् ॥ ३१ ॥
आयुर्यशो बलं वित्तं संततिश्चाऽक्षयानृप । तेषांभविष्यते नूनं ये प्रजापालनेरताः
एवमुक्त्वा तु तान्सर्वाल्लोकपालान्द्विजोत्तमान् ।
पूजयित्वा विधानेन प्रणिपत्य व्यसर्जयन् ॥ ३३ ॥
गतेषु विप्रमुख्येषु स्नात्वा हुतहुताशनाः ।
लोकपालाः क्षुधाविष्टाः पर्यटन्भैक्षमात्मनः ॥ ३४ ॥
अस्थिचर्मावशेषाङ्गाःकपालोद्धृतपाणयः । अलब्धग्रासमर्द्धार्धेनिर्ययुर्नगराद्बहिः
शापं दत्त्वातदाक्रोधाद्ब्राह्मणाययुधिष्ठिर । दरिद्राःसततंमूर्खाभवेयुश्चययुर्गृहान्
तदाप्रभृतिते सर्वेब्राह्मणा धनवर्जिताः । शापदोषेण कौबेर्यां संजाताद‌ुःखभाजनाः
नधनं पैतृकंपुत्रैर्न पिता पुत्रपौत्रिकम् । भुञ्जतेसकलं कालमित्येवं शङ्करोऽब्रवीत्
कुबेरेशे नरः स्नात्वायस्तुपूजयतेशिवम् । गन्धधूपनमस्कारैः सोऽश्वमेधफलंलभेत्
यमतीर्थे तुयःस्नात्वा संपश्यतियमेश्वरम् । सर्वपापैःप्रमुच्येतसप्तजन्मान्तरार्जितैः
पूर्णमास्याममावास्यां स्नात्वा तु पितृतर्पणम् ।
यः करोति तिलैः स्नानं तस्य पुण्यफलं शृणु ॥ ४१ ॥
सुतृप्तास्तेन तोयेन पितरश्च पितामहाः ।
स्वर्गस्था द्वादशाब्दानि क्रीडन्ति प्रपितामहाः ॥ ४२ ॥
वरुणेशेनरःस्नात्वा ह्यर्चयित्वामहेश्वरम् । वाजपेयस्ययज्ञस्यफलंप्राप्नोतिपुष्कलम्
मृतां(तः)कालेनमहतालोकेयत्रजलेश्वरः । सगच्छेत्तत्रयानेनगीयमानोऽप्सरोगणैः
वातेश्वरे नरः स्नात्वा सम्पूज्य च महेश्वरम् ।
जायते कृतकृत्योऽसौ लोकपालानवेक्षयन् ॥ ४५ ॥
किं तस्य बहुभिर्यज्ञैर्दानैर्वा बहुदक्षिणैः । स्नात्वाचतुष्टये लोकेअवाप्तं जन्मनःफलम्
ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ।

नित्यं वसन्ति कौरिल्यां (कौबेर्याम्) लोकपालान्निमन्त्य ये ॥ ४७ ॥
एतत्पुण्यं पापहरं धन्यमायुर्विवर्धनम् । पठतां शृण्वतां चैव सर्वपापक्षयो भवेत्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कुबेरादितीर्थचतुष्टयमाहात्म्यवर्णनंनाम
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

चतुस्त्रिंशदधिकशततमोऽध्यायः

रामेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले रामेश्वरमनुत्तमम् । तीर्थं पापहरं पुण्यं सर्वदुःखघ्नमुत्तमम् ॥
तत्रतीर्थेतुये स्नात्वापूजयन्तिमहेश्वरम् । महादेवंमहात्मानं मुच्यन्तेसर्वकिल्बिषैः
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे रामेश्वरतीर्थमाहात्म्यवर्णनं नामचतुस्त्रिंशदधिकशततमोऽध्यायः ॥

पञ्चत्रिंशदधिकशततमोऽध्यायः

सिद्धेश्वरमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानंतरं चान्यत्सिद्धेश्वरमनुत्तमम् । तीर्थं सर्वगुणोपेतं सर्वलोकेषु पूजितम्
तत्र तीर्थेतुयः स्नात्वा ह्युमारुद्रंप्रपूजयेत् । वाजपेयस्ययज्ञस्यस लभेत्फलमुत्तमम्
तेन पुण्येन महता मृतः स्वर्गमवाप्नुयात् । अप्सरोगणसंवीतो जयशब्दादिमंगलैः

सहस्रवत्सरांस्तत्र क्रीडयित्वा यथासुखम् ।

धनधान्यसमोपेते कुले महति जायते ॥ ४ ॥

पूज्यमानो नरश्रेष्ठ! वेदवेदाङ्गपारगः । व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे सिद्धेश्वरमाहात्म्यवर्णनं नामपञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

षट्त्रिंशदधिकशततमोऽध्यायः

अहल्यातीर्थमाहात्म्यवर्णनम्

मार्कण्डेय उवाच

ततोगच्छेन्महीपालचाहल्येश्वरमुत्तमम् । यत्रसिद्धामहाभागात्वहल्यातापसीपुरा

गौतमो ब्राह्मणस्त्वासीत्साक्षाद्ब्रह्मेव चाऽपरः ।

सत्यधर्मसमायुक्तो वानप्रस्थाश्रमे रतः ॥ २ ॥

तस्य पत्नी महाभागा ह्यहल्यानामविश्रुता । रूपयौवनसंपन्नात्रिषु लोकेषुविश्रुता

अस्याअप्यतिरूपेण देवराजः शतक्रतुः । मोहितोलोभयामासह्यहल्यां वलसूदनः

मांभजस्व वरारोहे देवराजमनिन्दिते । क्रीडयस्वमया सार्द्धंत्रिषु लोकेषु पूजिता

किं करिष्यसि विप्रेण शौचाचारकृशेन तु ।

तपःस्वाध्यायशीलेन क्लिश्यन्तीव सुलोचने !॥ ६ ॥

एवमुक्ता वरारोहा स्त्रीस्वभावात्सुचञ्चला ।

मनसाऽध्याय शक्रं सा कामेन कलुषीकृता ॥ ७ ॥

तस्या विदित्वा तं भावं स देवः पाकशासनः ।

गौतमं वञ्चयामास दुष्टभावेन भावितः ॥ ८ ॥

विदित्वा चान्तरं तस्य गृहीत्वा वेषमुत्तमम् ।

अहल्यां रमयामास विश्वस्तां मन्दिरान्तिके ॥ ६ ॥

क्षणमात्रान्तरे तत्र देवराजस्य भारत । आजगाममुनिश्रेष्ठोमन्दिरं त्वरयाऽन्वितः

आगतं गौतमंदृष्ट्वाभीतभीतःपुरन्दरः । निर्गतः सततो दृष्ट्वा शक्रोऽयमितिचिन्तयन्

ततः शशाप देवेन्द्रं गौतमः क्रोधमूर्च्छितः ।

अजितेन्द्रियोऽसि यस्मात्त्वं तस्माद्बहुभगो भव ॥ १२ ॥

एवमुक्तस्तु देवेन्द्रस्तत्क्षणादेव भारत !। भगानां तु सहस्रेण तत्क्षणादेव वेष्टितः

त्यक्त्याराज्यं सुरैः सार्द्धं गतश्रीकोजगाम ह । तपश्चचारविपुलं गौतमेनमहीतले

अहल्याऽपि ततः शप्ता यस्मात्त्वं दुष्टचारिणी ।

प्रेक्ष्य मां रमसे शक्रं तस्मादश्ममयी भव ॥ १५ ॥

गते वर्षसहस्रान्ते रामं दृष्ट्वा यशस्विनम् ।

तीर्थयात्राप्रसङ्गेन धौतपापा भविष्यसि ॥ १६ ॥

एवंगतेतःकालेदृष्ट्वारामेणधीमता । विश्वामित्रसहायेन त्यक्त्वासाऽश्ममयींतनुम्

पूजयित्वा यथान्यायं गतपापा विमत्सरा ।

आगता नर्मदातीरे तीर्थे स्नात्वा यथाविधि ॥ १८ ॥

कृतं चान्द्रायणं मासं कृच्छ्रं चाऽन्यं ततः परम् ।

ततस्तुष्टो महादेवो दत्त्वा वरमनुत्तमम् ॥ १६ ॥

जगामाऽदर्शनंभूयोरेमेचोमापतिश्चिरम् । अहल्यातुगतेदेवे स्थापयित्वाजगद्गुरुम्

अहल्येश्वरनामानं स्वगृहेचागमत्पुनः । तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरम्

स मृतः स्वर्गमाप्नोतियत्रदेवोमहेश्वरः । क्रीडयित्वा यथाकामं तत्रलोकेमहातपाः

गते वर्षसहस्रान्ते मानुष्यं लभते पुनः । धनधान्यचयोपेतः पुत्रपौत्रसमन्वितः ॥

वेदविद्याऽऽश्रयो धीमाञ्जायते विमले कुले ।

रूपसौभाग्यसम्पन्नः सर्वव्याधिविवर्जितः । जीवेद्वर्षशतं साग्रमहल्यातीर्थसेवनात्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेऽहल्यातीर्थमाहात्म्यवर्णनं नामषट्त्रिंशदधिकशततमोऽध्यायः ॥

सप्तत्रिंशदधिकशततमोऽध्यायः

कर्कटेश्वरतीर्थमाहात्म्यवर्णनम्

मार्कण्डेय उवाच

धर्मपुत्र! ततो गच्छेत्कर्कटेश्वरमुत्तमम् । उत्तरे नर्मदाकूले सर्वपापक्षयङ्करम् ॥ १ ॥

तत्र स्नात्वा विधानेन यस्तु पूजयते शिवम् ।
अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ २ ॥

तस्य तीर्थस्य माहात्म्यं पुराणे यच्छ्रुतंमया ।
न तद्वर्णयितुं शक्यं संक्षेपेण वदाम्यतः ॥ ३ ॥

तत्रतीर्थेतुयःकुर्यात्किञ्चित्कर्मशुभाशुभम् । हर्षान्मदान्महाराजतत्सर्वंजायतेऽक्षयम्
तत्रतीर्थेतपस्तप्त्वाबालखिल्यामरीचयः । रमन्तेऽद्यापिलोकेषुस्वेच्छयाकुरुनन्दन

तत्रस्थास्तन्न जानन्ति नरा ज्ञानबहिष्कृताः ।
शरीरस्थमिवाऽऽत्मानमक्षयं ज्योतिरव्ययम् ॥ ६ ॥

तत्र तीर्थेनृपश्रेष्ठ! देवी नारायणी पुरा । अद्यापितपते घोरं तपोयावत्किलार्बुदम्

तत्र तीर्थे तु यः स्नात्वा तर्प्पयेत्पितृदेवताः ।
तस्य ते द्वादशाब्दानि तृप्तिं यान्ति पितामहाः ॥ ८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कर्कटेश्वरतीर्थमाहात्म्यवर्णनं नाम
सप्तत्रिंशदधिकशततमोऽध्यायः ॥१३७॥

अष्टत्रिंशदधिकशततमोऽध्यायः

शक्रतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्पाण्डुपुत्र! शक्रतीर्थमनुत्तमम् । यत्रसिद्धोमहाभागो देवराजः शतक्रतुः
गौतमेन पुरा शप्तं ज्ञात्वा देवाः सुरेश्वरम् । ब्रह्माद्यादेवताःसर्वऋषयश्च तपोधनाः

गौतमं प्रार्थयामासुर्वाक्यैः सानुनयैः शुभैः ।
गतराज्यं गतश्रीकं शक्रं प्रति मुनीश्वर !॥ ३ ॥

इन्द्रेणरहितंराज्यंन कश्चित्कामयेद्द्विज !। देवोवामानवोवाऽपिएतत्तेविदितंप्रभो
तस्यत्वं भगयुक्तस्य दयां कुरु द्विजोत्तम । गतश्चादर्शनंशक्रो दूषितःस्वेनपाप्मना
देवानां वचनं श्रुत्वा गौतमो वेदवित्तमः । तथेति कृत्वा शक्रस्य वरंदातुं प्रचक्रमे
एतद्भगसहस्रं तु पुरा जातं शतक्रतो !। तल्लोचनसहस्रं तु मत्प्रसादाद्भविष्यति ॥७।
एवमुक्तःसहस्राक्षःप्रणम्यमुनिसत्तमम् । ब्राह्मणांस्तान्महाभागान्नर्मदांप्रत्यगात्ततः

स्नात्वा स विमले तोये संस्थाप्य त्रिपुरान्तकम् ।
जगाम त्रिदशावासं पूज्यमानोऽप्सरोगणैः ॥ ९ ॥

तत्र तीर्थे तु स्नात्वा पूजयेत्परमेश्वरम् । परदाराभिगमनान्मुच्यते पातकान्नरः ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शक्रतीर्थमाहात्म्यवर्णनंनामाऽष्टत्रिंशदधिकशततमोऽध्यायः ॥१३८॥

एकोनचत्वारिंशदधिकशततमोऽध्यायः

सोमतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महाराजस्सोमतीर्थमनुत्तमम् । यत्रसोमस्तपस्तप्त्वानक्षत्रपथमास्थितः

तत्र तीर्थे तु यः स्नायादाचम्य विधिपूर्वकम् ।

कृतजाप्यो रविं ध्यायेत्तस्य पुण्यफलं श‍ृणु ॥ २ ॥

ऋग्वेदयजुर्वेदाभ्यां सामवेदेनभारत । जपतो यत्फलंप्रोक्तंगायत्र्याचाऽत्रतत्फलम्

तत्र तीर्थे तु यो भक्त्या ब्राह्मणान्भोजयेच्छुचिः ।

तेन सम्यग्विधानेन कोटिर्भवति भोजिता ॥ ४ ॥

पादुकोपानहौ छत्रं वस्त्रकम्बलवाजिनः ।

यो दत्ते विप्रमुख्याय तस्य तत्कोटिसम्मितम् ॥ ५ ॥

सहस्रंतुसहस्राणामनृचांयस्तुभोजयेत् । एकस्यमन्त्रयुक्तस्यकलांनार्हतिषोडशीम्

एवं तु भोजयेत्तत्रबह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्युं छन्दोगंवासमाप्तिगम्

अग्निहोत्रसहस्रस्य यत्फलं प्राप्यते बुधैः । समंतद्वेदविदुषा तीर्थेसोमस्य तत्फलम्

भोजयेद्यः शतं तेषां सहस्रं लभते नरः । एकस्य योगयुक्तस्य तत्फलं कवयोविदुः

सन्निरुध्येन्द्रियग्रामं यत्रयत्र वसेन्मुनिः । तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च॥

तस्मात्सर्वप्रयत्नेनग्रहणेचन्द्रसूर्ययोः। सङ्क्रान्तौचव्यतीपातेयोगीभोज्योविशेषतः

संन्यासं कुरुते यस्तुतत्र तीर्थे युधिष्ठिर । विमानेनमहाभागः सयातित्रिदिवंनरः

सोमस्याऽनुचरो भूत्वा तेनैव सह मोदते ॥ १३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे सोमतीर्थमाहात्म्यवर्णनंनामैकोनचत्वारिंशदधिकशततमोऽध्यायः ॥

चत्वारिंशदधिकशततमोऽध्यायः

नन्दाह्रदतीर्थमाहात्म्यवर्णनम्

मार्कण्डेय उवाच

ततो गच्छेन्महराज नन्दाह्रदमनुत्तम् । यत्र सिद्धा महाभागा नन्दादेवी वरप्रदा ॥

महिषासुरे महाकाये पुरा देवभयङ्करे । शूलिन्याशूलभिन्नाङ्गे कृते दानवसत्तमे ॥

येनैकादशरुद्राश्चह्यादित्याःसमरुद्गणाः । वसवोवायुना सार्द्धंचन्द्रादित्यौसुरेश्वर

बलिना निर्जितायेनब्रह्मविष्णुमहेश्वराः । सङ्ग्रामे सुमहाघोरेकृते देवभयङ्करे ॥ ४

कृत्वा तत्कदनं घोरं नन्दा देवी सुरेश्वरी ।

यस्मात्स्नाता विशालाक्षी तेन नन्दाह्रदः स्मृतः ॥ ५ ॥

तत्रतीर्थेतुयःस्नात्वानन्दामुद्दिश्यभारत। ददातिदानंविप्रेभ्यःसोऽश्वमेधफलंलभेत्

भैरवं चैव केदारं तथा रुद्रं महालयम् । नन्दाह्रदश्चतुर्थःस्यात्पञ्चमंभुविदुर्लभमम्

बहवस्तं नजानन्ति कामरागसमन्विताः । नर्मदायांह्रदं पुण्यं सर्वपातकनाशनम्

तत्र तीर्थेतु यः स्नात्वानन्दां देवींप्रपूजयेत् । किंतस्यहिमवन्मध्यगमनेनप्रयोजनम्

परमार्थमविज्ञाय पर्यटन्ति तमोवृताः । तेषां समागमे पार्थ श्रमएव हि केवलम्

पृथिव्यां सागरान्तायां स्नानदानेन यत्फलम् ।

तत्फलं समवाप्नोति स्नात्वा नन्दाह्रदे नृप !॥ ११ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नन्दाह्रदतीर्थमाहात्म्यवर्णनंनाम चत्वारिंशदधिकशततमोऽध्यायः ॥

एकचत्वारिंशदधिकशततमोऽध्यायः

तापेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल तापेश्वरमनुत्तमम् । यत्रसा हरिणीसिद्धा व्याधभीतानरेश्वर

जले प्रक्षिप्य गात्राणि ह्यन्तरिक्षं गता तु सा ।

व्याधो विस्मितचित्तस्तु तां मृगीमवलोक्य च ॥ २ ॥

विमुच्य सशरं चापं प्रारेभेतप उत्तमम् । दिव्यं वर्षसहस्त्रंतु व्याधेनाऽऽचरितंतपः

अतीते तु ततः काले परितुष्टो महेश्वरः । वरं ब्रूहि महाव्याध यत्ते मनसि रोचते

व्याध उवाच

यदि तुष्टोऽसि देवेश यदि देयो वरोमम । तव पार्श्वेमहादेव वासोमे प्रतिदीयताम्

ईश्वर उवाच

एवं भवतुते व्याध! यस्त्वयाकाङ्क्षितोवरः । देवदेवोमहादेवइत्युक्त्वान्तरधीयत

गते चाऽदर्शनं देवे स्थापयित्वा महेश्वरम् ॥ ६ ॥

पूजयित्वा विधानेन गतो व्याधस्ततो दिवम् ।

तदाप्रभृति तत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ७ ॥

व्याधानुतापसञ्जातं तापेश्वरमितिश्रुतम् । तत्रतीर्थेतुयः स्नात्वासंपूजयतिशङ्करम्

शिवलोकमवाप्नोति मामुवाचमहेश्वरः । येस्नाता नर्मदातोयेतीर्थे तापेश्वरे नराः

तापत्रयविमुक्तास्ते नाऽत्र कार्याविचारणा ।

अष्टम्यां च चतुर्दश्यां तृतीयायां विशेषतः ।

स्नानं समाचरेन्नित्यं सर्वपातकशान्तये ॥ ११ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्च ऽवन्तीखण्डे रेवाखण्डे तापेश्वरतीर्थमाहात्म्यवर्णनं नामैकचत्वारिंशदधिकशततमोऽध्यायः ॥

द्विचत्वारिंशदधिकशततमोऽध्यायः

रुक्मिणीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज! रुक्मिणीतीर्थमुत्तमम् ।

यत्रैव स्नानमात्रेण रूपवान्सुभगो भवेत् ॥ १ ॥

अष्टम्यां चचतुर्दश्यां तृतीयायांविशेषतः । स्नानं समाचरेत्तत्र न चेह जायते पुनः

यःस्नात्वा रुक्मिणीतीर्थे दानं दद्यात्तु काञ्चनम् ।

तत्तीर्थस्य प्रभावेण शोकं नाप्नोति मानवः ॥ ३ ॥

युधिष्ठिर उवाच

तीर्थस्याऽस्यकथंजातोमहिमेदृङ्मुनीश्वर । रूपसौभाग्यदंयेन तीर्थमेतद्ब्रवीहिमे

मार्कण्डेय उवाच

कथयामि यथावृत्तमितिहासंपुरातनम् । कथितं पूर्वतो वृद्धैः पारम्पर्येण भारत!

तन्तेहं सम्प्रवक्ष्यामिश्रृणुष्वैकाग्रमानसः । नगरंकुण्डिनंनामभीष्मकोपरिपातिहि

हस्त्यश्वरथसम्पन्नो धनाढ्योऽतिप्रतापवान् ।

स्त्रीसहस्त्रस्य मध्यस्थः कुरुते राज्यमुत्तमम् ॥ ७ ॥

तस्य भार्या महादेवी प्राणेभ्योऽपि गरीयसी ।

तस्यामुत्पादयामास पुत्रमेकं च रुक्मकम् ॥ ८ ॥

द्वितीया तनया जज्ञे रुक्मिणीनामनामतः ।

तदाऽशरीरिणी वाचा राजानं तमुवाच ह ॥ ६ ॥

चतुर्भुजाय दातव्याकन्येयं भुवि भीष्मक !। एवं तद्वचनं श्रुत्वा जहर्ष प्रियया सह

ब्राह्मणैः सह विद्वद्भिः प्रविष्टःसूतिकागृहम् ।

स्वस्तिकं वाचयित्वाऽस्याश्चक्रे नामेति रुक्मिणी ॥ ११ ॥

यतः सुवर्णतिलकोजन्मनासहभारत । ततःसा रुक्मिणीनामब्राह्मणैःकीर्त्तितातदा
ततः साकालपर्यायादष्टवर्षा व्यजायत । पूर्वोक्तं चैव तद्वाक्यमशरीरिण्युदीरितम्
स्मृत्वा स्मृत्वाऽथ नृपतिश्चिन्तयामास भूपतिः ।
कस्मै देया मया बाला भविताकश्चतुर्भुजः ॥ १४ ॥
एतस्मिन्नन्तरे तावद्रैवतात्पर्वतोत्तमात् । मुख्यश्चेदिपतिस्तत्र दमघोषः समागतः
प्रविष्टो राजसदनंयत्र राजासभीष्मकः । तं दृष्ट्वाचाऽऽगतंगेहे पूजयामास भूपतिः
आसनं विपुलं दत्त्वा सभांगत्वानिवेशितः । कुशलंतव राजेन्द्र! दमघोषश्रियायुत
पुण्याहमद्य सञ्जातमहं त्वद्दर्शनोत्सुकः । कन्या मदीया राजेन्द्र! ह्यष्टवर्षाव्यजायत
चतुर्भुजाय दातव्या वागुवाचाऽशरीरिणी ।
भीष्मकस्य वचः श्रुत्वा दमघोषोऽब्रवीदिदम् ॥ १६ ॥
चतुर्भुजोमम सुतस्त्रिषुलोकेषुविश्रुतः । तस्येयंदीयतांकन्याशिशुपालस्यभीष्मक!
तस्यतद्वचनं श्रुत्वा दमघोषस्य भूमिप । भीष्मकेण ततोदत्ताशिशुपालायरुक्मिणी
प्रारब्धं मङ्गलं तत्र भीष्मकेणयुधिष्ठिर । दिक्षु देशान्तरेष्वेवयेवसन्ति स्वगोत्रजाः
निमन्त्रितास्तु ते सर्वे समाजग्मुर्यथाक्रमम् ।
ततो यादववंशस्य तिलकौ बलकेशवौ ॥ २३ ॥
निमन्त्रितौ समायातौ कुण्डिनं भीष्मकस्य तु ।
भीष्मकेण यथान्यायं पूजितौ तौ यदूत्तमौ ॥ २४ ॥
ततः प्रदोषसमये रुक्मिणी काममोहिनी ।
सखिभिः सहिता याता पूर्वहिश्चाम्बिकार्चने ॥ २५ ॥
साऽपश्यत्तत्र देवेशं गोपवेषधरं हरिम् । तं दृष्ट्वा मोहमापन्ना कामेन कलुषीकृता
केशवोऽपि च तां दृष्ट्वा सङ्कर्षणमुवाच ह । स्त्रीरत्नप्रवरंतात हर्तव्यमिति मे मतिः
केशवस्य वचः श्रुत्वा सङ्कर्षण उवाच ह ।
गच्छ कृष्ण महाबाहो स्त्रीरत्नं चाऽऽशु गृह्यताम् ॥ २८ ॥
अहं च तव मार्गेण ह्यागमिष्यामि पृष्ठतः । दानवानां च सर्वेषां कुर्वंश्चकदनंमहत्

सङ्कर्षणमतंप्राप्य केशवः केशिसूदनः । ययौ कन्यांगृहीत्वा तु रथमारोप्य सत्वरम्
निर्गतः सहसा राजन्वेगेनैवाऽनिलो यथा ।
हाहाकारस्तदा जातो भीष्मकस्य पुरे महान् ॥ ३१ ॥
निर्गता दानवाःक्रुद्धा वेलाइवमहोदधेः । गर्जन्तःसायुधाःसर्वेधावन्तोरथवर्त्मनि
बलदेवं ततः प्राप्ता रथमार्गाऽनुगामिनम्
तेषां युद्धं बलस्याऽऽसीत्सर्वलोकक्षयङ्करम् ॥ ३३ ॥
यथा तारामये पूर्वं सङ्ग्रामे लोकविश्रुते ।
गदाहस्तो महाबाहुस्त्रैलोक्येऽप्रतिमो बलः ॥ ३४ ॥
हलेनाऽऽकृष्य सहसा गदापातैरपातयत् । अशक्यो दानवैर्हन्तुं बलभद्रो महाबलः
बभञ्ज दानवान्सर्वांस्तथौ गिरिरिवाऽचलः । तं दृष्ट्वा च बलंक्रुद्धंदुर्धर्षं त्रिदशैरपि
भीष्मपुत्रो महातेजा रुक्मीनाम महायशाः ।
नराणामतिशूराणामक्षौहिण्या समन्वितः ॥ ३७ ॥
बलभद्रमतिक्रम्य ततो युद्धे निराकरोत् । तद्युद्धं वञ्चयित्वा तु रथमार्गेण सत्वरम्
केशवोऽपि तदा देवो रुक्मिण्या सहितो ययौ ।
विन्ध्यं तु लङ्घयित्वाऽग्रे त्रैलोक्यगुरुरव्ययः ॥ ३९ ॥
नर्मदातटमापेदे यत्र सिद्धः पुरा पुनः । अजेयो येन सञ्जातस्तीर्थस्यास्यप्रभावतः
एतस्मात्कारणात्तात योधनीपुरमुच्यते ।
रुक्मोऽपि दानवेन्द्रोऽसौ प्राप्तः स्थानमनुत्तमम् ॥ ४१ ॥
प्रत्युवाचाऽच्युतं क्रुद्धस्तिष्ठस्तिष्ठेति मा व्रज ।
अद्य त्वां निशितैर्बाणैर्नेष्यामि यमसादनम् ॥ ४२ ॥
एवं परस्परं वीरौ जगर्जतुरुभावपि । तयोर्युद्धमभूद्घोरं तारकाग्निजसन्निभम् ॥
चिक्षेपशरजालानिकेशवं प्रतिदानवः । नाऽनुचिन्त्य शरांस्तस्यकेशवः केशिसूदनः
ततो रुक्मोऽथ सङ्क्रुद्धो गृहीत्वा धनुरुत्तमम् ।
सायकेन सुतीक्ष्णेन तं बिभेद तदोरसि ॥ ४५ ॥

ततो विष्णुः स्वयं क्रुद्धश्चक्रं गृह्य सुदर्शनम् ।
संप्रहरत्यमुं यावद्रुक्मिण्याऽत्र निवारितः ॥ ४६ ॥
त्वां न जानाति देवेशंचतुर्बाहुं जनार्द्दनम् । दर्शयस्वस्वकंरूपं दयांकृत्वाममोपरि
एवमुक्तस्तुरुक्मिण्यादर्शयामासभारत । देवाद्दृष्ट्वापितद्रूपंस्तुवन्त्याकाशसंस्थितः
दिव्यं चक्षुस्तदा देवो ददौ रुक्मस्य भारत !॥ ४८ ॥

रुक्म उवाच

यन्मया पापनिष्ठेन मन्दभाग्येन केशव !। सायकैराहतंवक्षस्तत्सर्वं क्षन्तुमर्हसि ॥
पूर्वं दत्ता स्वयं देव जानकी जनकेन व । मया प्रदत्ता देवेश! रुक्मिणी तव केशव
उद्वाहययथान्यायं विधिदृष्टेन कर्मणा । रुक्मस्यवचनं श्रुत्वा ततस्तुष्टोजगद्गुरुः
बभाषे देवदेवेशो रुक्मिणं भीष्मकात्मजम् ।
गच्छ स्वकं पुरं मा भैः कुरु राज्यमकण्टकम् ॥ ५२ ॥
केशवस्य वचः श्रुत्वा रुक्मोदानवपुङ्गवः । तं प्रणम्य जगन्नाथ जगाम भवनं पितुः
गते रुक्मे तदा कृष्णः समामन्त्र्य द्विजोत्तमान् ।
मरीचिमत्र्यगिरसं पुलस्त्यं पुलहं क्रतुम् ॥ ५४ ॥
वसिष्ठं च महाभागमित्येते सप्त मानसाः ।
इत्येते ब्राह्मणाः सप्त पुराणे निश्चयं गताः ॥ ५६ ॥
क्षमावन्तः प्रजावन्तो महर्षिभिरलङ्कृताः । इत्येवं ब्रह्मपुत्राश्च सत्यवन्तो महामते
नर्मदातटमाश्रित्यनिवसन्तिजितेन्द्रियाः । तपःस्वाध्यायनिरताजपहोमपरायणाः
निमन्त्रितास्तुराजेन्द्रकेशवेनमहात्मना । श्राद्धंकृत्वायथान्यायंब्रह्मोक्तविधिनाततः
हरिस्तान्पूजयामास सप्त ब्रह्मर्षिपुङ्गवान् ।
प्रददौ द्वादशग्रामांस्तेभ्यस्तत्र जनार्दनः ॥ ५९ ॥
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । तावद्दानं मयादत्तं परिपन्थी न कश्चन
मद्दत्तं पालयिष्यन्ते ये नृपा गतकल्मषाः ।
तेभ्यः स्वस्ति करिष्यामि दास्यामि परमां गतिम् ॥ ६१ ॥

यावद्ध्रियान्तिलोकेषु महाभूतानि पञ्च च । तावत्तेदिविमोदन्ते मद्दत्तपरिपालकाः
यस्तुलोपयते मूढोदत्तं वः पृथिवीतले । नरकेतस्यवासःस्याद्यावदाभूतसम्प्लवम्
स्वदत्ता परदत्ता वा पालनीया वसुन्धरा ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ ६४ ॥
स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥ ६५ ॥
अन्यायेन हृता भूमिरन्यायेन च हारिता । हर्त्ताहारयिताचैवविष्ठायांजायतेकृमिः
षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ ६७ ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यरूपप्रतिमानि तानि को नाम साधुः पुनराददाति ॥ ६८ ॥
एवं तान्पूजयित्वा तु सम्यङ् न्यायेन पाण्डव !।
रुक्मिण्या विधिवत्पाणिं जग्राह मधुसूदनः ॥ ६९ ॥
मुशली च ततः सर्वाञ्जित्वा दानवपुङ्गवान् ।
स्वस्थानमगमत्तत्र कृत्वा कार्यं सुशोभनम् ॥ ७० ॥
प्रयातौद्वारवत्यां तौकृष्णसङ्कर्षणावुभौ । गच्छमानं तुतं दृष्ट्वा केशवंक्लेशनाशनम्
ब्राह्मणाः सत्यवन्तश्च निर्गताः शंसितव्रताः ।
आगच्छमानांस्तौ वीक्ष्य रथमार्गेण ब्राह्मणान् ॥ ७२ ॥
मुहूर्त्तं तत्र विश्रम्यकेशवो वाक्यमब्रवीत् । किमागमनकार्यं वोब्रूतसर्वं द्विजोत्तमाः
कुर्वाणाः स्वीयकर्माणि ममकृत्यंतुतिष्ठते । देवस्यवचनं श्रुत्वामुनयोवाक्यमब्रुवन
कल्पकोटिसहस्रेण सत्यभावात्तु वन्दितः ।
दुष्प्राप्योऽसि मनुष्याणां प्राप्तः किं त्यजसे हि नः ॥ ७५ ॥
ब्राह्मणानां वचःश्रुत्वा भगवानिदमब्रवीत् । मथुरायांद्वारवत्यांयोधनीपुर एव च
त्रिकालमागमिष्यामि सत्यं सत्यं पुनः पुनः ।

एवं ते ब्राह्मणाः श्रुत्वा योधनीपुरमागताः ॥ ७७ ॥
अवतीर्णस्त्रिभागेन प्रादुर्भावेतुमाथुरे । एतत्तेकथितं सर्वं तीर्थस्योत्पत्तिकारणम्
भूतंभव्यं भविष्यच्चवर्त्तमानं तथाऽपरम् । यंश्रुत्वासर्वपापेभ्यो मुच्यतेनाऽत्रसंशयः
तत्रतीर्थेतुयःस्नात्वापूजयेद्बलकेशवौ । तेन देवोजगद्धाता पूजितस्त्रिगुणात्मवान्
उपवासीनरो भूत्वा यस्तु कुर्यात्प्रदक्षिणम् ।
मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ८१ ॥
तत्र तीर्थे तु येवृक्षास्तान्पश्यन्त्यपियेनराः । तेऽपिपापैःप्रमुच्यंतेभ्रूणहत्यासमैरपि
प्रातरुत्थाय ये केचित्पश्यन्ति बलकेशवौ । तेन ते सदृशाः स्युर्वै देवदेवेन चक्रिणा
ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सुजीवितम् ।
ये नमन्ति जगन्नाथं देवं नारायणं हरिम् ॥ ८४ ॥
तत्र तीर्थे तु यद्दानं स्नानं देवार्चनं नृप । तत्सर्वमक्षयं तस्य इत्येवं शङ्करोऽब्रवीत्
प्रविश्याग्नौ मृतानांचयत्फलंसमुदाहृतम् । तच्छृणुष्व नृपश्रेष्ठ! प्रोच्यमानमशेषतः
विमानेनाऽर्कवर्णेन किङ्किणीजालमालिना ।
आग्नेये भवते तत्र मोदते कालमीप्सितम् ॥ ८७ ॥
जले चैव मृतानां तु योधनीपुरमध्यतः । वसन्तिवारुणेलोके यावदाभूतसंप्लवम्
अनाशके मृतानां तु तत्र तीर्थे नराधिप !।
अनिवर्त्तिका गतिर्नॄणां नाऽत्र कार्या विचारणा ॥ ८६ ॥
तत्र तीर्थे तु यो दद्यात्कपिलादानमुत्तमम् ।
विधानेन तु संयुक्तं शृणु तस्याऽपि यत्फलम् ॥ ९० ॥
तावन्तितस्यारोमाणितत्प्रसूतेश्चभारत ।तावन्तिदिविमोदन्तेसर्वकामैःसुपूजिताः
यावन्ति रोमाणि भवन्ति धेन्वास्तावन्ति वर्षाणि महीयते सः ।
स्वर्गाच्च्युतश्चाऽपि ततस्त्रिलोक्यां कुले समुत्पत्स्यति गोमतां सः
तत्र तीर्थे तु यो दद्याद्रूप्यं काञ्चनमेव वा । काञ्चनेन विमानेनविष्णुलोके महीयते
तस्मिंस्तीर्थे तु यो दद्यात्पादुके वस्त्रमेव च ।

दानस्याऽस्य प्रभावेण लभते स्वर्गमीप्सितम् ॥ ६४ ॥
ऋग्यजुः सामवेदानां पठनाद्यत्फलंभवेत् । तत्रतीर्थेतुराजेन्द्रगायत्र्यातत्फलंलभेत्
प्रयागे यद्भवेत्पुण्यं गयायां च त्रिपुष्करे । कुरुक्षेत्रे तु राजेन्द्र राहुग्रस्ते दिवाकरे
सोमेश्वरे च यत्पुण्यं सोमस्य ग्रहणेतथा । तत्फलं लभतेतत्र स्नानमात्रान्न संशयः
द्वादश्यां तु नरः स्नात्वा नमस्कृत्य जनार्द्दनम् ।
उद्धृताः पितरस्तेन अवाप्तं जन्मनः फलम् ॥ ६८ ॥
संक्रांतौचव्यतीपातेद्वादश्यांचविशेषतः । ब्राह्मणंभोजयेदेकं कोटिर्भवतिभोजिता
पृथिव्यां यानि तीर्थानि ह्यासमुद्राणि पाण्डव !।
तानि सर्वाणि तत्रैव द्वादश्यां पाण्डुनन्दन ॥ १०० ॥
क्षयंयान्तिचदानानि यज्ञहोमबलिक्रियाः । नक्षीयतेमहाराज तत्र तीर्थेतु यत्कृतम्
यद्भूतंयद्भविष्यच्चतीर्थमाहात्म्यमुत्तमम् । कथितंतेमया सर्वं पृथग्भावेन भारत!
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे रुक्मिणीतीर्थमाहात्म्यवर्णनंनामद्विचत्वारिंशदधिकशततमोऽध्यायः

त्रिचत्वारिंशदधिकशततमोऽध्यायः

योजनेश्वरतीर्थमाहात्म्यवणनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज योजनेश्वरमुत्तमम् । यत्र सिद्धौ पुरा कल्पेनरनारायणावृषी
तत्रतीर्थेतपस्तप्त्वासङ्ग्रामे देवदानवैः । जयंप्राप्तौमहात्मानौ नरनारायणावुभौ
पुनस्त्रेतायुगे प्राप्ते तौदेवौ रामलक्ष्मणौ । तत्रतीर्थेपुनः स्नात्वारावणोदुर्जयोहतः
पुनः पार्थ कलौ प्राप्ते तौ देवौबलकेशवौ । वसुदेवकुले जातौ दुष्करं कर्म चक्रतुः
नरकं कालनेमिं च कंसं चाणूरमुष्टिकौ । शिशुपालं जरासन्धं जघ्नतुर्बलकेशवौ ॥

ततस्तत्र रिपून्सङ्ख्ये भीष्मद्रोणपुरःसरान् ।
कर्णदुर्योधनादींश्च निहनिष्यति स प्रभुः ॥ ६ ॥
धर्मक्षेत्रेकुरुक्षेत्रेतत्र युध्यन्तितेक्षणम् । भीमार्जुननिमित्तेन शिष्यौकृत्वापरस्परम्
तत्र तीर्थे पुनर्गत्वा तपः कृत्वा सुदुष्करम् ।
पूजयित्वा द्विजान्भक्त्या यास्येते द्वारकां पुनः ॥ ८ ॥
तत्र तीर्थे तु यः स्नात्वापूजयेद्बलकेशवौ । तेनदेवोजगद्धातापूजितस्त्रिगुणात्मवान्
उपवासी नरो भूत्वा यस्तु कुर्यात्प्रजागरम् ।
मुच्यते सर्वपापेभ्यो गायंस्तस्य शुभां कथाम् ॥ १० ॥
यावतस्तत्र तीर्थे तुवृक्षान्पश्यन्तिमानवाः । ब्रह्महत्यादिकंपापंतावद्देषांप्रणश्यति
प्रातरुत्थाय येकेचित्पश्यन्ति बलकेशवौ । तेनैवसदृशाः सर्वेदेवदेवेन चक्रिणा ॥
ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सुजीवितम् ।
ये नमन्ति जगत्पूज्यं देवं नारायणं हरिम् ॥ १३ ॥
तत्र तीर्थे तु यद्दानं स्नानं देवार्च्चनं नृप !। क्रियते तत्फलं सर्वमक्षयायोपकल्पते ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गां च भुवं च दद्यात् ॥ १५ ॥
एतत्ते कथितं सर्वं तीर्थमाहात्म्यमुत्तमम् । अतीतंच भविष्यच्च वर्तमानं महाबलम्
श्रुत्वा वाऽपि पठित्वेदं श्रावयित्वाऽथ धार्मिकान् ।
मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ १७ ॥
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे योजनेश्वरतीर्थमाहात्म्यवर्णनं नाम
त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

चतुश्चत्वारिंशदधिकशततमोऽध्यायः

द्वादशीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराजद्वादशीतीर्थमुत्तमम् । क्षरन्तिसर्वदानानिजपहोमबलिक्रियाः
न क्षीयतेतुराजेन्द्रचक्रतीर्थे तु यत्कृतम् । यद्भूतंयद्भविष्यच्च तीर्थमाहात्म्यमुत्तमम्
कथितं तन्मया सर्व्वं पृथग्भावेन भारत !॥ ३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे द्वादशीतीर्थमाहात्म्यवर्णनंनाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः

पञ्चचत्वारिंशदधिकशततमोऽध्यायः

शिवतीर्थमाहात्म्यवर्णनम्

मार्कण्डेय उवाच

ततोगच्छेद्धरापाल!शिवतीर्थमनुत्तमम् । दर्शनाद्यस्यदेवस्यमुच्यते सर्व्वकिल्बिषैः
शिवतीर्थे तु यः स्नात्वा जितक्रोधो जितेन्द्रियः ।
पूजयेत महादेवं सोऽग्निष्टोमफलं लभेत् ॥ २ ॥
तत्र तीर्थे तु यो भक्त्या सोपवासोऽर्च्चयेच्छिवम् ।
अनिवर्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शिवतीर्थमाहात्म्यवर्णनं नाम पञ्चचत्वारिंशदधिकशततमोऽध्यायः

षट्चत्वारिंशदधिकशततमोऽध्यायः

अस्माहकतीर्थचतुष्टयमाहात्म्यवर्णनम्

मार्कण्डेय उवाच

अस्माहकं ततो गच्छेत्पितृतीर्थमनुत्तमम् । प्रेतत्वाद्यत्रमुच्यन्ते पिण्डेनैकेनपूर्वजाः

युधिष्ठिर उवाच

अस्माहकस्यमाहात्म्यं कथयस्व ममानघ । स्नानदानेनयत्पुण्यंतथापिण्डोदकेनच

श्रीमार्कण्डेय उवाच

पुरा कल्पे नृपश्रेष्ठ ऋषिदेवसमागमे । प्रश्नः पृष्टो मयातात तथा त्वमनुपृच्छसि

एकत्रसागराःसप्तसप्रयागाःसपुष्कराः । नास्यसाम्यंलभन्तेतेनात्रकार्याविचारणा

सोमनाथं तु विख्यातं यत्सोमेन प्रतिष्ठितम् । तत्र सोमग्रहेपुण्यंतत्पुण्यंलभते नरः

मासान्ते पितरो नृणां वीक्षन्ते सन्ततिं स्वकाम् ।

कश्चिदस्मात्कुलेऽस्माकं पिण्डमत्र प्रदास्यति ॥ ६ ॥

प्रपितामहास्तथादित्याः श्रुतिरेषा सनातनी ।

एवं ब्रुवन्ति देवाश्च ऋषयः स तपोधनाः ॥ ७ ॥

सकृत्पिण्डोदकेनैव शृणु पार्थिव! यत्फलम् ।

द्वादशाब्दानि राजेन्द्र योगं भुक्त्वा सुशोभनम् ॥ ८ ॥

युगेयुगेमहाराज अस्माहकेपितामहाः । सर्वदा ह्यवलोकन्तआगच्छन्तंस्वगोत्रजम्

भविष्यति किमस्माकममावास्याप्यमाहके ।

स्नानं दानं ये कुर्युः पितृणां तिलतर्पणम् ॥ १० ॥

ते सर्वपापविनिर्मुक्ताः सर्वान्कामांल्लभन्ति वै ।

जलमध्येऽत्र भूपाल! अग्नितीर्थं च तिष्ठति ॥ ११ ॥

दर्शनात्तस्यतीर्थस्य पापराशिर्विलीयते । स्नानमात्रेणराजेन्द्र ब्रह्महत्यां व्यपोहति

शुक्लाम्बरधरोनित्यंनियतःसजितेन्द्रियः । एककालंतुभुञ्जानो मासंतीर्थस्यसन्निधौ

सुवर्णालङ्कृतानां तुकन्यानांशतदानजम् । फलमाप्नोति सम्पूर्णंपितृलोकेमहीयते

पृथिव्यामासमुद्रायांमहाभोगपतिर्भवेत् । धनधान्यसमायुक्तोदाताभवतिधार्मिकः

उपवासी शुचिर्भूत्वा ब्रह्मलोकमवाप्नुयात् ।

अस्माहकं समासाद्य यस्तु प्राणान्परित्यजेत् ॥ १६ ॥

कोटिवर्षसहस्राणि रुद्रलोके महीयते । ततःस्वर्गात्परिभ्रष्टः क्षीणकर्मादिवश्च्युतः

सुवर्णमणिमुक्ताढ्ये कुलेजायेत रूपवान् । कृत्वाऽभिषेकविधिना हयमेधफलंलभेत्

धनाढ्यो रूपवान्दक्षोदाताभवतिधार्मिकः । चतुर्वेदेषुयत्पुण्यंसत्यवादिषुयत्फलम्

तत्फलं लभते नूनं तत्र तीर्थेऽभिषेचनात् ।

तीर्थानां परमं तीर्थं निर्मितं शम्भुना पुरा ॥ २० ॥

हृदयेशः स्वयं विष्णुर्जपेद्देवं महेश्वरम् । गन्धर्वाप्सरसश्चैव मरुतो मारुतास्तथा

विश्वेदेवाश्चपितरःसचन्द्राःसदिवाकराः । मरीचिरत्र्यङ्गिरसौपुलस्त्यःपुलहःक्रतुः

प्रचेताश्च वसिष्ठश्च भृगुर्नारद एव च । च्यवनो गालवश्चैव वामदेवो महामुनिः

बालखिल्याश्च गन्धारास्तृणबिन्दुश्च जाजलिः ।

उद्दालकश्चर्ष्यशृङ्गो वसिष्ठश्च सनन्दनः ॥ २४ ॥

शुक्रश्चैव भरद्वाजो वात्स्यो वात्स्यायनस्तथा ।

अगस्तिर्मित्रावरुणौ विश्वामित्रो मुनीश्वरः ॥ २५ ॥

गौतमश्च पुलस्त्यश्च पौलस्त्यः पुलहः क्रतुः ।

सनातनस्तु कपिलो वह्निः पञ्चशिखस्तथा ॥ २६ ॥

अन्येऽपि बहवस्तत्रमुनयःशंसितव्रताः । क्रीडन्ति देवताःसर्व्वऋषयःसतपोधनाः

मनुष्याश्चैव योगीन्द्राः पितरः सपितामहाः ।

अस्माहकेऽत्र तिष्ठन्ति सर्व एव न संशयः ॥ २८ ॥

पितरः पितामहाश्चैवतथैवप्रपितामहाः । येषांदत्तमुपस्थायिसुकृतंवाऽपिदुष्कृतम्

अक्षयं तत्र तत्सर्वं यत्कृतं योधनीपुरे । मातरं पितरं त्यक्त्वा सर्वबन्धुसुहृज्जनात्

धनं धान्यंप्रियान्पुत्रांस्तथादेहं नृपोत्तम । गच्छतेवायुभूतस्तु शुभाशुभसमन्वितः
अदृश्यः सर्वभूतानां परमात्मा महत्तरः । शुभाऽशुभगतिं प्राप्तः कर्मणास्वेनपार्थिव

युधिष्ठिर उवाच

शुभाशुभं न बन्धूनां जायते केन हेतुना । एकः प्रसूयते जन्तुरेकएव प्रलीयते ॥
एको हि भुङ्क्ते सुकृतमेकएव हि दुष्कृतम् ॥ ३४ ॥

मार्कण्डेय उवाच

एष त्वयोक्तो नृपते! महाप्रश्नः स्मृतो मया ॥ ३५ ॥
पितामहमुखोद्गीतं श्रुतं ते कथयाम्यहम् । यन्मेपितामहात्पूर्वं विज्ञातमृषिसंसदि
न माता न पिता बन्धुः कस्यचिन्न सुहृत्कचित् ।
कस्य न ज्ञायते रूपं वायुभूतस्य देहिनः ॥ ३७ ॥
यद्येवं न भवेत्तात लोकस्य तु नरेश्वर । अमर्यादं भवेन्नूनं विनश्यति चराचरम् ॥
एवं ज्ञात्वा पुरा राजन्समस्तैर्लोककर्तृभिः ।
मर्यादा स्थापिता लोके यथा धर्मो न नश्यति ॥ ३९ ॥
धर्मे नष्टे मनुष्याणामधर्मोऽभिभवेत्पुनः । ततः स्वधर्मचलनान्नरके गमनं ध्रुवम् ॥
लोको निरङ्कुशः सर्वो मर्यादालङ्घने रतः ।
मर्यादा स्थापिता तेन शास्त्रं वीक्ष्य महर्षिभिः ॥ ४१ ॥
स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ।
पिण्डोदकप्रदानं च तथैवाऽतिथिपूजनम् ॥ ४२ ॥
पितरः पितामहाश्चैव तथैव प्रपितामहाः ।
त्रयो देवाः स्मृतास्तात! ब्रह्मविष्णुमहेश्वराः ॥ ४३ ॥
पूजितैः पूजिताः सर्वे तथा मातामहास्त्रयः ।
तस्मात्सर्वप्रयत्नेन श्रुतिस्मृत्यर्थनोदितान् ॥ ४४ ॥
धर्मं समाचरन्नित्यंपापांशेन न लिप्यते । श्रुतिस्मृत्युदितंधर्मं मनसाऽपिनलङ्घयेत्
इह लोके परे चैव यदीच्छेच्छ्रेय आत्मनः ।

पितापुत्रौ सदाप्येकौ बिम्बाद्बिम्बमिवोद्धृतौ ॥ ४६ ॥
विभक्तौ वाऽविभक्तौ वा श्रुतिस्मृत्यर्थतस्तथा ।
उद्धरेदात्मनात्मानमात्मानमवसादयेत् ॥ ४७ ॥
पिण्डोदकप्रदानाभ्यामृतेपार्थ न संशयः । एवं ज्ञात्वाप्रयत्नेनपिण्डोदकप्रदोभवेत्
आयुर्धर्मोयशस्तेजःसन्ततिश्चैववर्द्धते। पृथिव्यांसागरान्तायांपितृक्षेत्राणियानिच
तानि ते सम्प्रवक्ष्यामि येषु दत्तं महाफलम् ।
गयायां पुष्करे ज्येष्ठे प्रयागे नैमिषे तथा ॥ ५० ॥
सन्निहत्यां कुरुक्षेत्रे प्रभासे कुरुनन्दन !। पिण्डोदकप्रदानेन यत्फलं कथितं बुधैः ॥
अस्माहके तदाऽऽप्नोति नर्मदायां न संशयः । तत्र ब्रह्मामुरारिश्च रुद्रश्चउमया सह
इन्द्राद्या देवताः सर्वे पितरोमुनयस्तथा । सागराः सरितश्चैवपर्वताश्चबलाहकाः
तिष्ठन्तिपितरः सर्वे सर्वतीर्थाधिकंततः । स्थिता ब्रह्मशिलातत्रगजकुम्भनिभान्नृप
कलौ न दृश्या भवति प्रधानं यद्गयाशिरः ।
वैशाखे मासि सम्प्राप्तेऽमावास्यां नृपोत्तम !॥ ५५ ॥
व्याप्य सा तिष्ठते तीर्थं गजकुम्भनिभा शिला ।
तच्च गव्यूतिमात्रं हि तीर्थं ततः प्रचक्षते ॥ ५६ ॥
तस्मिन्दिनेतत्रगत्वायस्तुश्राद्धप्रदो भवेत् । पितृणामक्षयातृप्तिर्जायतेशतवार्षिकी
अन्यस्यामप्यमावास्यां यः स्नात्वा विजितेन्द्रियः ।
करोति मनुजः श्राद्धं विधिवन्मन्त्रसंयुतम् ॥ ५८ ॥
तस्य पुण्यफलं यत्स्यात्तच्छृणुष्व नराधिप !।
अग्निष्टोमाश्वमेधाभ्यां वाजपेयस्य यत्फलम् ॥ ५९ ॥
तत्फलं समवाप्नोति यथा मे शङ्करोऽब्रवीत् ।
रौरवादिषु सर्वेषु नरकेषु व्यवस्थिताः ॥ ६० ॥
पिता पितामहाद्याश्च पितृके मातृके तथा । पिण्डोदकेन चैकेन तर्प्पणेन विशेषतः
क्रीडन्ति पितृलोकस्था यावदाभूतसम्प्लवम् ।

ये कर्मस्था विकर्मस्था ये जाताः प्रेतकल्मषाः ॥ ६२ ॥
पिण्डेनैकेन मुच्यन्ते तेऽपि तत्र न संशयः ।
अस्माहके शिला दिव्या तिष्ठते गजसन्निभा ॥ ६३ ॥
ब्रह्मणा निर्मिता पूर्वं सर्वपापक्षयङ्करी । उपर्यस्यायथान्यायं पितॄनुद्दिश्य भारत
दक्षिणाग्रेषु दर्भेषु दद्यात्पिण्डान्विचक्षणः ।
भूमौ चान्नेन सिद्धेन श्राद्धं कृत्वा यथाविधि ॥ ६५ ॥
श्राद्धिभ्यो वस्त्रयुग्मानि छत्रोपानत्कमण्डलु ।
दक्षिणा विविधा देया पितॄनुदिश्य भारत !॥ ६६ ॥
योददातिद्विजश्रेष्ठ!तस्यपुण्यफलंश्रृणु । तस्यतेद्वादशाब्दानितृप्तियान्तिन संशयः
अस्माहके महाराज पितरश्च पितामहाः ।
वायुभूता निरीक्षन्ते आगच्छन्तं स्वगोत्रजम् ॥ ६८ ॥
अत्र तीर्थे सुतोऽभ्येत्य स्नात्वा तोयं प्रदास्यति ।
श्राद्धं वा पिण्डदानं वा तेन यास्यामि सद्गतिम् ॥ ६६ ॥
स्नानेकृतेतुयेकेजिज्ञायन्तेवस्त्रविप्लुषः । प्रीणयेन्नरकस्थांस्तुतैःपितॄन्नाऽत्र संशयः
केशोदबिन्दवस्तस्य ये चाऽन्ये लेपभाजिनः ।
तृप्यन्त्यनग्निसंस्कारा ये मृताः स्युः स्वगोत्रजाः ॥ ७१ ॥
तत्रतीर्थेतुयेकेचिच्छ्राद्धं कृत्वाविधानतः । नरकादुद्धरन्त्याशुःजपन्तःपितृसंहिताम्
वनस्पतिगते सोमे यदा सोमदिनंभवेत् । अक्षयाल्लभते लोकान्पिण्डेनैकेन मानवः
अक्षयं तत्र वै सर्वं जायते नाऽत्र संशयः ।
नरकादुद्धरन्त्याशु जपन्ते पितृसंहिताम् ॥ ७४ ॥
तस्मिंस्तीर्थे त्वमावास्यां पितॄनुद्दिश्य भारत !।
नीलं सर्वाङ्गसम्पूर्णं गोभिऽषिच्य समुत्सृजेत् ॥ ७५ ॥
तस्य पुण्यफलंवक्तुं न तुवाचस्पतिःक्षमः । अस्माहकेवृषोत्सर्गाद्यत्पुण्यंसमवाप्यते
तव शुश्रूषणात्सर्वं तत्प्रवक्ष्यामि भारत !।

रौरवादिषु ये किञ्चित्पच्यन्ते तस्य पूर्वजाः ॥ ७७ ॥
वृषोत्सर्गेण तान्सर्वांस्तारयेदेकविंशतिम् ।
लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ॥ ७८ ॥
पिङ्गः खुरविषाणाभ्यां स नीलो वृष उच्यते ।
यस्तु सर्वाङ्गपिङ्गश्च श्वेतः पुच्छखुरेषु च ॥ ७६ ॥
स पिङ्गो वृष इत्याहुः पितॄणां प्रीतिवर्धनः । पारावतसवर्णश्चललाटेतिलकोभवेत्
तं वृषं बभ्रमित्याहुः पूर्णं सर्वाङ्गशोभनम् । सर्वाङ्गेष्वेकवर्णोयःपिङ्गःपुच्छखुरेषु च
खुरपिङ्गं तमित्याहुः पितॄणां सद्गतिप्रदम् । नीलंसर्वशरीरेण स्वारक्तनयनं दृढम्
तमेवनीलमित्याहुर्नीलःपञ्चविधःस्मृतः । यस्तु वैश्यगृहेजातः सर्वैनीलोविशिष्यते
न वाहयेद्गृहे जातं वत्सकं तु कदाचन । तेनैवच वृषोत्सर्गे पितॄणामनृणो भवेत्
जातं तु स्वगृहे वत्सं द्विजन्मा यस्तु वाहयेत् ।
पतन्ति पितरस्तस्य ब्रह्मलोकगता अपि ॥ ८५ ॥
यथा यथा हि पिबति पीत्वा धूनाति मस्तकम् ।
पिबन्पितॄन्प्रीणयति नरकादुद्धरेद्धुनन् ॥ ८६ ॥
यथा पुच्छाभिघातेन स्कन्धं गच्छन्ति बिन्दवः ।
नरकादुद्धरन्त्याशु पतितान्गोत्रिणस्तथा ॥ ८७ ॥
गर्जन्प्रावृषि काले तु विषाणाभ्यां भुवं लिखन् ।
खुरेभ्यो या मृदुद्धूता तया सम्प्रीणयेदृषीन् ॥ ८८ ॥
पिबन्पितॄन्प्रीणयते खादनोल्लेखने सुरान् ।
गर्जन्नृषिमनुष्यांश्च धर्मरूपो हि धर्मज ! ॥ ८६ ॥
भूतैर्वापि पिशाचैर्वा चातुर्थिकज्वरेण वा ।
गृहीतोऽस्माहकं गच्छेत्सर्वेषामाधिनाशनम् ॥ ६० ॥
स्नात्वा तु विमले तोये दर्भग्रन्थिं निबन्धयेत् ।
मस्तके बाहुमूले वा नाभ्यां वा गलकेऽपि वा ॥ ६१ ॥

गत्वा देवसमीपंच प्रादक्षिण्येनकेशवम्। ततःसमुच्चरन्मन्त्रंगायत्र्या वाथवैष्णवम्
नारायणं शरण्येशं सर्वदेवनमस्कृतम्। नमो यज्ञाङ्गसंभूत सर्वव्यापिन्नमोऽस्तु ते
नमो नमस्ते देवेश पद्मगर्भ सनातन । दामोदर जयानन्त रक्ष मां शरणागतम्॥
त्वं कर्त्ता त्वंचहर्त्ताच जगत्यस्मिंश्चराचरे। त्वंपालयसिभूतानिभुवनंत्वंबिभर्षि च
प्रसीद देवदेवेश सुप्तमङ्गं प्रबोधय । त्वद्ध्याननिरतो नित्यं त्वद्भक्तिपरमो हरे!॥
इति स्तुतो मयादेव प्रसादं कुरुमेऽच्युत। मांरक्षरक्षपापेभ्यस्त्रायस्वशरणागतम्
एवं स्तुत्वा च देवेशंदानवान्तकरंहरिम्। पुनरुक्तेनवैस्नात्वाततोविप्रांस्तुभोजयेत्

वेदोक्तेन विधानेन स्नानं कृत्वा यथाविधि।
पिण्डनिर्वपणं कृत्वा वाचयेत्स्वस्तिकं ततः॥ ९९॥

एवं स्तुत्वा च देवेशंदानवान्तकरंहरिम्। पुनरुक्तेनवैस्नात्वाततोविप्रांस्तुभोजयेत्
वेदोक्तेनविधानेनस्नानंकृत्वायथाविधि।एवंतान्वाचयित्वातुततोविप्रान्विसर्जयेत्

यत्तत्रोच्चरितं किञ्चित्तद्विप्रेभ्यो निवेदयेत्।
तत्र तीर्थे नरः स्नात्वा नारी वा भक्तितत्परा॥
शक्तितो दक्षिणां दद्यात्कृत्वा श्राद्धं यथाविधि॥ १०२॥

तत्रतीर्थेनरो यावत्स्नापयेद्विधिपूर्वकम्। क्षीरेणमधुनावापिदध्नावाशीतवारिणा
तावत्पुष्करपात्रेषु पिबन्तिपितरोजलम्। अयने विषुवे चैव युगादौ सूर्यसङ्क्रमे
पुष्पैःसंपूज्यदेवेशंनैवेद्यंयःप्रदापयेत्। सोऽश्वमेधस्ययज्ञस्य फलं प्राप्नोतिपुष्कलम्
तत्र तीर्थे तु यो राजन्सूर्यग्रहणमाचरेत्। सूर्यतेजोनिभैर्यानैर्विष्णुलोके महीयते॥
तत्र तीर्थेतु यःश्राद्धंपितृभ्यः संप्रयच्छति। सत्पुत्रेणचतेनैवसंप्राप्तं जन्मनःफलम्
इति श्रुत्वा ततोदेवाः सर्वेशक्रपुरोगमाः। ब्रह्मविष्णुमहेशाश्चस्थापयाञ्चक्रुरीश्वरम्
सर्वरोगोपशमनं सर्वपातकनाशनम्। यस्तु संवत्सरंपूर्णममावास्यां तु भावितः
पितृभ्यः पिण्डदानं च कुर्यादस्माहके नृपं। त्रिपुष्करेगयायांचप्रभासेनैमिषे तथा
यत्पुण्यं श्राद्धकर्तृणांतदिहैवभवेद्ध्रुवम्। तिलोदकंकुशैर्मिश्रं योदद्याद्दक्षिणामुखः

मन्वादौ च युगादौ च व्यतीपाते दिनक्षये।

यो दद्यात्पितृमातृभ्यः सोऽश्वमेधफलं लभेत्॥ ११२॥
अस्माहके नरो यस्तु स्नात्वासम्पूजयेद्धरिम्।
ब्रह्माणं शङ्करं भक्त्या कुर्याज्जागरणक्रियाम्॥ ११३॥
सर्वपापविनिर्मुक्तः शक्रातिथ्यमवाप्नुयात्।
तत्र तीर्थे नरः स्नात्वा यः पश्यति जनार्द्दनम्॥ ११४॥

विशेषविधिनाऽभ्यर्च्य प्रणम्य चपुनःपुनः। सपुत्रेणचतेनैव पितॄणांविहितागतिः

एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः।
सत्कार्यकारणोपेताः सुसूक्ष्माः सुमहाफलाः॥ ११६॥
एतत्ते कथितं राजन्महापातकनाशनम्।
अस्माहकस्य माहात्म्यं किमन्यत्परिपृच्छसि॥ ११७॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेऽस्माहकतीर्थमाहात्म्यवर्णनं नामषट्चत्वारिंशदधिकशततमोऽध्यायः॥

सप्तचत्वारिंशदधिकशततमोऽध्यायः

सिद्धेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल सिद्धेश्वरमनुत्तमम्। नर्मदादक्षिणे कूले तीर्थं परमशोभनम्

तत्र तीर्थे तु यः स्नात्वा पूजयेद् वृषभध्वजम्।
सर्वपापविनिर्मुक्तो गतिं यात्यश्वमेधिनाम्॥ २॥

तत्रतीर्थे तु यः स्नात्वाश्राद्धंकुर्यात्प्रयत्नतः। पितॄणांप्रीणनार्थायसर्वं तेन कृतंभवेत्
तत्र तीर्थे मृतानां तुजन्तूनां नृपसत्तम। गर्भवासे मतिस्तेषां न जायेत कदाचन

गर्भवासो हि दुःखाय नसुखायकदाचन । तत्तीर्थवारिणा स्नातुर्न पुनर्भवसंभवः
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां सहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे सिद्धेश्वरतीर्थमाहात्म्यवर्णनं नाम सप्तचत्वारिंशदधिकशततमोऽध्यायः

अष्टचत्वारिंशदधिकशततमोऽध्यायः

मङ्गलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल तीर्थमंगारकंशिवम् । उत्तरे नर्मदाकूले सर्वपापक्षयंकरम्
चतुर्थ्यंगारकदिने संकल्प्यकृतनिश्चयः । स्नायादस्तं गते सूर्ये संध्योपासनतत्परः

पूजयेल्लोहितं भक्त्या गन्धमाल्यविभूषणैः ।
संस्थाप्यस्थंडिले देवं रक्तचन्दनचर्चितम् ॥ ३ ॥

अङ्गारकायेति नमः कर्णिकायांप्रपूजयेत् । कुजायभूमिपुत्राय रक्तांगाय सुवाससे
हरकोपोद्भवायेति स्वेदजायाऽतिबाहवे । सर्वकामप्रदायेति पूर्वादिषु दलेषु च
एवं संपूज्य विधिवद्दद्यादर्घ्यंविधानतः । भूमिपुत्र महावीर्य स्वेदोद्भव पिनाकिनः

अङ्गारक महातेजा लोहिताङ्ग नमोऽस्तु ते ।
करकं वारिसंयुक्तं शालितन्दुलपूरितम् ॥ ७ ॥
सहिरण्यं सवस्त्रं च मोदकोपरि संस्थितम् ।
ब्राह्मणाय निवेद्यं तत्कुजो मे प्रीयतामिति ॥ ८ ॥

अर्घंदत्त्वाविधानेनरक्तचन्दनवारिणा । रक्तपुष्पपसमाकीर्णं तिलतन्दुलमिश्रितम्
कृत्वा ताम्रमये पात्रेमण्डलेवर्तुलेशुभे । कृत्वा शिरसितत्पात्रं जानुभ्याधरणींगतः
मन्त्रपूतं महाभाग दद्यादर्घ्यंविचक्षणः । ततोभुञ्जीत मौनेन क्षारतिलाम्लवर्जितम्
स्निग्धं मृदुसमधुरमात्मनः श्रेय इच्छता । एवं चतुर्थ्यं संप्राप्ते चतुर्थ्यंगारके नृप

सौवर्णं कारयेद्देवं यथाशक्ति सुरूपिणम् । स्थापयेत्ताम्रके पात्रे गुडपीठसमन्विते

गन्धपुष्पादिभिर्देवं पूजयेद् गुडसंस्थितम् ।
ईशान्यां स्थापयेद्देवं गुडतोयसमन्वितम् ॥ १४ ॥

कासारेणतथाग्नेय्यां स्थापयेत्करकं परम् । रक्ततंदुलसंमिश्रंनैर्ऋत्यांवायुगोचरे
स्थापयेन्मोदकैः सार्धं चतुर्थंकरकंबुधः । सूत्रेण वेष्टितग्रीवं गन्धमाल्यैरलङ्कृतम्
शङ्खतूर्यनिनादेन जयशब्दादिमङ्गलैः । रक्ताम्बरधरं विप्रं रक्तमाल्यानुलेपनम् ॥
वेदिमध्यगतं वाऽपि महदासनसंस्थितम् । सुरूपं सुभगं शान्तं सर्वभूतहिते रतम्
वेदविद्याव्रतस्नातं सर्वशास्त्रविशारदम् । पूजयित्वायथान्यायंवाचयेत्पाण्डुनन्दन
रक्तां गां च ततो दद्याद्रक्तेनानडुहा सह । प्रीयतां भूमिजोदेवः सर्वदैवतपूजितः ॥

विप्रं प्रदक्षिणीकृत्य पत्नीपुत्रसमन्वितः ।
पितृमातृसुहृद्वृत्तसार्द्धं क्षमाप्य च विसर्जयेत् ॥ २१ ॥

एवंकृतस्यतस्याऽथ तस्मिंस्तीर्थे विशेषतः । यत्पुण्यफलमुद्दिष्टंतत्तेसर्वंवदाम्यहम्

सप्त जन्मानि राजेन्द्र! सुरूपः सुभगो भवेत् ।
तीर्थस्याऽस्य प्रभावेन नाऽत्र कार्या विचारणा ॥ २३ ॥

अकामो वा सकामोवातत्र तीर्थे मृतो नरः । अङ्गारकपुरं याति देवगन्धर्वपूजितः

उपभुज्य यथान्यायं दिव्यान्भोगाननुत्तमान् ।
इह मानुष्यलोके वै राजा भवति धार्मिकः ॥ २५ ॥

सुरूपः सुभगश्चैव सर्वव्याधिविवर्जितः । जीवेद्वर्षशतं साग्रं सर्वलोकनमस्कृतः ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे मङ्गलेश्वरतीर्थमाहात्म्यवर्णनंनामाऽष्टाचत्वारिंशदधिकशततमोऽध्यायः

एकोनपञ्चाशदधिकशततमोऽध्यायः

लिङ्गवाराहतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवाऽनन्तरं तीर्थं लिङ्गेश्वरमितिश्रुतम् । दर्शनाद्देवदेवस्ययत्र पापं प्रणश्यति कृत्वा तुकदनं घोरंदानवानांयुधिष्ठिर । वाराहं रूपमास्थाय नर्मदायव्यवस्थितः तत्रतीर्थे तुयःस्नानं कृत्वादेवंनमस्यति । स मुच्यते नृपश्रेष्ठ महापापैः पुराकृतैः ॥ द्वादश्यां कृष्णपक्षस्य शुक्लेचसमुपोषितः । गन्धमाल्यैर्जगन्नाथं पूजयेत्पाण्डुनंदन ब्राह्मणांश्च महाभाग दानसंमानभोजनैः । पूजयेत्परया भक्त्यातस्यपुण्यफलंशृणु सत्रयाजिफलं जंतुर्लभते द्वादशाब्दकैः । ब्राह्मणान्भोजयंस्तत्रतदेव लभते फलम्

तर्प्पयित्वा पितृन्देवान्स्नात्वा तद्गतमानसः ।
जपेद्द्वादशानामानि देवस्य पुरतः स्थितः ॥ ७ ॥

मासिमासि निराहारोद्वादश्यां कुरुनन्दन । केशवं पूजयेन्नित्यंमासिमार्गशिरेबुधः पौषेनारायणंदेवंमाघमासेतुमाधवम् । गोविन्दंफाल्गुनेमासिविष्णुं चैत्रेसमर्चयेत् वैशाखेमधुहन्तारंज्येष्ठेदेवं त्रिविक्रमम् । वामनंतु तथाऽऽषाढे श्रावणेश्रीधरंस्मरेत् हृषीकेशं भाद्रपदेपद्मनाभं तथाऽऽश्विने । दामोदरं कार्त्तिके तु कीर्त्तयन्नावसीदति वाचिकंमानसंपापंकर्मजंयत्पुराकृतम् । तन्नश्यति न संदेहो मासनामानुकीर्त्तनात् स्वयं विशुद्धःसततमुन्मिषन्निमिषंस्तथा । शीघ्रंप्रपश्य भुञ्जानोमन्त्रहीनंसमुद्गिरेत्

परमापद्गतस्याऽपि जन्तोरेषा प्रतिक्रिया ।
यन्मासाधिपतेर्विष्णोर्मासनामानुकीर्त्तनम् ॥ १४ ॥
ता निशास्ते च दिवसास्ते मासास्ते च वत्सराः ।
नराणां सफला येषु चिन्तितो भगवान्हरिः ॥ १५ ॥
परमापद्गतस्याऽपि यस्य देवो जनार्द्दनः ।

नाऽवसर्पति हृत्पद्मात्स योगी नाऽत्र संशयः ॥ १६ ॥
ते भाग्यहीना मनुजाः सुशोच्यास्ते भूमिभाराय कृतावताराः ।
अचेतनास्ते पशुभिः समाना ये भक्तिहीना भगवत्यनन्ते ॥ १७ ॥
ते पूर्णकार्याः पुरुषाः पृथिव्यां ते स्वाङ्गपाताद्भुवनं पुनन्ति ।
विचक्षणा विश्वविभूषणास्ते ये भक्तियुक्ता भगवत्यनन्ते ॥ १८ ॥

सएव सुकृती तेन लब्धं जन्मतरोःफलम् । चित्तेवचसिकाये च यस्यदेवोजनार्द्दनः एतत्तीर्थवरं पुण्यंलिंगोयत्र जनार्द्दनः । वञ्चयित्वारिपून्संख्ये क्रोडोभूत्वासनातनः

उपप्लवे चन्द्रमसो रवेश्च योह्यष्टकानामयनद्वये च ।
पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ २१ ॥
घोणोन्मीलितमेरुरन्ध्रनिवहो दुःखाब्धिमज्जत्प्लवः ।
प्रादुर्भूतरसातलोदरबृहत्पङ्कार्द्धमग्नक्षुरः ॥
फूत्कारोत्करनुन्नवातविदलद्दिग्दन्तिनादश्रुति-
न्यस्तस्तब्धवपुः श्रुतिर्भवतु वः क्रोडो हरिः शान्तये ॥ २२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्त्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे-रेवाखण्डे लिङ्गवाराहतीर्थमाहात्म्यवर्णनंनामैकोनपञ्चाशदधिकशततमोऽध्यायः

पञ्चाशदधिकशततमोऽध्यायः

श्वेतवाराहतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराजकुसुमेश्वरमुत्तमम् । दक्षिणे नर्मदाकूले उपपातकनाशनम् ॥ कामेन स्थापितोदेवः कुसुमेश्वरसञ्ज्ञितः । ख्यातःसर्वेषु लोकेषु देवदेवः सनातनः

कामो मनोभवो विश्वः कुसुमायुधचापभृत् ।

स कामान्ददाति सर्वान्पूजितो मीनकेतनः ॥ ३ ॥

तेन निर्दग्धकायेन ह्याराध्य परमेश्वरम् । अनङ्गेन तथा प्राप्तमङ्गित्वं नर्मदातटे ॥

युधिष्ठिर उवाच

अङ्गिभूतस्य नाशत्वमनङ्गस्य तु मे वद । न श्रुतं न च मे दृष्टं भूतपूर्वं कदाचन ॥

एतत्सर्वं यथा वृत्तमाचक्ष्वद्विजसत्तम !। श्रोतुमिच्छामिविपेन्द्रभीमार्जुनयमैःसह

श्रीमार्कण्डेय उवाच

आदौ कृतयुगे तात देवदेवोमहेश्वरः । तपश्चचार विपुलं गङ्गासागरसंस्थितः ॥

तेनसम्पादितालोकास्तपसाससुरासुराः । जग्मुस्तेशरणं सर्वे देवदेवं शचीपतिम्

व्यापकः सर्वभूतानां देवदेवोमहेश्वरः । संतापयति लोकांस्त्रींस्तन्निवारय गोपते

श्रुत्वातद्वचनं तेषांदेवानां बलवृत्रहा । चिन्तयामास मनसातपोविघ्नायचादिशत्

अप्सरां मेनकां रम्भां घृताचीं च तिलोत्तमाम् ।

वसन्तं कोकिलं कामं दक्षिणानिलमुत्तमम् ॥ ११ ॥

गत्वा तत्र महादेवं तपश्चरणतत्परम् । क्षोभयध्वंयथान्यायं गङ्गासागरवासिनम्

एवमुक्तास्तुते सर्वे देवराजेनभारत । देवाप्सरःसमोपेता जग्मुस्ते हरसन्निधौ

वसन्तमासे कुसुमाकराकुले मयूरदात्यूहसुकोकिलाकुले ।

प्रनृत्यदेवाप्सरगीतसङ्कुले प्रवाति वाते यमनैर्ऋताकुले ॥ १४ ॥

तेन सम्मूर्च्छिताःसर्वे संरुर्गाच्च खगोत्तमाः । मधुमाधवगन्धेन सकिन्नरमहोरगाः

यावदालोकते तावत्तद्वनं व्याकुलीकृतम् । वीक्षते मदनाविष्टं दशावस्थागतंजनम्

देवदेवोऽपि देवानामवस्थात्रितयंगतः ।

सात्त्विकीं राजसीं राजंस्तामसीं तां शृणुष्व मे ॥ १७ ॥

एकं योगसमाधिना मुकुलितं चक्षुर्द्वितीयं पुनः,

पार्वत्या जघनस्थलस्तनतटे शृङ्गारभारालसम् ।

अन्यद्दूरनिरस्तचापमदनक्रोधानलोद्दीपितं

शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥ १८ ॥

एवं दृष्टः स देवेन सशरः सशरासनः । भस्मीभूतोगतःकामोविनाशः सर्वदेहिनाम्

कामं दृष्ट्वा क्षयं यातं तत्र देवाप्सरोगणाः ।

भीता यथाऽऽगतं सर्वे जग्मुश्चैव दिशो दश ॥ २० ॥

कामेन रहिता लोकाः ससुरासुरमानवाः । ब्रह्माणंशरणंजग्मुर्देवा इन्द्रपुरोगमाः

सीदमानंजगद्दृष्ट्वा तमूचुः परमेष्ठिनम् । जानामित्वंजगच्छेदंप्रभो मैथुनसम्भवात्

प्रजाः सर्वा विशुष्यन्ति कामेन रहिता विभो !॥ २२ ॥

एतच्छ्रुत्वा वचस्तेषां देवानां प्रपितामहः । जगाम सहितस्तत्र यत्रदेवो महेश्वरः

अतोषयज्जगन्नाथं सर्वभूतमहेश्वरम् । स्तुतिभिस्तण्डकैः स्तोत्रैर्वेदवेदाङ्गसम्भवैः

ततस्तुष्टो महादेवो देवानां परमेश्वरः । उवाच मधुरां वाणीं देवान्ब्रह्मपुरोगमान्

किं कार्यं कश्च सन्तापः किं वाऽऽगमनकारणम् ।

देवतानामृषीणां च कथ्यतां मम मा चिरम् ॥ २७ ॥

देवा ऊचुः

कामनाशाज्जगन्नाशो भविताऽयं चराचरे ।

त्रैलोक्यं त्वं पुनः शम्भो उत्पातयितुमर्हसि ॥ २८ ॥

एतच्छ्रुत्वावचस्तेषांविमृश्यपरमेश्वरः । चिन्तयामासकामस्यविग्रहम्भुविदुर्लभम्

आजगाम ततः शीघ्रमनङ्गो ह्यङ्गतां गतः । प्राणदःसर्वभूतानां पश्यतां नृपसत्तम

ततः शङ्खनिनादेन भेरीणां निःस्वनेन च । अभ्यनन्दंस्ततो देवं सुरासुरमहोरगाः

नमस्ते देवदेवेश कृतार्थाः सुरसत्तमाः । विसर्जिताः पुनर्जग्मुर्यथागतमरिन्दम ॥

गतेषु सर्वदेवेषु कामदेवोऽपि भारत । तपश्चचार विपुलं नर्मदातटमाश्रितः ॥३३॥

तपोजपकृशीभूतो दिव्यं वर्षशतंकिल । महाभूतैर्विघ्नकरैः पीड्यमानः समन्ततः ॥

आत्मविघ्नविनाशार्थं संस्मृतः कुण्डलेश्वरः । चकार रक्षांसर्वत्र शरपाते नृपोत्तम

ततस्तुष्टो महादेवो दृढभक्त्या वरप्रदः ।

वरेण च्छन्दयामास कामं कामविनाशनः ॥ ३६ ॥

ज्ञात्वा तुष्टं महादेवमुवाच झषकेतनः । प्रणतः प्राञ्जलिर्भूत्वा देवदेवं त्रिलोचनम्

यदि तुष्टोऽसि देवेश !यदि देयो वरो मम ।
अत्र तीर्थे जगन्नाथ! सदा सन्निहितो भव ॥ ३८ ॥
तथेति चोक्त्वा वचनं देवदेवो महेश्वरः ।
जगामाऽऽकाशमाविश्य स्तूयमानोऽप्सरोगणैः ॥ ३९ ॥

गते चाऽदर्शनंदेवे कामदेवोजगद्गुरुम् । स्थापयामास राजेन्द्रकुसुमेश्वरसञ्ज्ञितम्
तत्रतीर्थे तुयः स्नात्वा ह्यु पवासपरायणः । चैत्रमासेचतुर्दश्यांमदनस्यदिनेऽथवाः
प्रभाते विमले प्राप्ते स्नात्वा पूज्य दिवाकरम् । तिलमिश्रेणतोयेनतर्पयेत्पितृदेवता
कृत्वास्नानंविधानेनपूजयित्वाच तं नृप । पिण्डनिर्वपणं कुर्यात्तस्यपुण्यफलंशृणु

सत्त्रयाजिफलं यच्च लभते द्वादशाब्दिकम् ।
पिण्डदानात्फलं तच्च लभते नाऽत्र संशयः ॥ ४४ ॥

अङ्कुलमूलेयःपिण्डंपितृनुद्दिश्यदापयेत् । तस्यतेद्वादशाब्दानितृप्तियान्तिपितामहाः
कृमिकीटपतङ्गा येतत्र तीर्थे युधिष्ठिर । प्राप्नुवन्तिमृताःस्वर्गं किंपुनर्येनराम्मृताः

संन्यासं कुरुते योऽत्र जितक्रोधो जितेन्द्रियः ।
कुसुमेशे नरो भक्त्या स गच्छेच्छिवमन्दिरम् ॥ ४७ ॥

तत्रदिव्याप्सरोभिश्च देवगन्धर्वगायनैः । क्रीडन्ते सेव्यमानस्तु कल्पकोटिशतंनृप

पूर्णे चैव ततः काल इह मानुष्यतां गतः ।
जायते राजराजेन्द्रैः पूज्यमानो नृपो महान् ॥ ४९ ॥
कुरूपः सुभगो वाग्मी विक्रान्तो मतिमाञ्छुचिः ।
जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ५० ॥

एतत्पुण्यं पापहरं तीर्थकोटिशताधिकम् । कुसुमेशेतिविख्यातं सर्वदेवनमस्कृतम्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कुसुमेश्वरतीर्थमाहात्म्यवर्णनं नाम
पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

———

एकपञ्चाशदधिकशततमोऽध्यायः

श्वेतवाराहतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

उत्तरे नर्मदाकूले तीर्थं परमशोभनम् । जयवाराहमाहात्म्यं सर्वपापप्रणाशनम् ॥
उद्धृता जगती येन सर्वदेवनमस्कृता । लोकानुग्रहबुद्ध्या च संस्थितो नर्मदातटे

तत्र तीर्थे तु यः स्नात्वा वीक्षते मधुसूदनम् ।
मुच्यते सर्वपापेभ्यो दशजन्माऽनुकीर्त्तनात् ॥ ३ ॥

मत्स्यःकूर्मो वराहश्च नरसिंहोऽथवामनः । रामोरामश्चकृष्णश्च बुद्धःकल्किश्चतेदश

युधिष्ठिर उवाच

मत्स्येन किं कृतं तात कूर्मेणमुनिसत्तम !। वराहेण च किं कर्म नरसिंहेनकिंकृतम्
वामनेन च रामेण राघवेण च किं कृतम् । बुद्धरूपेणकिंवाऽपिकल्किनाकिंकृतंवद
एवमुक्तस्तु विप्रेन्द्रो धर्मपुत्रेण धीमता । उवाच मधुरांवाणीं तदा धर्मसुतम्प्रति

श्रीमार्कण्डेय उवाच

मीनो भूत्वा पुरा कल्पे प्रीत्यर्थं ब्रह्मणो विभुः ।
समर्पयत्समुद्धृत्य वेदान्मग्नान्महार्णवे ॥ ८ ॥

अमृतोत्पादने राजन्कूर्मोभूत्वाजगद्गुरुः । मन्दरंधारयामास तथादेवींवसुन्धराम्

उज्जहार धरां मग्नां पातालतलवासिनीम् ।
वाराहं रूपमास्थाय देवदेवो जनार्द्दनः ॥ १० ॥

नरस्यार्द्धतनुं कृत्वा सिंहस्यार्द्धतनुं तथा । हिरण्यकशिपोर्वक्षोविददारनखांकुशैः
जटीवामनरूपेण स्तूयमानोद्विजोत्तमैः । तद्दिव्यंरूपमास्थायक्रमित्वामेदिनींक्रमैः

कृतवांश्च बलिं पश्चात्पातालतलवासिनम् ।
स्थापयित्वा सुरान्सर्वान्गतो विष्णुः स्वकं पुरम् ॥ २३ ॥

जमदग्निसुतो रामो भूत्वा शस्त्रभृतां वरः।
क्षत्रियान्पृथिवीपालानवधीद्धैहयादिकान्॥ १४ ॥
कश्यपाय महीं दत्त्वा सपर्वतवनाकराम्।
तपस्तपति देवेशो महेन्द्रेऽद्यापि भारत !॥ १५ ॥
ततोदाशरथी रामो रावणं देवकण्टकम्। सगणं समरेहत्वाराज्यं दत्त्वाविभीषणे
पालयित्वा नयाद्भूमिं मखैः सन्तपर्य्य देवताः।
स्वर्गं गतो महातेजा रामो राजीवलोचनः॥ १७ ॥
वसुदेवगृहे भूयः संकर्षणसहायवान्। अवतीर्णो जगन्नाथो वासुदेवो युधिष्ठिर !॥
सोऽवधीत्तवसामर्थ्याद्वधार्थंदुष्टभूभृताम्। चाणूरकंसकेशीनांजरासन्धस्य भारत
तेनत्वं सुसहायेन हत्वाशत्रून्नरेश्वर। भोक्ष्यसेपृथिवींसर्वां भ्रातृभिःसहसम्भृताम्
तथा बुद्धत्वमपरं नवमं प्राप्स्यतेऽच्युतः। शान्तिमान्देवदेवेशो मधुहन्तामधुप्रियः
तेन बुद्धस्वरूपेण देवेन परमेष्ठिना। भविष्यति जगत्सर्वं मोहितं सचराचरम्॥
न श्रोष्यन्ति पितुः पुत्रास्तदाप्रभृति भारत !।
न गुरोर्बान्धवाः शिष्या भविष्यन्त्यधरोत्तरम्॥ २३ ॥
जितो धर्मो ह्यधर्मेण चासत्येन ऋतं जितम्।
जिताश्चौरैश्च राजानः स्त्रीभिश्च पुरुषा जिताः॥ २४ ॥
सीदन्ति चाग्निहोत्राणि गुरौ पूजा प्रणश्यति।
सीदन्ति मानवा धर्माः कलौ प्राप्ते युधिष्ठिर !॥ २५ ॥
द्वादशे दशमे वर्षे नारी गर्भवती भवेत्। कन्यास्तत्रप्रसूयन्ते ब्राह्मणो हरिपिङ्गलः
भविष्यति ततः कल्किर्दशमे जन्मनि प्रभुः॥ २७ ॥
एतत्ते कथितं राजन्देवस्य परमेष्ठिनः। कारणं दश जन्मानां सर्वपापक्षयङ्करम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे श्वेतवाराहतीर्थमाहात्म्यवर्णनंनामैकपञ्चाशदधिकशततमोऽध्यायः

द्विपञ्चाशदधिकशततमोऽध्यायः

भार्गलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेद्धरापाल भार्गलेश्वरमुत्तमम्। शङ्करं जगतः प्राणं स्मृतमात्राघनाशनम्
तत्र तीर्थेतुयः स्नात्वा पूजयेत्परमेश्वरम्। अश्वमेधस्ययज्ञस्य फलंप्राप्नोतिमानवः
तत्र तीर्थे तु यः कश्चित्प्राणत्यागं करिष्यति।
अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम्॥ ३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे भार्गलेश्वरतीर्थमाहात्म्यवर्णनंनाम द्विपञ्चाशदधिकशततमोऽध्यायः

त्रिपञ्चाशदधिकशततमोऽध्यायः

आदित्येश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं चान्यद्रवितीर्थमनुत्तमम्। तस्य सन्दर्शनादेवमुच्यन्ते पातकैर्नराः
रवितीर्थे तु यः स्नात्वा नरः पश्यति भास्करम्।
तस्य यत्फलमुद्दिष्टं स्वयं देवेन तच्छृणु॥ २ ॥
नान्धो न मूको बधिरःकुलेभवतिकश्चन। कुरूपःकुनखीवापितस्य जन्मानिषोडश
दद्रुश्चित्रककुष्ठानि मण्डलानि विचर्चिका।
नश्यन्ति देवभक्तस्य षण्मासान्नात्र संशयः॥ ४ ॥
चरितं तस्य देवस्य पुराणेयच्छ्रुतंमया। नतत्कथयितुं शक्यं सङ्क्षेपेण नृपोत्तम॥

तत्र तीर्थे तु यद्दानं रविमुद्दिश्य दीयते ।
विधिना पात्रविप्राय तस्यान्तो नाऽस्ति कर्हिचित् ॥ ६ ॥
अयने विषुवे चैवचन्द्रसूर्यग्रहे तथा । रवितीर्थेप्रदत्तानां दानानां फलमुत्तमम् ॥
सङ्क्रान्तौयानिदानानिहव्यकव्यानिभारत ।अपामिवसमुद्रस्यतेषामन्तोनलभ्यते
येनयेन यदा दत्तंयेनयेन यदा हुतम् । तस्य तस्य तदा काले सविता प्रतिदायकः
सप्त जन्मानि तान्येव ददात्यर्कः पुनः पुनः । शतमिन्दुक्षये दानं सहस्रंतु दिनक्षये
सङ्क्रान्तौ शतसाहस्रं व्यतीपाते त्वनन्तकम् ॥ ११ ॥

युधिष्ठिर उवाच

रवितीर्थंकथंतातपुण्यात्पुण्यतरंस्मृतम् । विस्तरेणममाख्याहिश्रवणौममलम्पटौ

श्रीमार्कण्डेय उवाच

शृणुष्वाऽवहितो भूत्वा ह्यादित्येश्वरमुत्तमम् ।
उत्तरे नर्मदाकूले सर्वव्याधिविनाशनम् ॥ १३ ॥
पुरा कृतयुगस्याऽऽदौ जाबालिर्ब्राह्मणोऽभवत् ।
वसिष्ठाऽन्वयसम्भूतो वेदशास्त्रार्थपारगः ॥ १४॥
पतिव्रता साधुशीला तस्य भार्या मनस्विनी ।
ऋतुकाले तु सा गत्वा भर्त्तारमिदमब्रवीत् ॥ १५ ॥
वर्त्तते ऋतुकालो मे भर्त्तारं त्वामुपस्थिता ।
भज मां प्रीतिसंयुक्तः पुत्रकामां तु कामिनीम् ॥ १६ ॥
एवमुक्तो द्विजः प्राह प्रियेऽद्याऽहं व्रतान्वितः ।
गच्छेदानीं वरारोहे! दास्य ऋत्वन्तरे पुनः ॥ १७ ॥
पुनर्द्वितीये सम्प्राप्ते ऋतुकालेऽप्युपस्थिता ।
पुनः सा च्छन्दिता तेन व्रतस्थोऽद्येति भारत !॥ १८ ॥
इत्थं वाबहुशस्तेनच्छन्दितासापुनःपुनः । निराशाचाऽभवत्तत्रभर्त्तारं प्रतिभामिनी
दुःखेन महताविष्टा विधायानशनं मृता । तेन भ्रूणहतेनैव पापेन सहसा द्विजः ॥

शीर्णघ्राणाङ्घ्रिरभवत्तपः सर्वं ननाश च । दृष्ट्वात्मानंसकुष्ठेन व्याप्तं ब्राह्मणसत्तमः
विषादं परमं गत्वानर्मदातटमाश्रितः । अपृच्छद्भास्करंतीर्थं द्विजेभ्यो द्विजसत्तमः
आरोग्यं भास्करादिच्छेदिति सञ्चिन्त्य चेतसि ।
कुतस्तद्भास्करं तीर्थं भो द्विजाः कथ्यतां मम ॥ २३ ॥
तपस्तप्स्याम्यहं गत्वा तस्मिंस्तीर्थे सुभावितः ॥ २४ ॥

द्विजा ऊचुः

रेवावाउत्तरे कूलेआदित्येश्वरनामतः । विद्यतेभास्करंतीर्थं सर्वव्याधिविनाशनम्
तत्रयाह्यविचारेण गन्तुंचेच्छक्यतेत्वया । एवमुक्तोद्विजैर्विप्रो गन्तुं तत्र प्रचक्रमे ॥
व्याधिना परिभूतस्तु घोरेण प्राणहारिणा ।
यदा गन्तुं न शक्नोति तदा तेन विचिन्तितम् ॥ २७ ॥
सामर्थ्यं ब्राह्मणानां हि विद्यतेभुवनत्रये । लिङ्गपातः कृतो विप्रैर्देवदेवस्यशूलिनः
समुद्रः शोषितो विप्रैर्विन्ध्यश्चापि निवारितः ।
अहमप्यत्र संस्थस्तु ह्यानयिष्यामि भास्करम् ॥ २६ ॥
तपोबलेन महताह्यादित्येश्वरसञ्ज्ञितम् । इतिनिश्चित्यमनसाह्य ग्रे तपसिसंस्थितः
वायुभक्षो निराहारो ग्रीष्मे पञ्चाग्निमध्यगः ।
शिशिरे तोयमध्यस्थो वर्षास्वप्रावृताकृतिः ॥ ३१ ॥
साग्रे वर्षशते पूर्णे रविस्तुष्टोऽब्रवीदिदम् ॥ ३२ ॥

सूर्य उवाच

वरं वरय भद्रं ते किं ते मनसि वाञ्छितम् ।
अदेयमपि दास्यामि ब्रूहि मां त्वं चिरं कृथाः ॥ ३३ ॥
किमसाध्यं हि ते विप्र! इदानीं तपसि स्थितः ॥ ३४ ॥

जाबालिरुवाच

यदि तुष्टोऽसि देवेश यदि देयो वरो मम । मम प्रतिज्ञा देवेश ह्यादित्येश्वरदर्शने ॥
कृता तां पारितुं देव! न शक्तो व्याधिनावृतः ।

शुक्लतीर्थेऽत्रतिष्ठ त्वमादित्येश्वरमूर्त्तिधृक् ॥ ३६ ॥
एवमुक्ते तु देवेशो बहुरूपो दिवाकरः । उत्तरे नर्मदाकूले क्षणादेव व्यदृश्यत ॥३७॥
तदाप्रभृति भूपाल! तद्धि तीर्थं प्रचक्षते । सर्वपापहरं प्रोक्तं सर्वदुःखविनाशनम् ॥
यस्तु सम्वत्सरं पूर्णं नित्यमादित्यवासरे ।
स्नात्वा प्रदक्षिणाः सप्त दत्त्वा पश्यति भास्करम् ॥ ३९ ॥
यत्फलं लभते तेन तच्छृणुष्व मयोदितम् । प्रसुप्तं मण्डलानीह दद्रुकुष्ठविचर्चिकाः
नश्यन्ति सत्वरं राजंस्तूलराशिरिवाऽनले । धनपुत्रकलत्राणां पूरयेद्वत्सरत्रयात्
यस्तुश्राद्धप्रदस्तत्रपितृनुद्दिश्यसङ्क्रमे । तृप्यन्तिपितरस्तस्यपितृदेवोहिभास्करः
इति ते कथितं सर्वमादित्येश्वरमुत्तमम् । सर्वपापहरं दिव्यं सर्वरोगविनाशनम् ॥
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्त्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे आदित्येश्वरतीर्थमाहात्म्यवर्णनंनाम त्रिपञ्चाशदधिकशततमोऽध्यायः

चतुःपञ्चाशदधिकशततमोऽध्यायः

कलकलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणेकूले तीर्थं कलकलेश्वरम् । विख्यातं सर्वलोकेषु स्वयंदेवेन निर्मितम्
अन्धकं समरे हत्वा देवदेवो महेश्वरः । सहितो देवगन्धर्वैः किन्नरैश्च महोरगैः ॥
शङ्खतूर्यनिनादैश्चमृदङ्गपणवादिभिः। वीणावेणुरवैश्चान्यैःस्तुतिभिःपुष्कलादिभिः
गायन्ति सामानि यजूंषि चान्यैश्छन्दांसि चान्ये ऋचमुद्गिरन्ति ।
स्तोत्रैरनेकैरपरे गृणन्ति महेश्वरं तत्र महानुभावाः ॥ ४ ॥
प्रमथानां निनादेन कलकलेन च वन्दिनाम् ।
यस्मात्प्रतिष्ठितं लिङ्गं तस्माज्जातं तदाख्यया ॥ ५ ॥

तत्र तीर्थे तु यः स्नात्वा वीक्षेत्कलकलेश्वरम् ।
वाजपेयात्परं पुण्यं स लभेन्मानवो भुवि ॥ ६ ॥
तेनपुण्येनपूतात्मा प्राणत्यागाद्दिवंव्रजेत् । आरूढःपरमंयानं गीयमानोऽप्सरोगणैः
उपभुज्यमहाभोगान्कालेनमहताततः । मर्त्त्यकेलोकेमहात्माऽसौजायतेविमलेकुले
ब्राह्मणःसुभगो लोके वेदवेदाङ्गपारगः । व्याधिशोकविनिर्मुक्तोजीवेच्चशरदांशतम्
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कलकलेश्वरतीर्थफलमाहात्म्यवर्णनं नाम
चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

पञ्चपञ्चाशदधिकशततमोऽध्यायः

चाणक्यसिद्धिप्राप्तिवर्णनम्

श्रीमार्कण्डेय उवाच

अतः परं प्रवक्ष्यामि सर्वतीर्थादनुत्तमम् । उत्तरे नर्मदाकूले शुक्लतीर्थं युधिष्ठिर ॥
तस्य तीर्थस्य चाऽन्यानि पुण्यत्वाच्छुभदर्शनात् ।
पृथिव्यां सर्वतीर्थानि कलां नार्हन्ति षोडशीम् ॥ २ ॥

युधिष्ठिर उवाच

तस्य तीर्थस्य माहात्म्यं श्रोतुमिच्छामि तत्त्वतः ।
भ्रातृभिः सहितः सर्व्वैस्तथान्यैर्द्विजसत्तमैः ॥ ३ ॥

श्रीमार्कण्डेय उवाच

शुक्लतीर्थस्य चोत्पत्तिमाकर्णय नरेश्वर !। यस्य सन्दर्शनादेव ब्रह्महत्या प्रलीयते ॥
नर्मदासरितां श्रेष्ठा सर्वपापप्रणाशिनी । यच्च बाल्ये कृतं पापं दर्शनादेव नश्यति
मोक्षदानिन सर्वत्र शुक्लतीर्थमृते नृप । शुक्लतीर्थस्य माहात्म्यं पुराणेयच्च तं मया

समागमे मुनीनां तु देवानां हि तथैव च । कथितं देवदेवेन शितिकण्टेन भारत!

कैलासे पर्वतश्रेष्ठे तत्ते सङ्कथयाम्यहम् ॥ ७ ॥

पुराकृतयुगस्याऽऽदौतोषितुंगिरिजापतिम् । तपश्चचारविपुलंविष्णुर्वर्षसहस्रकम

वायुभक्षो निराहारः शुक्लतीर्थे व्यवस्थितः ॥ ८ ॥

ततः प्रत्यक्षतामागाद्देवदेवो महेश्वरः । प्रादुर्भूतस्तु सहसा तत्र तीर्थे नराधिप

क्रोशद्वयमिदं चक्रे भुक्तिमुक्तिप्रदायकम् ।

तस्मिंस्तीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ १० ॥

गङ्गा कनखले पुण्या कुरुक्षेत्रे सरस्वती । ग्रामेवायदिवाऽरण्ये पुण्यासर्वत्रनर्मदा

सर्वौषधीनामशनं प्रधानं सर्वेषु पेयेषु जलं प्रधानम् ।

निद्रा सुखानां प्रमदा रतीनां सर्वेषु गात्रेषु शिरः प्रधानम् ॥ १२ ॥

स्नातस्याऽपि यथा पुण्यं ललाटं नृपसत्तम ।

शुक्लतीर्थं तथा पुण्यं नर्मदायां युधिष्ठिर ! ॥ १३ ॥

सरितां च यथागङ्गादेवतानांजनार्द्दनः । शुक्लतीर्थंतथापुण्यंनर्मदायां व्यवस्थितम्

चतुष्पदानां सुरभिर्वर्णानां ब्राह्मणो यथा । प्रधानं सर्वतीर्थानां शुक्लतीर्थंतथानृप

ग्रहाणां तु यथाऽऽदित्यो नक्षत्राणां यथा शशी ।

शिरो वा सर्वगात्राणां धर्माणां सत्यमिष्यते ॥ १६ ॥

तथैव पार्थ तीर्थानां शुक्लतीर्थमनुत्तमम् । दुर्विज्ञेयो यथा लोके परमात्मासनातनः

सुसूक्ष्मत्वादनिर्द्देश्यः शुक्लतीर्थं तथा नृप । मन्दप्रज्ञत्वमापन्नो महामोहसमन्वितः

शुक्लतीर्थं नजानाति नर्मदातटसंस्थितम् । बहुनाऽत्र किमुक्तेन धर्म्मपुत्र पुनःपुनः

शुक्लतीर्थं महापुण्यं सम्प्राप्तं कल्मषक्षयात् ।

योऽत्र दत्तेशुचिर्भूत्वा एकं रेवाजलाञ्जलिम् ॥ २० ॥

कल्पकोटिसहस्राणि पितरस्तेन तर्पिताः ॥ २१ ॥

एकः पुत्रो धरापृष्ठे पितॄणामार्त्तिनाशनः ।

चाणक्योनाम राजाऽभूच्छुक्लतीर्थं च वेद सः ॥ २२ ॥

युधिष्ठिर उवाच

कोऽसौ द्विजवरश्रेष्ठ! चाणक्योनाम नामतः ।

शुक्लतीर्थस्य यो वेत्ता नाऽन्यो वेत्ता हि कश्चन ॥ २३ ॥

केनोपायेन तत्तीर्थं तेन ज्ञातं धरातले । तदहं श्रोतुमिच्छामि परंकौतूहलं हि मे

श्रीमार्कण्डेय उवाच

इक्ष्वाकुप्रभवोराजानप्ताशुद्धोदनस्यच । चाणक्योनामराजर्षिर्बुभुजेपृथिवीमिमाम्

विक्रान्तोमतिमाञ्छूरः सर्वलोकैरवञ्चितः ।

वञ्चितः सहसा धूर्तवायसाभ्यां नृपोत्तमः ॥ २६ ॥

युधिष्ठिर उवाच

कथंसवञ्चितोराजावायसाभ्यां कुतोऽथवा । पुरायेनप्रतिज्ञातंधीगर्भेणमहात्मना

न जीवे वञ्चितोऽन्येन प्राणांस्त्यक्ष्ये न संशयः ।

एतन्मे वद विप्रेन्द्र! परं कौतूहलं मम ॥ २८ ॥

श्रीमार्कण्डेय उवाच

आत्मानंवञ्चितंज्ञात्वा तदा संगृह्य वायसौ । प्रेषयामासतीव्रेणदण्डेनयमसादनम्

वायसावूचतुः

सुन्दोपसुन्दयोः पुत्रावावां काकत्वमागतौ ।

मावधीस्त्वं महाभाग! कस्मिंश्चित्कारणान्तरे ॥ ३० ॥

तावावां कृतसङ्कल्पौ त्वया कोपेन मानद !।

निरस्तावनिरस्तौ वा यास्यावः परमां गतिम् ॥ ३१ ॥

तदादेशय राजेन्द्रकृत्वातव महत्प्रियम् । मुक्तशापोभविष्यावो ब्रह्मणोवचनंतथा

तच्छ्रुत्वाकाकवचनंचाणक्योनृपसत्तमः । नाहंजीवेविदित्वैवंवञ्चितःकेनकर्हिचित्

तस्मात्तीर्थं विजानीतं यमस्य सदने द्विजौ ।

प्रेषयामि यथान्यायं श्रुत्वा तत्कथयिष्यथः ॥ ३४ ॥

तेनैवमुक्तौ तौ काकौस्रक्चन्दनविभूषितौ । शीघ्रगौप्रेषयामासयमस्यसदनम्प्रति

राजोवाच

तत्रधर्मपुरं गत्वाविचरन्ताविततस्ततः । यदिपृच्छति धर्मात्मायमःसंयमनोमहान्
कुतोवामागतंब्रूतं केनवा भूषिताबुभौ । मदीयाभारतीतस्य कथनीयाह्यशङ्कितम्
इक्ष्वाकुसम्भवो राजा चाणक्यो नाम धार्मिकः ।
द्वादशाहे मृतस्याऽस्य तर्प्पितावशनादिना ॥ ३८ ॥
तच्छ्रुत्वा वचनं राज्ञो गतौ तौ यमसादनम् ।
क्रीडितौ प्राङ्गणे तस्य स्रक्चन्दनविभूषितौ ॥
धर्मराजेन तौ दृष्टौ पृष्टौ धृष्टौ च वायसौ ॥ ३९ ॥

यम उवाच

कुतःस्थानात्समायातौकेनवाभूषिताबुभौ । वृत्तंवैकथ्यतामेतद्वायसावविशङ्कया

काकावूचतुः

इक्ष्वाकुसम्भवो राजा चाणक्योनाम धार्म्मिकः ।
द्वादशाहे मृतस्याऽस्य तर्पितावशनादिभिः ॥ ४१ ॥
तयोस्तद्वचनंश्रुत्वातदा वैवस्वतोयमः । चित्रगुप्तंकलिंकालं वीक्ष्यतामिदमब्रवीत्
अण्डजस्वेदजातीनांभूतानांसचराचरे । विहितं लोककर्तॄणांसान्निध्यंब्रह्मणाममं
गतः कुत्र दुराचारश्चाणक्यो नामतस्त्विह ।
अन्विष्यतां पुराणेषु त्वितिहासेषु या गतिः ॥ ४४ ॥
ततस्तैर्धर्म्मपालैस्तुधर्मराजप्रचोदितैः । निरीक्षितापुराणोक्ताकर्मजागतिरागतिः
ततः प्रोवाच वचनं धर्मो धर्मभृताम्वरः । शृण्वतांधर्मपालानां मेघगम्भीरयागिरा
शुक्लतीर्थेमृतानां तु नर्मदाविमले जले । अण्डजस्वेदजातीनां न गतिर्मम सन्निधौ
तत्तीर्थं धार्मिकं लोके ब्रह्मविष्णुमहेश्वरैः ।
निर्मितं परया भक्त्या लोकानां हितकाम्यया ॥ ४८ ॥
पापोपपातकैर्युक्ता ये नरा नर्मदाजले । शुक्लतीर्थे मृताःशुद्धानते मद्विषयाःक्वचित्
एतच्छ्रुत्वा तु वचनं तौ काकौ यमभाषितम् ।

आगतौ शीघ्रगौ पार्थ दृष्ट्वा यमपुरं महत् ॥ ५० ॥
पृष्टौतौप्रणतौराज्ञायथा वृत्तं यथाश्रुतम् । कथयामासतुःपार्थदानवौकाकतांगतौ
अस्मात्स्थानाद्गतावावां यमस्य पुरमुत्तमम् ।
पृथिव्या दक्षिणेभागे ह्यतीत्य बहुयोजनम् ॥ ५२ ॥
तत्पुरं कामगं दिव्यं स्वर्णप्राकारतोरणम् । अनेकगृहसम्बाधं मणिकाञ्चनभूषितम्
चतुष्पथैश्चत्वरैश्च घण्टामार्गोपशोभितम् ।
उद्यानवनसञ्छन्नं पद्मिनीखण्डमण्डितम् ॥ ५४ ॥
हंससारससङ्घुष्टं कोकिलाकुलसङ्कुलम् । सिंहव्याघ्रगजाकीर्णमृक्षवानरसेवितम्
नरनारीसमाकीर्णं नित्योत्सवविभूषितम् ।
शङ्खदुन्दुभिनिर्घोषैर्वीणावेणुनिनादितम् ॥ ५६ ॥
यममार्गेऽपिविहितं 'स्वर्गलोकमिवाऽपरम् । गतौ तत्र पुनश्चान्यैर्यमदूतैर्यमाज्ञया
विदितौप्रेषितौतत्रयत्रदेवोजगत्प्रभुः । प्राणस्य भीत्या दृष्टोऽसौसिंहासनगतःप्रभुः
महाकायो महाजङ्घो महास्कन्धो महोदरः ।
महावक्षा महाबाहुर्महावक्त्रेक्षणो महान् ॥ ५९ ॥
महामहिषमारूढो महामुकुटभूषितः । तत्राऽन्यश्च कलिः कालश्चित्रगुप्तोमहामतिः
समागतौ तदा दृष्टौ मध्ये ज्वलितपावकौ ।
पुण्यपापानि जन्तूनां श्रुतिस्मृत्यर्थपारगौ ॥ ६१ ॥
विचारयन्तौसततंतिष्ठातेतौदिवानिशम् । ततो ह्यावां प्रणामान्तेयमेनयममूर्तिना
पृष्टावागमनेहेतुं तमब्रवश्शृणुष्व तत् । उज्जयिन्यांमहीपालश्चाणक्योऽभूत्प्रतापवान्
द्वादशाहे मृतस्याऽस्य भुक्त्वा प्राप्तौ यमालयम् ।
ततोऽस्माकं वचः श्रुत्वा कम्पयित्वा शिरो यमः ॥ ६४ ॥
उवाच वचनं सत्यं सभामध्येहसन्निव । अस्ति तत्कारणं येन चाणक्यःपापपूरुषः
नायातो मम लोके तु सर्वपापभयङ्करे । शुक्लतीर्थे मृतानां तु नर्मदायां परम्पदम्
जायते सर्वजन्तूनां नाऽत्र काचिद्विचारणा ।

अवशः स्ववशोवाऽपि जन्तुस्तत्क्षेत्रमण्डले ॥ ६७ ॥

मृतः स वैन सन्देहो रुद्रस्यानुचरो भवेत् । तद्धर्मवचनं श्रुत्वा निर्गत्यनगराद्बहिः

पश्यन्तौ विविधां घोरां नरके लोकयातनाम् ।

त्रिंशत्कोट्यो हि घोराणां नरकाणां नृपोत्तम !॥ ६९ ॥

दृष्ट्वा भीतौ परामार्ति गतौ तत्र महापथि । नरको रौरवस्तत्र महारौरव एव च ॥

पेषणः शोषणश्चैव कालसूत्रोऽस्थिभञ्जनः ।

तामिस्रश्चान्धतामिस्रः कृमिपूतिवहस्तथा ॥ ७१ ॥

दृष्टश्चान्यो महाज्वालस्तत्रैव विषभोजनः । नरकौ दंशमशकौ तथा यमलपर्वतौ ॥

नदी वैतरणी दृष्टा सर्वपापप्रणाशिनी । शीतलं सलिलं यत्रपिबन्तिह्यमृतोपमम्

तदेवनीरंपापानां शोणितंपरिवर्तते । असिपत्रवनं चाऽन्यद्दृष्टाऽन्यामहती शिला

अग्निपुञ्जनिभाकारा विशाला शाल्मली परा ।

इत्यादयस्तथैवान्ये शतसाहस्रसञ्ज्ञिताः ॥ ७५ ॥

घोरघोरतरा दृष्टाःक्लिश्यन्तेयत्रमानवाः । वाचिकैर्मानसैःपापैःकर्मजैश्चपृथग्विधैः

अहङ्कारकृतैर्दोषैर्मायावञ्चनपूर्वकैः । पिता माता गुरुर्भ्राता अनाथाविकलेन्द्रियाः

भ्रमन्ति नोद्धृता येषां गतिस्तेषां हि रौरवे ।

तत्र ते द्वादशाब्दानि क्षपित्वा रौरवेऽधमाः ॥ ७८ ॥

इह मानुष्यके लोकेदीनान्धाश्च भवन्तिते । देवब्रह्मस्वहर्तृणांनराणांपापकर्मणाम्

महारौरवमाश्रित्य ध्रुवं वासो यमालये । ततःकालेन महता पापाःपापेनवेष्टिताः

जायन्ते कण्टकैर्भिन्नाः कोशे वा कोशकारकाः ।

मृगपक्षिविहङ्गानां घातका मांसभक्षकाः ॥ ८१ ॥

पेषणं नरकं यान्ति शोषणं जीवबन्धनात् ।

तत्रत्यां यातनां घोरां सहित्वा शास्त्रचोदिताम् ॥ ८२ ॥

इह मानुष्यतां प्राप्य पङ्ग्वन्धबधिरा नराः । गवार्थे ब्राह्मणार्थेचह्यनृतंवदतामिह

पतनं जायतेपुंसां नरके कालसूत्रके । तत्रत्यायातना घोरा विहिताशास्त्रकर्तृभिः

भुक्त्वा समागता ह्यत्र ते यास्यन्त्यन्त्यजां गतिम् ।

बन्धयन्ति च ये जीवांस्त्यक्त्वात्मकुलसन्ततिम् ॥ ८५ ॥

पतन्तिनात्र सन्देहो नरके तेऽस्थिभञ्जने । तत्र वर्षशतस्याऽन्तइह मानुष्यतांगताः

कुब्जा वामनकाः पापा जायन्ते दुःखभागिनः ।

ये त्यजन्ति स्वकां भार्यां मूढाः पण्डितमानिनः ॥ ८७ ॥

ते यान्तिनरकंघोरंतामिस्रं नाऽत्रसंशयः । तत्र वर्षशतस्यान्ते इह मानुष्यतांगताः

दुश्चर्माणो दुर्भगाश्च जायन्ते मानवाहिते । मानकूटं तुलाकूटं कूटकं तु वदन्ति ये

नरके तेऽन्धतामिस्रे प्रपच्यन्ते नराधमाः । शतसाहस्रिकं कालमुषित्वातत्रतेनराः

इह शत्रुगृहे त्वन्धा भ्रमन्ते दीनमूर्त्तयः । पितृदेवद्विजेभ्योऽन्नमदत्त्वा येऽत्र भुञ्जते॥

नरके कृमिभक्ष्ये ते पतन्तिस्वात्मपोषकाः । ततःप्रसूतिकालेहि कृमिभुक्तश्चसव्रणः

जायतेऽशुचिगन्धोऽत्र परभाग्योपजीवकः ।

स्वकर्मविच्युताः पापा वर्णाश्रमविवर्जिताः ॥ ९३ ॥

नरके पूयसम्पूर्णेक्लिश्यन्ते ह्ययुतंसमाः । पूर्णेतत्र ततः काले प्राप्यमानुष्यकंभवम्

उद्वेजनीयाभूतानांजायन्तेव्याधिभिर्वृताः । अग्निदोगरदश्चैवलोभमोहान्वितोनरः

नरके विषसम्पूर्णे निमज्जति दुरात्मवान् । तत्र वर्षशतात्कालादुन्मज्जनमवस्थितः

भुवि मानुषतांप्राप्य कृपणोजायतेपुनः । पादुकोपानहौ छत्रंशय्यां प्रावरणानि च

अदत्त्वा दंशमशकैर्भक्ष्यन्ते जन्यसप्ततिम् । पितुर्द्रव्यापहर्त्तारस्ताडनक्रोशने रताः

पीडनं क्रियते तेषांयत्र तौ युग्मपर्वतौ । या सा वैतरणीघोरा नदी रक्तप्रवाहिनी

पिबन्ति रुधिरं तत्र येऽभियान्ति रजस्वलाम् ।

असिपत्रवने घोरे पीड्यन्ते पापकारिणः ॥ १०० ॥

परपीडाकरा नित्यंये नरोऽन्त्यजगामिनः । गुरुदाररतानां तु महापातकिनामपि

शिलावगूहनंतेषांजायतेजन्मसप्ततिम् । ज्वलन्तीमायसीं घोरांवहुकण्टकसम्वृताम्

शाल्मलीं तेऽवगूहन्ति परदाररताहिये । परस्ययोषितं हृत्वा ब्रह्मस्वमपहृत्य च

अरण्ये निर्जले देशेस भवेत्क्रूरराक्षसः । देवस्वं ब्राह्मणस्वं च लोभेनैवाऽऽहरेच्चयः

स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति ।
एवमादीनि पापानि भुञ्जन्ते यमशासनात् ॥ ५ ॥

येषांतु दर्शनादेव श्रवणाज्जायते भयम् । तथादानफलं चाऽन्ये भुञ्जानायममन्दिरे दृष्टाः श्रुतं कथयतां दूतानां च:यमाज्ञया । रथैरन्येगजैरन्ये केचिद्वाजिभिरावृताः

दृष्टास्तत्र महाभाग! तपःसंचयसंस्थिताः ।
गोदाता स्वर्णदाता च भूमिरत्नप्रदा नराः ॥ ८ ॥

शय्याशनगृहादीनां सलोकःकामदोनृणाम् । अन्नंपानीयसहितं ददतेयेऽत्रमानवाः तत्र तृताः सुसंतुष्टाः क्रीडन्ते यमसादने । अत्रयद्दीयते दानमपि बालाग्रमात्रकम् तदक्षयफलं सर्वं शुक्लतीर्थे नृपोत्तम । एतत्ते कथितंसर्वं यद्दृष्टं यच्च वै श्रुतम् ॥ कुरुष्वयदभिप्रेतंयदिशक्नोषिमुच्यताम् । तयोस्तद्वचनंश्रुत्वा चाणक्योहृष्टमानसः विसर्जयामास खगावभिनंद्यपुनःपुनः । ताभ्यांगताभ्यांसर्वस्वंदत्त्वाविप्रेषुभारत

कामक्रोधौ परित्यज्य जगामाऽमरपर्वतम् ।
तत्र बध्वोडुपं गाढं कृष्णरज्ज्वावलम्बितम् ॥ १४ ॥
प्लवमानो जगामाऽऽशु ध्यायन्देवं जनार्द्दनम् ।
आरोग्यं भास्करादिच्छेद्धनं वै जातवेदसः ॥ १५ ॥

प्राप्नोतिज्ञानमीशानान्मोक्षंप्राप्नोति केशवात् । नीलंरक्तंतदभवन्मेचकंयद्धिसूत्रकम्

शुद्धस्फटिकसङ्काशं दृष्ट्वा रज्जुं महामतिः ।
आप्लुत्य विमले तोये गतोऽसौ वैष्णवं पदम् ॥ १७ ॥
गायन्ति यद्वेदविदः पुराणं नारायणं शाश्वतमच्युताह्वयम् ।
प्राप्तः स तं राजसुतो महात्मा निक्षिप्य देहं शुभशुक्लतीर्थे ॥ १८ ॥
एषा ते कथिता राजन्सिद्धिश्चाणक्यभूभृतः ।
तथाऽन्यत्तव वक्ष्यामि शृणुष्वैकाग्रमानसः ॥ १९ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे चाणक्यसिद्धिप्राप्तिवर्णनंनाम पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥

षट्पञ्चाशदधिकशततमोऽध्यायः

शुक्लतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नास्ति लोकेषु तत्तीर्थं पृथिव्यां यन्नरेश्वर । शुक्लतीर्थेन सदृशमुपमानेन गीयते ॥ शुक्लतीर्थं महातीर्थं नर्मदायां व्यवस्थितम् । प्रागुदक्प्रवणेदेशे मुनिसङ्घनिषेवितम् वैशाखे च तथामासिकृष्णपक्षेचतुर्दशी । कैलासादुमयासार्द्धंस्वयमायातिशङ्करः

मध्याह्नसमये स्नात्वा पश्यत्यात्मानमात्मना ।
ब्रह्मविष्ण्वन्द्रसहितः शुक्लतीर्थे समाहितः ॥ ४ ॥
कार्त्तिक्यां तु विशेषेण वैशाख्यां च नरोत्तम !।
ब्रह्मविष्णुमहादेवान् स्नात्वा पश्यति तद्दिने ॥ ५ ॥
देवराजः सुरैः सार्द्धं वायुमार्गव्यवस्थितः ।
कृष्णपक्षे चतुर्द्दश्यां स्नात्वा पश्यति शङ्करम् ॥ ६ ॥
गन्धर्वाप्सरसो यक्षाः सिद्धविद्याधरोरगाः ।
तद्दिने तेऽपि देवेशं दृष्ट्वा मुञ्चन्ति किल्बिषम् ॥ ७ ॥

अर्द्धयोजनविस्तारं तदर्द्धेनैव चायतम् । शुक्लतीर्थंमहापुण्यं महापातकनाशनम् ॥

यत्र स्थितैः प्रदृश्यन्ते वृक्षाग्राणि नरोत्तमैः ।
तत्र स्थिता महापापैर्मुच्यन्ते पूर्वसञ्चितैः ॥ ९ ॥
पापोपपातकैर्युक्तो नरःस्नात्वा प्रमुच्यते ।
उपार्जिता विनश्येत भ्रूणहत्याऽपि दुस्त्यजा ॥ १० ॥

यस्मात्तत्रैव देवेश उमया सह तिष्ठति । वैशाख्यांच विशेषेण कैलासादेतिशङ्करः तेन तीर्थं महापुण्यं सर्वपातकनाशनम् । कथितंब्रह्मणा पूर्वं मया तव तथा नृप रजकेन यथा धौतं वस्त्रं भवति निर्मलम् । तथातत्रवपुःस्नानं पुरुषस्य भवेच्छुचि

पूर्वे वयसि पापानि कृत्वा पुष्टानि मानवः ।
अहोरात्रोषितो भूत्वा शुक्लतीर्थे व्यपोहति ॥ १४ ॥
शुक्लतीर्थे महाराज राकां रेवाजलाञ्जलिम् ।
कल्पकोटि सहस्राणि दत्त्वा स्युः पितरः शिवाः ॥ १५ ॥

न माता न पिता बन्धुः पतनं नरकार्णवे। उद्धरन्ति यथा पुण्यं शुक्लतीर्थे नरेश्वर तपसाब्रह्मचर्य्येणनतां गच्छन्तिसद्गतिम् । शुक्लतीर्थे मृतो जन्तुर्देहत्यागेनयांलभेत्

कार्त्तिकस्य तु मासस्य कृष्णपक्षे चतुर्दशीम् ।
घृतेन स्नापयेद्देवमुपोष्य प्रयतो नरः ॥ १८ ॥

स्नात्वाप्रभातेरेवायां दद्यात्सघृतकम्बलम् । सहिरण्यंयथाशक्तिदेवमुद्दिश्यशङ्करम् देवस्य पूरणां कुर्याद्धुतेन घृतकंबलम् । स गच्छतिमहातेजाः शिवलोकंमृतो नरः एकविंशकुलोपेतोयावदाभूतसम्प्लवम् । शुक्लतीर्थेनरःस्नात्वाह्य मांरुद्रंचयोऽर्चयेत् गन्धपुष्पादिधूपैश्च सोऽश्वमेधफलंलभेत् । मासोपवासं यः कुर्यात्तत्र तीर्थे नरेश्वर मुच्यते समहत्पापैः सप्तजन्मसुसंचितैः । उष्ट्रीक्षीरमविक्षीरं नवश्राद्धे च भोजनम् वृषलीगमनं चैवतथाऽभक्ष्यस्य भक्षणम् । अविक्रयेऽनृतेपापं माहिषेऽयाज्ययाजके वार्धुष्ये पङ्क्तिगरदेदेवब्राह्मणदूषके । एवमादीनिपापानि तथाऽन्यान्यपि भारत चान्द्रायणेननश्यन्ति शुक्लतीर्थे नसंशयः । शुक्लतीर्थे तुय स्नात्वातर्पयेत्पितृदेवताः

तस्य ते द्वादशाब्दानि तृप्तिं यान्ति सुतर्पिताः ।
पादुकोपानहौ छत्रं शय्यामासनमेव च ॥ २७ ॥

सुवर्णं धनधान्यं च श्राद्धं युक्तहलंतथा । अन्नंपानीयसंहितं तस्मिंस्तीर्थेददन्तिये हृष्टाःपुष्टामृता यान्तिशिलोकंनसंशयः । तत्रतीर्थे तुयो भक्त्याशिवमुद्दिश्यभारत

भिक्षामात्रं तथाऽन्नं ये तेऽपि स्वर्यान्ति वै नराः ।
यज्विनां व्रतिनां चैव तत्र तीर्थनिवासिनाम् ॥ ३० ॥
अपि वालाग्रमात्रं हि दत्तं भवति चाऽक्षयम् ।
अग्निप्रवेशं यः कुर्याच्छुक्लतीर्थे समाहितः ॥ ३१ ॥

रागद्वेषविनिर्मुक्तो हृदिध्यात्वाजनार्द्दनम् । सर्वकामसुसंपूर्णःस गच्छेद्वारुणं पुरम् अरोगोनजरा तत्रयत्र देवोऽम्भसांपतिः । अनाशकंतुयः कुर्यात्तस्मिंस्तीर्थेयुधिष्ठिर

अनिवर्तिका गतिस्तस्य रुद्रलोकादसंशयम् ।
अवशः स्ववशो वाऽपि जन्तुस्तत्क्षेत्रमण्डले ॥ ३४ ॥
मृतः स तु न सन्देहो रुद्रस्याऽनुचरो भवेत् ।
शुक्लतीर्थे तु यः कन्यां शक्त्या दद्यादलङ्कृताम् ॥ ३५ ॥

विधिना यो नृपश्रेष्ठ!कुरुते वृषमोक्षणम् । तस्य यत्फलमुद्दिष्टं पुराणे रुद्रभाषितम् तदहंसंप्रवक्ष्यामि शृणुष्वैकमनानृप । यावन्तोरोमकूपाः स्युःसर्वाङ्गेषुपृथक्पृथक् तावद्वर्षसहस्राणि रुद्रलोके महीयते । शुक्लतीर्थे तु यदत्तं ग्रहणे चन्द्रसूर्ययोः ॥ ३८ वर्धतेतद्गुणं तावद्दिनानि दशपञ्च च । शुक्लतीर्थे शुचिर्भूत्वायः करोतिप्रदक्षिणम् पृथ्वीप्रदक्षिणा तेन कृतायत्तस्यतत्फलम् । शोभनं मिथुनं यस्तुरुद्रमुद्दिश्य पूजयेत् सप्त जन्मानि तस्यैव वियोगो नचवैकचित् । एतत्तेकथितं राजन्संक्षेपेणफलंमहत्

शुक्लतीर्थस्य यत्पुण्यं यथा देवाच्छ्रुतं मया ।
य इदं शृणुयाद्भक्त्या पुराणे विहितं फलम् ॥ ४२ ॥
स लभेन्नाऽत्र सन्देहः सत्यं सत्यं पुनः पुनः ।
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥ ४३ ॥
मोक्षार्थी लभते मोक्षं स्नानदानफलं महत् ॥ ४४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे शुक्लतीर्थमाहात्म्यवर्णनंनाम षट्पञ्चाशदधिकशततमोऽध्यायः ॥

———

सप्तपञ्चाशदधिकशततमोऽध्यायः

हुङ्कारस्वामितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं राजञ्छुङ्कतीर्थसमीपतः । वासुदेवस्य तीर्थं तु सर्वलोकेषुपूजितम्
तद्धि पुण्यं सुविख्यातं नर्मदायांपुरातनम् । तत्रहुङ्कारमात्रेण रेवाक्रोशंजगामसा

यदा प्रभृति राजेन्द्र हुङ्कारेण गता सरित् ।
तदा प्रभृति स स्वामी हुङ्कारः शब्दितो बुधैः ॥ ३ ॥

हुङ्कारतीर्थे यःस्नात्वापश्यत्यच्युतम् । समुच्यतेनरः पापैः सप्तजन्मकृतैरपि
संसारार्णवमग्नानां नराणां पापकर्मिणाम् । नैवोद्धर्त्ताजगन्नाथंविनानारायणंपरः

सा जिह्वा या हरिं स्तौति तच्चित्तं यत्तदर्पितम् ।
तावेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ ॥ ६ ॥

सर्वदासर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थोभगवान्मङ्गलायतनोहरिः
यदन्यद्देवतार्चायाः फलं प्राप्नोति मानवः । साष्टाङ्गप्रणिपातेन तत्फलं लभते हरेः
रेणुगुण्ठितगात्रस्ययावन्तोऽस्यरजःकणाः । तावद्वर्षसहस्राणिविष्णुलोकेमहीयते

सम्मार्ज्जनाभ्युक्षणलेपनेन तदालये नश्यति सर्वपापम ।
नारी नराणां परया तु भक्त्या दृष्ट्वा तु रेवा नरसत्तमस्य ॥ १० ॥
ये नार्चितो भगवान्वासुदेवो जन्मार्जितं नश्यति तस्य पापम् ।
स याति लोकं गरुडध्वजस्य विधूतपापः सुरसङ्घपूज्यताम् ॥ ११ ॥
शाठ्येनाऽपि नमस्कारं प्रयुञ्जंश्चक्रपाणिनः ।
सप्तजन्मार्जितं पापं गच्छत्याऽऽशु न संशयः ॥ १२ ॥

पूजायां प्रीयतेरुद्रो जपहोमैर्दिवाकरः । शङ्खचक्रगदापाणिः प्रणिपातेन तुष्यति ॥
भवजलधिगतानां द्वन्द्ववाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् ।

विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥
हुङ्कारतीर्थेराजेन्द्र!शुभंवायदिवाऽशुभम् । यत्कृतंपुरुषव्याघ्र! तन्नश्यति नकर्हिचित्

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे हुङ्कारस्वामितीर्थमाहात्म्यवर्णनंनाम सप्तपञ्चाशदधिकशततमोऽध्यायः

अष्टपञ्चाशदधिकशततमोऽध्यायः

सङ्गमेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्परं तीर्थं सङ्गमेश्वरमुत्तमम् । नर्मदा दक्षिणे कूले सर्वपापभयावहम् ॥
धनदस्तत्रविश्रान्तोमुहूर्त्तं नृपसत्तम । पितृलोकात्समायातः कैलासं धरणीधरम्

प्रत्ययार्थं नृपश्रेष्ठ! ह्यद्यापि धरणीतले ।
कृष्णवर्णा हि पाषाणा दृश्यन्ते स्फटिकोज्ज्वलाः ॥ ३ ॥
विन्ध्यनिर्झरनिष्क्रान्ता पुण्यतोया सरिद्वरा ।
प्रविष्टा नर्मदातोये सर्वपापप्रणाशने ॥ ४ ॥

सङ्गमे तत्र यः स्नात्वा पूजयेत्सङ्गमेश्वरम् । अश्वमेधस्ययज्ञस्यफलंप्राप्नोत्यसंशयम्
घण्टापताकावितनं यो ददेत्सङ्गमेश्वरे । हंसयुक्तविमानस्थो दिव्यस्त्रीशतसम्वृतः
स रुद्रपदमाप्नोति रुद्रस्यानुचरो भवेत् । दधिभक्तेन देवस्ययःकुर्य्याल्लिङ्गपूरणम्

सिक्थसङ्ख्यं शिवे लोके स वसेत्कालमीप्सितम् ।
श्रीफलैः पूरयेल्लिङ्गं निःस्वो भूत्वा भवस्य तु ॥ ८ ॥
सोऽपि तत्फलमाप्नोति गतः स्वर्गं नरेश्वर !।
अक्षया सन्ततिस्तस्य जायते सप्तजन्मसु ॥ ६ ॥

स्नपनं देवदेवस्य दध्ना मधुघृतेन वा । यः करोति विधानेन तस्य पुण्यफलं शृणु

घृतक्षीरवहा नद्यो यत्र वृक्षा मधुस्रवाः । तत्र ते मानवायान्ति सुप्रसन्ने महेश्वरे
पत्रं पुष्पं फलं तोयं यस्तु दद्यान्महेश्वरे । तत्सर्वं सप्तजन्मानि ह्यक्षयं फलमश्नुते
सर्वेषामेव पात्राणां महापात्रं महेश्वरः । तस्मात्सर्वप्रयत्नेन पूजनीयो महेश्वरः ॥

ब्रह्मचर्यस्थितो नित्यं यस्तु पूजयते शिवम् ।
इह जीवन्स देवेशो मृतो गच्छेदनामयम् ॥ १४ ॥
शिवे तु पूजिते पार्थ! यत्फलं प्राप्यते बुधैः ।
योगीन्द्रे चैव तत्पार्थ! पूजिते लभते फलम् ॥ १५ ॥
ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ।
येषां गृहेषु भुञ्जन्ति शिवभक्तिरता नराः ॥ १६ ॥

सन्निरुध्येन्द्रियग्रामं यत्रयत्र वसेन्मुनिः । तत्रतत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च ॥
यत्फलं वेदविदुषि भोजितेशतसङ्ख्यया । तत्फलं जायतेपार्थह्येकेनशिवयोगिना

यत्र भुञ्जति भस्माङ्गी मूर्खो वा यदि पण्डितः ।
तत्र भुञ्जति देवेशः सपत्नीको वृषध्वजः ॥ १६ ॥
विप्राणां वेदविदुषां कोटिं सम्भोज्य यत्फलम् ।
भिक्षामात्रप्रदानेन तत्फलं शिवयोगिनाम् ॥ २० ॥

सङ्गमेश्वरमासाद्यप्राणत्यागंकरोति यः । न तस्यपुनरावृत्तिः शिवलोकात्कदाचन

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे सङ्गमेश्वरतीर्थमाहात्म्यवर्णनंनामाऽष्टपञ्चाशदधिकशततमोऽध्यायः

एकोनषष्ट्युत्तरशततमोऽध्यायः

अनरकेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज तीर्थं परमपावनम् । नर्मदायां सुदुष्प्रापं सिद्धंह्यनरकेश्वरम्
तस्मिंस्तीर्थेनरःस्नात्वापापकर्माऽपिभारत । नपश्यतिमहाघोरंनरकद्वारसञ्ज्ञिकम्

युधिष्ठिर उवाच

शुभाशुभफलैस्तात भुक्तभोगा नरास्त्विह । जायन्तेलक्षणैर्यैस्तु तानिमेवदसत्तम

यथा निर्गच्छते जीवस्त्यक्त्वा देहं न पश्यति ।
तथा गच्छन्पुनर्देहं पञ्चभूतसमन्वितः ॥ ४ ॥
त्वगस्थिमांसमेदोऽसृक्केशस्नायुशतैः सह ।
विण्मूत्ररेतःसङ्घाते का सञ्ज्ञा जायते नृणाम् ॥ ५ ॥

एवमुक्तः स मार्कण्डः कथयामासयोगवित् । ध्यात्वासनातनंसर्वदेवदेवंमहेश्वरम्

श्रीमार्कण्डेय उवाच

शृणु पार्थ! महाप्रश्नं कथयामि यथाश्रुतम् ।
सकाशाद् ब्रह्मणः पूर्वमृषिदेवसमागमे ॥ ७ ॥
गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम् ।
इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ८ ॥
अचीर्णप्रायश्चित्तानां यमलोके ह्यनेकधा ।
यातनाभिर्वियुक्तानामनेकां जीवसन्ततिम् ॥ ६ ॥

गत्वामनुष्यभावे तु पापचिह्नाभवन्ति ते । तत्तेऽहंसम्प्रवक्ष्यामिशृणुष्वैकमनानृप

सहित्वा यातनां सर्वां गत्वा वैवस्वतक्षयम् ।
विस्तीर्णयातना ये तु लोकमायान्ति चिह्निताः ॥ ११ ॥

गद्गदोऽनृतवादी स्यान्मूकश्चैव गवानृते । ब्रह्महाजायतेकुष्ठी स्यावदन्तस्तुमद्यपः
कुनखीस्वर्णहरणाद्दुःश्चर्मागुरुतल्पगः । संयोगीहीनयोनिःस्याद्दरिद्रोऽदत्तदानतः

ग्रामशूकरतां याति ह्ययाज्ययाजको नृप !।
खरो वै बहुयाजी स्याच्छ्वाऽनिमन्त्रितभोजनात् ॥ १४ ॥

अपरीक्षितभोजीस्याद्वानरोविजने वने । वितर्जकोऽथमार्जारःखद्योतः कक्षदाहतः

अविद्यां यः प्रयच्छेत बलीबर्दो भवेद्धि सः ।
अन्नं पर्युषितं विप्रे ददानः क्लीवतां व्रजेत् ॥ १६ ॥
मात्सर्यादथ जात्यन्धो जन्मान्धः पुस्तकं हरन् ।
फलान्याहरतोऽपत्यं म्रियते नाऽत्र संशयः ॥ १७ ॥

मृतोवानरतांय।तितन्मुक्तोऽथगलाडवान् । अदत्त्वाभक्षयंस्तानिह्यनपत्योभवेन्नरः
हरन्वस्त्रं भवेद्गोधा गरदः पवनाशनः । प्रव्राजीगमनाद्राजन्भवेन्मरुपिशाचकः ॥
वातकोजलहर्त्ता च धान्यहर्त्ता च मूषकः । अप्राप्तयौवनागच्छन्भवेत्सर्पइतिश्रुतिः

गुरुदाराभिलाषी च कृकलासो भवेच्चिरम् ।
जलप्रस्रवणं यस्तु भिन्द्यान्मत्स्यो भवेन्नरः ॥ २१ ॥

अविक्रेयान्विक्रयन्वैविकटाक्षोभवेन्नर । अयोनिगोवृकोहिस्यादुलूकःक्रयवञ्चनात्
मृतस्यैकादशाहे तु भुञ्जानः श्वोपजायते । प्रतिश्रुत्यद्विजायार्थमददन्मधुको भवेत्
राज्ञीगमाद्भवेद्दुष्टतस्करोविड्वराहकः । परिवादीद्विजातीनांलभतेकाच्छपीं तनुम्

व्रजेद्देवलको राजन्योनिं चाण्डालसञ्ज्ञिताम् ।
दुर्भगः फलविक्रेता वृश्चिको वृषलीपतिः ॥ २५ ॥
मार्जारोऽग्निं पदा स्पृष्ट्वा रोगवान्परमांसभुक् ।
सोदर्यागमनात्षण्ढो दुर्गन्धश्च सुगन्धहृत् ॥ २६ ॥
ग्रामभट्टो दिवाकीर्त्तिर्दैवज्ञो गर्दभो भवेत् ।
कुपण्डितः स्यान्मार्जारो भषणो व्यास एव च ॥ २७ ॥

स एव दृश्यतेराजन्प्रकाशात्परमर्मणाम् । यद्वातद्वापिपारक्यंस्वल्पंवायदिवा बहु

कृत्वावै योनिमाप्नोतितैरश्चींनात्रसंशयः । एवमादीनिचान्यानिचिह्नानिनृपसत्तम
स्वकर्मविहितान्येवदृश्यन्ते यैस्तु मानवाः । ततोजन्मततोमृत्युःसर्वजन्तुषु भारत
जायतेनाऽत्रसन्देहः समीभूतेशुभाऽशुभे । स्त्रीपुंसोःसम्प्रयोगेणविशुद्धेशुक्रशोणिते
पञ्चभूतसमोपेतः सषष्ठः परमेश्वरः । इन्द्रियाणिमनः प्राणाः ज्ञानमायुःसुखंधृतिः
धारणं प्रेरणं दुःखमिच्छाहङ्कार एव च । प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ

तस्येदमात्मनः सर्वमनादेरादिमिच्छतः ।
प्रथमे मासि स क्लेदभूतो धातुविमूर्च्छितः ॥ ३४ ॥
मास्यर्बुदं द्वितीये तु तृतीये चेन्द्रियैर्युतः ।
आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रबलादिकम् ॥
वायोस्तु स्पर्शनं चेष्टां दहनं रौक्ष्यमेव च ॥ ३५ ॥
पित्तात्तु दर्शनं पक्तिमौष्ण्यं रूपं प्रकाशनम् ।
सलिलाद्रसनां शैत्यं स्नेहं क्लेदं समार्दवम् ॥ ३६ ॥

भूमेर्गन्धं तथा घ्राणं गौरवं मूर्त्तिमेव च । आत्मागृह्णात्यजःपूर्वंतृतीयेस्पन्दतेचसः

दौर्हृदस्याऽप्रदानेन गर्भो दोषमवाप्नुयात् ।
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः ॥ ३८ ॥
स्थैर्यं चतुर्थे त्वङ्गानां पञ्चमे शोणितोद्भवः ।
षष्ठे बलं च वर्णश्च नखरोम्णां च सम्भवः ॥ ३९ ॥

मनसा चेतनायुक्तो नखरोमशतावृतः । सप्तमे चाऽष्टमेचैव त्वचावान्स्मृतिवानपि
पुनर्गर्भं पुनर्द्धात्रीमेनस्तस्य प्रधावति । अष्टमे मास्यतो गर्भो जातःप्राणैर्वियुज्यते

नवमे दशमे वाऽपि प्रबलैः सूतिमारुतैः ।
निर्गच्छते बाण इव यन्त्रच्छिद्रेण सज्वरः ॥ ४२ ॥

शरीरावयवैर्युक्तो ह्यङ्गप्रत्यङ्गसंयुतः । अष्टोत्तरं मर्मशतं तत्रास्था तु शतत्रयम् ॥

सप्त शिरःकपालानि विहितानि स्वयम्भुवा ।
तिस्रः कोट्योऽर्द्धकोटी च रोम्णामङ्गेषु भारत !॥ ४४ ॥

द्वासप्ततिसहस्राणि हृदयादभिनिसृताः ।
हितानाम हि ता नाड्यस्तासां मध्ये शशिप्रभा ॥ ४५ ॥
एवं प्रवर्त्तते चक्रं भूतग्रामे चतुर्विधे । उत्पत्तिश्च विनाशश्च भवतः सर्वदेहिनाम् ॥
गतिरूर्ध्वाच धर्मेण ह्यधर्म्मेण त्वधोगतिः । जायते सर्ववर्णानांस्वधर्म्मचलनान्नृप
देवत्वे मानवत्वे च दानभोगादिकाः क्रियाः ।
दृश्यन्ते या महाराज ! तत्सर्वं कर्मजं फलम् ॥ ४८ ॥
स्वकर्मविहितेघोरे कामक्रोधार्जिते शुभे । निमज्जेन्नरके घोरे यस्योत्तारोनविद्यते ॥
उत्तारणायजन्तूनां नर्मदातटसंस्थितम् । एवमेतन्महातीर्थं नरकेश्वरमुत्तमम् ॥
नरकापहं महापुण्यं महापातकनाशनम् । तत्तीर्थं सर्वतीर्थानामुत्तमं भुविदुर्लभम्
तत्र तीर्थे तु यः स्नात्वापूजयेत महेश्वरम् । महापातकयुक्तोऽपि नरकं नैव पश्यति
तत्र तीर्थे तु यो दद्याद्धेनुं वैतरणींशुभाम् । स मुच्यते सुखेनैव वैतरण्यांनसंशयः
युधिष्ठिर उवाच
यमद्वारेमहाघोरेयासा वैतरणी नदी । किं रूपा किंप्रमाणासाकथंसावहतिद्विज
कथं तस्याः प्रमुच्यन्ते केषां वासस्तु सन्ततम् ।
केषां तु साऽनुकूला सा ह्येतद्विस्तरतो वद ॥ ५५ ॥
श्रीमार्कण्डेय उवाच
धर्मपुत्र महाबाहो शृणु सर्वं मयोदितम् । या सावैतरणीनाम यमद्वारेमहासरित्
अगाधा पाररहिता दृष्टमात्रा भयावहा । पूयशोणिततोयासामांसकर्द्दमनिर्मिता
तत्तोयं भ्रमते तूर्णं तापीमध्ये घृतं यथा । कृमिभिः सङ्कुलं पूयं वज्रतुण्डैरयोमुखैः
शिशुमारैश्चमकरैर्वज्रकर्त्तरि संयुतैः । अन्यैश्च जलजीवैः सा सुहिंस्रैर्मर्मभेदिभिः
तपन्ति द्वादशादित्याः प्रलयान्त इवोल्बणाः ।
पतन्ति तत्र वै मर्त्याः क्रन्दन्तो भृशदारुणम् ॥ ६० ॥
हा भ्रातः पुत्र हा मातः प्रलपन्तिमुहुर्मुहुः ।
असिपत्रवने घोरे पतन्तं योऽभिरक्षति ॥ ६१ ॥

प्रतरन्ति निमज्जन्ति ग्लानिं गच्छन्ति जन्तवः ।
चतुर्विधैः प्राणिगणैर्द्रष्टव्या सा महानदी ॥ ६२ ॥
तरन्ति तस्यां सद्दानैरन्यथातुपतन्ति ते । मातरं ये न मन्यन्ते ह्याचार्यं गुरुमेव च
अवजानन्ति मूढा ये तेषां वासस्तु सन्ततम् ।
पतिव्रतां साधुशीलामूढां धर्म्मेषु निश्चलाम् ॥ ६४ ॥
परित्यजन्ति ये पापाः सन्ततं तु वसन्ति ते ।
विश्वासप्रतिपन्नानां स्वामिमित्रतपस्विनाम् ॥ ६५ ॥
स्त्रीबालवृद्धदीनानांच्छिद्रमन्वेषयन्ति ये । पच्यन्तेतत्रमध्येवैक्रन्दमानाःसुपापिनः
श्रान्तं बुभुक्षितं विप्रंयोविघ्नयतिदुर्मतिः । कृमिभिर्भक्ष्यते तत्र यावत्कल्पशतत्रयम्
ब्राह्मणाय प्रतिश्रुत्ययोदानंनप्रयच्छति । आहूयनास्तियोब्रूतेतस्यवासस्तुसन्ततम्
अग्निदोगरदश्चैव राजगामी च पैशुनी । कथाभङ्गकरश्चैव कूटसाक्षी च मद्यपः ॥
वज्रविध्वंसकश्चैव स्वयंदत्तापहारकः । सुक्षेत्रसेतुभेदी च परदारप्रधर्षकः ॥ ७० ॥
ब्राह्मणोरसविक्रेता वृषलीपतिरेव च । गोकुलस्यतृषार्त्तस्य पालीभेदं करोति यः
कन्याभिदूषकश्चैव दानंदत्त्वातु तापकः । शूद्रस्तुकपिलापानीब्राह्मणोमांसभोजनी
एते वसन्ति सततं मा विचारं कृथा नृप !। सानुकूलाभवेद्येन तच्छृणुष्व नराधिप
अयने विषुवे चैव व्यतीपाते दिनक्षये । अन्येषु पुण्यकालेषु दीयते दानमुत्तमम् ॥
कृष्णां वा पाटलां वापि कुर्याद्वैतरणीं शुभाम्
स्वर्णशृङ्गीं रूप्यखुरां कांस्यपात्रस्य दोहिनीम् ॥ ७५ ॥
कृष्णवस्त्रयुगाच्छन्नां सप्तधान्यसमन्विताम् ।
कुर्यात्सद्रोणशिखर आसीनां ताम्रभाजने ॥ ७६ ॥
यमं हैमं प्रकुर्वीत लोहदण्डसमन्वितम् । इक्षुदण्डमयं बद्ध्वा ह्युडुपं पट्टबन्धनैः
उडुपोपरितांधेनुं सूर्यदेहसमुद्भवाम् । कृत्वाप्रकल्पयेद्विद्वांश्च्छत्रोपानद्युगान्विताम्
अङ्गुलीयकवासांसि ब्राह्मणाय निवेदयेत् ।
इममुच्चारयेन्मन्त्रं सङ्गृह्याऽस्याश्च पुच्छकम् ॥ ७९ ॥

ॐयमद्वारे महाघोरे या सावैतरणीनदी । तत्तुं कामोददाम्येनांतुभ्यंवैतरणिनमः
॥ इत्यधिवासनमन्त्रः ॥

गावो मे चाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ ८१ ॥

ॐविष्णुरूपद्विजश्रेष्ठभूदेवपङ्क्तिपावन !। सदक्षिणामया दत्ता तुभ्यंवैतरणि नमः
॥ इति दानमन्त्रः ॥

ब्राह्मणं धर्मराजं च धेनुं वैतरणीं शिवाम् । सर्वंप्रदक्षिणीकृत्य ब्राह्मणायनिवेदयेत्
पुच्छं सङ्गृह्य सुरभेरग्रे कृत्वा द्विजं ततः ॥ ८४ ॥

धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये । उत्तितीर्षु रहं धेनो वैतरण्यै नमोऽस्तुते
॥ इत्यनुव्रजमन्त्रः ॥

अनुव्रजेत गच्छन्तं सर्वं तस्य गृहं नयेत् । एवंकृतेमहीपालसरित्स्यात्सुखवाहिनी
तारयते तया धेन्वा सा सरिज्जलवाहिनी ।
सर्वान्कामानवाप्नोति ये दिव्या ये च मानुषाः ॥ ८७ ॥
रोगीरोगाद्विमुक्तः स्याच्छाम्यन्ति परमापदः ।
स्वस्थे सहस्रगुणितमातुरे शतसम्मितम् ॥ ८८ ॥

मृतस्यैव तुयद्दानं परोक्षेतत्समं स्मृतम् । स्वहस्तेन ततोदेयंमृते कःकस्यदास्यति
इति मत्वा महाराज स्वदत्तं स्यान्महाफलम् ।
इत्येवमुक्तं तव धर्मसूनो! दानं मया वैतरणीसमुत्थम् ।
शृणोति भक्त्या पठतीह सम्यक्स याति विष्णोः पदमप्रमेयम् ॥ ९० ॥

श्रीमार्कण्डेय उवाच

प्राप्ते चाश्वयुजे मासि तस्मिन्कृष्णा चतुर्दशी ।
स्नात्वा कृत्वा ततः श्राद्धं सम्पूज्य च महेश्वरम् ॥ ९१ ॥
पितृभ्यो दीयते दानं भक्तिश्रद्धासमन्वितैः ।
पश्चाज्जागरणं कुर्यात्सत्कथाश्रवणादिभिः ॥ ९२ ॥

ततः प्रभातसमये स्नात्वा वै नर्मदाजले । तर्पणंविधिवत्कृत्वा पितॄणां दैवपूर्वकम्
सौवर्णं घृतसंयुक्तं दीपं दद्याद् द्विजातये ।
पश्चात्सम्भोजयेद्विप्रान्स्वयं चैव विमत्सरः ॥ ९४ ॥

एवंकृतेनरश्रेष्ठ! न जन्तुर्नरकं व्रजेत् । अवश्यमेव मनुजैर्द्रष्टव्या नारकी स्थितिः ॥
अनेन विधिना कृत्वा नपश्येन्नरकान्नरः । तत्र तीर्थेमृतानां तु नराणांविधिनानृप
मन्वन्तरंशिवेलोकेवासोभवतिदुर्लभे । विमानेनाऽर्कवर्णेनकिङ्किणीशतशोभिना
स गच्छति महाभाग! सेव्यमानोऽप्सरोगणैः ।
भुनक्ति विविधान्भोगानुक्तकालं न संशयः ॥ ९८ ॥
पूर्णे चैव ततः काल इह मानुष्यतां गतः ।
सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ९९ ॥

प्राप्यचाश्वयुजेमासिकृष्णपक्षेचतुर्दशीम् । अहोरात्रोषितोभूत्वापूजयित्वामहेश्वरम्
महापातकयुक्तोऽपि मुच्यते नाऽत्र संशयः ॥ १०० ॥

अष्टाविंशतिकोट्योवैनरकाणांयुधिष्ठिर !। विमुक्तानरकेदुःखैःशिवलोकंव्रजन्तिते
तत्र भुक्त्वा महाभोगान्दिव्यैश्वर्यसमन्वितान् ।
लभन्ते मानुषं जन्म दुर्लभं भुवि मानवाः ॥ १०२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डेऽनरकेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनषष्ट्यु त्तरशततमोऽध्यायः ॥

षष्ट्युत्तरशततमोऽध्यायः

मोक्षतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्पाण्डुपुत्र मोक्षतीर्थमनुत्तमम् । सेवितंदेवगन्धर्वैर्मुनिभिश्च तपोधनैः

बहवस्तन्न जानन्ति विष्णुमायाविमोहिताः ।

यत्र सिद्धा महाभागा ऋषयः सतपोधनाः ॥ २ ॥

पुलस्त्यः पुलहो विद्वान्क्रतुश्चैव महामतिः । प्राचेतसोवसिष्ठश्च दक्षो नारदएव च

एते चाऽन्ये महाभागाः सप्तसाहस्रसञ्ज्ञिताः ।

मोक्षं गताः सह सुतैस्तत्तीर्थं तेन मोक्षदम् ॥ ४ ॥

तत्र प्रवाहमध्ये तु पतिता तमहा नदी । तत्र तत्सङ्गमं तीर्थं सर्वपापक्षयङ्करम् ॥

ऋग्यजुःसामसञ्ज्ञानामभ्यस्तानां तु यत्फलम् ।

सम्यग्जप्त्वा तु विधिना गायत्रीं तत्र तल्लभेत् ॥ ६ ॥

तत्र दत्तं हुतं जप्तं तीर्थसेवार्जितं फलम् । सर्वमक्षयतां याति मोक्षसाधनमुत्तमम्

तत्र तीर्थे मृतानां तु संन्यासेन द्विजन्मनाम् ।

अनिवर्त्तिका गतिस्तेषां मोक्षतीर्थप्रभावतः ॥ ८ ॥

एषतेविधिरुद्दिष्टःसंक्षेपेण मयाऽनघ । व्युष्टिस्तीर्थस्य महतीपुराणे याऽभिधीयते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे

रेवाखण्डे मोक्षतीर्थमाहात्म्यवर्णनं नाम षष्ट्युत्तरशततमोऽध्यायः ॥ १६० ॥

एकषष्ट्युत्तरशततमोऽध्यायः

सर्पतीर्थ माहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महाराज सर्पतीर्थमनुत्तमम् ।

यत्र सिद्धा महासर्पास्तपस्तप्त्वा युधिष्ठिर !॥ १ ॥

वासुकिस्तक्षकोघोरः सर्प ऐरावतस्तथा । कालियश्चमहाभागःकर्कोटकधनञ्जयौ

शङ्खचूडो महातेजा धृतराष्ट्रो वृकोदरः । कुलिको वामनश्चैवतेषां ये पुत्रपौत्रिणः

तत्र तीर्थे महापुण्ये तपस्तप्त्वा सुदुष्करम् ।

भुञ्जन्ति विविधान्भोगान्क्रीडन्ति च यथासुखम् ॥ ४ ॥

तत्र तीर्थे तु यः स्नात्वातर्पयेत्पितृदेवताः । वाजपेयफलं तस्य पुरा प्रोवाच शङ्करः

स्नातानांसर्पतीर्थेतुनराणां भुविभारत । सर्पवृश्चिकजातिभ्योन भयंविद्यतेक्वचित्

मृतो भोगवतीं गत्वापूज्यमानोमहोरगैः । नागकन्यापरिवृतो महाभोगपतिर्भवेत्

मार्गशीर्षस्य मासस्य कृष्णपक्षे च याऽष्टमी ।

सोपवासः शुचिर्भूत्वा लिङ्गं सम्पूरयेत्तिलैः ॥

यथाविभवसारेण गन्धपुष्पैः समर्चयेत् ॥ ८ ॥

एवं विधाय विधिवत्प्रणिपत्यक्षमापयेत् । तस्य यत्फलमुद्दिष्टं तच्छृणुष्वनरेश्वर

तिलास्तत्र च यत्सङ्ख्याः पत्रपुष्पफलानि च ।

तावत्स्वर्गपुरे राजन्मोदते कालमीप्सितम् ॥ १० ॥

ततः स्वर्गात्परिभ्रष्टो जायते विमले कुले । सुरूपः सुभगश्चैवधनकोटिपतिर्भवेत्॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

रेवाखण्डे सर्पतीर्थमाहात्म्यवर्णनं नामैकषष्ट्युत्तरशततमोऽध्यायः ॥ १६१ ॥

द्विषष्ट्युत्तरशततमोऽध्यायः

गोपेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

गोपेश्वरं ततो गच्छेत्सर्प्पक्षेत्रादनन्तरम् । यत्र स्नानेन चैकेन मुच्यन्ते पातकैर्नराः
तत्रतीर्थेतुयःस्नात्वाकुरुते प्राणसंक्षयम् । सगच्छेद्यदियुक्तोपिपापेनशिवमंदिरम्
तत्र तीर्थे तुयः स्नात्वा पूजयेद्देवमीश्वरम् । मुच्यतेसर्वपापैश्च रुद्रलोकंसगच्छति

क्रीडित्वा च यथाकामं रुद्रलोके महातपाः ।
इह मानुष्यतां प्राप्य राजा भवति धार्मिकः ॥ ४ ॥

हस्त्यश्वरथसम्पन्नोदासीदाससमन्वितः । पूज्यमानो नरेन्द्रैश्च जीवेद्वर्षशतं सुखी

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे गोपेश्वरतीर्थमाहात्म्यवर्णनं नाम द्विषष्ट्युत्तरशततमोऽध्यायः ॥१६२॥

त्रिषष्ट्युत्तरशततमोऽध्यायः

नागतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महाराज नागतीर्थमनुत्तमम् । आश्विनस्यसितेपक्षेपञ्चम्यांनियतःशुचिः

रात्रौ जागरणं कृत्वा गन्धधूपनिवेदनैः ।
प्रभाते विमले स्नात्वा श्राद्धं कृत्वा यथाविधि ॥ २ ॥
मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ।
तत्र तीर्थे तु यो राजन्प्राणत्यागं करिष्यति ॥ ३ ॥

अनिवर्त्तिका गतिस्तस्य प्रोवाचेति शिवः स्वयम् ॥ ४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नागतीर्थमाहात्म्यवर्णनंनाम त्रिषष्ट्युत्तरशततमोऽध्यायः ॥ १६३ ॥

चतुःषष्ट्युत्तरशततमोऽध्यायः

साम्बौरेश्वरतीमाहात्म्यवर्णनम्

श्रीमार्कण्डे यउवाच

ततो गच्छेन्महाराज! साम्बौरं तीर्थमुत्तमम् ।
यत्र सन्निहितो भानुः पूज्यमानः सुरासुरैः ॥ १ ॥

तत्रयेपङ्गुतांप्राप्ताःशीर्णघ्राणनखानराः । दद्रुमण्डलभिन्नाङ्गा मक्षिकाकृमिसङ्कुलाः

मातापितृभ्यां रहिता भ्रातृभार्याविवर्जिताः ।
अनाथा विकला व्यङ्गा मग्ना ये दुःखसागरे ॥ ३ ॥
तेषां नाथो जगद्योनिर्नर्मदातटमाश्रितः ।
साम्बौरनाथो लोकानामार्त्तिहा दुःखनाशनः ॥ ४ ॥

तत्र तीर्थेतुयः स्नात्वामासमेकंनिरन्तरम् । पूजयेद्भास्करंदेवं तस्यपुण्यफलं शृणु
यत्फलं चोत्तरे पार्थ! तथावै पूर्वसागरे । दक्षिणेपश्चिमेस्नात्वातत्रतीर्थेतुतत्फलम्
कौमारेयौवनेपापंवार्द्धकेयच्चसञ्चितम् । तत्प्रणश्यतिसाम्बौरेस्नानमात्रान्नसंशयः

न व्याधिर्नैव दारिद्र्यं न चैवेष्टवियोजनम् ।
सप्तजन्मानि राजेन्द्र! साम्बौरपरिसेवनात् ॥ ८ ॥

सप्तम्यामुपवासेन तद्दिनेचाप्युपोषिते । सततफलमवाप्नोति तत्रस्नात्वानसंशयः

रक्तचन्दनमिश्रेण यदर्घ्येण फलं स्मृतम् ।
तत्र तीर्थे नृपश्रेष्ठ! स्नात्वा तत्फलमाप्नुयात् ॥ १० ॥

नर्मदासलिलं रम्यं सर्वपातकनाशनम् ।
निरीक्षितं विशेषेण साम्बौरेण महात्मना ॥ ११ ॥
ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ।
स्नात्वा पश्यन्ति देवेशं साम्बौरेश्वरमुत्तमम् ॥ १२ ॥
सूर्यलोके वसेत्तावद्यावदाभूतसम्प्लवम् ॥ १३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेसाम्बौरेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःषष्ट्युत्तरशततमोऽध्यायः

पञ्चषष्ट्युत्तरशततमोऽध्यायः

सिद्धेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले सिद्धेश्वरमितिश्रुतम् ।
तीर्थं परं महाराज! सिद्धैः कृतमिति प्रभो !॥ १ ॥

तत्र तीर्थं महापुण्यं सर्वतीर्थेषुपावनम् । नर्मदायामहाराज दक्षिणं कूलमाश्रितम् तत्र तीर्थे नरः स्नात्वा तर्प्पयेत्पितृदेवताः । श्राद्धंतत्रैवयोदद्यात्पितृनुद्दिश्य भारत

तृप्यन्ति पितरस्तस्य द्वादशाब्दान्न संशयः ।
तत्र तीर्थे तु यो भक्त्या स्नात्वा पूजयते शिवम् ॥ ४ ॥
रात्रौ जागरणं कृत्वा पठेत्पौराणिकीं कथाम् ।
ततः प्रभाते विमले स्नानं कुर्याद्यथाविधि ॥ ५ ॥
वीक्षते गिरिजाकान्तं स गच्छेत्परमां गतिम् ।
पुरा सिद्धा महाभागा कपिलाद्या महर्षयः ॥ ६ ॥
जपन्तश्च परं ब्रह्म योगसिद्धा महाव्रताः ।

सिद्धिं ते परमां प्राप्ता नर्मदायाः प्रभावतः ॥ ७ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे सिद्धेश्वरतीर्थमाहात्म्यवर्णनंनाम पञ्चषष्ट्युत्तरशततमोऽध्यायः ॥

षट्षष्ट्यधिकशततमोऽध्यायः

सिद्धेश्वरीदेवीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः सिद्धेश्वरीदेवीवैष्णवीपापनाशिनी । आनन्दंपरमं प्राप्ताद्दृष्ट्वास्थानंसुशोभनम् तत्रतीर्थे नरः स्नात्वापूजयेत्पितृदेवताः । देवींपश्यतियोभक्त्यामुच्यतेसर्वपातकैः

मृतवत्सा तु या नारी वन्ध्या स्त्री जननी तथा ।
पुत्रं सा लभते नारी शीलवन्तं गुणान्वितम् ॥ ३ ॥
तत्र तीर्थे तु यः स्नात्वा पश्येद्देवीं सुभक्तितः ।
अष्टम्यां वा चतुर्दश्यां सर्वकालेऽथवा नृप !॥ ४ ॥

सङ्गमे तु ततः स्नातः नारीवापुरुषोऽपि वा । पुत्रंधनंतथादेवीददातिपरितोषिता गोत्ररक्षां प्रकुरुते दृष्टा देवी सुपूजिता । प्रजां च पाति सततंपूज्यमानान संशयः

नवम्यां च महाराज! स्नात्वा देवीमुपोषितः ।
पूजयेत्परया भक्त्या श्रद्धापूतेन चेतसा ॥ ७ ॥
स गच्छेत्परमं लोकं यः सुरैरपि दुर्लभः ॥ ८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे सिद्धेश्वरीदेव्यास्तीर्थमाहात्म्यवर्णनंनामषट्षष्ट्युत्तरशततमोऽध्यायः

सप्तषष्ट्युत्तरशततमोऽध्यायः

मार्कण्डेश्वरतीर्थमाहात्म्यवर्णनम्

युधिष्ठिर उवाच

नर्मदादक्षिणेकूले त्वचिह्नेनोपलक्षितम् । तीर्थमेतन्ममाऽऽख्याहि सम्भवंचमहामुने

श्रीमार्कण्डेय उवाच

पुराकृतयुगस्यादौ दक्षिणेगिरिमुत्तममम् । विन्ध्यंसर्वगुणोपेतंनियतोनियताशनः

ऋषिसङ्घैः कृतातिथ्यो दण्डके न्यवसं चिरम् ।
उषित्वा सुचिरं कालं वर्षाणामयुतं सुखी ॥ ३ ॥

तान्नृषीन्समनुज्ञाप्य शिष्यैरनुगतस्ततः । निवृत्तः सुमहाभाग! नर्मदाकूलमागतः

पुण्यं च रमणीयं च सर्वपापविनाशनम् । कृत्वाऽहमास्पदंतत्र द्विजसङ्घसमायुतः

ब्रह्मचारीभिराकीर्णं गार्हस्थ्ये सुप्रतिष्ठितैः ।
वानप्रस्थैश्च यतिभिर्यताहारैर्यतात्मभिः ॥ ६ ॥

तपस्विभिर्महाभागैः कामक्रोधविवर्जितैः । तत्राऽहंवर्षमयुतंतपःकृत्वा सुदारुणम्

आराधयं वासुदेवं प्रभुं कर्त्तारमीश्वरम् । जपंस्तपोभिर्नियमैर्नर्मदाकूलमाश्रितः

ततस्तौ वरदौ देवौ समायातौ युधिष्ठिर !।
प्रत्यक्षौ भास्करौ राजन्नुमाश्रीभ्यां विभूषितौ ॥ ९ ॥

प्रणम्याऽहं ततो देवौ भक्तियुक्तो वचोऽब्रुवम् ।
भवन्तौ प्रार्थयामि स्म वरार्हौ वरदौ शिवौ ॥ १० ॥

धर्मस्थितिं महाभागौ भक्तिं वाऽनुत्तमां युवाम् ।
अजरो व्याधिरहितः पञ्चविंशतिवर्षवत् ॥

अस्मिन्स्थाने सदा स्थेयं सह देवैरसंशयम् ॥ ११ ॥
एवमुक्तौ मया पार्थ! तौ देवौ कृष्णशङ्करौ ।

मामूचतुः प्रहृष्टौ तौ निवासार्थं युधिष्ठिर !॥ १२ ॥

देवावूचतुः

अस्मिन्स्थाने स्थितौ विद्धि सह देवैः सवासवैः ।
एवमुक्त्वा ततो देवौ तत्रैवाऽन्तरधीयताम् ॥ १३ ॥

अहंचस्थापयित्वातौशङ्करंकृष्णमव्ययम् । कृतकृत्यस्ततोजातःसम्पूज्यसुसमाहितः

तस्मिंस्तीर्थे नरः स्नात्वा पूजयेत्परमेश्वरम् ।
मार्कण्डेश्वरनाम्ना वै विष्णुं त्रिभुवनेश्वरम् ॥ १५ ॥

स गच्छेत्परमंस्थानं वैष्णवं शैवमेव च । घृतेन पयसावाऽथ दध्नाच मधुना तथा

नार्मदेनोदकेनाऽथ गन्धधूपैः सुशोभनैः । पुष्पोपहारैश्च तथा नैवेद्यैर्नियतात्मवान्

एवं विष्णोः प्रकुर्वीतजागरंभक्तितत्परः । स्नानादीनितथाराजन्प्रयतःशुचिमानसः

ज्येष्ठे मासि सिते पक्षे चतुर्दश्यामुपोषितः । द्वादश्यां कारयेद्देवपूजनं वैष्णवोनरः

एवं कृत्वाचतुर्दश्यामेकादश्यां नरोत्तम !। वैष्णवंलोकमाप्नोतिविष्णुतुल्योभवेन्नरः

माहेश्वरे च राजेन्द्र! गणवन्मोदते पुरे । श्राद्धं च कुरुते तत्र पितॄनुदिश्य सुस्थिरः

तस्य ते ह्यक्षयां तृप्तिं प्राप्नुवन्ति न संशयः ।
नर्मदायां द्विजः स्नात्वा मौनी नियतमानसः ॥ २२ ॥

उपास्य सन्ध्यां तत्रस्थो जपं कृत्वा सुशोभनम् ।
तर्पयित्वा पितॄन्देवान्मनुष्यांश्च यथाविधि ॥ २३ ॥

कृष्णस्य पुरतः स्थित्वा मार्कण्डेशस्य वा पुनः ।
ऋग्यजुःसाममन्त्रांश्च जपेदत्र प्रयत्नतः ॥ २४ ॥

ऋचमेकांजपेद्यस्तुऋग्वेदस्य फलं लभेत् । यजुर्वेदस्य यजुषासाम्नासामफलंलभेत्

एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ।
मृतप्रजा तु या नारी वन्ध्या स्त्रीजननी तथा ॥ २६ ॥

रुद्रांस्तु विधिवज्जप्त्वा ब्राह्मणो वेदतत्त्ववित् ।
लिङ्गस्य दक्षिणे पार्श्वे स्थापयेत्कलशं शिवम् ॥ २७ ॥

रुद्रैकादशभिर्मन्त्रै स्नापयेत्कलशाम्भसा । पुत्रमाप्नोतिराजेन्द्र दीर्घायुषमकल्मषम्

मार्कण्डेश्वरवृक्षान्यो दूरस्थानपि पश्यति ।

ब्रह्महत्यादिपापेभ्यो मुच्यते शङ्करोऽब्रवीत् ॥ २६ ॥

य इदं शृणुयाद्भक्त्या पठेद्वा नृपसत्तम !। सर्वपापविशुद्धात्मा जायतेनाऽत्रसंशयः

इदं यशस्यमायुष्यंधन्यं दुःस्वप्ननाशनम् । पठतांशृण्वतां वाऽपिसर्वपापप्रमोचनम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे मार्कण्डेश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तषष्ट्युत्तरशततमोऽध्यायः ॥

अष्टषष्ट्यधिकशततमोऽध्यायः

अङ्कूरेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे रोधस्यङ्कूरेश्वरमुत्तमम् । तीर्थं सर्वगुणोपेतं त्रिषु लोकेषु विश्रुतम्

यत्रसिद्धंमहारक्षआराध्यतु महेश्वरम् । शङ्करंजगतः प्राणं स्मृतिमात्रावहारिणम्

युधिष्ठिर उवाच

किं तद्रक्षो द्विजश्रेष्ठ!किंनाम कस्यवाऽन्वये । एतद्विस्तरतःसर्वंकथयस्वममाऽनघ

अज्ञानतिमिरान्धा ये पुमांसः पापकारिणः ।

युष्मद्विधैर्दीपभूतैः पश्यन्ति सचराचरम् ॥ ४ ॥

धर्मपुत्रवचःश्रुत्वामार्कण्डेयोमुनीश्वरः। स्मितंकृत्वाबभाषेतांकथांपापप्रणाशनीम्

मार्कण्डेय उवाच

मानसोब्रह्मणःपुत्रः पुलस्त्योनामपार्थिवः । वेदशास्त्रप्रवक्ताचसाक्षाद्वेधाइवाऽपरः

तृणबिन्दुसुता तस्य भार्याऽऽसीत्परमेष्ठिनः ।

तस्य धर्मप्रसङ्गेन पुत्रो जातो महामनाः ॥ ७ ॥

यस्माद्वेदेतिहासैश्च सषडङ्गपदक्रमाः । विश्रान्ता ब्रह्मणा दत्ता नामविश्रवसेतिच

कस्मिंश्चिदथ काले च भरद्वाजो महामुनिः ।

स्वसुतां प्रददौ राजन्मुदा विश्रवसे नृप !॥ ६ ॥

स तया रमतेसार्धं पौलोम्या मघवा इव । मुदा परमयाराजन्ब्राह्मणो वेदवित्तमः

केनचित्त्वथकालेन पुत्रः पुत्रगुणैर्युतः । जज्ञे विश्रवसो राजन्नाम्ना वैश्रवणः श्रुतः

सोऽपिमौनव्रतं कृत्वा बालभावाद्युधिष्ठिर । सर्वभूताभयंदत्त्वाचचार परमम्व्रतम्

तस्य तुष्टो महादेवो ब्रह्मा ब्रह्मर्षिभिः सह ।

सखित्वं चेश्वरो दत्त्वा धनदत्वं जगाम ह ॥ १३ ॥

यमेन्द्रवरुणानां च चतुर्थस्त्वं भविष्यसि ।

ब्रह्माऽप्युक्त्वा जगामाऽऽशु लोकपालत्वमीप्सितम् ॥ १४ ॥

ततस्त्वनन्तरेकालेकैकसीनामराक्षसी । पातालंभूतलंत्यक्त्वाविश्रवंचकमे पतिम्

पुत्रोऽथ रावणो जातस्तस्या भरतसत्तम !।

कुम्भकर्णो महारक्षो धर्मात्मा च विभीषणः ॥ १६ ॥

कुम्भश्चैव निकुम्भश्च कुम्भकर्णसुतावुभौ । महाबलौ महावीर्यौमहान्तौ पुरुषोत्तम

अङ्कूरो राक्षसश्रेष्ठः कुम्भस्य तनयो महान् ।

विभीषणं च गुणवद्दृष्ट्वैवं राक्षसोत्तमः ॥ १८ ॥

ततः स यौवनं प्राप्य ज्ञात्वा रक्षः पितामहम् । परं निर्वेदमापन्नश्चचार सुमहत्तपः

दक्षिणं पश्चिमं गत्वा सागरं पूर्वमुत्तरम् । नर्मदायां प्रसङ्गेन ह्यङ्कूरोराक्षसेश्वरः

तपश्चचार सुमहद्दिव्यं वर्षशतंकिल । ततस्तुष्टो महादेवः साक्षात्परपुरञ्जयः ॥२१॥

वरेण च्छन्दयामास राक्षसं वृषकेतनः । वरं वृणीष्व भन्द्रते तव दास्यामि सुव्रत

प्रोवाच राक्षसो वाक्यं देवदेवं महेश्वरम् । वरदं सोऽग्रतो दृष्ट्वाप्रणम्य च पुनःपुनः

यदि तुष्टो महादेव! वरदोऽसि सुरेश्वर !।

दुर्लभं सर्वभूतानाममरत्वं प्रयच्छ मे ॥ २४ ॥

ममनाम्ना स्थितोऽनेनवरेणत्रिपुरान्तक !। सदासन्निहितोऽप्यत्रतीर्थेभवितुमर्हसि

ईश्वर उवाच

यावद्विभीषणमतंयावद्धर्मनिषेवणम् । करिष्यसि दृढात्मात्वं तावदेतद्भविष्यति

एवमुक्त्वा ययौ देवः सर्वदेवतपूजितः । विमानेनाऽर्कवर्णेन कैलासं धरणीधरम्

गते चाऽदर्शनं देवे स्नात्वाऽऽचम्य विधानतः ।

स्थापयामास राजेन्द्र! ह्यङ्कूरेश्वरमुत्तमम् ॥ २८ ॥

गन्धपुष्पैस्तथा धूपैर्वस्त्रालङ्कारभूषणैः । पताकैश्चामरैश्छत्रैर्जयशब्दादिमङ्गलैः

पूजयित्वा सुरेशानं स्तोत्रैर्हृद्यैः सुपुष्कलैः ।

जगाम भवनं रक्षो यत्र राजा विभीषणः ॥ ३० ॥

पूजितः स यथान्यायं दानसन्मानगौरवैः ।

सौदर्ये स्थापितो भावे सोऽवासीत्सीत्तपरयामुदा ॥ ३१ ॥

तत्रतीर्थे तु यः स्नात्वापूजयेत्परमेश्वरम् । अङ्कूरेश्वरनामानं सोऽश्वमेधफलंलभेत्

माण्डव्यखातमारभ्य सङ्गमं वाऽपि यच्छुभम् ।

रेवाया आमलक्याश्च देवक्षेत्रं महेश्वरम् ॥ ३३ ॥

माण्डव्यखातात्पश्चिमतस्तीर्थं तदङ्कूरेश्वरम् ।

तत्र तीर्थे नरः स्नात्वा शुचिः प्रयतमानसः ॥ ३४ ॥

सन्ध्यामाचम्ययत्नेन जपंकृत्वाऽथभारत । तर्पयित्वापितॄन्देवान्मनुष्यान्भरतर्षभ

सचैलःक्लिन्नवसनोमौनमास्थायसंयतः । अष्टम्यां वा चतुर्दश्यामुपोष्यविधिवन्नरः

पूजां यः कुरुते राजंस्तस्य पुण्यफलं शृणु ।

साग्रं तु योजनशतं तीर्थान्यायतनानि च ॥ ३७ ॥

भवन्ति तानि दृष्टानि ततः पापैः प्रमुच्यते ।

तत्र तीर्थे तु यद्दानं देवमुद्दिश्य दीयते ॥ ३८ ॥

स्नात्वा तु विधिवत्पात्रे तदक्षयमुदाहृतम् ।

होमाद्दशगुणं प्रोक्तं फलं जाप्ये ततोऽधिकम् ॥ ३६ ॥

त्रिगुणंचोपवासेनस्नानेन च चतुर्गुणम् । संन्यासंकुरुतेयस्तु प्राणत्यागंकरोतिवा

अनिवर्त्तिकागतिस्तस्यरुद्रलोकादसंशयम् । कृमिकीटपतङ्गानां तत्रतीर्थेयुधिष्ठिर

अङ्कूरेश्वरनामाख्ये मृतानां सुगतिर्भवेत् ॥ ४१ ॥

एतत्ते कथितं राजन्नङ्कूरेश्वरसम्भवम् । तीर्थं सर्वगुणोपेतं परमम्पापनाशनम् ॥

येऽपि शृण्वन्ति भक्त्येदं कीर्त्यमानं महाफलम् ।

लभन्ते नाऽत्र सन्देहः शिवस्य भुवनं हि ते ॥ ४३ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे अङ्कूरेश्वरतीर्थमाहात्म्यवर्णनंनामाऽष्टषष्ट्युत्तरशततमोऽध्यायः ॥

एकोनसप्तत्यधिकशततमोऽध्यायः

काममोदिनीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेत्परंतीर्थंपुण्यंपापप्रणाशनम् । माण्डव्योयत्रसंसिद्धऋषिर्नारायणस्तथा

नारायणेन शुश्रूषाशूलस्थेनकृतापुरा । तत्र स्नात्वामहाराज मुच्यतेपापकञ्चुकात्

युधिष्ठिर उवाच

आश्चर्यमेतल्लोकेषु यत्त्वया कथितं मुने !। न दृष्टं न श्रुतं तात! शूलस्थेन तपः कृतम्

एतत्सर्वं कथय मे ऋषिभिः सहितस्य वै ।

अस्य तीर्थस्य माहात्म्यं माण्डव्यस्य कुतूहलात् ॥ ४ ॥

श्रीमार्कण्डेय उवाच

शृणु राजन्यथावृत्तं पुरा त्रेतायुगेक्षितौ । लोकपालोपमो राजादेवपन्नोमहामतिः

धर्मज्ञश्च कृतज्ञश्च यज्वादानरतः सदा । प्रजा ररक्ष यत्नेन पिता पुत्रानिवौरसान्

दात्यायनीप्रिया भार्या तस्य राज्ञोवशानुगा । हारनूपुरघोषेण झङ्काररवनादिता

परस्परं तयोः प्रीतिर्वर्द्धतेऽनुदिनं नृप !।

वंशस्तम्बे स्थितोराजा संशास्ति पृथिवीमिमाम् ॥ ८ ॥
हस्त्यश्वरथसम्पूर्णां धनवाहनसंयुताम् । अलङ्कृतो गुणैः सर्वैरनपत्यो महीपतिः
दुःखेनमहताऽऽविष्टःसन्तप्तःसन्ततिंविना ।स्नानहोमरतोनित्यंद्वादशाब्दानिभारत
व्रतोपवासनियमैः पत्नीभिः सह तस्थिवान् ।
आराधयद्भगवतीं चामुण्डां मुण्डमर्दिनीम् ॥ ११ ॥
स्तोत्रैरनेकैर्भक्त्या च पूजाविधिसमाधिना ।
जय वाराहि चामुण्डे जय देवि! त्रिलोचने !॥ १२ ॥
ब्राह्मि ! रौद्रि ! च कौमारि ! कात्यायनि ! नमोऽस्तु ते ।
प्रचण्डे! भैरवे! रौद्रि! योगिन्याकाशगामिनि !॥ १३ ॥
नास्तिकिञ्चित्त्वयाहीनंत्रैलोक्येसचराचरे । राज्ञास्तुताचसंतुष्टादेवीवचनमब्रवीत्
वरयस्व यथाकामं यस्ते (यत्ते) मनसि वर्त्तते ।
आराधिता त्वया भक्त्या तुष्टा दास्यामि ते वरम् ॥ १५ ॥

देवपन्न उवाच

यदि तुष्टाऽसि देवेशि वरार्हो यदिवाऽप्यहम् । पुत्रसन्तानरहितं संतप्तं मांसमुद्धर
सन्तानं नयमे वृद्धिंगोत्ररक्षां कुरुष्व मे । अपुत्रिणांगृहाणीह श्मशानसदृशानिहि
पितरस्तस्यनाश्नन्ति देवताऋषिभिःसह । क्रियमाणेऽप्यहरहःश्राद्धेमत्पितरःसदा
दर्शयन्ति सदाऽऽत्मानं स्वप्ने क्षुत्पीडितं मम ।
इति राज्ञो वचः श्रुत्वा देवी ध्यानमुपागता ॥ १६ ॥
दिव्येन चक्षुषा दृष्टं त्रैलोक्यं सचराचरम् । प्रसन्नवदना देवी राजानमिदमब्रवीत्
सन्तानं नाऽस्ति ते राजंस्त्रैलोक्ये सचराचरे ।
यजस्व यज्ञपुरुषमपत्यं नास्ति तेऽन्यथा ॥ २१ ॥
मयादृष्टंमहीपालत्रैलोक्यं दिव्यचक्षुषा । एवमुक्त्वागता देवीराजास्वगृहमागमत्
इयाज यज्ञपुरुषं सञ्जाता कन्यका ततः । तेजस्विनी रूपवती सर्वलोकमनोहरा ॥
देवगन्धर्वलोकेऽपि तादृशी नास्ति कामिनी ।

तस्या नाम कृतं पित्रा हर्षात्कामप्रमोदिनी ॥ २४ ॥
ततःकालेनववृधेरूपेणास्तम्भयज्जगत् । हंसलीलागतिः सुभ्रूः स्तनभारावनामिता
रक्तमाल्याम्बरधरा कुण्डलाभरणोज्ज्वला ।
दिव्यानुलेपनवती सखीभिः सा सुरक्षिता ॥ २६ ॥
कुचमध्यगतो हारोविद्युन्मालेवराजते । भ्रमराञ्चितकेशीसाबिम्बोष्ठीचारुहासिनी
कर्णान्तप्राप्तनेत्राभ्यां पिबन्तीवाऽथ कामिनः ।
चन्द्रताम्बूलसौरभ्यैराकर्षन्तीव मन्मथम् ॥ २८ ॥
कम्बुग्रीवा चारुमध्या ताम्रपादाङ्गुलीनखा ।
निम्ननाभिः सुजघना रम्भोरू सुदती शुभा ॥ २६ ॥
मातापितृसुहृद्वर्गे क्रीडानन्दविवर्द्धिनी ।
एकस्मिन्दिवसे बाला सखीवृन्दसमन्विता ॥ ३० ॥
चन्दनागरुताम्बूलधूपसौमनसाञ्चिता । गृहीत्वा पुष्पधूपादि गता देवीप्रपूजने ॥
तडागतट उत्सृज्यभूषणान्यङ्गवेष्टकान् । चक्रुःसरसिताःक्रीडां जलमध्यगतास्तदा
क्रीडन्तींतामवेक्ष्याथससखीं विमलेजले । राक्षसःशंबरो नामश्येनरूपेणचाऽऽगमत्
गृहीता जलमध्यस्था तेन सा काममोदिनी ।
खमुत्पपात दुष्टात्मा गृहीत्वाऽऽभरणान्यपि ॥ ३४ ॥
वायुमार्गं गतः सोऽथ कामिन्या सह भारत !।
अपतन्कुण्डलादीनि यत्र तोये महामुनिः ॥ ३५ ॥
माण्डव्यो नर्मदातीरे काष्ठवत्सञ्जितेन्द्रियः । लीनोमाहेश्वरे स्थानेनारायणपदेपरे
तस्य चानुचरोभ्राता भ्रातुः शुश्रूषणे रतः । तपोजपकृशीभूतो दध्यौदेवं जनार्दनम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डेकाममोदिनीहरणवर्णनं नामैकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६६ ॥

सप्तत्यधिकशततमोऽध्यायः

माण्डव्यशूलारोपणवर्णनम्

श्रीमार्कण्डेय उवाच

कामप्रमोदिनीसख्यो नीयमानांचतेनतु । दृष्ट्वाताश्चुक्रुशुःसर्वानिःसृत्यजलमध्यतः
गताराजगृहेसर्वाः कथयन्तिसुदुःखिताः । कामप्रमोदिनीराजन्हृताश्येनेनपक्षिणा

क्रीडन्ती च जलस्थाने तडागे देवसन्निधौ ।
अन्वेष्या च त्वयाराजंस्तस्य मार्गं विजानता ॥ ३ ॥
तासां तद्वचनं श्रुत्वा देवपन्नः सुदुःखितः ।
हाहेत्युक्त्वा समुत्थाय रुदमानो वरासनात ॥ ४ ॥
मन्त्रिभिः सहितस्तस्मिंस्तडागे जलसन्निधौ ।
न चिह्नं न च पन्थानं दृष्ट्वा दुःखान्मुमोह च ॥ ५ ॥
तस्य राज्ञस्तु दुःखेन दुःखितो नागरो जनः ।
क्षणेनाऽऽश्वासितो राजा मन्त्रिभिः सपुरोहितैः ॥ ६ ॥
किं कुर्म इत्युवाचेदमस्मिन्काले विधीयताम् ।
सर्वैस्तत्सम्विदं कृत्वा वाहिनीं चतुरङ्गिणीम् ॥ ७ ॥

प्रेषयामि दिशःसर्वा हस्त्यश्वरथसंकुला । वादित्राणिचवाद्यंतेव्याकुलीभूतसङ्कुले
नाराचैस्तोमरैर्भल्लैः खड्गैः परश्वधादिभिः । राजासंनाहबद्धोऽभूद्गगनंग्रसतेकिल
नदेवोनचगन्धर्वोनदैत्योनच राक्षसः । किंकरिष्यतिराजाऽद्य नजानेरोषनिष्कृतिम्

नागरोऽपि जनस्तत्र दृष्ट्वा चकितमानसः ।
चतुर्दशसहस्राणि दन्तिनां सृणिधारिणाम् ॥ ११ ॥
अश्वारोहसहस्राणि ह्यशीतिः शस्त्रपाणिनाम् ।
रथानां त्रिससहस्राणि विंशतिर्भरतर्षभ !॥ १२ ॥

सङ्ग्रामभेरीनिनदैःखुररेणुर्नभोगता । एतस्मिन्नंतरे तात रक्षको नगरस्य हि ॥
गृहीत्वाऽऽभरणं तस्यास्त्वङ्गप्रत्यङ्गिकंतथा । कुण्डलाङ्गदकेयूरहारनूपुरझल्लरीः
निवेद्याकथयद्राज्ञेमयादृष्टंत्ववेक्षणात् । तापसानामाश्रमे तु माण्डव्योयत्रतिष्ठति
तापसैर्वेष्टितो यत्र ददृशे तत्र सन्निधौ । दण्डवासिवचःश्रुत्वाप्रत्यक्षाङ्गविभूषणम्
स क्रोधरक्तनयनो मन्त्रिणो वीक्ष्यनैगमान् । ईदृग्भूतस्समाचारोब्राह्मणोनगरेमम
चौरचर्यां व्रतच्छन्नःपरद्रव्यापहारकः । तेनकन्याहृता मेऽद्य तपस्विपापकर्मिणा

शाकुन्तं रूपमास्थाय जलस्थो गगनं ययौ ।
पाखण्डिनो विकर्मस्थान्बिडालव्रतिकाञ्छठान् ॥ १९ ॥
चाटुतस्करदुर्वृत्तान्हन्यान्नास्त्यस्य पातकम् ।
नदृष्टव्यो मया पापः स्तेयी कन्यापहारकः ॥ २० ॥

शूलमारोप्यतां क्षिप्रंन विचारस्तुतस्यवै । सच वध्योमयादुष्टोरक्षोरूपी तपोधनः

एवं ब्रुवंश्चलन्क्रोधादादिश्य दण्डवासिनम् ।
कार्याकार्यं न विज्ञाय शूलमारोपयद्द्विजम् ॥ २२ ॥
पौरा जानपदाः सर्वे अश्रुपूर्णमुखास्तदा ।
हाहेत्युक्त्वा रुदन्त्यन्ये वदन्ति च पृथक्पृथक् ॥ २३ ॥

कुत्सितं चकृतंकर्मराज्ञा चण्डालचारिणा । ब्रह्मणोनैव वध्योहिविशेषेणतपोवृतः

यदि रोषसमाचारो निर्वास्यो नगराद्बहिः ।
न जातु ब्राह्मणं हन्यात्सर्वपापेऽप्यवस्थितम् ॥ २५ ॥

राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् । नाश्नातिचगृहे राजन्नाग्निर्नगरवासिनाम्

सर्वेऽप्युद्विग्नमनसो गृहव्याप्तिविवर्जिताः ॥ २६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे माण्डव्यशूलारोपणवर्णनंनाम सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

———

एकसप्तत्यधिकशततमोऽध्यायः

शाण्डिलीमहर्षिसम्वादवर्णनम्

श्रीमार्कण्डेय उवाच

कथितं ब्राह्मणं दृष्ट्वा शूलेक्षिप्तं तपोधनैः । नारायणसमीपे तु गताः सर्वे महर्षयः

नारदो देवलो रैभ्यो यमः शातातपोऽङ्गिराः ।

वसिष्ठो जमदग्निश्च याज्ञवल्क्यो बृहस्पतिः ॥ २ ॥

कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽरुणिर्मुनिः ।

वालखिल्यादयोऽन्ये च सर्वेप्यृषिगणाऽन्वयाः ॥ ३ ॥

ददृशुः शूलमारूढं माण्डव्यमृषिपुङ्गवाः । प्रोचुर्नारायणं विप्रंकिंकुर्मस्तवचेप्सितम्

सर्वे ते तत्र सान्निध्यान्माण्डव्यस्य महात्मनः ।

सम्भ्रान्ता आगता ऊचुः किं मृतः किं नु जीवति ॥ ५ ॥

अवस्थां तस्यतेदृष्ट्वाविषादमगमन्परम् । असहित्वातुतद्दुःखंसर्वेते मनसाद्विजाः

पृच्छयतां यदि मन्येत राजानं भस्मसात्कुरु ।

तेषां तद्वचनं श्रुत्वा वाक्यं नारायणोऽब्रवीत् ॥ ७ ॥

मयि जीवति मद्भ्राता ह्यवस्थामीदृशीं गतः ।

धिग्जीवितं च मे किन्तु तपसो विद्यते फलम् ॥ ८ ॥

दृष्ट्वाशूलस्थितंज्येष्ठं मन्मनोऽनुविदीर्यते । परंकिंतुकरिष्यामि येनराष्ट्रं सराजकम्

भस्मसाच्च करोम्यद्य भवद्भिः क्षम्यतामिह ।

एवमुक्त्वा गृहीत्वाऽसौ करस्थमभिमन्त्रयेत् ॥ १० ॥

क्रोधेन पश्यते यावत्तावद्धुङ्कारकोऽभवत् ।

तेन हुंकारशब्देन ऋषयो विस्मितास्तदा ॥ ११ ॥

माण्डव्यस्य समीपे तु ह्यपृच्छंस्ते द्विजोत्तमाः ।

निवारयसि किं विप्र! शापं नृपजिघांसनम् ॥ १२ ॥

अपापस्य तु येनेह कृतमस्य जिघांसनम् ।

ऋषीणां वचनं श्रुत्वा कृच्छ्रान्माण्डव्यकोऽब्रवीत् ॥ १३ ॥

अभिवन्दामि वोमूर्ध्ना स्वागतं ऋषयः सदा ।

अर्घ्यसन्मानपूजार्हाः सर्वेऽत्रोपविशन्तु ते ॥ १४ ॥

निविष्टैकाग्रमनसा सर्वान्माण्डव्यकोऽब्रवीत् ॥ १५ ॥

प्राप्तं दुःखं मयाघोरं पूर्वजन्मार्जितंफलम् । माविषादं कुरुध्वं भोःकृतंपापंतुभुज्यते

ऋषय ऊचुः

केन कर्मविपाकेन इहजात्यन्तरं व्रजेत् । दानधर्मफलेनैव केन स्वर्गं च गच्छति ॥

माण्डव्य उवाच

अदत्तदाना जायन्तेपरभाग्योपजीविनः । नस्नानंनजपोहोमो नातिथ्यंनसुरार्चनम्

नपर्वणिपितृश्राद्धंनदानं द्विजसत्तमाः । व्रजन्तिनरके घोरेयान्तितेत्वन्त्यजांगतिम्

पुनर्दरिद्राः पुनरेव पापाः पापप्रभावान्नरके वसन्ति ।

तेनैव संसारिणि मर्त्यलोके जीवादिभूते कृमयः पतङ्गाः ॥ २० ॥

ये स्नानशीला द्विजदेवभक्ता जितेन्द्रिया जीवदयानुशीलाः ।

ते देवलोकेषु वसन्ति हृष्टा ये धर्मशीला जितमानरोषाः ॥ २१ ॥

विद्याविनीता न परोपतापिनः स्वदारतुष्टाः परदारवर्जिताः ।

तेषां न लोके भयमस्ति किंचित्स्वभावशुद्धा गतकल्मषा हि ते ॥ २२॥

ऋषय ऊचुः

पूर्वजन्मनि विप्रेन्द्र! किं त्वयादुष्कृतंकृतम् । येन कष्टमिदंप्राप्तं सन्धानंशूलगर्हितम्

शूलस्थंत्वांसमालक्ष्यह्यागताःसर्वएवहि । जीवन्तंत्वां प्रपश्याम त्वंतरन्नवतारयन्

रुजा सन्तापजं दुःखं सोढ्वापि त्वमवेदनः ॥ २४ ॥

माण्डव्य उवाच

स्वयमेव कृतं कर्म स्वयमेवोपभुज्यते । सुकृतं दुष्कृतं पूर्वं नान्ये भुञ्जन्तिकर्हिचित्

यथा धेनुसहस्रेषु वत्सो विन्दतिमातरम् । तथा पूर्वकृतं कर्म कर्त्तारमुपगच्छति ॥

न माता न पिता भ्राता न भार्या न सुताः सुहृत् ।
न कस्य कर्मणां लेपः स्वयमेवोपभुज्यते ॥ २७ ॥

श्रूयतां ममवाक्यंचभवद्भिः पृच्छितोह्यहम् । पूर्ववयसिभो विप्रामलज्ञानकृतक्षणः

अज्ञानाद्बालभावेन यूका कण्टेऽधिरोपिता ।
तैलाभ्यक्तशिरोगात्रे मया यूका धृता न हि ॥ २९ ॥

कङ्कुतींरोप्यकेशेषुसासा कण्टेऽधिरोपिता । तेषु पापंकृतंसद्यः फलमेतन्ममाभवत्

किंचित्कालं क्षपित्वाऽहं प्राप्स्ये मोक्षं निरामयम् ।
भवन्तस्त्विह सन्तापं मा कुरुध्वं महर्षयः ॥ ३१ ॥
इमामवस्थां भुक्त्वाऽहं कञ्चिच्छपे न चोचरे ।
अहानि कतिचिच्छूले क्षपयिष्यामि किल्बिषम् ॥ ३२ ॥
प्राक्तनं कर्म भुञ्जामि यन्मया सञ्चितं द्विजाः ।
क्षन्तव्यमस्य राज्ञोऽथ कोपश्चैव विसर्ज्यताम् ॥ ३३ ॥
श्रुत्वा तु तस्य तद्वाक्यं माण्डव्यस्य महर्षयः ।
प्रहर्षमतुलं लब्ध्वा साधुसाध्वित्यपूजयन् ॥ ३४ ॥

नारायण उवाच

इदंजलंमन्त्रपूतंकस्मिन्स्थानेक्षिपाम्यहम् । येन राजाभवेद्भस्मसराष्ट्रःसपुरोहितः

माण्डव्य उवाच

इदं जलं च रक्षस्वकालकूटविषोपमम् । समुद्रे क्षिपयिष्यामिदेवकार्यंसमुत्थितम्

अथ ते मुनयः सर्वे माण्डव्यं प्रणिपत्य च ।
आमन्त्रयित्वा हर्षाच्च कश्यपाद्या गृहान् ययुः ॥ ३७ ॥
गच्छमानास्तु ते चोक्ताः पञ्चमेऽहनि तापसाः ।
आगन्तव्यं भवद्भिश्च मत्सकाशं प्रतिज्ञया ॥ ३८ ॥

तथेति ते प्रतिज्ञाय नारदाद्या अदर्शनम् । गतेषु विप्रमुख्येषु शाण्डिलीचतपोधना

द्वितीयेऽह्नि समायाता न तु बुध्वाऽथ तं ऋषिम् ।
भर्त्तारं शिरसा धार्य रात्रौ पर्यटते स्म सा ॥ ४० ॥
न दृष्टः शूलके विप्रो भाराक्रान्त्या युधिष्ठिर !।
स्खलिता तस्य जानुभ्यां शूलस्थस्य पतिव्रता ॥ ४१ ॥
सर्वाङ्गेषु व्यथा जाता तस्याः प्रस्खलनान्मुनेः ।
ईदृशीं वर्त्तमानां च ह्यवस्थां पूर्वदैविकीम् ॥ ४२ ॥

पुनःपापफलं किञ्चिद्वाकष्टममवर्त्तते । व्यथितोऽहंत्वयापापे किमर्थंखलकर्मणि

स्वैरिणीं त्वां प्रपश्यामि राक्षसी तस्करी नु किम् ।
एवमुक्त्वा क्षणं मोहात्क्रन्दमानो मुहुर्मुहुः ॥ ४४ ॥

तपस्विनोऽथऋषयःसर्वेसंत्रस्तमानसाः । पश्यमानामुनेः कष्टं पृच्छन्तेतेयुधिष्ठिर

पर्यटसे किमर्थं त्वं निशीथे वहनं नु किम् ।
क्षिप्तं तु झोलिकाभारं किंवाऽऽगमनकारणम् ॥
व्यथामुत्पाद्य ऋषये दुःखाद् दुःखविलासिनि !॥ ४६ ॥

शाण्डिल्युवाच

नाऽसुरीं न च गन्धर्वीं न पिशाचीं न राक्षसीम् ।
पतिव्रतां तु मां सर्वे जानन्तु तपसि स्थिताम् ॥ ४७ ॥

नमेकामोनमेक्रोधो नवैरं न च मत्सरः । अज्ञानाद्दृष्टिमान्द्याच्चस्खलनं क्षन्तुमर्हथ

वहनं भर्तृसौख्याय दिवा सम्पीड्यते रुजा ।
अयं भर्त्ता विजानीथ झोलिका संस्थितः सदा ॥ ४९ ॥
भरणं पानं वस्त्रं च ददाम्येतस्य रोगिणः ।
ऋषिः शौनकमुख्योऽसौ शाण्डिलीं मां विजानत ॥ ५० ॥

स्वभर्तृधर्मिणीं कोपं मा कुरुध्वातिथिंकुरु । सतांसमीपंसम्प्राप्तांसर्वेक्षन्तुमर्हथ

ऋषय ऊचुः

परव्यथां न जानीषे व्यचरन्ती यदृच्छया । प्रभातेऽभ्युदितेसूर्येतवभर्त्तामरिष्यति

आत्मदुःखात्परं दुःखं न जानासि कुलाधमे !।
तेन वाक्येन घोरेण शाण्डिली विमनाऽभवत् ॥ ५३ ॥
परं विषादमापन्ना क्षणं ध्यात्वाऽब्रवीद्वचः ।
कोपात्संरक्तनयना निरीक्षन्ती मुनींस्तदा ॥ ५४ ॥
सतां गेहे किल प्राप्ता भवतां चाऽपकारिणी ।
सामेनातिथिपूजायां शिष्टे च गृहमागते ॥ ५५ ॥
भवद्भिरीदृगातिथ्यं कृतञ्चैव ममैव तु । स्वर्गापवर्गधर्मश्च भवद्भिर्न निरीक्षितम्
प्राजापत्यामिमां दृष्ट्वा मां यथा प्राकृताः स्त्रियः ।
भवन्तः स्त्रीबलं मेऽद्य पश्यन्तु दिवि देवताः ॥ ५७ ॥
मरिष्यति न मे भर्त्ता ह्यादित्यो नोदयिष्यति ।
अन्धकारं जगत्सर्वं क्षीयते नाऽद्य शर्वरी ॥ ५८ ॥
एवमुक्ते तथा वाक्येस्तम्भितेऽर्कैतमोमयम् । नचप्रजायतेसर्वंनिर्वषट्कासत्क्रियम्
स्वाहाकारः स्वधाकारः पञ्चयज्ञविधिर्न हि ।
स्नानं दानं जपो नास्ति सन्ध्यालोपव्यतिक्रमः ॥
षण्मासं च तदा पार्थ लुप्तपिण्डोदकक्रियम् ॥ ६० ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शाण्डिलीऋषिसम्वादवर्णनं नामैकसप्तत्युत्तरशततमोऽध्यायः ॥१७१॥

द्विसप्तत्युत्तरशततमोऽध्यायः

माण्डव्यतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

अथ तेऋषयःसर्वे देवाश्चेन्द्रपुरोगमाः । माण्डव्यस्याऽऽश्रमे पुण्ये समीयुर्नर्मदातटे
शङ्खदुन्दुभिनादेन दीपिकाज्वलनेन च । अप्सरोगीतनादेननृत्यन्त्यो वारयोषितः
कथानकैः स्तुवन्त्यन्ये तस्य शूलाग्रधारिणः ।
अष्टाशीतिसहस्राणि स्नातकानां तपस्विनाम् ॥ ३ ॥
समाजेत्रिदशैःसार्द्धं तत्र ते चदिदृक्षया । ब्रह्मविष्णुमहेशानास्तत्र हर्षात्समागताः
मातरो मल्लिकाद्याश्च क्षेत्रपालाविनायकाः ।
दिक्पाला लोकपालाश्च गङ्गाद्याश्च सरिद्वराः ॥ ५ ॥
ऋषिदेवसमाजे तु नित्यंहर्षप्रमोदने । तत्र राजा समायातः पौरजानपदैः सह ॥६
दृष्ट्वा कौतूहलं तत्र व्याकुलीकृतमानसम् ।
वित्रस्तमनसो भूत्वा भयात्सर्वे समास्थिताः ॥ ७ ॥
तस्मिन्समागमे दिव्ये ब्रह्मविष्ण्वीशमब्रुवन् ।
भो माण्डव्य महासत्त्व! वरदास्तेऽमरैः सह ॥ ८ ॥
अनेककष्टतपसा तव सिद्धिर्भविष्यति । प्रार्थयस्व यथाकामं यत्ते मनसिरोचते
अनादित्यमयं लोकं निर्वषट्कारमाकुलम् । नष्टधर्मंविजानीहिप्रकृतिस्थंकुरुष्वच
अनुग्रहं तु शाण्डिल्याः प्रार्थयाम द्विजोत्तम! ॥ १० ॥
एष ते कष्टदो राजासमायातस्तवाऽग्रतः । सम्भूषयस्वविप्रर्षे जनंदेवासुरं गणम्

माण्डव्य उवाच

यदि प्रसन्नामेदेवाःसमायाताःसुरैःसह । त्रिकालमत्रतीर्थेचस्थातव्यमृषिभिःसह
भवतांतुप्रसादेनरुजामेशाम्यतांसदा । एवमस्त्विति देवेशायाबज्जल्पन्तिपाण्डव

तावद्रक्षो गृहीत्वाऽग्रे कन्यां कामप्रमोदिनीम् ।

उवाच भगवञ्छापं पुरा दत्त्वोर्वशी मम ॥ १४ ॥

यदा कन्यां हरे रक्षः शापांतस्ते भविष्यति । तेनमेगर्हितंकर्म्मशापेनाऽकृतबुद्धिना

क्षन्तव्यमितिचोक्त्वा च गतश्चाऽदर्शनं पुनः ।

गते चैव तु सा कन्या दृष्टा पद्मदलेक्षणा ॥ १६ ॥

मन्त्रयित्वासुरैःसर्वैर्दत्तामाण्डव्यधीमते । तांवज्रशूलिकांप्लाव्यपवित्रैर्नर्मदोदकैः

माण्डव्यमृषिमुत्तार्य जयशब्दादिमङ्गलैः ।

विवाहयित्वा तां कन्यां माण्डव्य ऋषिपुङ्गवः ॥ १८ ॥

अभिवाद्य च तान्सर्वान्दानसन्मानगौरवैः ।

अथ राजा समीपस्थो रत्नैश्च विविधैरपि ॥ १९ ॥

धिग्वादैर्निन्दितःसर्वैस्तैर्जनैर्भूषितःपुनः । राज्ञाचब्राह्मणाःसर्वेभूषणाच्छादनाशनैः

सुवर्णकोटिदानेन तुष्टान्कृत्वाक्षमापिताः ।

वृत्ते विवाहे आहूय शाण्डिलीं तामथाब्रवीत् ॥ २१ ॥

मानयस्व इमान् विप्रान् मोचयस्व दिवाकरम् ।

अपहृत्य तमो येन कृपा सद्यः प्रवर्त्तते ॥ २२ ॥

ऋषीणां वचनं श्रुत्वा शाण्डिली दुःखिताऽब्रवीत् ।

उदितेऽर्के तु मे भर्त्ता मृत्युं यास्यति भो द्विजाः !॥ २३ ॥

तं कथं मोचयामीह ह्यात्मनोऽनिष्टसिद्धये । क्रियाप्रवर्त्तनाच्चाद्यकिंकार्यंमे महर्षयः

निःपुंसी स्त्री ह्यनाथाऽहं भवामि भवतो मतम् ।

तिष्ठ त्वमन्धकारे तु नेच्छामि रविणोदयम् ॥ २५ ॥

तेनवाक्येनतेसर्वेदेवासुरमहर्षयः । शिरःसञ्चालनाःसर्व्वेसाधु साध्वितिचाऽब्रुवन्

पतिव्रते महाभागे शृणु वाक्यंतपोधने !। मन्त्रसे यदि नः सर्वान्कुरुष्ववचनंचयत्

शाण्डिल्युवाच

येन मे न मरेद्भर्त्ता येन सत्यं मुनेर्वचः । तत्कुरुध्वं विचार्याशु येन सम्वर्धते सुखम्

तस्यास्तद्वचनं श्रुत्वा स्वप्नावस्था कृतो ह्यृषिः ।

अन्तर्हितो मुहूर्त्तं च शाण्डिल्याश्च प्रपश्य ताम् ॥ २९ ॥

पुनरादाय ते सर्वे कृत्वा निर्व्रणसत्तनुम्

स्नापितो नर्मदातोये शाण्डिल्यायै समर्पितः ॥ ३० ॥

ततःसा हृष्टमनसापतिंदृष्ट्वा तु तैजसम् । प्रणम्य तानृषीन्देवान्विमलार्कंजगत्कृतम्

क्रियाप्रवर्त्तिताःसर्वे देवगन्धर्वमानुषाः । हृष्टतुष्टा गताःसर्वे स्वमाश्रमपदं महत् ॥

पतिव्रतास्वभर्त्रा सा मासमेवाऽऽश्रमे स्थिता ।

माण्डव्येनाऽप्यनुज्ञाता ययौ नत्वा स्वमाश्रमम् ॥ ३३ ॥

गतेषु तेषु सर्वेषु स्थापयामास चाच्युतम् ।

माण्डव्येश्वरनामानं नारायण इति स्मृतम् ॥ ३४ ॥

दिव्यं वर्षसहस्रं तु पूजयामास भारत । गतोऽसावृषिसङ्घैश्चसहितोऽमरपर्वतम्

तपस्तपन्तौतौतत्रह्यद्यापिकिलभारत । भ्रातरौ संयतात्मानौ ध्यायतःपरमम्पदम्

तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ।

पितरस्तस्य तृप्यन्ति पिण्डदानाद्द्वशाब्दिकम् ॥ ३७ ॥

देवगृहे तु पक्षादौ यः करोति विलेपनम् । गोदानशतसाहस्रे दत्ते भवतियत्फलम्

उपलेपनेन द्विगुणमर्चने तु चतुर्गुणम् । दीपप्रज्वलने पुण्यमष्टधा परिकीर्त्तितम्

दिव्यनेत्रधरो भूत्वा त्रैलोक्ये सचराचरे । दध्ना मधुघृतैर्देवं पयसा नर्मदोदकैः ॥

स्नपनं ये प्रकुर्वन्ति पुष्पमालाविलेपनैः । येऽर्च्चयन्ति विरूपाक्षंदेवंनारायणंहरिम्

तेऽपि दिव्यविमानेन क्रीडन्ते कल्पसङ्ख्यया ।

दीपाष्टकं तु यः कुर्यादष्टमीं च चतुर्द्दशीम् ॥ ४२ ॥

एकादश्यांतुकृष्णस्यनपश्यन्तियमंतुते । फलैर्नानाविधैः शुभ्रैर्यःकुर्य्याल्लिङ्गपूरणम्

तेऽपि यान्ति विमानेन सिद्धचारणसेविताः ।

घण्टा चैव पताका च विमाने पुष्पमालिका ॥ ४४ ॥

वादित्राणि यथार्हाणि प्रान्ते च गच्छते शिवम् ।

देवालयं तु यः कुर्याद्वैष्णवं माण्डवेश्वरम् ॥ ४५ ॥
स्वर्गे वसति धर्मात्मा यावदाभूतसम्प्लवम् ।
माण्डव्यनारायणाख्ये विप्रान्भोजयतेऽग्रतः ॥ ४६ ॥
एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ।
आश्विने मासि सम्प्राप्ते शुक्लपक्षे चतुर्दशीम् ॥ ४७ ॥

कृतोपवासनियमो रात्रौ जागरणेन च । दीपमालांचतुर्दिक्षुपूजांकृत्वा तु शक्तितः नारी वा पुरुषोवाऽपि नृत्यगीतप्रवादनैः । प्रभाते विमलेसूर्येस्नानादिकविधिं नृप अभिनिर्वर्त्यमौनेन पश्यते देवमीदृशम् । सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥ अथवा मार्गशीर्षे च चैत्रवैशाखयोरपि । श्रावणेवा महाराजसर्वकालेऽथवापि च

शिवरात्रिसमं पुण्यमित्येवं शिवभाषितम् ।
वाजपेयाऽश्वमेधाभ्यां फलम्भवति नाऽन्यथा ॥ ५२ ॥
दुर्भगा दुःखिता वन्ध्या दरिद्रा च मृतप्रजा ।
स्नाति रुद्रवटेर्या स्त्री सर्वान्कामानवाप्नुयात् ॥ ५३ ॥

कृमिकीटपतङ्गाश्चतस्मिस्तीर्थे तु ये मृताः । स्वर्गंप्रयान्तिते सर्वेदिव्यरूपधरानृप

अनाशके जलेऽग्नौ तु ये मृता व्याधिपीडिताः ।
अनिवर्त्तिका गतिस्तेषां रुद्रलोके ह्यसंशयम् ॥ ५५ ॥

नित्यंनमतियोराजञ्छिवनारायणावुभौ । गोदानफलमाप्नोतितस्यतीर्थप्रभावतः

देवालये तु राजेन्द्र यश्च कुर्यात्प्रदक्षिणाम् ।
प्रदक्षिणीकृता तेन ससागरधरा धरा ॥ ५७ ॥
सार्द्धं शतं च तीर्थानि मल्लिकाभवनाद् बहिः ।
तस्य तीर्थप्रमाणं तु विस्तरं राजसत्तम ॥ ५८ ॥

सूत्रेणवेष्टयेत्क्षेत्रमथवा शिवमन्दिरम् । अथवा शिवलिङ्गं च तस्यपुण्यफलं शृणु जम्बूद्वीपश्च कृत्स्नश्चशाल्मलीकुशक्रौञ्चकौ । शाकपुष्करगोमेदैःसप्तद्वीपावसुन्धरा भूषिता तेन राजेन्द्र सशैलवनकानना । रेवायां दक्षिणे भागे शिवक्षेत्रात्समीपतः देवखातं महापुण्यं निर्मितंत्रिदशैरपि । तस्मिन्यःकुरुतेस्नानं मुच्यतेसर्वपातकैः

पूर्णिमायाममावास्यां व्यतीपातेऽर्कसङ्क्रमे ।
श्राद्धं च संग्रहे कुर्यात्सगच्छेत्परमां गतिम् ॥ ६३ ॥

देवखातेत्रयो देवा ब्रह्मविष्णुमहेश्वराः । तिष्ठन्ति ऋषिभिःसार्द्धंपितृदेवगणैःसह तत्र तीर्थेऽश्विनेमासिचतुर्द्दश्यांविशेषतः । वायुमार्गेस्थितःशक्रस्तिष्ठते दैवतैःसह

पृथिव्यां यानि तीर्थानि सरितः सागरास्तथा ।
विशन्ति तानि सर्वाणि देवखाते दिनद्वयम् ॥ ६६ ॥
गयाशिरे च यत्पुण्यं प्रयागेऽमकरकण्टके ।
प्रयागे सोमतीर्थे च तत्पुण्यं माण्डवेश्वरे ॥ ६७ ॥

पट्टबन्धेनयत्पुण्यंमात्रायां लकुलेश्वरे । आश्विन्यामश्विनीयोगे तत्पुण्यंमाण्डवेश्वरे

उज्जयिन्यां महाकाले वाराणस्यां त्रिपुष्करे ।
सन्निहत्यां रविग्रस्ते माण्डव्याख्ये सनातनम् ॥ ६९ ॥
इति ज्ञात्वा महाराज सर्वतीर्थेषु चोत्तमम् ।
पितॄन्देवान्समभ्यर्च्य स्नानदानादिपूजनैः ॥ ७० ॥
चतुर्द्दश्यां निराहारः स्थितो भूत्वा शुचिव्रतः ।
पूजयेत्परया भक्त्या रात्रौ जागरणे शिवम् ॥ ७१ ॥

स्नानैश्च विविधैर्देवंपुष्पागरुविलेपनैः । प्रभातेपौर्णमास्यां तुस्नानादिविधितर्पणैः श्राद्धेन हव्यकव्येन शिवपूजार्चनेन च । अग्निष्टोमादियज्ञैश्च विधिवच्चाप्तदक्षिणैः धौतपापो विशुद्धात्मा फलते फलमुत्तमम् । गोसहस्रप्रदानेन दत्तंभवति भारत ॥ स्नानाद्यैर्विधिवत्तत्र तद्दिने शिवसन्निधौ । हिरण्यंवृषभं धेनुं भूमिं गोमिथुनंहयम् शिवमुद्दिश्य वै वस्त्रयुग्मे दद्यात्सुरूपिणे । पादुकोपानहौछत्रं भाजनं रक्तवाससी होमं जाप्यं तथा दानमक्षयं सर्वमेवतत् । ऋचमेकांतु ऋग्वेदेयजुर्वेदे यजुस्तथा ॥ सामैकं सामवेदेतु जपेद्देवाग्रसंस्थितः । सम्यग्वेदफलं तस्य भवेद्वै नाऽत्रसंशयः गायत्रीजाप्यमात्रस्तु वेदत्रयफलंलभेत् । कुलकोटिशतंसाग्रं लभतेतुशिवार्च्चनात्

स्नाने दाने तथा श्राद्धे जागरे गीतवादिते ।

अनिवर्त्तिका गतिस्तस्य शिवलोकात्कदाचन ॥ ८० ॥
कालेन महताऽऽविष्टो मर्त्यलोके समाविशेत् ।
राजा भवति मेधावी सर्वव्याधिविवर्जितः ॥ ८१ ॥
जीवेद्वर्षशतं साग्रं पुत्रपौत्रधनान्वितः । तच्च तीर्थं पुनःस्मृत्वा लीयमानो महेश्वरे
उपास्ते यस्तु वै सन्ध्यां तस्मिंस्तीर्थे च पर्वणि ।
साङ्गोपाङ्गैश्चतुर्वेदैर्लभते फलमुत्तमम् ॥ ८३ ॥
तत्र सर्वं शिवक्षेत्राच्छरपातं समन्ततः । न संचरेद्भयोद्विग्ना ब्रह्महत्या नराधिप॥
यत्रतत्रस्थितो वृक्षान्पश्यतेतीर्थतत्परः । विविधैः पातकैर्मुक्तोमुच्यतेनाऽत्रसंशयः
श्वभ्रीतत्रमहाराजजलमध्ये प्रदृश्यते । कथानिका पुराणोक्ता वानरीतीर्थसेवनात्
तत्र कूपो महाराज तिष्ठते देवनिर्मितः । शिवस्य पश्चिमे भागे शिवक्षेत्रमनुत्तमम्
वृषोत्सर्गं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ! ।
क्रीडन्ति पितरस्तस्य स्वर्गलोके यदृच्छया ॥ ८८ ॥
अगम्याऽऽगमने पापमयाज्ययाजनेकृते । स्तेयाच्चब्रह्मगोहत्यागुरुघाताच्च पातकम्
तत्सर्वं नश्यते पापं वृषोत्सर्गे कृते तु वै ॥ ८६ ॥
माण्डव्यतीर्थमाहात्म्यं यः शृणोति समाधिना ।
मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ६० ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे नर्मदामाहात्म्ये माण्डव्यतीर्थमाहात्म्यवर्णनंनाम
द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

त्रिसप्तत्यधिकशततमोऽध्यायः

शुद्धेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्रतीर्थं परमशोभनम् । नर्मदादक्षिणे कुले सर्वपापप्रणाशनम् ॥
सिद्धेश्वरमिति ख्यातं महापातकनाशनम् । यत्रशुद्धिपरां प्राप्तो देवदेवो महेश्वरः
पुराहत्यायुतःपार्थ देवदेवस्त्रिशूलधृक् । पुरापञ्चशिरा आसीद्ब्रह्मालोकपितामहः
तेनाऽनृतं वचश्चोक्तं कस्मिंश्चित्कारणान्तरे ॥ ३ ॥
तच्छ्रुत्वा सहसातस्मै चुकोप परमेश्वरः । छेदयामासभगवान्मूर्द्धानं करजैस्तदा
तस्य तत्करसंलग्नं च्यवतेन कदाचन । ततो हि देवदेवेशः पर्यटन्पृथिवीमिमाम् ॥
ततो वाराणसीं प्राप्तस्तस्यांतदपतच्छिरः । पतितेतु कपाले च ब्रह्महत्यानमुञ्चति
ततस्तु सागरे गत्वापूर्वेच दक्षिणेतथा । पश्चिमे चोत्तरे पार्थ ! देवदेवो महेश्वरः
पर्यटन्सर्वतीर्थेषु ब्रह्महत्या न मुञ्चति । नर्मदादक्षिणे कुले सुतीर्थं प्राप्तवान्प्रभुः ॥
कुलकोटिं समासाद्य प्रार्थयामास चात्मवान् ।
प्रायश्चित्तं ततः कृत्वा बभूव गतकल्मषः ॥ ६ ॥
ततो निष्कल्मषोजातो देवदेवोमहेश्वरः । दत्त्वासुरेभ्यस्तत्स्थानंततश्चान्तर्द्धधेप्रभुः
तदाप्रभृति तत्तीर्थं शुद्धरुद्रेति कीर्त्तितम् । विख्यातं त्रिषु लोके ब्रह्महत्याहरं परम्
मासे मासे सितेपक्षेऽमावास्यायां युधिष्ठिर ।
स्नात्वा तत्र विधानेन तर्पयेत्पितृदेवताः ॥ १२ ॥
दद्यात्पिण्डं पितृणां तु भावितेनान्तरात्मना ।
तस्य ते द्वादशाब्दानि सुतृप्ताः पितरो नृप !॥ १३ ॥
गन्धधूपप्रदीपाद्यैरभ्यर्च्य परमेश्वरम् । शुद्धेश्वराभिधानं तु शिवलोके महीयते ॥
एतत्ते कथितं राजञ्छुद्धरुद्रमनुत्तमम् । मया श्रुतंयथादेव सकाशाच्छूलपाणिनः

मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ ११ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे शुद्धेश्वरतीर्थमाहात्म्यवर्णनं नाम त्रिसप्तत्युत्तरशततमोऽध्यायः

चतुःसप्तत्यधिकशततमोऽध्यायः

गोपेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

गोपेश्वरं ततो गच्छेदुत्तरे नर्मदातटे । यत्र स्नानेन चैकेन मुच्यन्ते पातकैर्नराः ॥१॥
तत्रतीर्थेतुयःस्नात्वा कुरुते प्राणसंक्षयम् । बर्हियुक्तेन यानेन सगच्छेच्छिवमन्दिरे॥२॥

क्रीडित्वा सुचिरं कालं शिवलोके नराधिप !।
इह मानुष्यतां प्राप्य राजा भवति वीर्यवान् ॥ ३ ॥

हस्त्यश्वरथसंपन्नो दासीदाससमन्वितः । पूज्यमानो नरेन्द्रैश्च जीवेद्वर्षशतं नरः ॥४॥

सम्प्राप्ते कार्त्तिके मासि नवम्यां शुक्लपक्षतः ।
सोपवासः शुचिर्भूत्वा दीपकांस्तत्र दापयेत् ॥ ५ ॥
गन्धपुष्पैः समभ्यर्च्य रात्रौ कुर्वीत जागरम् ।
तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नराधिप ! ॥ ६ ॥

यावत्पुण्यं फलं संख्यादीपकानां तथैवच । तावद्युगसहस्राणि शिवलोकेमहीयते

तस्मिंस्तीर्थे तु राजेन्द्र! लिङ्गपूरणकं विधिम् ।
तथैव पद्मकैश्चैव दधिभक्तैस्तथैव च ॥ ८ ॥

यस्तु कुर्यान्नरश्रेष्ठ तस्यपुण्यफलं शृणु । यावन्तितिलसंख्यानि दधिभक्तंतथैवच

पद्मसङ्ख्या शिवे लोके मोदते कालमीप्सितम् ।
तस्मिंस्तीर्थे तु राजेन्द्र! यत्किञ्चिद्दीयते नृप !॥ १० ॥

सर्वं कोटिगुणंतस्य संख्यातुं वानशक्यते । एवंते कथितं सर्वंसर्वतीर्थमनुत्तमम् ॥११॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे गोपेश्वरतीर्थमाहात्म्यवर्णनंनाम चतुःसप्तत्युत्तरशततमोऽध्यायः

पञ्चसप्तत्यधिकशततमोऽध्यायः

कपिलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

उत्तरे नर्मदाकूले भृगुक्षेत्रस्यमध्यतः । कपिलेश्वरंतु विख्यातंविशेषात्पापनाशनम्
योऽसौ सनातनो देवः पुराणे परिपठ्यते । वासुदेवो जगन्नाथः कपिलत्वमुपागतः
पातालं सुतलंनामतस्यैव नितलंह्यधः । गभस्तिगंचतस्याऽधोह्यन्धतामिस्रमेव च
पातालं सप्तमं यच्च ह्यधस्तात्संस्थितं महत् । वसतेतत्रवैदेवः पुराणःपरमेश्वरः ॥
सब्रह्मासमहादेवःसदेवो गरुडध्वजः । पूज्यमानःसुरैः सिद्धैस्तिष्ठते ब्रह्मवादिभिः

वसतस्तस्य राजेन्द्र! कपिलस्य जगद्गुरोः ।
विनाशं चाऽग्रतः प्राप्ताः क्षणेन सगरात्मजाः ॥ ६ ॥
भस्मीभूतांस्तु तान्दृष्ट्वा कपिलो मुनिसत्तमः ।
जगाम परमं शोकं चिन्त्यमानोऽथ किल्बिषम् ॥ ७ ॥

सर्वसंगपरित्यागे चित्तेनिर्विषयीकृते । अयुक्तं षष्टिसहस्राणांकर्त्तुंमम विनाशनम्

कृतस्य करणं नास्ति तस्मात्पापविनाशनम् ।
गत्वा तु कापिलं तीर्थं मोचयाम्यघमात्मनः ॥ ९ ॥

पातालं तु ततो मुक्त्वा कपिलोमुनिसत्तमः । तपश्चचारसुमहन्नर्मदातटमास्थितः
व्रतोपवासैर्विविधैः स्नानदानजपादिकैः । परं निर्वाणमापन्नः पूजयन्रुद्रमव्ययम् ॥
तत्र तीर्थे तुयः स्नात्वा पूजयेत्परमेश्वरम् । गोसहस्रफलंतस्य लभते नाऽत्र संशयः

ज्येष्ठमासे तुसंप्राप्ते शुक्लपक्षे चतुर्दशी । तत्रस्नात्वाविधानेन भक्त्यादानंप्रयच्छति
पात्रभूताय विप्रायस्वल्पं वायदिवाबहु । अक्षयं तत्फलं प्रोक्तं शिवेन परमेष्ठिना
अङ्गारकदिने प्राप्तेचतुर्थ्यां नवमीषु च । स्नानंकरोतिपुरुषो भक्त्योपोष्यवराङ्गना
रूपमैश्वर्यमतुलंसौभाग्यं सन्ततिंपराम् । लभते सप्तजन्मानिनित्यं नित्यं पुनः पुनः

पौर्णमास्याममावास्यां स्नात्वा पिण्डं प्रयच्छति ।
तस्य ते द्वादशाब्दानि तृप्ता यान्ति सुरालयम् ॥ १७ ॥

तत्रतीर्थेतुयोभक्त्या दद्याद्दीपंसुशोभनम् । जायतेतस्यराजेन्द्रमहादीप्तिः शरीरजा

तत्र तीर्थे मृतानां तु जन्तूनां सर्वदा किल ।
अनिवर्त्तिका भवेत्तेषां गतिस्तु शिवमन्दिरात् ॥ १६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे कपिलेश्वरतीर्थमाहात्म्यवर्णनंनाम पञ्चसप्तत्यधिकशततमोऽध्यायः

षट्सप्तत्यधिकशततमोऽध्यायः

पिङ्गलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपाल पिङ्गलावर्त्तमुत्तमम् । तीर्थंसर्वगुणोपेतं कामिकंभुविदुर्लभम्
वाचिकं मानसं पापंकर्मजंयत्पुराकृतम् । पिङ्गलेश्वरमासाद्य ततसर्वंविलयंव्रजेत्
तत्र स्नानं च दानं च देवखाते कृतंनृप । अक्षयं तद्भवेत्सर्वमित्येवं शङ्करोऽब्रवीत् ॥
पृथिव्यांसर्वतीर्थेषु समुद्धृत्यशुभोदकम् । मुक्तंतत्रसुरैः खात्वादेवखातंततोऽभवत्

युधिष्ठिर उवाच

कथंतु देवखातं तत्संजातंद्विजसत्तम! । सुराः सर्वेकथं तत्र मुमुचुर्वारि तीर्थजम्
सर्वं कथय मे विप्र! श्रवणे लम्पटं मनः ॥ ५ ॥

श्रीमार्कण्डेय उवाच

यदा तुशूलशुद्ध्यर्थं रुद्रोदेवगणैः सह । बभ्राम पृथिवीं सर्वां कमण्डलुधरः शुभाम्
प्रभासाद्येषुतीर्थेषुस्नानंचक्रुःसुरास्तदा । सर्वतीर्थोत्थितंतोयं पात्रेवैनिहितंतुतैः
शूलभेदमनुप्राप्य शूलं शुद्धं तु शूलिनः । तत्रोत्थमुदकं गृह्य आगता भृगुकच्छके ॥
तत्राऽपश्यंस्ततोह्यग्निंपिङ्गलाक्षं च रोगिणम् । तपस्युग्रेऽव्यवसितंध्यायमानंमहेश्वर
हविर्भागैस्तुविप्राणांराज्ञां चैवामयाविनाम् । दृष्ट्वा तुबहुरोगार्त्तमग्निंदेवमुखं सुराः
प्राहुस्ते सहिता देवं शङ्करं लोकशङ्करम् ॥ १० ॥

देवा ऊचुः

प्रसादः क्रियतां शम्भो पिङ्गलस्यामयाविनः ।
यथा हि नीरुजः कायो हविषां ग्रहणक्षमः ॥
पुनर्भवति पिङ्गस्तु तथा कुरु महेश्वर !॥ ११ ॥

ईश्वर उवाच

भोभोः सुरा हि तपसातुष्टोऽहं वोविशेषतः । वचनाच्चविशेषेणददाम्यभिमतवरम्

पिङ्गल उवाच

यदि तुष्टोऽसि देवेश! दीयते देव! चेप्सितम् ।
चन्द्रादित्यौ च नयने कृत्वाऽत्र कलया स्थितः ॥ १३ ॥

तथा पुनर्नवः कायोभवेद्धिमम शङ्कर । तथा कुरु विरूपाक्ष नमस्तुभ्यं पुनः पुनः ॥

मार्कण्डेय उवाच

ततःसभगवाञ्छम्भुर्मूर्त्तिमादित्यरूपिणीम् । कृत्वातुतस्यतद्रोगमपानुदतशङ्करः
ततःपुनर्नवीभूतःपुनः प्रोवाचशङ्करम् । अत्रैव स्थीयतांशम्भोतथैव भास्करःस्वयम्
प्राणिनामुपकाराय रोगाणामुपशान्तये । पापानांध्वंसनार्थायश्रेयसां चैव वृद्धये
एवमुक्तस्तु भगवान्पिङ्गलेन महात्मना । अवतारं च कृतवान्गीर्वाणानिदमब्रवीत्

ईश्वर उवाच

मुञ्चध्वमुदकंदेवास्तीर्थेभ्यो यत्समाहृतम् । ममचोत्तरतःकृत्वा खातं देवमयंशुभम्

तत्रनिक्षिप्यतांवारि सर्वरोगविनाशनम् । सर्वपापहरं दिव्यं सर्वैरपि सुरादिभिः
एवमुक्ताः सुराःसर्वे खातंकृत्वा तथोत्तरे । त्रयस्त्रिंशत्कोटिगणैर्मुक्तंतत्तीर्थजंजलम्
प्रोचुस्ते सहिताः सर्वे विरूपाक्षपुरोगमाः ।
यः कश्चिद्देवखातेऽस्मिन्मृदालम्भनपूर्वकम् ॥ २२ ॥
स्नानं कृत्वा रविदिने संस्नाप्य नर्मदाजले ।
श्राद्धं कृत्वा पितृभ्यो वै दानं दत्त्वा स्वशक्तितः ॥ २३ ॥
पूजयिष्यति पिङ्गेशंतस्यवासस्त्रिविष्टपे । भविष्यतिसुरैरुक्तं शृणोतिसकलंजगत्
आमया भुवि मर्त्यानां क्षयरोगविचर्चिकाः ।
व्याधयो विकृताकाराः कासश्वासज्वरोद्भवाः ॥ २५ ॥
एकद्वित्रिचतुर्थाहा ये ज्वरा भूतसम्भवाः ।
ये चाऽन्येविकृतादोषा दद्रुश्च कामलं तथा । दिनैतेसप्तभिर्यान्तिनाशंस्नानैरवेर्दिने
शतभेदप्रभिन्ना ये कुष्ठा बहुविधास्तथा ॥ २७ ॥
शतमादित्यवाराणां स्नायादष्टोत्तरं तु यः । सम्पूज्यशङ्करं दद्यात्तिलपात्रंद्विजातये
नश्यन्तितस्यकुष्ठानिगरुडेनेवपन्नगाः । एवमुक्त्वागताःसर्वे त्रिदशास्त्रिदशालयम्

मार्कण्डेय उवाच

नदीषु देवखातेषु तडागेषु सरित्सु च । स्नानं समाचरेन्नित्यं नरः पापैः प्रमुच्यते
षष्टितीर्थसहस्रेषु षष्टितीर्थशतेषु च । यत्फलं स्नानदानेषु देवखाते ततोऽधिकम्
देवखातेषु यः स्नात्वा तर्पयित्वा पितॄन्नृप । पूजयेद्देवदेवेशं पिङ्गलेश्वरमुत्तमम् ॥
सोऽश्वमेधस्य यज्ञस्य वाजपेयस्य भारत !।
द्वयोः पुण्यमवाप्नोति नाऽत्र कार्या विचारणा ॥ ३३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे पिङ्गलेश्वरतीर्थमाहात्म्यवर्णनंनाम षट्सप्तत्युत्तरशततमोऽध्यायः ॥

सप्तसप्तत्यधिकशततमोऽध्यायः

भूतीश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

भूतीश्वरं ततो गच्छेत्सर्वतीर्थेष्वनुत्तमम् । दर्शनादेव राजेन्द्र! यस्य पापंप्रणश्यति
तत्र स्थाने पुरापार्थ देवदेवेन शूलिना । उद्धूलनं कृतंगात्रे तेन भूतीश्वरं तु तत्
पुष्ये वा जन्मनक्षत्र (त्रेह्य) अमावास्यां विशेषतः ।
भूतीश्वरे नरः स्नात्वा कुलकोटिं समुद्धरेत् ॥ ३ ॥
तत्रस्थाने तुयो भक्त्याकुरुतेह्यङ्गगुण्ठनम् । तस्य यत्फलमुद्दिष्टं तच्छृणुष्वनराधिप
यावन्तो भूतिकणिका गात्रे लग्नाः शिवालये ।
तावद्वर्षसहस्राणि शिवलोके महीयते ॥ ५ ॥
सर्वेषामेव स्नानानां भस्मस्नानं परं स्मृतम् ।
पुराणैर्ऋषिभिः प्रोक्तं सर्वशास्त्रेष्वनुत्तमम् ॥ ६ ॥
एककालं द्विकालं वा त्रिकालं चाऽपि यः सदा ।
स्नानं करोति चाऽऽग्नेयं पापं तस्य प्रणश्यति ॥ ७ ॥
दिव्यस्नानाद्वरंस्नानंवायव्यंभरतर्षभ। वायव्यादुत्तमंब्राह्मयं वरंब्राह्मयात्तुवारुणम्
आग्नेयं वारुणाच्छ्रेष्ठं यस्मादुक्तं स्वयम्भुवा ।
तस्मात्सर्वप्रयत्नेन ह्याग्नेयं स्नानमाचरेत् ॥ ६ ॥

युधिष्ठिर उवाच

आग्नेयं वारुणंब्राह्मयं वायव्यंदिव्यमेवच । किमुक्तंश्रोतुमिच्छामिपरंकौतूहलंहिमे

मार्कण्डेय उवाच

आग्नेयं भस्मना स्नानमवगाह्य च वारुणम् ।
आपोहिष्ठेति च ब्राह्मयं वायव्यं गोरजः स्मृतम् ॥ ११ ॥

सूर्ये दृष्टे तु यत्स्नानं गङ्गातोयेनतत्समम् । तत्स्नानंपञ्चमंप्रोक्तंदिव्यंपाण्डवसत्तम ॥
तस्मात्सर्वप्रयत्नेनस्नात्वा भूतेश्वरेतु यः । पूजयेद्देवमीशानंसबाह्याभ्यन्तरःशुचिः
तत्र स्थाने तु ये नित्यं ध्यायन्ति परमं पदम् ।
सूक्ष्मं चातीन्द्रियं नित्यं ते धन्या नाऽत्र संशयः ॥ १४ ॥
मुक्तितीर्थं तु तत्तीर्थं सर्वतीर्थेष्वनुत्तमम् । दर्शनादेव तस्यैव पापंयातिमहत्क्षयम्
जायतेपूजया राज्यं तत्र स्तुत्वामहेश्वरम् । जपेन पापसंशुद्धिर्ध्यानेनेनान्त्यमश्नुते
ॐ ज्योतिः स्वरूपमनादिमध्यमनुत्पाद्यमानमनुच्चार्यमाणाक्षरम् ।
सर्वभूतस्थितं शिवं सर्वयोगेश्वरं सर्वलोकेश्वरंमोहशोकहीनंमहाज्ञानगम्यम् ॥
तत्र तीर्थे तु यो गत्वा स्नानं कुर्यान्नरेश्वर ।
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
एवंभूतं न जानन्ति मोक्षापेक्षणिका नराः ॥ १८ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे भूतीश्वरतीर्थमाहात्म्यवर्णनंनाम सप्तसप्तत्यधिकशततमोऽध्यायः ॥

अष्टसप्तत्यधिकशततमोऽध्यायः

गङ्गावाहकतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र गङ्गावाहकमुत्तमम् । नर्मदायां महापुण्यं भृगुतीर्थसमीपतः ।
तत्र गङ्गा महापुण्या चचार विपुलं तपः । पुरा वर्षशतंसाग्रं परमं व्रतमास्थिता
ध्यात्वा देवं जगद्योनिं नारायणमकल्मषम् ।
आत्मानं परमं धाम सरित्सा जगतीपते !॥ ३ ॥
ततो जनार्दनो देव आगत्येदमुवाच ह ॥ ४ ॥

विष्णुरुवाच

तपसातवतुष्टोऽहं मत्पादाम्बुजसम्भवे । मत्तः किमिच्छसेदेविब्रूहिकिंकरवाणिते

गङ्गोवाच

त्वत्पादकमलाद्भ्रष्टागङ्गासहचराविभो । यदृच्छयात्रिलोकेशवन्द्यमानादिवौकसैः
नृपो भगीरथस्तस्मात्तपःकृत्वासुदुष्करम् । समाराध्यजगन्नाथं शङ्करंलोकशङ्करम्
अवतारयामासहि मांपृथिव्यांधरणीधर !। मयावै युवयोर्वाक्यादवतारःकृतोभुवि
वैष्णवीमिति मां मत्वा जनः सर्वाप्लुतो मयि ।
ये वै ब्रह्महणो लोके ये च वै गुरुतल्पगाः ॥ ६ ॥
त्यागिनः पितृमातृभ्यां ये च स्वर्णहरा नराः ।
गोघ्ना ये मनुजा लोके तथा ये प्राणिहिंसकाः ॥ १० ॥
अगम्यागामिनोयेचह्यभक्ष्यस्यचभक्षकाः । येचाऽनृप्रवक्तारोयेचविश्वासघातकाः
देवब्राह्मणवित्तानां हर्त्तारोये नराधमाः । देवब्रह्मगुरुस्त्रीणां ये च निन्दाकरानराः
ब्रह्मशापप्रदग्धा ये ये चैवात्महनो द्विजाः । भ्रष्टानशनसंन्यासनियतव्रतचारिणः
तथैवापेयपेयाश्चये च स्वगुरुनिन्दकाः । निषेधकायेदानानांपात्रदानपराङ्मुखाः
ऋतुघ्ना ये स्वपत्नीनां पित्रोः स्नेहपरा न हि ।
बान्धवेषु च दीनेषु करुणा यस्य नास्ति वै ॥ १५ ॥
क्षेत्रसेतुविभेदीचपूर्वमार्गप्रलोपकः । नास्तिकःशास्त्रहीनस्तु विप्रःसन्ध्याविवर्जितः
अहुताशी ह्यसन्तुष्टः सर्वाशी सर्वविक्रयी ।
कदर्या नास्तिकाः क्रूराः कृतघ्ना ये द्विजायः ॥ १७ ॥
पैशुन्या रसविक्रेयाः सर्वकालविनाकृताः ।
स्वगोत्रां परगोत्रां वा ये भुञ्जन्ति द्विजाधमाः ॥ १८ ॥
ते मां प्राप्य विमुच्यन्ते पापसङ्घैः सुसञ्चितैः ।
तत्पापक्षारतप्ताया न शर्म मम विद्यते ॥ १६ ॥
तथा कुरु जगन्नाथ! यथाऽहं शर्म चाप्नुयाम् ।

एवमुक्तस्तु देवेशस्तुष्टः प्रोवाच जाह्नवीम् ॥ २० ॥

विष्णुरुवाच

अहमत्र वसिष्यामि गङ्गाधरसहायवान् । प्रविशस्व सदा रेवांत्वमत्रैवचमूर्त्तिना
मम पादतलम्प्राप्य वह त्रिपथगामिनि । सदा बहूदके काले नर्मदाजलसम्भृता
प्रावृट्कालं समासाद्य भविष्यति जलाकुला ।
प्लाव्योभयतटं देवी प्राप्य मामुत्तरस्थितम् ॥ २३ ॥
प्लावयिष्यति तोयेन यदा शङ्खं करे स्थितम् ।
तदा पर्वशतोद्युक्तं वैष्णवं पर्वसञ्ज्ञितम् ॥ २४ ॥
न तेन सदृशंकिञ्चिद् व्यतीपातादि सङ्क्रमम् ।
अयने द्वे च न तथा पुण्यात्पुण्यतरं यथा ॥ २५ ॥
तस्मिन्पर्वणिदेवेशि शङ्खंसंस्पृश्य मानवः । स्नानमाचरतेतोयेमिश्रेगाङ्गेयनार्मदे
पुण्यं त्वशेषपुण्यानां मङ्गलानां च मङ्गलम् ।
विष्णुना विधृतो येन तस्माच्छान्तिः प्रचक्रमे ॥ २७ ॥
तत्रान्तंपापसङ्घस्य ध्रुवमाप्नोतिमानवः । शङ्खोद्धारे नरःस्नात्वातर्पयेत्पितृदेवताः
तृप्तास्ते द्वादशाब्दानि सिद्धिं च सार्वकामिकीम् ।
गङ्गावहे तु यः श्राद्धं शङ्खोद्धारे प्रदास्यति ॥ २६ ॥
तेन पिण्डप्रदानेनतृप्यन्ति पितरस्तथा । शङ्खोद्धारेनरः स्नात्वा पूजयेद्बलकेशवौ
रात्रौ जागरणं कृत्वा शुद्धो भवति जाह्नवि !।
यत्त्वं लोककृतं कर्म मन्यसे भुवि दुःसहम् ॥ ३१ ॥
तस्मिन्पर्वणि तत्सर्वं तत्र स्नात्वा व्यपोहय ।
एवमुक्त्वा वरश्रेष्ठ! विष्णुश्चान्तरधीयत ॥ ३२ ॥
तदा प्रभृति तत्तीर्थं गङ्गावाहकमुत्तमम् । ब्रह्माद्यैर्ऋषिभिस्तात पारंपर्यक्रमागतैः
तत्र तीर्थेतुयःस्नात्वाभक्तिभावेन भारत । गङ्गातीर्थेतुसस्नातः समस्तेषु नसंशयः
तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ।

अनिवर्त्तिका गतिस्तेषां विष्णुलोकात्कदाचन ॥ ३५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे गङ्गावाहकतीर्थमाहात्म्यवर्णनं नामाष्टसप्तत्युत्तरशततमोऽध्यायः ॥

एकोनाशीत्यधिकशततमोऽध्यायः

गौतमेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र गौतमेश्वरमुत्तमम् । सर्वपापहरं तीर्थं त्रिषु लोकेषु विश्रुतम्
गौतमेन तपस्तप्तं तत्र तीर्थे युधिष्ठिर !। दिव्यं वर्षसहस्रं तु ततस्तुष्टो महेश्वरः ॥
प्रणम्य शिरसा तत्र स्थापितःपरमेश्वरः । स्थापितो गौतमेनेशो गौतमेश्वरउच्यते
तत्र देवैश्च गन्धर्वैर्ऋषिभिःपितृदैवतैः । सम्प्राताह्युत्तमा सिद्धिराराध्यपरमेश्वरम्
तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ।
पूजयेत्परमीशानं सर्वपापैः प्रमुच्यते ॥ ५ ॥
बहवस्तन्न जानन्तिविष्णुमायाविमोहिताः । तत्रसन्निहितंदेवंशूलपाणिं महेश्वरम्
ब्रह्मचारीतुयोभूत्वातत्रतीर्थे नरेश्वर । स्नात्वाऽर्च्चयेन्महादेवंसोऽश्वमेधफलं लभेत्
ब्रह्मचारी तु यो भूत्वा तर्पयेत्पितृदेवताः । पूजयेत्परमीशानं सर्वपापैः प्रमुच्यते ॥
तत्र तीर्थे तु यो दानं भक्त्या दद्याद् द्विजातये ।
तदक्षयफलं सर्वं नाऽत्र कार्या विचारणा ॥ ६ ॥
मासे चाऽश्वयुजे राजन्कृष्णपक्षे चतुर्दशीम् ।
स्नात्वा तत्र विधानेन दीपकानां शतं ददेत् ॥ १० ॥
पूजयित्वा महादेवं गन्धपुष्पादिभिर्नरः । मुच्यते सर्वपापेभ्योमृतःशिवपुरं व्रजेत्
अष्टम्यां च चतुर्दश्यां कार्त्तिक्यां तु विशेषतः ।

उपोष्य प्रयतो भूत्वा घृतेन स्नापयेच्छिवम् ॥ १२ ॥

पञ्चगव्येन मधुनादध्नावा शीतवारिणा । सर्वसर्वस्ययज्ञस्यफलं प्राप्नोतिमानवः

भक्त्यातुपूजयेत्पश्चात्स लभेत्फलमुत्तमम् । विल्वपत्रैरखण्डैश्च पुष्पैरुन्मत्तकोद्भवैः

कुशापामार्गसहितैः कदम्बद्रोणजैरपि । मल्लिका करवीरैश्च रक्तपीतैः सितासितैः

पुष्पैरन्यैर्यथालाभं यो नरःपूजयेच्छिवम् । नैरन्तर्येणषण्मासं योऽर्चयेद्गौतमेश्वरम्

सर्वान्कामानवाप्नोति मृतः शिवपुरंव्रजेत् ॥ १६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे गौतमेश्वरतीर्थमाहात्म्यवर्णनंनामैकोनाशीत्यधिकशततमोऽध्यायः ॥

———

अशीत्यधिकशततमोऽध्यायः

दशाश्वमेधतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपाल दशाश्वमेधिकं परम् । तीर्थं सर्वगुणोपेतं महापातकनाशनम्

यत्र गत्वा महाराज स्नात्वा सम्पूज्य चेश्वरम् ।

दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ २ ॥

युधिष्ठिर उवाच

अश्वमेधो महायज्ञो बहुसम्भारदक्षिणः । अशक्यः प्राकृतैः कर्त्तुं कथंतेषांफलं लभेत्

अत्याश्चर्यमिदं तत्त्वं त्वयोक्तं वदतासता । यथामेजायतेश्रद्धादीर्घायुस्त्वंतथावद

मार्कण्डेय उवाच

इदमाश्चर्यभूतं हि गौर्यापृष्टस्त्रियम्बकः । तत्तेऽहं सम्प्रवक्ष्यामि पृच्छतेनिपुणाय वै

पुरा वृषस्थो देवेश ह्युमया सह शङ्करः । कदाचित्पर्यटन्पृथ्वींनर्मदातटमाश्रितः

दशाश्वमेधिकं तीर्थं दृष्ट्वा देवो महेश्वरः । तीर्थं प्रत्यञ्जलिबद्ध्वानमश्चक्रेत्रिलोचनः

कृताञ्जलिपुटं देवं दृष्ट्वा देवीदमब्रवीत् ॥ ८ ॥

देव्युवाच

किमेतद्देवदेवेश! चराचरनमस्कृत !। प्रह्वनम्राञ्जलिं बद्ध्वा भक्त्या परमया युतः

एतदाश्चर्यमतुलं सर्वं कथय मे प्रभो! ॥ १० ॥

ईश्वर उवाच

प्रत्यक्षं पश्य तीर्थस्य फलं मा विस्मिता भव ।

वियत्स्था मे भुविस्थस्य क्षणं देवि! स्थिरा भव ॥ ११ ॥

एवमुक्त्वा तु देवेशो गौरवर्णो द्विजोऽभवत् ।

क्षुत्क्षामकण्ठो जटिलः शुष्को धमनिसन्ततः ॥ १२ ॥

उपविश्यभुवःपृष्ठेसुस्वरंमन्त्रमुच्चरन् । क्रमप्रियोमहादेवो माधुर्येण प्रमोदयन् ॥ १३

श्रुत्वा तां मधुरां वाणीं स्वयं देवेन निर्मिताम् ।

सम्भ्रान्ता ब्राह्मणाः सर्वे स्नातुं ये तत्र चाऽऽगताः ॥ १४ ॥

नित्यक्रिया च सर्वेषां विस्मृता श्रुतिविभ्रमात् ।

तं दृष्ट्वा पठमानं तु क्षुत्पिपासाऽभिपीडितम् ॥ १५ ॥

द्विजोन्यमन्त्रयत्कश्चिद्भक्त्या तंभोजनायवै । प्रसादः क्रियतांब्रह्मन्भोजनायगृहेमम

अद्य मे सफलं जन्म ह्यद्य मे सफलाः क्रियाः ।

सर्वान्कामान्प्रदास्यन्ति प्रीता मेऽद्य पितामहाः ॥ १७ ॥

त्वयि भुक्ते द्विजश्रेष्ठ प्रसीद त्वं ध्रुवं मम । एवमुक्तो महादेवो द्विजरूपधरस्तदा

प्रहस्य प्रत्युवाचेदं ब्राह्मणंश्लक्ष्णयागिरा । मयावर्षसहस्रं तु निराहारं तपः कृतम्

इदानीं तुगृहे तस्य करिष्ये द्विजसत्तम । दशभिर्वाजिमेधैश्च येनेष्टं पारणं तथा ॥

इत्युक्तो देवदेवेनब्राह्मणो विस्मयान्वितः । उत्तमाङ्गं विधुन्वन्वै जगामस्वगृहंप्रति

एवंतेबहवोविप्राःप्रत्याख्यातेनिमन्त्रणे । पुराणार्थमजानन्तोनास्तिकाबहवोगताः

अथ कश्चिद् द्विजो विद्वान्पुराणार्थस्य तत्त्ववित् ।

देवं निमन्त्रयामास द्विजरूपधरं शिवम् ॥ २३ ॥

तथैव सोऽपि देवेनप्रोक्तःसप्राह तंपुनः। मनसाचिन्तयित्वातुपुराणोक्तंद्विजोत्तमः
स्मृतिवेदपुराणेषु यदुक्तं तत्तथाभवेत् । इतिनिश्चित्य तंविप्रमुवाच प्रहसन्निव ॥
भो भो विप्र! प्रतीक्षस्व यावदागमनं पुनः।
इत्युक्त्वा तु द्विजो गत्वा दशाश्वमेधिकं परम् ॥ २६ ॥
स्नानं महालंभनादि कृतंतेन द्विजन्मना। जपं श्राद्धंतथादानं कृत्वाधर्मानुसारतः
संकल्प्य कपिलां तत्र पुराणोक्तविधानतः।
समायात्त्वरितं तत्र यत्राऽसौ तिष्ठते द्विजः ॥ २८ ॥
अथाऽऽगत्य द्विजं प्राह वाजिमेधः कृतो मया।
उत्तिष्ठ मे गृहं रम्यं भोजनार्थं हि गम्यताम् ॥ २६ ॥
इत्युक्तः शङ्करस्तेनब्राह्मणेनाऽतिविस्मितः। उवाचब्राह्मणंदेव इदानींत्वमितोगतः
द्विजवर्य! कथं चेष्टा दश यज्ञा महाधनाः ॥ ३१ ॥

द्विज उवाच

न विचारस्त्वया कार्यः कृता यज्ञा न संशयः।
यदि वेदाः प्रमाणं ते भुवि देवा द्विजास्तथा ॥ ३२ ॥
दशाश्वमेधिकंतीर्थंतथा सत्यंद्विजोत्तम। यदि वेदपुराणोक्तं वाक्यंनिःसंशयंभवेत्
तदा प्राप्तं मया सर्वं नाऽत्र कार्या विचारणा।
एवमुक्तस्तु देवेश आस्तिक्यं तस्य चेतसः ॥ ३४ ॥
विमृश्य बहुभिः किञ्चिदुत्तरं नप्रपद्यत। जगाम तद्गृहं रम्यं पठन्ब्रह्म सनातनम् ॥
संप्राप्तं तं द्विजंभक्त्यापाद्यार्घ्येणतमर्चयत्। षड्संभोजनं तेनदत्तंपश्चाद्यथाविधि
ततो भुक्ते महादेवे सर्वदेवमये शिवे। पुष्पवृष्टिः पपाताऽऽशु गगनात्तस्य मूर्द्धनि
तस्यास्तिक्यं तु संलक्ष्य तुष्टः प्रोवाच शङ्करः ॥ ३७ ॥

ईश्वर उवाच

किं तेऽद्य क्रियतां ब्रूहि वरदोऽहं द्विजोत्तम! ।
अदेयमपि दास्यामि एकचित्तस्य ते ध्रुवम् ॥ ३८ ॥

ब्राह्मण उवाच

यदि प्रीतोऽसि मेदेवयदिदेयोवरो मम। अस्मिंस्तीर्थेमहादेव स्थातव्यं सर्वदैवहि
उपकाराय देवेश! एष मे वर उत्तमः । एवमुक्तस्तु देवेन आरुरोह द्विजोत्तमः ॥
गन्धर्वाप्सरःसम्बाधं विमानं सार्वकामिकम्।
पूज्यमानो गतस्तत्र यत्र लोका निरामयाः ॥ ४१ ॥

मार्कण्डेय उवाच

एतदाश्चर्यमतुलं दृष्ट्वा देवी सुविस्मिता । विस्मयोत्फुल्लनयना पुनःपप्रच्छशङ्करम्

पार्वत्युवाच

कथमेतद्भवेत्सत्यं यत्रेदमसमञ्जसम् । स्नानं कुर्वन्ति बहवो लोका ह्यत्र महेश्वर ॥
तेषां तु स्वर्गगमनं यथैष स्वर्गतिं गतः। कथमेतत्समाचक्ष्व विस्मयः परमो मम
एतच्छ्रुत्वा तु देवेशः प्रहसन्प्रत्युवाच ताम्।
वेदवाक्ये पुराणार्थे स्मृत्यर्थे द्विजभाषिते ॥ ४५ ॥
विस्मयो हिनकर्त्तव्योह्यनुमानंहितत्तथा। असंभाव्यंहिलोकानां पुराणेयत्प्रगीयते
यदि पक्षं पुरस्कृत्य लोकाः कुर्वन्ति पार्वति !।
तस्मान्न सिद्धिरेतेषां भवत्येको न विस्मयः ॥ ४७ ॥
नास्तिका भिन्नमर्यादा ये निश्चयबहिष्कृताः।
तेषां सिद्धिर्न विद्येत आस्तिक्याद्भवते ध्रुवम् ॥ ४८ ॥
श्रुत्वाख्यानमिदं देवीववन्देतीर्थमुत्तमम्। सर्वपापहरंपुण्यं नर्मदायांव्यवस्थितम्

मार्कण्डेय उवाच

दशाश्वमेधं राजेन्द्र सर्वतीर्थोत्तमोत्तमम्। तीर्थं सर्वगुणोपेतं महापातकनाशनम्
तत्रागता महाभागा स्नातुकामा सरस्वती।
पुण्यानां परमा पुण्या नदीनामुत्तमा नदी ॥ ५१ ॥
नाममात्रेण यस्यास्तु सर्वपापैः प्रमुच्यते।
स्नातास्तत्र दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ ५२ ॥

दशाश्वमेधे साराजन्नियताब्रह्मचारिणी । आराधयित्वा देवेशंपरंनिर्वाणमागतीः
कालुष्यं ब्रह्मसंभूतासंवत्सरसमुद्भवम् । प्रक्षालयितुमायाति दशम्यामाश्विनस्यच
उपोष्य रजनीं तां तु संपूज्य त्रिपुरान्तकम् ।
राजन्निष्कलमषा यान्ति श्वोभूते शाश्वतं पदम् ॥ ५५ ॥

युधिष्ठिर उवाच

सरस्वती महापुण्या नदीनामुत्तमानदी । दशाश्वमेधमायाति स्नातुंसंवत्सरेसदा.
किमधिक्यं भवेत्तीर्थं दशम्यां तत्र शंस मे ॥ ५६ ॥

श्रीमार्कण्डेय उवाच

राजन्नाश्वयुजेमासि दशम्यां तद्विशिष्यते । पार्थिवेषु चतीर्थे तुसर्वेष्वेव नसंशयः
दशाश्वमेधिकेराजन्नित्यंहि दशमीशुभा । विशेषादाश्विनेशुक्लामहापातकनाशिनी
तस्यां स्नात्वाऽर्च्चयेद्देवानुपवासपरायणः ।
श्राद्धं कृत्वा विधानेन पश्चात्संपूजयेच्छिवम् ॥ ५९ ॥
तत्रस्थां पूजयेद्देवीं स्नातुकामां सरस्वतीम् । नमो नमस्ते देवेशि ब्रह्मदेहसमुद्भवे
कुरु पापक्षयं देवि संसारान्मां समुद्धर । गन्धधूपैश्च संपूज्य ह्यर्च्चयित्वा पुनःपुनः
दश प्रदक्षिणा दत्त्वा सूत्रेण परिवेष्टयेत् । कपिलां तुततोविप्रे दद्याद्विगतमत्सरः
सर्वलक्षणसंपन्नां सर्वोपस्करसंयुताम् । दत्त्वा विप्राय कपिलांन शोचतिकृताकृते
पश्चाज्जागरणं कुर्याद् घृतेनोज्वाल्यदीपकम् । पुराणपठनेनैव नृत्यगीतविवादनैः
वेदोक्तैश्चैव जाप्यैश्चपूजयेच्छशिशेखरम् । प्रभातेविमले पश्चात्स्नात्वाचैनर्मदाजले
ब्राह्मणान्भोजयेद्भक्त्या शिवभक्तांश्च योगिनः ।
एवं कृते ततो राजन्सम्यक्तीर्थफलं लभेत् ॥ ६६ ॥
तत्र तीर्थे तुयः स्नात्वा पूजयेच्छङ्करंनरः । दशाश्वमेधावभृथं लभते पुण्यमुत्तमम्
पूतात्मा तेन पुण्येन रुद्रलोकं स गच्छति ।
आरूढः परमं यानं कामगं च सुशोभनम् ॥ ६८ ॥
तत्र दिव्याऽप्सरोभिस्तु वीज्यमानोऽथ चामरैः ।

क्रीडते सुचिरं कालं जयशब्दादिमङ्गलैः ॥ ६९ ॥
ततोऽवतीर्णः कालेन इहराजाभवेद्ध्रुवम् । हस्त्यश्वरथसंपन्नो महाभोगी परंतपः
दशाश्वमेधे यद्दानं दीयते शिवयोगिनाम् । दशाश्वमेधसदृशं भवेत्तन्नाऽत्र संशयः
सर्वेषामेव यज्ञानामश्वमेधो विशिष्यते ।
दुर्लभः स्वल्पवित्तानां भूरिशः पापकर्मणाम् ॥ ७२ ॥
तत्र तीर्थेतु राजेन्द्रदुर्लभोऽपिसुरासुरैः । प्राप्यतेस्नानदानेन इत्येवंशङ्करोऽब्रवीत्
अकामो वा सकामो वा मृतस्तत्र नरेश्वर !।
देवत्वं प्राप्नुयात्सोऽपि नाऽत्र कार्या विचारणा ॥ ७४ ॥
अग्निप्रवेशं यः कुर्यात्तत्र तीर्थेनरोत्तम । अग्निलोके वसेत्तावद्यावदाभूतसम्प्लवम् ॥
जलप्रवेशंयः कुर्यात्तत्र तीर्थे नराधिप । ध्यायमानो महादेवंवारुणंलोकमाप्नुयात्
दशाश्वमेधे यः कश्चिच्छूरवृत्त्या तनुं त्यजेत्
अक्षया नु गतिस्तस्य इत्येवं श्रुतिनोदना ॥ ७७ ॥
न तां गतिं यान्ति भृगुप्रपातिनो न दण्डिनो नैव च सांख्ययोगिनः ॥
ध्वजाकुले दुन्दुभिशंखनादिते क्षणेन यां यान्ति महाहवे मृताः ॥ ७८॥
यत्र तत्र हतःशूरः शत्रुभिः परिवेष्टितः । अक्षयाँल्लभतेलोकान्यदि क्लीबं न भाषते
दशाश्वमेधे संन्यासं यः करोति विधानतः ।
अनिवर्त्तिका गतिस्तस्य रुद्रलोकात्कदाचन ॥ ८० ॥
दशाश्वमेधे यत्पुण्यं संक्षेपेणयुधिष्ठिर । कथितं परया भक्त्यासर्वपापप्रणाशनम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे दशाश्वमेधतीर्थमाहात्म्यवर्णनंनामाशीत्युत्तरशततमोऽध्यायः ॥

एकाशीत्यधिकशततमोऽध्यायः

भृगुकच्छोत्पत्तिवर्णनम्

श्रीमार्कण्डेय उवाच

अतः परंप्रवक्ष्यामि भृगुतीर्थस्यविस्तरम् । यंश्रुत्वाब्रह्महागोघ्नोमुच्यतेसर्वपातकैः
तत्रतीर्थं तुविख्यातं वृषखातमितिश्रुतम् । भृगुणातत्र राजेन्द्रतपस्तप्तं पुराकिल

युधिष्ठिर उवाच

भृगुकच्छे सविप्रेन्द्रो निवसन्केनहेतुना। तपस्तप्त्वासुविपुलंपरां सिद्धिमुपागतः

को वा वृष इति प्रोक्तस्तत्खातं येन खानितम्।
एतत्सर्वं यथान्यायं कथयस्व ममाऽनघ ॥ ४ ॥

श्रीमार्कण्डेय उवाच

एष प्रश्नो महाराजयस्त्वया परिपृच्छितः । तत्सर्वंकथयिष्यामि शृणुष्वैकमनान्नृप
षष्ठस्तु ब्रह्मणः पुत्रो मानसो भृगुसत्तमः । तपश्चचार विपुलंश्रीवृते क्षेत्र उत्तमे ॥

दिव्यं वर्षसहस्रं तु संशुष्को मुनिसत्तमः ।
निराहारो निरानन्दः काष्ठपाषाणवत्स्थितः ॥ ७ ॥

ततःकदाचिद्देवेशोविमानवरमास्थितः । उमयासहितः श्रीमांस्तेनमार्गेणचागतः
दृष्ट्वा तत्र महाभागं भृगुं वल्मीकवत्स्थितम् । उवाच देवीदेवेशंकिमिदंदृश्यतेप्रभो!

ईश्वर उवाच

भृगुर्नाम महादेवि तपस्तप्त्वा सुदारुणम् । दिव्यंवर्षसहस्रं तुमम ध्यानपरायणः
जलबिन्दुं कुशाग्रेण मासेमासे पिबेच्चसः । सम्वत्सरशतं साग्रं तिष्ठते च वरानने
तच्छ्रुत्वा वचनं गौरीक्रोधसंवर्त्तितेक्षणा । उवाचदेवी देवेशं शूलपाणिं महेश्वरम्

सत्यमुग्रोऽसि लोके त्वं ख्यापितो वृषभध्वज !।
निष्कारुण्यो दुराराध्यः सर्वभूतभयङ्करः ॥ १३ ॥

दिव्यं वर्षसहस्रं तु ध्यायमानस्यशङ्करम्। ब्राह्मणस्यवरं कस्मान्नप्रयच्छसिशंसमे
एवमुक्तोऽथ देवेशः प्रहस्य गिरिनंदिनीम् । उवाच नरशार्दूल!मेघगम्भीरयागिरा
स्त्री विनश्यति गर्वेणतपः क्रोधेननश्यति । गावो दूरप्रचारेणशूद्रान्नेन द्विजोत्तमाः

क्रोधान्वितो द्विजो गौरि! तेन सिद्धिर्न विद्यते ।
वर्षायुतैस्तथा लक्षैर्न किञ्चित्कारणं प्रिये !॥ १७ ॥
एवंभूतस्य तस्याऽपि क्रोधस्य चरितं महत् ।
एवमुक्त्वा ततः शम्भुर्वृषं दध्यौ च तत्क्षणे ॥ १८ ॥

वृषोहि भगवन्ब्रह्मा वृषरूपी महेश्वरः । ध्यानप्राप्तः क्षणादेव गर्जयन्वै मुहुर्मुहुः ॥
किंकरोमि सुरश्रेष्ठ ध्यातःकेनैव हेतुना । करोमि कस्य निधनमकाले परमेश्वर! ॥

ईश्वर उवाच

कोपयस्व द्विजश्रेष्ठं गत्वा त्वंभृगुसत्तमम् । येनमे श्रद्दधत्येषा गौरीलोकैकसुन्दरी

एतच्छ्रुत्वा वृषो गत्वा धर्षणार्थं द्विजोत्तमम् ।
नर्मदायास्तटे रम्ये समीपे चाऽऽश्रमे भृगुः ॥ २२ ॥

ततः शृङ्गैर्गृहीत्वा तुप्रक्षिप्तोनर्मदाजले । ततःक्रुद्धो भृगुस्तत्र दण्डहस्तोमहामुनिः
पशुवत्ते वधिष्यामि दण्डघातेनमस्तके । शिखायज्ञोपवीते च परिधानं वरासने

सुसंवृतं कृतं तेन धावन्वै पृष्ठतोऽब्रवीत् ॥ २५ ॥

भृगुरुवाच

पापकर्मन्दुराचार कथंयास्यसिमेवृष। अवमानं समुत्पाद्य कृत्वा गर्त्तं खुरैस्तथा
गर्जयित्वामहानादंततो विप्रमपातयत् । आत्मानं पातितंज्ञात्वावृषेणपरमेष्ठिना
भृगुः क्रोधेनजज्वाल हुताहुतिरिवानलः । करेगृह्य महादण्डं ब्रह्मदण्डमिवाऽपरम्
हन्तुकामो वृषंविप्रोभ्यधावत युधिष्ठिर । धावमानं ततो दृष्ट्वास वृषः पूर्वसागरे
जम्बूद्वीपं कुशं क्रौञ्चं शाल्मलिंशाकमेवच । गोमेदंपुष्करंप्राप्तः पूर्वतोदक्षिणापथम्
उत्तरं पश्चिमं चैवद्वीपाद्द्वीपं नरेश्वर । पातालं सुतलं पश्चाद्वितलंच तलातलम् ॥

तामिस्रमन्धतामिस्रं पातालं सप्तमं ययौ ।

ततो जगाम भूर्लोकं प्राणार्थी स वृषोत्तमः ॥३२ ॥
भुवः स्वश्चैव च महस्तपः सत्यं जनस्तथा ।
अनुगम्यमानो विप्रेण न शर्म लभते क्वचित् ॥ ३३ ॥
पापं कृत्वैव पुरुषः कामक्रोधबलार्दितः । ततो जगाम शरणं ब्रह्माणं विष्णुमेव च
इन्द्रं चन्द्रं तथाऽऽदित्यैर्याम्यवारुणमारुतैः ।
यदा सर्वैः परित्यक्तो लोकालोकैः सुरेश्वरैः ॥ ३५ ॥
तदा देवं नमस्कृत्वा रक्षरक्षस्वचाऽब्रवीत् । वध्यमानंमहादेवो भृगुणा परमेष्ठिना
सर्वलोकैः परित्यक्तमनाथमिव तं प्रभो । दृष्ट्वा श्रान्तं वृषं देवः पतितं चरणाग्रतः
ततः प्रोवाच भगवान्स्मितपूर्वमिदं वचः ॥ ३८ ॥

ईश्वर उवाच

पश्य देवि! महाभागे! शमं विप्रस्य सुन्दरि !॥ ३९ ॥

पार्वत्युवाच

यावद्विप्रोनचास्माकंकुप्यतेपरमेश्वर !। तावद्वरंप्रयच्छाऽऽशुयदिचेच्छसिमत्प्रियम्
ततो भस्मी जटी शूली चन्द्रार्धकृतशेखरः । उमार्द्धदेहोभगवान्भूत्वा विप्रमुवाचह
भोभोद्विजवरश्रेष्ठक्रोधस्तेनशमंगतः । यस्मात्तस्मादिदंतातक्रोधस्थानं भविष्यति
ततो दृष्ट्वा च तं शम्भुं भृगुः श्रेष्ठं त्रिलोचनम् ।
जानुभ्यामवनिं गत्वा इदं स्तोत्रमुदैरयत् ॥ ४३ ॥

भृगुरुवाच

प्रणिपत्य भूतनाथं भवोद्भवं भूतिदं भयातीतम् ।
भवभीतो भुवनपते! विज्ञप्तुं किञ्चिदिच्छामि ॥ ४४ ॥
त्वद्गुणनिकरान्वक्तुं का शक्तिर्मानुषस्यास्य ।
वासुकिरपि न तावद्वक्तुं वदनसहस्रं भवेद्यस्य ॥ ४५ ॥
भक्त्या तथाऽपि शङ्कर! शशिधर! करजालधवलिताशेष !।
स्तुतिमुखरस्य महेश्वर! प्रसीद तव चरणनिरतस्य ॥ ४६ ॥

सत्त्वं रजस्तमस्त्वं स्थित्युत्पत्तिविनाशनं देव !।
भवभीतो भुवनपते भुवनेश! शरणनिरतस्य ॥ ४७ ॥
यमनियमयज्ञदानं वेदाभ्यासश्च धारणायोगः ।
त्वद्भक्तेः सर्वमिव नार्हन्ति वै कलासहस्रांशम् ॥ ४८ ॥
उत्कृष्टरसरसायनखड्गाञ्जनविवरपादुकासिद्धिः ।
चिह्नं हि तव नतानां दृश्यत इह जन्मनि प्रकटम् ॥ ४९ ॥
शाठ्ये न यदि प्रणमति वितरसि तस्याऽपि भूतिमिच्छया देव !।
भवति भवच्छेदकरी भक्तिर्मोक्षाय निर्मिता नाथ !॥ ५० ॥
परदारपरस्वरतं परपरिभवदुःखशोकसन्तप्तम् ।
परवदनवीक्षणपरं परमेश्वर! मां परित्राहि ॥ ५१ ॥
अधिकाभिमानमुदितं क्षणभङ्गुरविभवविलसन्तम् ।
क्रूरं कुपथाभिमुखं शङ्कर! शरणागतं परित्राहि ॥ ५२ ॥
दीनं द्विजं परार्थे वन्धुजनेनैव पूरिता ह्याशा ।
छिन्धि महेश्वर! तृष्णां किं मूढं मां विडम्बयसि ॥ ५३ ॥
तृष्णां हरस्व शीघ्रं लक्ष्मीं दद हृदयवासिनीं नित्यम् ।
छिन्धि मदमोहपाशं मामुत्तारय भवाच्च देवेश !॥ ५४ ॥
करुणाभ्युदयं नाम स्तोत्रमिदं सर्वसिद्धिदं दिव्यम् ।
यः पठति भृगुं स्मरति च शिवलोकमसौ प्रयाति देहान्ते ॥ ५५ ॥
एतच्छ्रुत्वा महादेवः स्तोत्रं च भृगुभाषितम् ।
उवाच वरदोऽस्मीति देव्या सह वरोत्तमम् ॥ ५६ ॥

भृगुरुवाच

प्रसन्नो देवदेवेश! यदि देयो वरो मम । सिद्धिक्षेत्रमिदं सर्वं भविता मम नामतः॥
भवद्भिः सन्निधानेन स्थातव्यं हि सहोमया । देवक्षेत्रमिदंपुण्यंयेनसर्वम्भविष्यति
अत्र स्थाने महास्थानं करोमि जगदीश्वर । तवप्रसादाद्देवेश पूर्यन्तांमे मनोरथाः

ईश्वर उवाच

श्रियाकृतमिदं पूर्वं किं न ज्ञातंत्वयाद्विज । अनुमान्यश्रियं देवीं यदीयंमन्यतेभवान्
कुरुष्व यदभिप्रेतं त्वत्कृतं न तदन्यथा ।
एवमुक्त्वा गते देवे स्नात्वा गत्वा भृगुः श्रियम् ॥ ६१ ॥
कृत्वा च पारणं तत्रवसन्विप्रस्तया सह । श्रियाचसहितःकाल इदं वचनमब्रवीत्

भृगुरुवाच

यदि ते रोचते भद्रे! दुःखासीनं च ते यदि ।
त्वया गृते महाक्षेत्रे स्वीयं स्थानं करोम्यहम् ॥ ६३ ॥

श्रीरुवाच

ममनाम्ना तु विप्रर्षेतवनाम्ना तु शोभनम् । स्थानं कुरुष्वाभिप्रेतमविरोधेनमेमतिः

भृगुरुवाच

कच्छपाधिष्ठितं ह्येतत्तस्य पृष्ठिगतं रमे । संमन्त्र्य सहितं तेन शोभनं भवती कुरु
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे भृगुकच्छोत्पत्तिवर्णनं नामैकाशीत्युत्तरशततमोऽध्यायः ॥

द्व्यशीत्यधिकशततमोऽध्यायः

भृगुकच्छतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो भृगुः श्रिया चैव समेतःकच्छपंगतः । अभिनन्द्य यथान्यायमुवाचवचनंशुभम्
त्वया धृता धरा सर्वा तथा लोकाश्चराचराः ।
तथैव पुण्यभावत्वात्स्थितस्तत्र महामते !॥ २ ॥
चातुर्विद्यस्य संस्थानं करोमि रमया सह । यदित्वंमन्यसेदेव तदादेशयमांविभो

कूर्म उवाच

एवमेवद्विजश्रेष्ठ ममनामाङ्कितं पुरम् । भविष्यति महत्कालं ममोपरिसुसंस्थितम्
अचलं सुस्थिरं तात न भीःकार्या सुलोचने !।
एतच्छ्रुत्वा शुभं वाक्यं कच्छपस्य मुखाच्च्युतम् ॥ ५ ॥
नन्दनेवत्सरे माघे पञ्चम्यां भरतर्षभ । शस्ते तु ह्युत्तरायोगेकुम्भस्थे शशिमण्डले
रेवाया उत्तरे तीरे गम्भीरे चारुवारुणि । प्रागुदक्प्रवणेदेशे कोटितीर्थसमन्वितम्
क्रोशप्रमाणं तत्क्षेत्रं प्रासादशतसङ्कुलम् । अचिरेणैवकालेन तपोबलसमन्वितः ॥
विचिन्त्य विश्वकर्माणं चकार भृगुसत्तमः ॥ ६ ॥
ब्राह्मणा वेदविद्वांसो क्षत्रिया राज्यपालकाः ।
वैश्या वृत्तिरतास्तत्र शूद्राः शुश्रूषकास्त्रिषु ॥ १० ॥
एवं श्रिया वृतं क्षेत्रं परमानन्दनन्दितम् । निर्मितं भृगुणातातसर्वपातकनाशनम्
इति भृगुकच्छोत्पत्तिः

मार्कण्डेय उवाच

ततःकालेन महता कस्मिंश्चित्कारणान्तरे ।
देवलोकंजगामाशु लक्ष्मीर्ऋषिसमागमे ॥ १२ ॥
समर्प्य कुञ्चिकाट्टालं भृगवे ब्रह्मवादिने । पालयस्व यथार्थं वै स्थानकं ममसुव्रत
देवकार्याण्यशेषाणि कृत्वा श्रीः पुनरागता ।
आजगाम रमा देवी भृगुकच्छं त्वरान्विता ॥ १४ ॥
प्रार्थितं कुञ्चिकाट्टालं स्वगृहं स्वपरिग्रहम् ।
भृगुर्यदा तदा पार्थ! मिथ्या नास्ति तदाऽवदत् ॥ १५ ॥
एवं विवादः सुमहान्सञ्जातश्च नरेश्वर । ममेति मम चैवेति परस्परसमागमे ॥१६
ततः कालेन महता भृगुणा परमर्षिणा ।
चातुर्विद्यप्रमाणार्थं चकार महतीं स्थितिम् ॥ १७ ॥
अस्मदीयं यथा सर्वं नगरंमृगलोचने । चातुर्विद्या द्विजाःसर्वेतथाजानन्तिसुन्दरि

श्रीरुवाच

प्रमाणंमम विप्रेन्द्राश्चातुर्वर्ण्या न संशयः । मदीयंवात्वदीयंवाकथयन्तुद्विजोत्तमाः
ततःसमस्तैर्विबुधैःसम्प्रधार्यपरस्परम् । द्विधातैर्वाक्स्थलंदृष्ट्वाब्राह्मणानृपसंहितम्
अष्टादशसहस्राणि नोचुर्वैकिञ्चिदुत्तरम् । अष्टादशसहस्रेषु भृगुकोपभयान्नृप ॥
उक्तं च तालकं हस्ते यस्य तस्येदमुत्तरम् ॥ २१ ॥
एतच्छ्रुत्वा तु सा देवी निगमं नैगमैः कृतम् ।
क्रोधेन महताविष्टा शशाप द्विजपुङ्गवान् ॥ २२ ॥

श्रीदेव्युवाच

यस्मात्सत्यं समुत्सृज्य लोभोपहतमानसैः ।
मदीयं लोपितं स्थानं तस्माच्छृण्वन्तु मे गिरम् ॥ २३ ॥
त्रिपौरुषाभवेद्विद्यात्रिपुरुषंन भवेद्धनम् । न द्वितीयस्तुवोवेदःपठितोभवतिद्विजाः
गृहाणि न द्विभौमानि न च भूतिः स्थिरा द्विजाः ।
पक्षपातेन वो धर्मो न च निःश्रेय भावतः ॥ २५ ॥
इष्टो गोत्रजनःकश्चिल्लोभेनावृतमानसः । न च क्रोधं परित्यज्यह्येकंसत्यम्भविष्यति
अद्यप्रभृति सर्वेषामहंकारो द्विजन्मनाम् । न पितापुत्रवाक्येन न पुत्रःपितृकर्मणि
अहङ्कारकृताः सर्वे भविष्यन्तिनसंशयः । इति जप्त्वा रमादेवी तदैवच दिवं ययौ
ततो गतायां वै लक्ष्म्यां देवाब्रह्मर्षयोऽमलाः ।
क्रोधलोभमिदं स्थानं तेऽपि चोक्त्वा दिवं ययुः ॥ २६ ॥
गतां दृष्ट्वा ततो देवीमृषींश्चैव तपोधनान् ।
भृगुश्च परमेष्ठी स विषादमगमत्परम् ॥
प्रसादयामास पुनः शङ्करं त्रिपुरान्तकम् ॥ ३० ॥
तपसा महता पार्थ! ततस्तुष्टो महेश्वरः । उवाच वचनं काले हर्षयन्भृगुसत्तमम्॥
किं विषण्णोऽसि विप्रेन्द्र! किं वा सन्तापकारणम् ।
मयि प्रसन्नेऽपि तव ह्येतत्कथय मेऽनघ !॥ ३२ ॥

भृगुरुवाच

शापयित्वा द्विजान्सर्वान्पुरा लक्ष्मीर्विनिर्गता ।
अपवित्रमिदं चोक्त्वा ततो देवा विनिर्गताः ॥ ३३ ॥

ईश्वर उवाच

पुरा मयायथाप्रोक्तंतत्तथा न तदन्यथा । क्रोधस्थानमसन्देहंतथाऽन्यदपितच्छृणु
तत्र स्थानसमुद्भूता महद्भयविवर्जिताः । ब्राह्मणामत्प्रसादेन भविष्यन्तिनसंशयः
वेदविद्याव्रतस्नाताः सर्वशास्त्रविशारदाः ।
येऽपि ते शतसाहस्रास्त्वरिता ह्यागतास्त्विह ॥ ३६ ॥
अपठस्यापि मूर्खस्य सर्वावस्थांगतस्य च । उत्तरादुत्तरंशक्तो दातुंन तु भृगूत्तम
कोटितीर्थमिदं स्थानं सर्वपापप्रणाशनम् । अद्यप्रभृतिविप्रेन्द्र भविष्यतिन संशयः
मत्प्रसादाद्देवगणैः सेवितश्च भविष्यति । भृगुक्षेत्रे मृताये तु कृमिकीटपतङ्गकाः
वासस्तेषां शिवे लोके मत्प्रसादाद्भविष्यति ।
वृषखाते नरः स्नात्वा पूजयित्वा महेश्वरम् ॥ ४० ॥
सर्वमेधस्य यज्ञस्य फलंप्राप्नोत्यसंशयम् । भृगुतीर्थेनरः स्नात्वा तर्पयेत्पितृदेवताः
तस्य ते द्वादशाब्दानि शान्ति गच्छन्ति तर्पिताः ।
दध्निक्षीरेण तोयेन घृतेन मधुना सह ॥ ४२ ॥
येस्नपन्तिविरूपाक्षंतेषां वासस्त्रिविष्टपे । मत्प्रसादाद्द्विजश्रेष्ठसर्वदेवानुसेवितम्
भविष्यति भृगुक्षेत्रं कुरुक्षेत्रादिभिः समम् ।
मार्त्तण्डग्रहणे प्राप्ते यवं कृत्वा हिरण्मयम् ॥ ४४ ॥
दत्त्वा शिरसि यः स्नाति भृगुक्षेत्रे द्विजोत्तम !।
अविचारेण तं विद्धि संस्नातं कुरुजाङ्गले ॥ ४५ ॥
अहं चैव वसिष्यामि अम्बिका च मम प्रिया ।
सर्वदुःखापहा देवी नाम्ना सौभाग्यसुन्दरी ॥ ४६ ॥
वसिष्यामि तया देव्या सहितो भृगुकच्छके ।

एवमुक्त्वा स्थितो देवो भृगुकच्छेऽम्बिका तथा ॥ ४७ ॥
भृगुस्तु स्वपुरं प्रायाद् ब्रह्मघोषनिनादितम् ।
ऋग्यजुःसामघोषेण ह्यथर्वणनिनादितम् ॥ ४८ ॥

तत्रतीर्थेतुयःस्नात्वा वृषमुत्सृजतेनरः । स यातिशिवसायुज्यमित्येवंशङ्करोऽब्रवीत्

तत्र तीर्थे तु यः स्नात्वा चैत्रे मासि समाचरेत् ।
दद्याच्च लवणं विप्रे पूज्य सौभाग्यसुन्दरीम् ॥ ५० ॥

गोभूहिरण्यं विप्रेभ्यःप्रीयेतां ललिताशिवौ । न दुःखंदुर्भगत्वंचवियोगंपतिनासह प्राप्नोतिनारीराजेन्द्रभृगुतीर्थाप्लवेन च । यस्तु नित्यं भृगुं देवं पश्येद्वैपाण्डुनन्दन आब्रह्मसदनं यावत्तत्रस्थैर्दैवतैः सह । यत्फलं समावाप्नोति तच्छृणुष्व नृपोत्तम ॥

सुवर्णशृङ्गीं कपिलां पयस्विनीं साध्वीं सुशीलां तरुणीं सवत्साम् ।
दत्त्वा द्विजे सर्वव्रतोपपन्ने फलं च यत्स्यात्तदिहैव नूनम् ॥ ५४ ॥
समाः सहस्राणि तु सप्त वै जले म्रियेल्लभेद् द्वादशवह्निमध्ये ।
त्यजंस्तनुं शूरवृत्त्या नरेन्द्र! शक्राऽतिथ्यं याति वै मर्त्यधर्मा ॥ ५५ ॥
आख्यानमेतच्च सदा यशस्यं स्वर्ग्यं धन्यं पुत्र्यमायुष्यकारि ।
शृण्वँल्लभेत्सर्वमेतद्धि भक्त्या पर्वणि पर्वण्याजमीढस्सदैव ॥ ५६ ॥

संन्यासं कुरुते यस्तु भृगुतीर्थे विधानतः । स मृतः परमंस्थानंगच्छेद्वैयच्चदुर्लभम् एतच्छ्रुत्वा भृगुश्रेष्ठोदेवदेवेनभाषितम् । प्रहृष्टवदनो भूत्वा तत्रैव संस्थितो द्विजः

तिरोभावं गते देवे भृगुःश्रेष्ठो द्विजोत्तमः ।
स्वमूर्तिं तत्र मुक्त्वा तु ब्रह्मलोकं जगाम ह ॥ ५९ ॥
भृगुकच्छस्य चोत्पत्तिः कथिता तव पाण्डव !।
संक्षेपेण महाराज ! सर्वपापप्रणाशनी ॥ ६० ॥

एतत्पुण्यं पापहरं क्षेत्रं देवेन कीर्त्तितम् । चतुर्युगसहस्रेण पितामहदिनं स्मृतम् ॥ प्राप्ते ब्रह्मदिनेविप्रा जायतेयुगसम्भवः । न पश्यामित्विदं क्षेत्रमितिरुद्रःस्वयंजगौ

यः शृणोति त्विदं भक्त्या नारी वा पुरुषोऽपि वा ।

स याति परमं लोकमिति रुद्रः स्वयं जगौ ॥ ६३ ॥
देवखाते नरः स्नात्वा पिण्डदानादिसत्क्रियाम् ।
यां करोति नृपश्रेष्ठ! तामक्षयफलां विदुः ॥ ६४ ॥
य इमं शृणुयाद्भक्त्या भृगुकच्छस्य विस्तरम् ।
कोटितीर्थफलं तस्य भवेद्वै नाऽत्र संशयः ॥ ६५ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे भृगुकच्छतीर्थमाहात्म्यवर्णनंनाम द्व्यशीत्युत्तरशततमोऽध्यायः

त्र्यशीत्यधिकशततमोऽध्यायः

केदारेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

अतःपरंमहाराजगच्छेत्केदारसञ्ज्ञकम् । यत्रगत्वामहाराजश्राद्धं कृत्वा पिबेज्जलम्

सम्पूज्य देवदेवेशं केदारोत्थं फलं लभेत् ॥ १ ॥

युधिष्ठिर उवाच

कथमत्र सुरश्रेष्ठ केदाराख्यः स्थितः स्वयम् । उत्तरे नर्मदाकूले एतद्विस्तरतोवद

श्रीमार्कण्डेय उवाच

पुरा कृतयुगस्याऽऽदौ शङ्करस्तुमहेश्वरः । भृगुणाराधितःशप्तःश्रियाचभृगुकच्छके अपवित्रमिदंक्षेत्रं सर्ववेदविवर्जितम् । भविष्यति नृपश्रेष्ठ गतेत्युक्त्वा हरिप्रिया तपश्चचार विपुलं भृगुर्वर्षसहस्रकम् । वायुभक्षो निराहारश्चिरं धमनिसन्ततः ॥ ततःप्रत्यक्षतामागाल्लिङ्गीभूतोमहेश्वरः । प्रादुर्भूतस्तुसहसाभित्त्वापातालसप्तकम्

ददर्शाऽथ भृगुर्देवमौत्पलीं केलिकामिव ।
स्तुतिं चक्रे स देवाय स्थाणवे त्र्यम्बकेति च ॥ ७ ॥

एवं स्तुतः स भगवान्प्रोवाच प्रहसन्निव । पुनः पुनर्भृगुं मत्तः किन्नु प्रार्थयसेमुने

भृगुरुवाच

पञ्चक्रोशमिदंक्षेत्रं पद्मया शापितम्विभो । अपवित्रमिदंक्षेत्रं सर्ववेदविवर्जितम् ॥
भविष्यतीति च प्रोच्य गता देवी दिवम्प्रति ॥ ६ ॥

पुनः पवित्रतां याति यथेदं क्षेत्रमुत्तमम् । तथा कुरु महेशान! प्रसन्नो यदि शङ्कर

ईश्वर उवाच

केदाराख्यमिदं ब्रह्मँ लिङ्गमाद्यम्भविष्यति ।
कृत्वेदमादिलिङ्गानि भविष्यन्ति दशैव हि ॥ ११ ॥

एकादशमदृश्यंहिक्षेत्रमध्येभविष्यति । पा(ल)वयिष्यतितत्क्षेत्रमेकादशःस्वयंविभुः
तथा वै द्वादशादित्या मत्प्रसादात्तु मूर्त्तितः ।
वसिष्यन्ति भृगुक्षेत्रे रोगदुःखनिबर्हणाः ॥ १३ ॥

दुर्गाः ह्यष्टादश तथा क्षेत्रपालास्तु षोडश । भृगुक्षेत्रे भविष्यन्तिवीरभद्राश्चमातरः
पवित्रीकृतमेतद्धि नित्यं क्षेत्रं भविष्यति ।
माघमासे ह्युषःकाले स्नात्वा मासं जितेन्द्रियः ॥ १५ ॥
यः पूजयति केदारं स गच्छेच्छिवमन्दिरम् ।
तस्मिंस्तीर्थे नरः स्नात्वा पितृनुद्दिश्य भारत !।
श्राद्धं ददाति विधिवत्तस्य प्रीताः पितामहाः ॥ १६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे केदारेश्वरतीर्थमाहात्म्यवर्णनं नाम त्र्यशीत्युत्तरशततमोऽध्यायः ॥

चतुरशीत्यधिकशततमोऽध्यायः

धौतपापतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

धौतपापं ततो गच्छेद्भृगुतीर्थसमीपतः । वृषेणतु भृगुस्तत्र भूयोभूयोधुतस्ततः
धौतपापं तु तत्तेन नाम्नालोकेषुविश्रुतम् । तत्र स्थितोमहादेवस्तुष्ट्यर्थंभृगुसत्तमे
तत्र तीर्थे तु यः स्नात्वा शाठ्येनाऽपि नरेश्वर !।
मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ ३ ॥
यस्तु सम्यग्विधानेन तत्र स्नात्वाऽर्चयेच्छिवम् ।
देवान्पितॄन्समभ्यर्च्य मुच्यते सर्वपातकैः ॥ ४ ॥

ब्रह्महत्या गवांवध्या तत्रतीर्थे युधिष्ठिर । प्रविशेन्नसदाभीताप्रविष्टापिक्षयम्व्रजेत्

युधिष्ठिर उवाच

आश्चर्यभूतं लोकेऽस्मिन्कथयस्वद्विजोत्तम । प्रविशेन्नब्रह्महत्याययथावैधौतपाप्मनि
ब्रह्महत्यासमं पापं भविता नेह किञ्चन । कथं वा धौतपापे तु प्रविष्टं नश्यते द्विज
एतद्विस्तरतः सर्वं पृच्छामि वद कौतुकात् ॥ ७ ॥

मार्कण्डेय उवाच

आदिसर्गे पुरा शम्भुर्ब्रह्मणः परमेष्ठिनः । विकारंपञ्चमंदृष्ट्वा शिरोऽश्वमुखसन्निभम्
अङ्गुष्ठाङ्गुलियोगेन तच्छिरस्तेनकृन्तितम् । कृत्तमात्रे तु शिरसिब्रह्महत्याऽभवत्तदा
ब्रह्महत्यायुतश्चासीदुत्तरे नर्मदातटे । धुनितं तु यतो राजन्वृषेण धर्म्ममूर्त्तिना ॥
तत्र धौतेश्वरीं देवीं स्थापितां वृषभेण तु ।
ददर्श भगवाञ्छम्भुः सर्वदैवतपूजिताम् ॥ ११ ॥

दृष्ट्वाधौतेश्वरीं दुर्गां ब्रह्महत्याविनाशिनीम् । तत्रविश्रममाणश्चशङ्करस्त्रिपुरान्तकः
स शङ्करो ब्रह्महत्या विहीनं मेने त्मानन्तस्य तीर्थस्य भावात् ।

सुविस्मितो देवदेवो वरेण्यो दृष्ट्वा दूरे ब्रह्महत्यां च तीर्थात् ॥ १३ ॥
विधौतपापं महितं धर्मशक्त्या विशेन्न हत्या देवीभयात्प्रभीता ।
रक्ताम्बरा रक्तमाल्योपयुक्ता कृष्णा नारी रक्तदामप्रसक्ता ॥ १४ ॥
मां वाञ्छन्ती स्कन्धदेशं रहस्ये दूरे स्थिता तीर्थवर्यप्रभावात् ।
सञ्चिन्त्य देवो मनसा स्मरारिर्वासाय बुद्धिं तत्र तीर्थे चकार ॥ १५ ॥
विमृश्य देवो बहुशः स्थितः स्वयं विधौतपापः प्रथितः पृथिव्याम् ।
बभूव तत्रैव निवासकारी विधूतपापनिकटप्रदेशे ॥ १६ ॥

तदाप्रभृतिराजेन्द्रब्रह्महत्याविनाशनम् । विधौतपापंतत्तीर्थंनर्मदायांव्यवस्थितम् अश्वयुक्च्छुक्लनवमी तत्र तीर्थेविशिष्यते । दिनत्रयं तु राजेन्द्र सप्तम्यादिविशेषतः समुपोष्याष्टमींभक्त्यासाङ्गंवेदंपठेत्तुयः । अहोरात्रेणचैकेन ऋग्यजुःसामसञ्ज्ञकम् अभ्यसन्ब्रह्महत्याया मुच्यते नाऽत्र संशयः । वृषलीगमनञ्चैव यश्च गुर्वङ्गनागमः

स्नात्वा ब्रह्मरसोत्कृष्टे कुम्भेनैव प्रमुच्यते ।
वन्ध्या स्त्री जननी या तु काकवन्ध्या मृतप्रजा ॥ २१ ॥
सापि कुम्भोदकैः स्नात्वा जीवत्पुत्रा प्रजावती ।
अपठस्तु नरोपोष्य ऋग्यजुःसामसम्भवाम् ॥ २९ ॥

ऋचमेकां जपन्विप्रस्तथा पर्वणि यो नृप !। अनृचोपोष्यगायत्रीं जपेद्वेदमातरम् जपन्नवम्यां विपेन्द्रो मुच्यते पापसञ्चयात् । एवंतुकथितंतात पुराणोक्तंमहर्षिभिः धौतपापंमहापुण्यं शिवेनकथितंमम । प्राणत्यागं तुयःकुर्याज्जलेवाऽग्नौस्थलेपिवा स गच्छति विमानेन ज्वलनार्कसमप्रभः । हंसबर्हिप्रयुक्तेन सेव्यमानोऽप्सरोगणैः

शिवस्य परमं स्थानं यत्सुरैरपि दुर्लभम् ।
क्रीडते स्वेच्छया तत्र यावच्चन्द्रार्कतारकम् ॥ २७ ॥

धौतपापेतुयानारीकुरुते प्राणसंक्षयम् । तत्क्षणादेवसा पार्थ पुरुषत्वमवाप्नुयात् अथ किं बहुनोक्तेन शुभंवायदिवाऽशुभम् । तदक्षयफलं सर्वं धौतपापे कृतं नृप !॥ संन्यसेन्नियमेनान्नं संन्यसेद्विषयादिकम् । फलमूलादिकं चैवजलमेकंनसंत्यजेत् ॥

एवं यःकुरुतेपार्थरुद्रलोकं सगच्छति । तत्र भुक्त्वाखिलान्भोगाञ्जायतेभुविभूपतिः

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे धौतपापतीर्थमाहात्म्यवर्णनं नाम चतुरशीत्युत्तरशततमोऽध्यायः

पञ्चाशीत्यधिकशततमोऽध्यायः

एरण्डीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल एरण्डीतीर्थमुत्तमम् । स्नानमात्रेण तत्रैव ब्रह्महत्याप्रणश्यति मासि चाश्वयुजे तत्र शुक्लपक्षे चतुर्दशीम् । उपोष्य प्रयतःस्नातस्तर्पयेत्पितृदेवताः पुत्रर्द्धिरूपसम्पन्नोजीवेच्चशरदांशतम् । शिवलोकंमृतोयाति नाऽत्रकार्याविचारणा

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे-रेवाखण्डे एरण्डीतीर्थमाहात्म्यवर्णनं नाम पञ्चाशीत्युत्तरशततमोऽध्यायः

षडशीत्यधिकशततमोऽध्यायः

कनखलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल तीर्थं कनखलोत्तमम् । गरुडेन तपस्तप्तं पूजयित्वा महेश्वरम् दिव्यं वर्षशतंयावज्जातमात्रेण भारत । तपोजपैः कृशीभूतो दृष्टो देवेन शम्भुना ॥ ततस्तुष्टो महादेवो वैनतेयं मनोजवम् । उवाच परमं वाक्यं विनतानन्दवर्धनम् प्रसन्नस्ते महाभाग वरं वरय सुव्रत !। दुर्लभं त्रिषु लोकेषु ददामि तव खेचर !॥

गरुड उवाच

इच्छामिवाहनं विष्णोर्द्विजेन्द्रत्वं सुरेश्वर !। प्रसन्ने त्वयिमेसर्वंभवत्विति मतिर्मम

श्रीमहेश उवाच

दुर्लभः प्राणिनांतातयोवरः प्रार्थितोऽनघ। देवदेवस्यवहनं द्विजेन्द्रत्वं सुदुर्लभम्
नारायणोदरे सर्वं त्रैलोक्यं सचराचरम्। त्वया स कथमूह्यो तद्देवदेवो जगद्गुरुः
तेनैव स्थापितश्चेन्द्रस्त्रैलोक्ये सचराचरे।
कथमन्यस्य चेन्द्रत्वं भवतीति सुदुर्लभम् ॥ ८ ॥
तथाऽपि मम वाक्येनवाहनंत्वंभविष्यसि। शङ्खचक्रगदापाणेर्वहतोऽपिजगत्त्रयम्
इन्द्रस्त्वंपक्षिणां मध्येभविष्यसिनसंशयः। इति दत्त्वावरंतस्माअन्तर्धानंगतोहरः
ततो गते महादेवे ह्यरुणस्याऽनुजो नृप !।
आराधयामास तदा चामुण्डां मुण्डमण्डिताम् ॥ ११ ॥
श्मशानवासिनीं देवीं बहुभूतसमन्विताम्।
योगिनीं योगसंसिद्धां वसामांसासवप्रियाम् ॥ १२ ॥
ध्यातमात्रा तु तेनैवप्रत्यक्षाह्यभवत्तदा। जालंधरे चयासिद्धिः कौलीने उड्डिशेपरे
समग्रा सा भृगुक्षेत्रे सिद्धक्षेत्रे तु संस्थिता।
चामुण्डा तत्र सा देवी सिद्धक्षेत्रे व्यवस्थिता ॥ १४ ॥
संस्तुता ऋषिभिर्दैवैर्योगक्षेमार्थसिद्धये। विनताऽऽनंदजननस्तत्र तांयोगिनीं नृप
भक्त्या प्रसादयामास स्तोत्रैर्वैदिकलौकिकैः ॥ १५ ॥

गरुड उवाच

ॐया सा क्षुत्क्षामकण्ठा नवरुधिरमुखा प्रेतपद्मासनस्था
भूतानां वृन्दवृन्दैः पितृवननिलया क्रीडते शूलहस्ता।
शस्त्रध्वस्तप्रवीरव्रजरुधिरगलन्मुण्डमालोत्तरीया
देवी श्रीवीरमाता विमलशशिनिभा पातु वश्चर्ममुण्डा ॥ १६ ॥
या सा क्षुत्क्षामकण्ठा विकृतभयकरी त्रासिनी दुष्कृतानाम्

मुञ्चज्ज्वालाकलापैर्दशनकसमसैः खादति प्रेतमांसम्।
पिङ्गोद्ध्वोद्बद्धजूटारविसद्दशतनुर्व्याघ्रचर्मोत्तरीया-
दैत्येन्द्रैर्यक्षरक्षोऽप्सरसुरनमिता पातुवश्चर्ममुण्डा ॥ १७ ॥
या सा दोर्दण्डचण्डैर्डमरुरणरणाटोपटङ्कारघण्टैः
कल्पान्तोत्पातवाताहतपटुपटहैर्वल्गते भूतमाता।
क्षुत्क्षामा शुष्ककुक्षिः खरतरनखरैः क्षोदति प्रेतमांसम्
मुञ्चन्ती चाट्टहासं घुरघुरितरवा पातु वश्चर्ममुण्डा ॥ १८ ॥
या सा निम्नोदराभा विकृतभवभयत्रासिनी शूलहस्ता
चामुण्डा मुण्डचाता रणरुणितरणज्झल्लरीनादरम्या।
त्रैलोक्यं त्रासयन्ती कहकहकहकहैर्घोररावैरनेकै-
र्नृत्यन्ती मातृमध्ये पितृवननिलया पातु वश्चर्ममुण्डा ॥ १९ ॥
या धत्ते विश्वमखिलं निजांशेनमहोज्ज्वला। कनकप्रसवेलीना पातुमांकनकेश्वरी
हिमाद्रिसम्भवा देवीदयादर्शितविग्रहा। शिवप्रियाशिवे सक्तापातुमांकनकेश्वरी
अनादिजगदादिर्या रत्नगर्भा वसुप्रिया। रथाङ्गपाणिना पद्मापातु मां कनकेश्वरी
सावित्री या च गायत्री मृडानी वागथेन्दिरा।
स्मर्तॄणां या सुखं दत्ते पातु मां कनकेश्वरी ॥ २३ ॥
सौम्यासौम्यैः सदा रूपैः सृजत्यवति या जगत्।
परा शक्तिः परा बुद्धिः पातु मां कनकेश्वरी ॥ २४ ॥
ब्रह्मणः सर्गसमये सृज्यशक्तिः परातुया। जगन्मायाजगद्धात्री पातु मांकनकेश्वरी
विश्वस्य पालने विष्णोर्या शक्तिः परिपालिता।
मदनोन्मादिनी मुख्या पातु मां कनकेश्वरी ॥ २६ ॥
विश्वसंलयने मुख्या या रुद्रेण समाश्रिता।
रौद्री शक्तिः शिवाऽनन्ता पातु मां कनकेश्वरी ॥ २७ ॥
कैलाससानुसंरुद्धकनकप्रसवेशया। भस्मकाभिहता पूर्वं पातु मां कनकेश्वरी ॥

पतिप्रभावमिच्छन्ती त्रस्यन्ती या विना पतिम् ।
अवला त्वेकभावा च पातु मां कनकेश्वरी ॥ २६ ॥
विश्वसंरक्षणे सक्ता रक्षिता कनकेन या । आब्रह्मस्तम्बजननी पातुमांकनकेश्वरी॥
ब्रह्मविष्णवीश्वराःशक्त्याशरीरग्रहणंयया । प्रापिताप्रथमाशक्तिःपातुमांकनकेश्वरी
श्रुत्वा तु गरुडेनोक्तं देवीवृत्तचतुष्टयम् । प्रसन्ना सम्मुखी भूत्वा वाक्यमेतदुवाचह

श्रीचामुण्डोवाच

प्रसन्ना ते महासत्त्व वरं वरय वाञ्छितम् । ददामि ते द्विजश्रेष्ठ यत्तेमनसिरोचते

गरुड उवाच

अजरश्चामरश्चैव अधृष्यश्च सुरासुरैः । तव प्रसादाच्चैवान्यैरजेयश्च भवाम्यहम् ॥
त्वया चाऽत्र सदा देवि! स्थातव्यं तीर्थसन्निधौ ।

मार्कण्डेय उवाच

एवं भविष्यतीत्युक्त्वा देवी देवैरभिष्टुता ॥ ३५ ॥
जगामाकाशमाविश्यभूतसङ्घसमन्विता । यदालक्ष्म्यानृपश्रेष्ठस्थापितंपुरमुत्तमम्
अनुमान्य तदा देवीं कृतं तस्यां समर्पितम् ।

लक्ष्मीरुवाच

रक्षणाय मया देवि! योगक्षेमार्थसिद्धये ॥ ३७ ॥
मातृवत्प्रतिपाल्यंतेसदादेविपुरंमम । गरुडोऽपिततःस्नात्वासम्पूज्यकनकेश्वरीम्
तीर्थं तत्रैव संस्थाप्य जगामाऽऽकाशमुत्तमम् ।
तत्र तीर्थे तु यः स्नात्वा पूजयेत्पितृदेवताः ॥ ३६ ॥
सर्वकामसमृद्धस्य यज्ञस्य फलमश्नुते । गन्धपुष्पादिभिर्यस्तु पूजयेत्कनकेश्वरम्
तस्य योगैश्वर्यसिद्धिर्योगपीठेषु जायते । मृतो योगेश्वरं लोकं जयशब्दादिमङ्गलैः
स गच्छेन्नाऽत्र सन्देहो योगिनीगणसंयुतः ॥ ४१ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कनखलेश्वरतीर्थमाहात्म्यवर्णनंनाम षडशीत्युत्तरशततमोऽध्यायः ॥

सप्ताशी यधिकशततमोऽध्यायः

कालाग्निरुद्रतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

जालेश्वरं ततो गच्छेल्लिङ्गमाद्यं स्वयम्भुवः ।
कालाग्निरुद्रं विख्यातं भृगुकच्छे व्यवस्थितम् ॥ १ ॥
सर्वपापप्रशमनं सर्वोपद्रवनाशनम् । क्षेत्रपापविनाशाय कृपया च समुत्थितम् ॥
पुरा कल्पेऽसुरगणैराक्रान्ते भुवनत्रये । वेदोक्तकर्मनाशे च धर्मे च विलयंगते ॥३॥
देवर्षिमुनिसिद्धेषु विश्वासपरमेषु च । कालाग्निरुद्रादुत्पन्नो धूमः कालोद्भवोद्भवः
धूमात्समुत्थितं लिङ्गं भित्त्वा पातालसप्तकम् ।
अवटं दक्षिणे कृत्वा लिङ्गं तत्रैव तिष्ठति ॥ ५ ॥
तत्रतीर्थेनृपश्रेष्ठकुण्डंज्वालासमुद्भवम् । यत्र सा पतिताज्वालाशिवस्यदहतःपुरम्
तत्रावाटंसमुद्भूतंधूमावर्त्तस्ततोऽभवत् । तस्मिन्कुण्डेतुयःस्नानंकृत्वावैनर्मदाजले
कुर्याच्छ्राद्धं पितृभ्यो वै पूजयेच्च त्रिलोचनम् ।
कालाग्निरुद्रनामानि स गच्छेत्परमां गतिम् ॥ ८ ॥
यत्किञ्चित्कामिकं कर्म ह्याभिचारिकमेव वा ।
रिपुसङ्क्षयकृद्वापि सान्तानिकमथापि वा ॥
अत्र तीर्थे कृतं सर्वमचिरात्सिद्ध्यते नृप !॥ ६ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कालाग्निरुद्रतीर्थमाहात्म्यवर्णनंनाम सप्ताशीत्युत्तरशततमोऽध्यायः ॥

अष्टाशीत्यधिकततमोऽध्यायः

शालग्रामतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः परं महाराज चत्वारिंशत्क्रमान्तरे । शालग्रामं ततो गच्छेत्सर्वदैवतपूजितम्
यत्रादिदेवो भगवान्वासुदेवस्त्रिविक्रमः ।
स्वयं तिष्ठति लोकात्मा सर्वेषां हितकाम्यया ॥ २ ॥
नारदेन तपस्तप्त्वा कृता शाला द्विजन्मनाम् ।
सिद्धिक्षेत्रं भृगुक्षेत्रं ज्ञात्वा रेवातटे स्वयम् ॥ ३ ॥
शालग्रामाभिधो देवो विप्राणां त्वधिवासितः ।
साधूनां चोपकाराय वासुदेवः प्रतिष्ठितः ॥ ४ ॥
योगिनामुपकाराय योगिध्येयो जनार्दनः । शालग्रामेति तेनैव नर्मदातटमाश्रितः
मासिमार्गशिरेशुक्लाभवत्येकादशीयदा । स्नात्वारेवाजलेपुण्ये तद्दिनं समुपोषयेत्
रात्रौ जागरणं कुर्यात्सम्पूज्यच जनार्द्दनम् । पुनः प्रभातसमयेद्वादश्यां नर्मदाजले
स्नात्वा सन्तर्प्य देवांश्च पितॄन्मातॄस्तथैव च ।
श्राद्धं कृत्वा ततः पश्चात्पितृभ्यो विधिपूर्वकम् ॥ ८ ॥
शक्तितो ब्राह्मणान्पूज्य स्वर्णवस्त्रान्नदानतः ।
क्षमापयित्वा तान्विप्रांस्तथा देवं खगध्वजम् ॥ ९
एवं कृते महाराज यत्पुण्यञ्च भवेन्नृणाम् । शृणुष्वावहितोभूत्वातत्पुण्यंनृपसत्तम
न शोकदुःखे प्रतिपत्स्यतीह जीवन्मृतो याति मुरारिसाम्यम् ।
महान्ति पापानि विसृज्य दुग्धं पुनर्न मातुः पिबते स्तनोद्यत् ॥ ११ ॥
शालग्रामं पश्यते यो हि नित्यं स्नात्वा जले नार्मदेऽघौघहारे ।
स मुच्यते ब्रह्महत्यादिपापैर्नारायणानुस्मरणेन तेन ॥ १२ ॥

वसन्ति ये संन्यसित्वा च तत्र निगृह्य दुःखानि विमुक्तसङ्गाः ।
ध्यायन्तो वै साङ्ख्यवृत्त्या तुरीयं पदं मुरारेस्तेऽपि तत्रैव यान्ति ॥ १३
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे शालग्रामतीर्थमाहात्म्यवर्णनं नामाष्टाशीत्युत्तरशततमोऽध्यायः ॥

एकोननवत्यधिकशततमोऽध्यायः

उदीर्णवराहतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! तीर्थं परमशोभनम् । उदीर्णो यत्र वाराहो ह्यभवद्धरणीधरः
धुन्वन्दंष्ट्रां करालाग्रां बिभ्रच्च पृथिवीमिमाम् ।
स एव पञ्चमः प्रोक्तो वाराहो मुक्तिदायकः ॥ २ ॥

युधिष्ठिर उवाच

कथमुदीर्णरूपोऽभूद्वाराहो धरणीधरः । वाराहत्वं गतः केन पञ्चमः केन रञ्जितः

मार्कण्डेय उवाच

आदिकल्पेपुराराजन्क्षीरोदे भगवान्हरिः । शेतेस भोगिशयनेयोगनिद्राविमोहितः
लक्ष्मीकराम्बुजयुगमृद्यमानपदद्वयः । तस्मिन्स्वपतिदेवेशे भाराक्रान्तावसुन्धरा
बभूव नृपतिश्रेष्ठ गत्वा वैदेवसन्निधौ । अवोचद्भारखिन्नाहं गमिष्यामि रसातलम्
दृष्ट्वा देवाः समुद्विग्ना गता यत्र जनार्द्दन । तुष्टुवुर्वाग्भिरिष्टाभिःकेशवंजगतःपतिम्

देवा ऊचुः

नमो नमस्ते देवेश!सुरार्तिहर!सर्वग !। विश्वमूर्त्ते नमस्तुभ्यं त्राहि सर्वान्महद्भयात्
इत्युक्तो दैवतैर्देवो ह्युवाच किमुपस्थितम् ।
कार्यं वदध्वं मे देवा! यत्कृत्यं मा चिरं कृथाः ॥ ९ ॥

देवा ऊचुः

धरा धरित्री भूतानां भारोद्विग्ना निमज्जति ।
तामुद्धर हृषीकेश लोकान्संस्थापय स्थितौ ॥ १० ॥
एवमुक्तः सुरैः सर्वैः केशवः परमेश्वरः । वाराहं रूपमास्थाय सर्वयज्ञमयं विभुः ॥
दंष्ट्राकरालं पिङ्गाक्षं समाकुञ्चितमूर्द्धजम् ।
कृत्वाऽनन्तं पादपीठं दंष्ट्राग्रेणोद्धरन्भुवम् ॥ १२ ॥
सपर्वतवनामुर्वीं समुद्रपरिमेखलाम् । उद्धृत्य भगवान्विष्णुरुदीर्णः समजायत ॥
दर्शयन्पञ्चधात्मानमुत्तरे नर्मदातटे । तथाऽऽद्यं कोरलायां तु द्वितीयं योधनीपुरे
जयक्षेत्राभिधानेतु जयेतिपरिकीर्त्तितम् । असुरान्मोहयल्लिङ्गस्तृतीयःपरिकीर्त्तितः
पावनाय जगद्धेतोःस्थितोयस्माच्छशिप्रभः । अतस्तुनृपशार्दूलश्वेतइत्यभिधीयते
उद्धृत्य जगतां देवीमुदीर्णो भृगुकच्छके । ततःपञ्चमउदीर्णोवराह इति सञ्ज्ञितः
इति पञ्चवराहास्ते कथिताः पाण्डुनन्दन !। युगपद्दर्शनं चैषां ब्रह्महत्यांव्यपोहति
ज्येष्ठे मासि सिते पक्ष एकादश्यां विशेषतः ।
गत्वा ह्यादिवराहं तु सम्प्राप्ते दशमीदिने ॥ १९ ॥
हविष्यमन्नं भुञ्जीयाल्लघुसायं गते रवौ । रात्रौ जागरणं कुर्याद्वाराहेह्यादिसञ्ज्ञके
ततः प्रभाते ह्युषसि संस्नात्वा नर्मदाजले ।
सन्तर्प्य पितृदेवांश्च तिलैर्यवविमिश्रितैः ॥ २१ ॥
धेनुं दद्याद्द्विजेयोग्येसर्वाभरणभूषिताम् । निर्ममोनिरहङ्कारो दानंदद्याद्द्विजातये
गत्वा सम्पूजयेद्देवं वाराहं ह्यादिसञ्ज्ञितम् ।
अनेन विधिना पूज्य पश्चाद्गच्छेज्जयं त्वरन् ॥ २३ ॥
त्वरितंतुजयंगत्वापूर्वकंविधिमाचरेत् । अश्वंदद्याद्द्विजाग्र्यायजयपूर्वाभिनिर्गतम्
लिङ्गे चैव तिला देयाः श्वेते हिरण्यमेवच । उदीर्णेचभुवंदद्यात्पूर्वकं विधिमाचरेत्
अनस्तमित आदित्ये वराहान्पञ्चपश्यतः । यत्फलंलभते पार्थ! तदिहैकमनाःशृणु
ब्रह्महत्यासुरापानं स्तेयंगुर्वंगनागमः । एभिस्तुसहसंयोगो विश्वस्तानांचवञ्चनम्

स्वसृदुहितृभगिनीकुलदारोपबृंहणम् । आजन्ममरणाद्यावत्पापं भरतसत्तम !॥
तीर्थपञ्चकपूतस्य वैष्णवस्य विशेषतः । युगपच्चविनश्येत तूलराशिरिवानलात्
नारायणानुस्मरणाज्जपध्यानाद्विशेषतः ।
विप्रणश्यति पापानि गिरिकूटसमान्यपि ॥ ३० ॥
दृष्ट्वा पञ्चवराहान्वै पौरुषेमहतिस्थितः । आप्लवन्नर्मदातोयेश्राद्धंकृत्वायथाविधि
उदयास्तमनादर्वाग्यः पश्येल्लोटणेश्वरम् । कलेवरविमुक्तः स इत्येवं शङ्करोऽब्रवीत्
मुक्तिं प्रयाति सहसा दुष्प्रापां परमेश्वरीम् ।
पौरुषे क्रियमाणेऽपि न सिद्धिर्जायते यदि ॥ ३३ ॥
ब्रुवन्ति स्वर्गगमनमपि पापान्वितस्य च । यत्र तत्र गतस्यैव भवेत्पञ्चवराहकी ॥
ज्येष्ठस्यैकादशीतिथौ ध्रुवं तत्र वसेन्नरः । आदिं जयंतथा श्वेतं लिङ्गमुदीर्णमेवच
आश्रित्य तस्या द्रष्टव्या वराहास्तु यतस्ततः ।
ज्येष्ठस्यैकादशीतिथौ विष्णुना प्रभुविष्णुना ॥ ३६ ॥
वाराहं रूपमास्थाय उद्धृता धरणी विभो !।
पुण्यात्पुण्यतमा तेन ह्यशेषाघौघनाशिनी ॥ ३७ ॥
दृष्ट्वा पञ्चवराहान्वै क्रोडमुदीर्णरूपिणम् । पूजयित्वाविधानेन पश्चाज्जागरणञ्चरेत्
सपञ्चवर्त्तिकान्दीपान्घृतेनोज्ज्वाल्य भक्तितः ।
पुरणश्रवणैर्नृत्यैर्गीतवाद्यैः सुमङ्गलैः ॥ ३९ ॥
वेदजाप्यैः पवित्रैश्च क्षपयित्वा च शर्वरीम् ।
यत्पुण्यं लभते मर्त्यो ह्याजमीढ! शृणुष्व तत् ॥ ४० ॥
रेवाजलं पुण्यतमं पृथिव्यां तथा च देवो जगतां पतिर्हरिः ।
एकादशी पापहरा नरेन्द्र! बह्वायासैर्लभ्यते मानवानाम् ॥ ४१ ॥
एकैकशो ब्रह्महत्यादिकानि शक्तानि हन्तुं पापसङ्घानि राजन् ।
नैते सर्वे युगपद्वै समेता हन्तुं शक्ताः किन्नु तद्ब्रूहि राजन् !॥ ४२ ॥
यथेदमुक्तं तव धर्मसूनो! श्रुतं च यच्छङ्कराच्चन्द्रमौलेः ।

श्रुत्वेदमिच्छन्मुच्यते सर्वपापैः पठन्पदं याति हि वृत्रशत्रोः ॥ ४३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्रयां संहितायांपञ्चमेऽवन्तीखण्डे

रेवाखण्डे नर्मदामाहात्म्ये उदीर्णवराहतीर्थमाहात्म्यवर्णनं

नामैकोननवत्युत्तरशततमोऽध्यायः ॥ १८९ ॥

———

नवत्यधिकशततमोऽध्यायः

चन्द्रहासतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल सोमतीर्थमनुत्तमम् । चन्द्रहासेतिविख्यातंसर्वदैवतपूजितम्

यत्र सिद्धिं परांप्राप्तः सोमो राजा सुरोत्तमः ॥ २ ॥

युधिष्ठिर उवाच

कथंसिद्धिमनुप्राप्तःसोमोराजाजगत्पतिः। तत्सर्वंश्रोतुमिच्छामिकथयस्वममाऽनघ

मार्कण्डेय उवाच

पुरा शप्तोमुनीन्द्रेण दक्षेणकिलभारत । असेवनाद्धि दाराणां क्षयरोगीभविष्यसि

उद्वाहितानां पत्नीनां ये न कुर्वन्ति सेवनम् ।

या निष्ठा जायते तेषां तां शृणुष्व नरोत्तम !॥ ५ ॥

ऋतुकालेतु नारीणांसेवनाज्जायतेसुतः । सुतात्स्वर्गश्चमोक्षश्चहीत्येवंश्रुतिनोदना

तत्कालोचितधर्मेण ये न सेवन्ति तां नराः ।

तेषां ब्रह्मघ्नजं पापं जायते नाऽत्र संशयः ॥ ७ ॥

तेन पापेन घोरेण वेष्टितो रौरवेवसेत् । तस्यतद्रुधिरं पापाःपिबन्तेकालमीप्सितम्

ततोऽवतीर्णकालेन यां यां योनिं प्रयास्यति ।

तस्यां तस्यां स दुष्टात्मा दुर्भगो जायते सदा ॥ ९ ॥

नारीणांतुसदाकामो ह्यधिकःपरिवर्त्तते । विशेषेणऋतोःकालेभिद्यतेकामसायकैः

परिभूता हि सा भर्त्रा ध्यायतेऽन्यं पतिं ततः ।

तस्याः पुत्रः समुत्पन्नो ह्युच्यते कुलमुत्तमम् ॥ ११ ॥

स्वर्गस्थास्तेन पितरःपूर्वजातामहीपते! । पतन्ति जातमात्रेण कुलटस्तेनचोच्यते

तेन कर्मविपाकेन क्षयरोगी शशी ह्यभूत् ।

त्यक्त्वा लोकं सुरेन्द्राणां मर्त्यलोकमुपागतः ॥ १३ ॥

तत्रतीर्थान्यनेकानि पुण्यान्यतनानि च । भ्रमित्वानर्मदांप्राप्तःसर्वपापप्रणाशिनीम्

उपवासस्तु दानानि व्रतानि नियमाश्च ये ।

चचार द्वादशाब्दानि ततो मुक्तः स किल्बिषैः ॥ १५ ॥

स्थापयित्वा महादेवंसर्वपातकनाशनम् । जगामप्रभया पूर्णः सोमलोकमनुत्तमम्

येनैव स्थापितोदेवः पूज्यतेवर्षसंख्यया । तावद्युगसहस्राणि तस्यलोकं समश्नुते

तेन देवान्विधानोक्तान्स्थापयन्ति नरा भुवि ।

अक्षयं चाव्ययं यस्मात्फलं भवति नाऽन्यथा ॥ १८ ॥

सोमतीर्थेतुयः स्नात्वापूजयेद्देवमीश्वरम् । जायते स नरो भूत्वा सोमवत्प्रियदर्शनः

चन्द्रप्रभासे यो गत्वा स्नानं विधिवदाचरेत् ।

व्याधिना नाभिभूतः स्यात्क्षयरोगेण वा युतः ॥ २० ॥

चन्द्रहास्येनरः स्नात्वा द्वादश्यांतुनरेश्वर । चतुर्दश्यामुपोष्यैवक्षीरस्य जुहुयाच्चरुम्

मन्त्रैः पञ्चभिरीशानं पुरुषस्त्र्यम्बकं यजेत् ।

हविःशेषं स्वयं प्राश्य चन्द्रहास्येशमीक्षयेत् ॥ २२ ॥

अनेनविधिना राजंस्तुष्टो देवो महेश्वरः । विधिनातीर्थयोगेन क्षयरोगाद्विमुच्यते

सप्तभिःसोमवारैर्यःस्नानं तत्रसमाचरेत् । सवैकर्णकृताद्रोगान्मुच्यतेपूजयञ्छिवम्

अक्षिरोगस्तथा राजंश्चन्द्रहास्ये विनश्यति ।

चन्द्रहास्ये तु यो गत्वा ग्रहणे चन्द्रसूर्ययोः ॥

स्नानं समाचरेद्भक्त्या मुच्यते सर्वपातकैः ॥ २५ ॥

तत्रस्नानं चदानं चचन्द्रहास्ये शुभाशुभम् । कृतंनृपवरश्रेष्ठसर्वं भवतिचाक्षयम् ॥

ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितम् ।

चन्द्रहास्ये तु ये स्नात्वा पश्यन्ति ग्रहणं नराः ॥ २७ ॥

वाचिकं मानसंपापं कर्मजं यत्पुराकृतम् । स्नानमात्रात्तु राजेन्द्रतत्रतीर्थेप्रणश्यति

बहवस्तन्न जानन्ति महामोहसमन्विताः । देहस्थइवसर्वेषां परमात्मेवसंस्थितम्

पश्चिमे सागरेगत्वा सोमतीर्थेतुयत्फलम् । तत्समग्रमवाप्नोतिचन्द्रहास्येनसंशयः

संक्रान्तौ च व्यतीपाते विषुवे चायने तथा ।

चन्द्रहास्ये नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ३१ ॥

ते मूढास्ते दुराचारास्तेषां जन्म निरर्थकम् ।

चन्द्रहास्यं न जानन्ति नर्मदायां व्यवस्थितम् ॥ ३२ ॥

चन्द्रहास्ये तु यः कश्चित्संन्यासं कुरुते नृप !।

अनिवर्त्तिका गतिस्तस्य सोमलोकात्कदाचन ॥ ३३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे चन्द्रहास्यतीर्थमाहात्म्यवर्णनं नाम नवत्युत्तरशततमोऽध्यायः

एकनवत्यधिकशततमोऽध्यायः

द्वादशादित्यतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

सिद्धेश्वरं ततोगच्छेत्तस्यैव तुसमीपतः । अमृतस्त्रावितलिङ्गमाद्यं स्वायंभुवंतथा

दृष्टमात्रेण येनेह ह्यनृणो जायते नरः । पुरा वर्षशतं साग्रमाराध्य परमेश्वरम् ॥

प्राप्नुयुः परमां सिद्धिमादित्या द्वादशैव तु ।

अतः सिद्धेश्वरः प्रोक्तः सिद्धिदः सिद्धिकाङ्क्षिणाम् ॥ ३ ॥

युधिष्ठिर उवाच

कथं सिद्धेश्वरे प्राप्ताःसिद्धिं देवा द्विजोत्तम !।

आदित्या इति यच्चोक्तं तत्ते विस्मापनं कृतम् ॥ ४ ॥

तपस्युग्रे व्यवसिता आदित्याः केन हेतुना ।

संप्राप्तास्तु द्विजश्रेष्ठ सिद्धिं चैवाभिलाषिकीम् ॥ ५ ॥

संक्षिप्य तु मया पृष्टं विस्तराद् द्विज! शंस मे ॥ ६ ॥

मार्कण्डेय उवाच

अदितेर्द्वादशादित्या जाताः शक्रपुरोगमाः ।

इन्द्रो धाता भगस्त्वष्टा मित्रोऽथ वरुणोर्यमा ॥ ७ ॥

विवस्वान्सविता पूषा ह्यंशुमान्विष्णुरेवच ।

त इमे द्वादशादित्या इच्छन्तो भास्करं पदम् ॥ ८ ॥

नर्मदातटमाश्रित्यतपस्युग्रेव्यवस्थिताः । सिद्धेश्वरेमहाराज काश्यपेयैर्महात्मभिः

परा सिद्धिरनुप्राप्ता द्वादशादित्यसञ्ज्ञितैः ।

स्थापितश्च जगद्धाता तस्मिंस्तीर्थे दिवाकरः ॥ १० ॥

स्वकीयांशविभागेन द्वादशादित्यसञ्ज्ञितैः ।

तदाप्रभृति तत्तीर्थं राजन्ख्यातिं गतं भुवि ॥ ११ ॥

प्रलये समनुप्राप्ते ह्यादित्याद्वादशैव ते । द्वादशादित्यतो राजन्संभवन्तियुगक्षये

इन्द्रस्तपति पूर्वेण धाता चैवाग्निगोचरे ।

गभस्तिपतिर्वैयाम्ये त्वष्टा नैर्ऋतदिङ्मुखः ॥ १३ ॥

वरुणः पश्चिमे भागे मित्रस्तु वायवे तथा ।

विष्णुश्च सौम्यदिग्भागे विवस्वानीशगोचरे ॥ १४ ॥

ऊर्ध्वतश्चैवसविताह्यधःपूषाविशोषयन् । अंशुमांस्तुतथा विष्णुर्मुखतोनिर्गतंजगत्

प्रदहन्वै नरश्रेष्ठ बभ्रमुश्च इतस्ततः । यथैव ते महाराज! दहन्ति सकलं जगत् ॥

तथैव द्वादशादित्या भक्तानां भावसाधनाः ।

प्रातरुत्थाय यः स्नात्वा द्वादशादित्यसञ्ज्ञितम् ॥ १७ ॥
पश्यते देवदेवेशं शृणु तस्यैवयत्फलम् । वाचिकं मानसं पापं कर्मजं यत्पुराकृतम्
नश्यते तत्क्षणादेव द्वादशादित्यदर्शनम् । प्रदक्षिणं तुयः कुर्यात्तस्य देवस्यभारत
प्रदक्षिणीकृता तेन पृथिवीनाऽत्र संशयः । तत्रतीर्थे तुसप्तम्यामुपवासेनयत्फलम्
अन्यत्र सप्तसप्तम्यां लभन्तिनलभन्तिच । षष्ठ्यांवारे दैनकरे द्वादशादित्यदर्शनात्
प्रदक्षिणं तुयः कुर्यात्तस्य पापंतुनश्यति । अरोगी सप्तजन्मानि भवेद्वैनाऽत्रसंशयः
यस्तु प्रदक्षिणशतंदद्याद्भक्त्यादिनेदिने । दद्रूपिटककुष्ठानि मण्डलानिविचर्चिकाः
नश्यन्तिव्याधयःसर्वेगरुडेनैवपन्नगाः । पुत्रप्राप्तिर्भवेत्तस्य षष्ठ्या वासरसेवनात्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे द्वादशादित्यतीर्थमाहात्म्यवर्णनं नामैकनवत्युत्तरशततमोऽध्यायः

द्विनवत्यधिकशततमोऽध्यायः

श्रीपत्युत्पत्तिवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं तात देवतीर्थमनुत्तमम् । दृष्ट्वा तु श्रीपतिं पापैर्मुच्यते मानवो भुवि॥
महर्षेस्तस्य जामाता भृगोर्देवो जनार्द्दनः ॥ २ ॥

युधिष्ठिर उवाच

कोऽयंश्रियः पतिर्देवोदेवानामधिपोविभुः । कथंजन्माऽभवत्तस्य देवेषुत्रिषुवामुने
सम्बन्धी चकथं जातो भृगुणासहकेशवः । एतद्विस्तरतो ब्रह्मन्वक्तुमर्हसि भार्गव

श्रीमार्कण्डेय उवाच

संक्षेपात्कथयिष्यामिसाध्यस्यचरितंमहत् । नहिविस्तरतोवक्तुंशक्ताःसर्वेमहर्षयः
नारायणस्य नाभ्यब्जाज्जातो देवश्चतुर्मुखः ।

तस्य दक्षोऽङ्गजो राजन्दक्षिणाङ्गुष्ठसंभवः ॥ ६ ॥
धर्मः स्तनान्तात्संजातस्तस्य पुत्रोऽभवत्किल ।
नारायणसहायोऽसावजोपिऽभरतर्षभ ! ॥ ७ ॥
मरुत्वती वसुर्जामी लम्बा भानुमती सती ।
संकल्पा च मुहूर्त्ता च साध्या विश्वावती ककुप् ॥ ८ ॥
धर्मपत्न्यो दशैवैता दाक्षायण्यो महाप्रभाः ।
तासां साध्या महाभागा पुत्रानजयन्नृप !॥ ९ ॥
नरो नारायणश्चैव हरिः कृष्णस्तथैवच । विष्णोरंशांशका ह्येतेचत्वारोधर्मसूनवः
तथा नारायणनरौ गन्धमादनपर्वते । आत्मन्यात्मानमाधाय तेपतुः परमं तपः ॥
ध्यायमानावनौपम्यं स्वं कारणमकारणम् । वासुदेवमनिर्देश्यमप्रतर्क्यमनंतरम्
योगयुक्तौ महात्मानावास्थितावुग्रतापसौ ।
तयोस्तपः प्रभावेण न तताप दिवाकरः ॥ १३ ॥
ववाह शङ्कितो वायुः सुखस्पर्शो ह्यशङ्कितः ।
शिशिरोऽभवदत्यर्थं ज्वलन्नपि विभावसुः ॥ १४ ॥
सिंहव्याघ्रादयः सौम्याश्चेरुः सहमृगैर्गिरौ ।
तयोर्गौरिव भारार्त्ता पृथिवी पृथिवीपते !॥ १५ ॥
चेरुश्च भूधराश्चैव चुक्षुभेच महोदधिः । देवाश्चस्वेषु धिष्ण्येषु निष्प्रभेषु हतप्रभाः
बभूवुरवनीपाल! परमं क्षोभमागताः ॥ १६ ॥
देवराजस्तथा शक्रःसन्तप्तस्तपसातयोः । युयोजाप्सरसस्तत्र तयोर्विघ्नचिकीर्षया

इन्द्र उवाच

रम्भेतिलोत्तमे कुब्जे घृताचि ललितेशुभे । प्रम्लोचेसुभ्रु सुम्लोचे सौरभेयिमहोद्धते
अलम्बुषे मिश्रकेशिपुण्डरीके वरूथिनि । विलोकनीयं बिभ्राणा वपुर्मन्मथबोधनम्
गन्धमादनमासाद्य कुरुध्वं वचनंमम । नरनारायणौ तत्र तपोदीक्षान्वितौ द्विजौ
तेपाते धर्मतनयौ तपः परमदुश्चरम् । तावस्माकं वरारोहाः कुर्वाणौ परमं तपः

कर्मातिशयदुःखार्त्तिप्रदावायतिनाशनौ । तद्गच्छतनभीःकार्या भवतीभिरिदंवचः
स्मरः सहायो भविता वसंतश्चवराङ्गनाः । रूपं वयः समालोक्यमदनोद्दीपनं परम्
कन्दर्पवशमभ्येति विवशः को न मानवः ॥ २३ ॥

मार्कण्डेय उवाच

इत्युक्त्वा देवराजेन मदनेन समंतदा । जग्मुरप्सरसः सर्वा वसन्तश्च महीपते !॥
गन्धमादनमासाद्य पुंस्कोकिलकुलाकुलम् ।
चचार माधवो रम्यं प्रोत्फुल्लवनपादपम् ॥ २५ ॥
प्रववौ दक्षिणाम्नायां मलयानुगतोऽनिलः । भृङ्गमालारुतरवै रमणीयमभूद्वनम् ॥
गन्धश्च सुरभिः सद्यो वनराजिसमुद्भवः । किन्नरोरगयक्षाणां बभूव घ्राणतर्पणः
वराङ्गनाश्च ताः सर्वा नरनारायणावृषी ।
विलोभयितुमारब्धा वागङ्गललितस्मितैः ॥ २८ ॥
जगौमनोहरं काचिन्ननर्त तत्र चाऽप्सराः । अवादयत्तथैवान्या मनोहरतरं नृप !॥
हावैर्भावैः स्मृतैर्हास्यैस्तथाऽन्या वल्गुभाषितैः ।
तयोः क्षोभाय तन्वङ्ग्यश्चक्रुरुद्यममङ्गनाः ॥ ३० ॥
तथापि नतयोःकश्चिन्मनसःपृथिवीपते!। विकारोऽभवदध्यात्मपारसंप्राप्तचेतसोः
निवातस्थौ यथा दीपावकम्पौ नृप! तिष्ठतः ।
वासुदेवार्प्पणस्वस्थे तथैव मनसी तयोः ॥ ३२ ॥
पूर्यमाणोऽपि चाम्भोभिर्भुवमन्यां महोदधिः ।
यथा न याति संक्षोभं तथा तन्मानसं क्वचित् ॥ ३३ ॥
सर्वभूतहितं ब्रह्मवासुदेवमयं परम् । मन्यमानौ न रागस्य द्वेषस्य च वशंगतौ ॥
स्मरोऽपि नशशाकाथ प्रवेष्टुं हृदयं तयोः । विद्यामयं दीपयुतमन्धकारइवालयम्
पुष्पोज्ज्वलांस्तरुवरान्वसन्तं दक्षिणानिलम् ।
ताश्चैवाप्सरसः सर्वाः कन्दर्प्पं च महामुनी ॥ ३६ ॥
यच्चारब्धं तपस्ताभ्यामात्मानं गन्धमादनम् । ददर्शातेऽखिलं रूपं ब्रह्मणःपुरुषर्षभ!

दाहायनामलोवह्नेर्नापःक्लेदायचाम्भसः । तद्द्रव्यमेवतद्द्रव्यविकारायन वै यतः
ततोविज्ञाय विज्ञाय परंब्रह्म स्वरूपतः । मधुकन्दर्पशोषित्सु विकारोनाऽभवत्तयोः
ततो गुरुतरं यत्नं वसन्तमदनौ नृप । चक्राते ताश्चतन्वंग्यस्तत्क्षोभाय पुनः पुनः ॥
अथ नारायणो धैर्यसन्धार्योदीर्णमानसः । ऊरोरुत्पादयामास वराङ्गीमबलांतदा
त्रैलोक्यसुन्दरीरत्नमशेषमवनीपते । गुणैर्लाघवमभ्येति यस्याः संदर्शनादनु ॥ ४२
तां विलोक्य महीपाल! चकम्पे मनसाऽनिलः ।
वसन्तो विस्मयं यातः स्मरः सस्मार किञ्चन ॥ ४३ ॥
रम्भातिलोत्तमाद्याश्च वैलक्ष्यं देवयोषितः । न रेजुरवनीपाल तल्लक्ष्यहृदयेक्षणाः ॥
ततःकामो वसन्तश्चपार्थिवाप्सरसश्चताः । प्रणम्य भगवन्तौतौतुष्टुवुर्मुनिसत्तमौ

वसन्तकामाप्सरस ऊचुः

प्रसीदतु जगद्धाता यस्य देवस्य मायया ।
मोहिताः स्म विजानीमो नान्तरं विद्यते द्वयोः ॥ ४६ ॥
प्रसीदतु स वां देवोयस्य रूपमिदंद्विधा । धामभूतस्य लोकानामनादेरप्रतिष्ठतः
नरनारायणौ देवौ शङ्खचक्रायुधावुभौ ।
आस्तां प्रसादसुमुखावस्माकमपराधिनाम् ॥ ४८ ॥
निधानं सर्वविद्यानां सर्वपापवनानलः । नारायणोऽतो भगवान्सर्वपापं व्यपोहतु
शार्ङ्गचिह्नायुधः श्रीमानात्मज्ञानमयोऽनघः ।
नरः समस्तपापानि हतात्मा सर्वदेहिनाम् ॥ ५० ॥
जटाकलापबद्धोऽयमनयोर्नः क्षमावतोः ।
सौम्यास्यदृष्टिः पापानि हन्तुं जन्मार्जितानि वै ॥ ५१ ॥
तथाऽऽत्मविद्यादोषेण योऽपराधः कृतो महान् ।
त्रैलोक्यवन्द्यौ यौ नाथौ विलोभयितुमागताः ॥ ५२ ॥
प्रसीद देव विज्ञानघन! मूढदृशामिव । भवन्ति सन्तः सततं स्वधर्मपरिपालकाः ॥
दृष्टैतन्नः समुत्पन्नं यथा स्त्रीरत्नमुत्तमम् । त्वयिनारायणोत्पन्ना श्रेष्ठापारवतीमतिः

तेन सत्येन सत्यात्मन्परमात्मन्सनातन !। नारायण प्रसीदेश सर्वलोकपरायण !॥
प्रसन्नबुद्धे शान्तात्मन्प्रसन्नवदनेक्षण । प्रसीद योगिनामीश नर! सर्वगताऽच्युत !
नमस्यामो नरं देवं तथा नारायणं हरिम् । नमो नराय नम्याय नमोनारायणाय च
प्रसन्नानामनाथानां तथा नाथवतां प्रभो !।
शं करोतु नरोऽस्माकं शं नारायण! देहि नः ॥ ५८ ॥

मार्कण्डेय उवाच

एवमभ्यर्चितःस्तुत्या रागद्वेषादिवर्जितः । प्राहेशःसर्वभूतानां मध्येनारायणो नृप!

नारायण उवाच

स्वागतं माधवे कामे भवत्वप्सरसामपि ।
यत्कार्यमागतानां च इहास्माभिस्तदुच्यताम् ॥ ६० ॥
यूयं संसिद्धये नूनमस्माकं बलशत्रुणा ।
संप्रेषितास्ततोऽस्माकं नृत्ययोगादिदर्शनम् ॥ ६१ ॥
नवयं गीतनृत्येननाङ्गचेष्टादिभाषितैः । लुब्धावैविषयैर्मन्ये विषयादारुणात्मकाः
शब्दादिसङ्गदुष्टानि यदा नाक्षाणि नः शुभाः ।
तदा नृत्यादयो भावाः कथं लोभप्रदायिनः ॥ ६३ ॥
ते सिद्धाः स्म न वै साध्या भवतीनां स्मरस्य च ।
माधवस्य च शक्रोऽपि स्वास्थ्यं यात्वविशङ्किताः ॥ ६४ ॥
योऽसौ परश्च परमः पुरुषः परमेश्वरः । परमात्मा समस्तस्यस्थावरस्यचरस्य च
उत्पत्तिहेतुरेते च यस्मिन्सर्वंप्रलीयते । सर्वावासीति देवत्वाद्वासुदेवेत्युदाहृतः
वयमंशांशकास्तस्य चतुर्व्यूहस्य मानिनः ।
तदादेशितवर्त्मानो जगद्बोधाय देहिनाम् ॥ ६७ ॥
तत्सर्वभूतंसर्वेशंसर्वत्र समदर्शिनम् । कुतः पश्यन्तौ रागादीन्करिष्यामोविभेदिनः
वसन्ते मयि चेन्द्रे चभवतीषु तथास्मरे । यदासएव भूतात्मा तदाद्वेषादयःकथम्
तन्मयाऽन्यविभक्तानि यदा सर्वेषु जन्तुषु ।

सर्वेश्वरेश्वरो विष्णुः कुतो रागादयस्ततः ॥ ७० ॥
ब्रह्माणमिन्द्रमीशानमादित्यमरुतोऽखिलान् ।
विश्वेदेवानृषीन्साध्यान्वसून्पितृगणांस्तथा ॥ ७१ ॥
यक्षराक्षसभूतादीन्नागान्सर्पान्सरीसृपान् । मनुष्यपक्षिगोरूपगजसिंहजलेचरान्
मक्षिकामशकान्दंशाञ्छलभाञ्जलजान्कृमीन् ।
गुल्मवृक्षलतावल्लीत्वक्सारतृणजातिषु ॥ ७३ ॥
यच्चकिञ्चिदद्दृश्यं वाद्दृश्यंवात्रिदशाङ्गनाः । मन्यध्वंजातमेकस्य तत्सर्वंपरमात्मनः
जायमानः कथं विष्णुमात्मानं परमं चयम् ।
रागद्वेषौ तथा लोभं कः कुर्यादमराङ्गनाः ॥ ७५ ॥
सर्वभूतमये विष्णौ सर्वगे सर्वधातरि । निपात्यतं पृथग्भूते कुतोरागादिकोगुणः
एवमस्मासु युष्मासु सर्वभूतेषु चाबलाः । तन्मयैकत्वभूतेषु रागाद्यवसरः कुतः ॥
सम्यग्दृष्टिरियं प्रोक्ता समस्तैक्यावलोकिनी ।
पृथग्विज्ञानमात्रैव लोकसंव्यवहारवत् ॥ ७८ ॥
भूतेन्द्रियान्तः करणप्रधानपुरुषात्मकम् । जगद्वैद्यो तदखिलं तदा भेदः किमात्मकः
भवन्ति लयमायान्ति समुद्रसलिलोर्मयः ।
न वारिभेदतो भिन्नास्तथैवैक्यादिदं जगत् ॥ ८० ॥
यथाग्नेरर्चिषः पीताः पिङ्गलारुणधूसराः ।
तथाऽपि नाऽग्नितो भिन्नास्तथैतद् ब्रह्मणो जगत् ॥ ८१ ॥
भवतीभिश्च यत्क्षोभमस्माकं सपुरन्दरः । कारयत्यसदेतच्च विवेकाचारचेतसाम्
भवन्त्यः सच देवेन्द्रो लोकाश्चससुरासुराः । समुद्राद्रिवनोपेतामद्देहान्तरगोचराः
यथेयं चारुसर्वाङ्गी भवतीनां मयाऽग्रतः ।
दर्शिता दर्शयिष्यामि तथा चैवाऽखिलं जगत् ॥ ८४ ॥
प्रयातु शक्रो मा गर्वमिन्द्रत्वं कस्य सुस्थिरम् ।
यूयं च मा स्मयं यात सन्ति रूपान्विताः स्त्रियः ॥ ८५ ॥

किं सुरूपं कुरूपं वा यदा भेदो न दृश्यते। तारतम्यं सुरूपत्वे सततं भिन्नदर्शनात्
भवतीनां स्मयं मत्वा रूपौदार्यगुणोद्भवम्। मयेयंदर्शिता तन्वी ततस्तुशममेष्यथ

यस्मान्मदूरोर्निष्पन्ना त्वियमिन्दीवरेक्षणा।
उर्वशीनाम कल्याणी भविष्यति वराप्सराः॥ ८८॥
तदियं देवराजस्य नीयतां वरवर्णिनी।
भवत्यस्तेन चाऽऽस्माकं प्रेषिताः प्रीतिमिच्छता॥ ८९॥
वक्तव्यश्च सहस्राक्षो नाऽस्माकं भोगकारणात्।
तपश्चर्या न वाप्राप्यफलं प्राप्तुमभीप्सता॥ ९०॥

सन्मार्गमस्य जगतो दर्शयिष्येकरोम्यहम्। तथानरेण सहितो जगतःपालनोद्यतः
यदि कश्चित्तवाबाधां करोतित्रिदशेश्वर !। तमहं वारयिष्यामिनिवृत्तोभववासव

कर्त्ताऽसि चेत्त्वमाबाधां न दुष्टस्येह कस्यचित्।
तं चाऽपि शास्ता तदहं प्रवर्त्तिष्याम्यसंशयम्॥ ९३॥
एतज्ज्ञात्वा न सन्तापस्त्वया कार्यो हि मां प्रति।
उपकाराय जगतामवतीर्णोऽस्मि वासव !॥ ९४॥

या चेयमुर्वशी मत्तःसमुद्भूतापुरन्दर !। त्रेताग्निहेतुभूतेयं एवं प्राप्य भविष्यति॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे नर्मदामाहात्म्ये श्रीपत्युत्पत्तिवर्णनंनाम द्विनवत्युत्तरशततमोऽध्यायः

त्रिनवत्यधिकशततमोऽध्यायः

श्रीपतिमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

इत्युक्तेऽप्सरसः सर्वाःप्रणिपत्यपुनःपुनः। ऊचुर्नारायणं देवं तद्दर्शनसमीहया॥ १

वसन्तकामाप्सरस उचुः

भगवन्भवता योऽयमुपदेशो हितार्थिना।
प्रोक्तः स सर्वो विज्ञातो माहात्म्यं विदितं च ते॥ २॥

यत्त्वेतद्भवता प्रोक्तंप्रसन्नेनान्तरात्मना। दर्शितेयंविशालाक्षीदर्शयिष्यामिवोजगत्
तत्रार्थे सर्वभावेन प्रपन्नानांजगत्पते !। दर्शयात्मानमखिलं दर्शितेयं यथोर्वशी॥

यदि देवाऽपराधेपि नाऽस्मासु कुपितं तव।
नमस्ते जगतामीश दर्शयाऽऽत्मानमात्मना॥ ५॥

नारायण उवाच

पश्यतेहाऽखिलाँल्लोकान्मम देहे सुराङ्गनाः।
मधुं मदनमात्मानं यच्चान्यद् द्रष्टुमिच्छथ॥ ६॥

श्रीमार्कण्डेय उवाच

इत्युक्त्वाभगवान्देवस्तदानारायणोनृप। उच्चैर्जहासस्वनवत्तत्राऽभूदखिलंजगत्

ब्रह्मा प्रजापतिः शक्रः सह रुद्रैः पिनाकधृक्।
आदित्या वसवः साध्या विश्वेदेवा महर्षयः॥ ८॥

नासत्यदस्रावनिलः सर्वशश्च तथाग्नयः। यक्षगन्धर्वसिद्धाश्च पिशाचोरगकिन्नराः

समस्ताप्सरसो विद्याःसाङ्गा वेदास्तदुक्तयः।
मनुष्याः पशवः कीटाः पक्षिणः पादपास्तथा॥ १०॥
सरीसृपाश्चाथ सूक्ष्मा यच्चान्यज्जीवसञ्ज्ञितम्।

समुद्राः सकलाः शैलाः सरितः काननानि च ॥ ११ ॥
द्वीपान्यशेषाणि तथातथा सर्वसरांसि च।। नगरग्रामपूर्णा च मेदिनीमेदिनीपते
देवाङ्गनाभिर्देवस्य देहे दृष्टं महात्मनः ॥ १२ ॥
नक्षत्रग्रहताराभिःसुसंपूर्णनभस्तलम् । ददृशुस्ताःसुचार्वङ्ग्यस्तस्यान्तर्विश्वरूपिणः
ऊर्ध्वंनतिर्यङ्ङाधस्तायदांतस्तस्यदृश्यते । तमनंतमनादिंचततस्तास्तुष्टुवुःप्रभुम्
मदनेनसमं सर्वामधुनाच वराङ्गनाः । ससाध्वसाभक्तिपराः परं विस्मयमागताः
वसन्तकामाप्सरस ऊचुः
पश्याम नादिं तव देव! नान्तं न मध्यमव्याकृतरूपपारम् ।
परायणं त्वां जगतामनन्तं नताः स्म नारायणमात्मभूतम् ॥ १६ ॥
महीनभोवायुजलाग्नयस्त्वं शब्दादिरूपस्तु परापरात्मन् ।
त्वत्तो भवत्यच्युत! सर्वमेतद्भेदादिरूपोऽसि विभो! त्वमात्मन् !॥ १७ ॥
द्रष्टासि रूपस्य परस्य वेत्ता श्रोता च शब्दस्य हरे! त्वमेकः ।
स्रष्टा भवान्सर्वगतोऽखिलस्य घ्राता च गन्धस्य पृथक्छरीरी ॥ १८ ॥
सुरेषु सर्वेषु न सोऽस्ति कश्चिन्मनुष्यलोकेषु न सोऽस्ति कश्चित् ।
पश्वादिवर्गेषु न सोऽस्ति कश्चिद्यो नांशभूतस्तव देवदेव !॥ १९ ॥
ब्रह्माम्बुधींदुप्रमुखानि सौम्य शक्रादि रूपाणि तवोत्तमानि ।
समुद्ररूपं तव धैर्यवत्सु तेजः स्वरूपेषु रविस्तथाग्निः ॥ २० ॥
क्षमाधनेषु क्षितिरूपमग्र्यं शीघ्रेषु शीघ्रो बलवत्सु वायुः ।
मनुष्यरूपं तव राजवेषो मूढेषु सर्वेश्वर! पादपोऽसि ॥ २१ ॥
सर्वानयेष्वच्युत दानवस्त्वं सनत्सुजातश्च विवेकवत्सु ।
रसस्वरूपेण जलस्थितोऽसि गन्धस्वरूपं भवतो धरित्र्याम् ॥ २२ ॥
दृश्यस्वरूपश्च हुताशनस्त्वं स्पर्शस्वरूपं भवतः समीरे ।
शब्दादिकं ते नभसि स्वरूपं मन्तव्यरूपो मनसि प्रभो! त्वम् ॥ २३ ॥
बोधस्वरूपश्च मतौ त्वमेकः सर्वत्र! सर्वेश्वर! सर्वभूत !।

पश्यामि ते नाभिसरोजमध्ये ब्रह्माणमीशं च हरं भृकुट्याम् ॥ २४ ॥
तवाऽश्विनौ कर्णगतौ समस्तास्तवाऽऽस्थिता बाहुषु लोकपालाः ।
घ्राणोऽनिलो नेत्रगतौ रवीन्दू जिह्वा च ते नाथ! सरस्वतीयम् ॥ २५ ॥
पादौ धरित्री जठरं समस्ताँल्लोकान्हृषीकेश! विलोकयामः ।
जङ्घे वयं पादतलाङ्गुलीषु पिशाचयक्षोरगसिद्धसङ्घाः ॥ २६ ॥
पुंस्त्वे प्रजानां पतिरोष्ठयुग्मे प्रतिष्ठितास्ते क्रतवः समस्ताः ।
सर्वे वयं ते दशनेषु देव! दंष्ट्रासु देवा ह्यभवंश्च दन्ताः ॥ २७ ॥
रोमाण्यशेषास्तव देवसंघा विद्याधरा नाथ तवाङ्घ्रिरेखाः ।
साङ्गाः समस्तास्तव देव! वेदाः समास्थिताः सन्धिषु बाहुभूताः ॥ २८ ॥
वराहभूतं धरणीधरस्ते नृसिंहरूपं च सदा करालम् ।
पश्याम ते वाजिशिरस्तथोच्चैस्त्रिविक्रमे यच्च तदाऽप्रमेयम् ॥ २९ ॥
अमी समुद्रास्तव देव ! देहे मौर्वालयः शैलधरास्तथाऽमी ।
इमाश्च गङ्गाप्रमुखाः स्रवन्त्यो द्वीपाण्यशेषाणि वनादिदेशाः ॥ ३० ॥
स्तुन्वति चेमे मुनयस्तवेश देहे स्थितास्त्वन्महिमानमग्र्यम् ।
त्वामीशितारं जगतामनन्तं यजन्ति यज्ञैः किल यज्ञिनोऽमी ॥ ३१ ॥
त्वत्तोऽहि सौम्यं जगतीह किञ्चित्त्वतो न रौद्रंच समस्तमूर्ते !।
त्वत्तो न शीतं च न केशवोष्णं सर्वस्वरूपातिशयी त्वमेव ॥ ३२ ॥
प्रसीद सर्वेश्वर! सर्वभूत! सनातनात्मन्परमेश्वरेश ।
त्वन्मायया मोहितमानसाभिर्यत्तेऽपराद्धं तदिदं क्षमस्व ॥ ३३ ॥
किं वाऽपराद्धं तव देवदेव! यन्मायया नो हृदयं तवाऽपि ।
मायाभिशंकिप्रणतार्त्तिहंतर्मनो हि नो विह्वलतामुपैति ॥ ३४ ॥
न तेऽपराद्धं यदि तेऽपराद्धमस्माभिरुन्मार्गविवर्त्तिनीभिः ।
तत्क्षम्यतां सृष्टिकृतस्तवैव देवाऽपराधः सृजतो विवेकम् ॥ ३५ ॥
नमो नमस्ते गोविन्द नारायण जनार्द्दन !। त्वन्नामस्मरणात्पापमशेषंनः प्रणश्यतु

नमोऽनन्त! नमस्तुभ्यं विश्वात्मन्विश्वभावन !।
त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥ ३७ ॥
वरेण्य यज्ञपुरुष! प्रजापालन वामन !। त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु ॥
नमोऽस्तु तेऽब्जनाभाय प्रजापतिकृतेहर !। त्वन्नामस्मरणात्पापशेषं नः प्रणश्यतु
संसारार्णवपोताय नमस्तुभ्यमधोक्षज !। त्वन्नामस्मरणात्पापमशेषं नः प्रणश्यतु
नमःपरस्मैश्रीशायवासुदेवायवेधसे । स्वेच्छयागुणयुक्ताय सर्गस्थित्यन्तकारिणे
उपसंहर विश्वात्मन्रूपमेतत्सनातनम् । वर्धमानं न नो दष्टुं समर्थं चक्षुरीश्वर !॥
प्रलयाग्निसहस्रस्य समा दीप्तिस्तवाऽच्युत ।
प्रमाणेन दिशो भूमिर्गगनं च समावृतम् ॥ ४३ ॥
नविद्मः कुत्र वर्त्तामो भवान्नाथोपलक्ष्यते । सर्वं जगदिहैकस्थं पिण्डितंलक्षयामहे
किं वर्णयामो रूपंते किं प्रमाणमिदंहरे !। माहात्म्यं किं नुतेदेवयज्जिह्वायानगोचरे
वक्तारो वाऽयुतेनापि बुद्धीनामयुतायुतैः । गुणनिर्वर्णनं नाथ कर्तुं तव न शक्यते
तदेतद्दर्शितं रूपं प्रसादः परमः कृतः । छन्दतो जगतामीश! तदेतदुपसंहर ॥ ४७ ॥

श्रीमार्कण्डेय उवाच

इत्येवं संस्तुतस्ताभिरप्सरोभिर्जनार्द्दनः ।
दिव्यज्ञानोपपन्नानां तासां प्रत्यक्षमीश्वरः ॥ ४८ ॥
विवेश सर्वभूतानि स्वैरंशैर्भूतभावनः । तं दृष्ट्वा सर्वभूतेषु लीयमानमधोक्षजम् ॥
विस्मयंपरमंचक्रुःसमस्तादेवयोषितः । सचसर्वेश्वरः शैलान्पादपान्सागरान्भुवम्
जलमग्निं तथा वायुमाकाशं च विवेश ह ।
काले दिक्ष्वथ सर्वात्मा ह्यात्मनश्चाऽन्यथाऽपि वा ॥ ५१ ॥
आत्मरूपस्थितंस्वेन महिम्ना भावयञ्जगत् । देवदानवरक्षांसि यक्षविद्याधरोरगाः
मनुष्यपशुकीटादिमृगपश्वन्तरिक्षगाः । येऽन्तरिक्षेतथाभूमौदिवि ये च जलाश्रयाः
तान्विवेश स विश्वात्मापुनस्तद्रूपमास्थितः । नरेणसार्धंयत्ताभिर्दृष्टपूर्वमरिन्दम
ताः परं विस्मयंजग्मुःसर्वास्त्रिदशयोषितः । प्रणेमुःसाध्वसात्पाण्डुवदनान्नृपसत्तम

नारायणोऽपि भगवानाह तास्त्रिदशाङ्गनाः ॥ ५६ ॥

नारायण उवाच

नीयतामुर्वशीभद्रा यत्राऽसौत्रिदशेश्वरः । भवतीनांहितार्थाय सर्वभूतेष्वनाविति
ज्ञानमुत्पादितं भूयो लयं भूतेषु कुर्वता । यद्गच्छध्वंसमस्तोऽयं भूतग्रामोमदंशकः
अहमध्यात्मभूतस्य वासुदेवस्य योगिनः ।
अस्मात्परतरं नाऽस्ति योऽनन्तःपरिपठ्यते ॥ ५९ ॥
तमजं सर्वभूतेशं जानीत परमं पदम् । अहं भवत्यो देवाश्च मनुष्याः पशवश्च ये ॥
एतत्सर्वमनन्तस्य वासुदेवस्य वै कृतम् ॥ ६० ॥
एवं ज्ञात्वा समं सर्वं सदेवासुरमानुषम् । सपश्वादिगुणं चैव द्रष्टव्यंत्रिदशाङ्गनाः

मार्कण्डेय उवाच

इत्युक्तास्तेन देवेन समस्तास्ताः सुरस्त्रियः ।
प्रणम्य तौ समदनाः सवसन्ताश्च पार्थिव !॥ ६२ ॥
आदाय चोर्वशीं भूयो देवराजमुपागताः । आचख्युश्च यथावृत्तं देवराजायतत्तथा

मार्कण्डेय उवाच

तथा त्वमपि राजेन्द्र! सर्वभूतेषु केशवम् । चिन्तयन्समतां गच्छसमतैव हि मुक्तये
जानन्नेवं विशेषेण भूतेषु परमेश्वरम् । वासुदेव कथं दोषाँल्लोभादीन्न प्रहास्यसि
सर्वभूतानि गोविन्दाद्यदा नाऽन्यानि भूपते !।
तदा वैरादयो भावाः क्रियतां न तु पुत्रक !॥ ६६ ॥
इति पश्य जगत्सर्वं वासुदेवात्मकं नृप !। एतदेव हि कृष्णेन रूपमाविष्कृतं नृप !
परमेश्वरेति यद्रूपं तदेतत्कथितं तव । जन्मादिभावरहितं तद्विष्णोः परमम्पदम् ॥
संक्षेपेणाऽथ भूपाल!श्रूयतां यद्वदामि ते । यन्मतंपुरुषः कृत्वा परं निर्वाणमृच्छति
सर्वो विष्णुसमासो हि भावाभावौ च तन्मयौ ।
सदसत्सर्वमीशोऽसौ महादेवः परं पदम् ॥ ७० ॥
भवजलधिगतानां द्वन्द्वाताहतानां सुतदुहितृकलत्रत्राणभारार्दितानाम् ।

विषमविषयतोये मज्जतामप्लवानां भवति शरणमेको विष्णुपोतो नराणाम् ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीपतिमाहात्म्यवर्णनंनाम त्रिनवत्युत्तरशततमोऽध्यायः ॥ १९३ ॥

चतुर्नवत्यधिकशततमोऽध्यायः

श्रीपतिविवाहवर्णनम्

श्रीमार्कण्डेय उवाच

तच्छ्रुत्वानन्तदेवेन विश्वरूपमुदाहृतम् । देवराजस्तथा देवाः परं विस्मयमागताः

दृष्ट्वा चाप्सरसं पुण्यामुर्व्वशीं कमलाननाम् ।
सन्त्रस्तो विस्मितश्चाऽभूदिन्द्रो राजश्रिया वृतः ॥ २
न किञ्चिदुत्तरं वाक्यमुक्त्वाञोषमास्थितः ।
इति वृत्तान्तभूतं हि नारायणविचेष्टितम् ॥ ३ ॥
भृगोः ख्या (ख्या) त्यां समुत्पन्ना लक्ष्मीः श्रुत्वा तु वै नृप !।
वैश्वरूपं परं रूपं विस्मिताऽचिन्तयत्तदा ॥ ४ ॥

केनोपायेन स स्यान्मे भर्त्ता नारायणः प्रभुः । व्रतेनतपसावाऽपिदानेननियमेन च वृद्धानांसेवनेनाऽथदेवताराधनेनवा । इति चिन्तापरांकन्यांसतीञ्ज्ञात्वायुधिष्ठिर

प्राह प्राप्तो मया भर्त्ता शङ्करस्तपसा किल ।
प्रजापतिश्च गायत्र्या ह्यन्याभिरभिवाञ्छिताः ॥ ७ ॥

तपसैवहि ते प्राप्यस्तस्मात्तच्चर सुव्रते !। तपस्त्वंहिमहच्चोग्रं सर्ववाञ्छितदायकम्

मार्कण्डेय उवाच

सागरान्तं समासाद्य लक्ष्मीः परपुरञ्जय । चचारविपुलं कालं तपः परमदुश्चरम् ॥

स्थाणुवत्संस्थिता साऽभूद्दिव्यं वर्षसहस्रकम् ।

तत इन्द्रादयो देवाः शङ्खचक्रगदाधराः ॥ १० ॥
भूत्वा जग्मुस्तदर्थं ते सा तु पृष्टवती सुरान् ।
विश्वरूपं वैष्णवं यत्तद्दर्शयत मा चिरम् ॥ ११ ॥
विलक्षा व्रीडिता देवा गत्वा नारायणं तदा ।
अब्रुवन्वैश्वरूपं नो शक्ता दर्शयितुं वयम् ॥ १२ ॥

ततो यथेष्टं ते जग्मुः स च विष्णुरचिन्तयत् । उग्ररूपास्थितादेवीदेहंदहतिभार्गवी

तां तस्मात्तत्र गत्वाऽहं वरं दत्त्वा तु वाञ्छितम् ।
पुनस्तपः करिष्यामि दर्शयिष्यामि वा पुनः ॥
वैष्णवं विश्वरूपं यद्दुर्दर्श्यं देवदानवैः ॥ १४ ॥

मार्कण्डेय उवाच

ततो गत्वा हृषीकेश सागरान्तस्थितां श्रियम् ।
प्राह तुष्टोऽस्मि ते देवि! वरं वृणु यथेप्सितम् ॥ १५ ॥

श्रीरुवाच

यदि तुष्टोऽसि मे देव प्रपन्नाया जनार्द्दन ! । तदादर्शयतद्दृष्टमप्सरोभिस्तवाऽनघ विश्वरूपमनन्तं च भूतभावन केशव !। गन्धमादनमासाद्य कृतं यच्च तपस्त्वया ॥

तद्वदस्व विभो! विष्णो! न मिथ्या यदि केशव !।
श्रद्दधामि न चैवाऽहं रूपस्याऽस्य कथञ्चन ॥ १८ ॥

बहुभिर्यक्षरक्षोभिर्मायाचारिप्रचारिभिः । छन्दिता मम जानद्भिर्भावमन्तर्गतं हरौ

भूत्वा विष्णुस्वरूपास्ते चक्रिणश्च चतुर्भुजाः ।
सुव्रीडितागताः सर्वे विश्वरूपो सहायतः ॥ २० ॥

मार्कण्डेय उवाच

नारायणोऽथभगवाञ्छङ्खचक्रगदाभृतम् । तयातथोक्तस्तद्रूपंमुक्त्वादं सुरपूजितम् रूपं परं यथोक्तं वै विश्वरूपमदर्शत । दर्शयित्वा वचः प्राह पञ्चरात्रविधानतः ॥

योऽर्चयिष्यति मां नित्यं स पूज्यः स च पूजितः ।

धनधान्यसमायुक्तः सर्वभोगसमन्वितः ॥ २५ ॥
मूलं हि सर्वधर्माणां ब्रह्मचर्यंपरन्तपः । तेनाहंतत्रस्थास्यामिमूलश्रीपति सञ्ज्ञितः
मूलश्रीः प्रोच्यतेब्राह्मी ब्रह्मचर्यस्वरूपिणी । सर्वयोगमयीपुण्या सर्वपापहरीशुभा
पतिस्तस्याः प्रभुरहं वरदः प्राणिनां प्रिये !।
रेवाजले नरः स्नात्वा योऽर्चयेन्मां यतव्रतः ॥ २६ ॥
मूलश्रीपतिनामानं वाञ्छितं प्राप्नुयात्फलम् ।
दानानि तत्र यो दद्यान्महादानानि च प्रिये !॥ २७ ॥
सहस्रगुणितं पुण्यमन्यस्थानादवाप्यते । दृष्टं त्वयातत्रदेशे सम्यक्चैवावधारितम्
तदर्चित्वा परान्कामानाप्स्यसि त्वं न संशयः ॥ २८ ॥
वरं वृणीष्व देवेशि! वाञ्छितं दुर्लभं सुरैः । दुर्गसंसारकान्तारपतितैः परमेश्वरि

श्रीरुवाच

नारायण जगद्धातर्नारायण जगत्पते !। नारायण परब्रह्म! नारायणपरायण !॥३०
प्रसीद पाहि मां भक्त्या सम्यक्सर्गे नियोजय ।
प्रियो ह्यसि प्रियाऽहं ते यथा स्यां तत्तथा कुरु ॥ ३१ ॥
गृहं धर्मार्थकामानां कारणं देव सम्मतम् ।
तदास्थायाऽऽश्रमं पुण्यं मां श्रेयसि नियोजय ॥ ३२ ॥

नारायण उवाच

नारायणगिरा देवि! विज्ञतोऽस्मि यतस्त्वया ।
नारायणगिरिर्नाम तेन मेऽत्र भविष्यति ॥ ३३ ॥
नारायणस्मृतौ याति दुरितं जन्मकोटिजम् ।
यस्माद्गिरति तस्माच्च गिरिरित्येव शब्दितम् ॥ ३४ ॥
तस्मात्सर्वाश्रयो देवि गिरिः पर्वतराड् भवेत् ।
सुरासुरमनुष्याणां यथाऽहमपि चाऽऽश्रयः ॥ ३५ ॥
य एतत्पूजयिष्यन्ति मण्डलस्थं परं मम । नारायणगिरिर्नाम देवरूपं शुभेक्षणे ॥

ते दिव्यज्ञानसम्पन्ना दिव्यदेहविचेष्टिताः ।
दिव्यं लोकमवाप्स्यन्ति दिव्यभोगसमन्विताः ॥ ३७ ॥

मार्कण्डेय उवाच

तयोरेवं सम्वदतोर्देवा इन्द्रपुरोगमाः । समागता वनोद्देशं सागरान्ते महर्षयः ॥
ततो भृगुं देवराजो नारायणविचिन्तितम् ।
वव्रे ज्ञात्वा तु तत्कन्यां धर्मात्मा स ददौ च ताम् ॥ ३९ ॥
धर्मोऽपि विधिवद्वत्स! विवाहं समकारयत् । देवदेवस्यराजर्षे देवतार्थे समाहितः

युधिष्ठिर उवाच

धर्मो विवाहमकरोद्विधिवद्यस्त्वयोदितम् ।
को विधिस्तत्र का दत्ता दक्षिणा भृगुणाऽपि च ॥ ४१ ॥
विवाहयज्ञे समभूत्स्रुक्स्रुवग्रहणेचकः । ऋत्विजःकेसदस्याश्च तस्यासन्द्विजसत्तम
किं तस्याऽवभृथं त्वासीत्तत्सर्वं वद विस्तरात् ।
त्वद्वाक्यामृतपानेन तृप्तिर्मम न विद्यते ॥ ४३ ॥

मार्कण्डेय उवाच

नारायणविवाहस्य यज्ञस्य च युधिष्ठिर !। तपसस्तस्यदेवस्यसम्यगाचरणस्यच
वक्तुं समर्थो न गुणान्ब्रह्माऽपि परमेश्वरः ।
तथाप्युद्देशतो वच्मि शृणु भूत्वा समाहितः ॥ ४५ ॥
ब्रह्मा सप्तर्षयस्तत्र स्रुक्स्रुवग्रहणे रताः । अग्नीञ्जुहुविरे राजन्वेदिर्धात्री ससागरा
ददुः समुद्रा रत्नानि ब्रह्मर्षिभ्यो नृपोत्तम !।
धनदोऽपि ददौ वित्तं सर्वब्राह्मणवाञ्छितम् ॥ ४७ ॥
विश्वकर्माऽपि देवानांब्रह्मर्षीणांपरन्तप । वेश्मानिसुविचित्राणिसर्वरत्नमयानिच
कृत्वा प्रदर्शयामासदेवेन्द्राय यशस्विने । शतक्रतुस्ततोविप्रान्कापिष्ठलपुरोगमान्
शौनकादींश्च पप्रच्छ बाष्कलाञ्छागलानपि ।
आत्रेयानपि राजेन्द्र! वृणुध्वमभिवाच्छिन्नम् ॥ ५० ॥

दृष्ट्वातेचित्ररत्नानिप्राहुःसर्वेश्वरेश्वरम् । देवानांच ऋषीणां च सङ्गमोऽयंसुपुण्यकृत्

अस्मिन्पुण्ये सुरेशान! वस्तुं वाञ्छामहे सदा ।
शतक्रतुः प्राह पुनर्वासो वोऽत्र भविष्यति ॥
सत्यधर्मरता यूयं यावत्कालं भविष्यथ ॥ ५२ ॥

मार्कण्डेय उवाच

पृष्टंयद्राजशार्दूल केमखे होत्रिणोऽभवन् । तत्प्रोच्यमानमधुनाशृणुभूत्वासमाहितः

सनत्कुमारप्रमुखाः सदस्यास्तस्य चाऽभवन् ।
औद्गात्रमत्र्यङ्गिरसौ मतीचिश्च चकार ह ॥ ५४ ॥

हौत्रं धर्मवशिष्ठौच ब्रह्मत्वंसनकोमुनिः । षट्त्रिंशद्ग्रामसाहस्त्रंप्रादात्तेभ्यःशतक्रतुः
लक्ष्मीर्भर्त्रा च संयुक्ताऽभवत्तत्कृतवान्प्रभुः । ब्रह्मणोजुह्वतोवह्नियावद्देशस्थितैःसुरैः
दृष्टं ललाटं देशोऽसौ ललाट इति सञ्ज्ञितः । स देशःश्रीपतेःक्षेत्रपुण्यंदेवर्षिसेवितम्

सर्वाश्चर्थमयंदिव्यं दिव्यसिद्धिसमन्वितम् ।
ब्राह्मणानां ततः पङ्क्तिं निवेशयितुमुद्यता ॥ ५८ ॥
लक्ष्मीः श्रीपतिनामानमाह देवं वचस्तदा ।

श्रीरुवाच

य एते ब्राह्मणाः शिष्या भृग्वादीनां यतव्रताः ।
तान्निवेशयितुमिच्छामि त्वत्प्रसादादधोक्षज !।
मरीच्यादयः सुरेन्द्रेण स्थापिता गरुडध्वज !॥ ६० ॥

नैष्ठिकव्रतिनो विप्राबहवोऽत्रयतव्रताः । प्राजापत्येव्रते ब्राह्मेकेचिदत्रव्यवस्थिताः

तानहं स्थापयिष्यामि त्वत्प्रसादादधोक्षज !॥ ६१ ॥

मार्कण्डेय उवाच

ततः कौतूहलधरोभगवान्वृषभध्वजः । पप्रच्छःव्रतिनःसर्वान्वृत्तिभेदेव्यवस्थितान्
नारदोऽपिमहादेवमुपेत्यचसतीपतिम् । प्राहकृष्णाजिनधरोनैष्ठिका ब्राह्मणा ह्यमी

अमी कार्याः सुवस्त्रेण छन्नगुह्या द्विजोत्तमाः ।

प्राजापत्याश्चतुर्विंशसहस्राणि नरेश्वर !॥ ६४ ॥

ब्रह्मचर्यव्रतस्थानां व्रतब्रह्मविचारिणाम् । द्वादशैषां सहस्राणिसन्तिवै वृषभध्वज

नारदस्य वचः श्रुत्वा देवा देवर्षयोऽपि च ।
साधुसाध्वित्यमन्यन्त नोचुः केचन किञ्चन ॥ ६६ ॥
समाह्वयत्ततो लक्ष्मीस्तान्विप्रान्भक्तिसंयुता ।
उवाच चरणान्गृह्य प्रसादः क्रियतां मयि ॥ ६७ ॥
षट्त्रिंशच्च सहस्राणि वेश्मनामत्र संस्थितिः ।
विश्वकर्मकृतानां तु तेषु तिष्ठन्तु वोऽखिलाः ॥ ६८ ॥
ते तथेति प्रतिज्ञाय स्थिताः सम्प्रीतमानसाः ।
धनधान्यसमृद्धाश्च वाञ्छितप्राप्तिलक्षणाः ॥
सर्वकामसमृद्धाश्च ह्यनारम्भेषु कर्मणाम् ॥ ६९ ॥
इति संस्थाप्य तान्विप्रान्सा स्थिता पर्यपालयत् ।
चतुर्द्धा तु स्थितो विष्णुः श्रियाः देव्याः प्रिये रतः ॥ ७० ॥

एवं ववाहिकमखेनिवृत्ते ऋषयस्तुतम् । ऊचुश्चावभृथस्नानं कुत्र कुर्मो जनार्द्दन !॥
इति श्रुत्वा तु वचनं श्रीपतिःपादपङ्कजात् । मुमोचजाह्नवीतोयं रेवामध्यगमंशुचि
हरेः पादोदकंदृष्ट्वानिःसृतंमुनयस्तु ते । विस्मितास्समपश्यन्तजानंतस्तस्यगौरवम्

रुद्रेण सहिताः सर्वे देवता ऋषयस्तथा ।
सङ्कथा विस्मिताश्चक्रुर्विधुन्वन्तः शिरांसि च ॥ ७४ ॥

ऋषय ऊचुः

ब्रूहि शम्भो! किमत्रायं अकस्माद्वारिसम्भवः ।
विष्णोः पादाम्बुजोत्थश्च सम्मोहकरणः परः ॥ ७५ ॥

ईश्वर उवाच

पादोदकमिदंविष्णोरहंजानामिवै सुराः । दशाश्वमेधावभृथैःस्नानमत्रातिरिच्यते

युष्माभिः श्रीपतिः पूज्यः स्नानं चावभृथं कुतः ।

भविष्यतीति तेनाऽऽशु इदं वोऽर्थे विनिर्म्मितम् ॥ ७७ ॥

स्नात्वाऽत्र त्रिदशेशाना यत्फलं सम्प्रपद्यते । वक्तुं नकेनचिद्यातिततःकिमुत्तरंवचः

मार्कण्डेय उवाच

एवमुक्त्वा तुते सर्वे स्नानं कृत्वा यथागतम् । जग्मुर्देवा महेशानपुरोगाभरतर्षभ

ब्राह्मणाश्च ततः सर्वे स्ववेश्मान्येव भेजिरे ।

देवतीर्थे महाराज! सर्वपापप्रणाशने ॥ ८० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीपतिविवाहवर्णनंनाम चतुर्नवत्युत्तरशततमोऽध्यायः ॥ १९४ ॥

पञ्चनवत्यधिकशततमोऽध्यायः

श्रीपतिमाहात्म्यवर्णनम्

युधिष्ठिर उवाच

देवतीर्थेतुकिन्नाममाहात्म्यंसमुदाहृतम् । फलं किंस्नानदानादिकारिणांजायतेमुने

मार्कण्डेय उवाच

पृथिव्यां यानि तीर्थानि देवैर्मुनिगणैरपि ।

सेवितानि महाबाहो! तानि ध्यातानि विष्णुना ॥ २ ॥

समागतान्येकतां वै तत्र तीर्थे युधिष्ठिर । तत्तीर्थंवैष्णवंपुण्यं देवतीर्थमितिश्रुतम्

कुरुक्षेत्रं भुवि परमन्तरिक्षे त्रिपुष्करम् । पुरुषोत्तमं दिवि परं देवतीर्थं परात्परम्

देवतीर्थसमं नास्ति तीर्थमत्र परत्र च । यत्प्राप्य मनुजस्तप्येन्न कदाचिद्युधिष्ठिर

देवैरुक्तानि तीर्थानि योऽत्र स्नानं समाचरेत् ।

देवतीर्थे स सर्वत्र स्नातो भवति मानवः ॥ ६ ॥

एवमस्त्विति तैरुक्तो देवा ऋषिगणा अपि ।

सन्तुष्टाः श्रीशमभ्यर्च्य स्वं स्वं स्थानं तु भेजिरे ॥ ७ ॥

सूर्यग्रहेऽत्र वै क्षेत्रे स्नात्वा यत्फलमश्नुते ।

स्नात्वा श्रीशं समभ्यर्च्य समुपोष्य यथाविधि ॥ ८ ॥

यद्ददाति हिरण्यानि दानानि विधिवन्नृप !।

तदनन्तफलं सर्वं सूर्यस्य ग्रहणे यथा ॥ ९ ॥

भूमिदानं धेनुदानं स्वर्णदानमनन्तकम् । वज्रदानमनन्तं च फलं प्राह शतक्रतुः ॥

सोमो वै वस्त्रदानेनमौक्तिकानांचभार्गवः । सुवर्णस्यरविर्दानं धर्मराजोह्यनन्तकम्

देवतीर्थे तु यद्दानं श्रद्धायुक्तेन दीयते । तदनन्तफलं प्राह बृहस्पतिरुदारधीः ॥१२॥

देवतीर्थं भृगुक्षेत्रे सर्वतीर्थाधिकंनृप !। देवतीर्थे नरः स्नात्वाश्रीपतिं योऽनुपश्यति

सोमग्रहे कुलशतं स समुद्धृत्य नाकभाक् ।

दानानि द्विजमुख्येभ्यो देवतीर्थे नराधिप !॥ १४ ॥

यैर्दत्तानि नरैर्भोगभागिनः प्रेत्य चेह ते । देवतीर्थे विप्रभोज्यं हरिमुद्दिश्ययश्चरेत्

स सर्वाह्लादमाप्नोति स्वर्गलोके युधिष्ठिर !।

देवतीर्थे नरो नारी स्नात्वा नियतमानसौ ॥ १६ ॥

उपोष्यैकादशीं भक्त्या पूजयेद्यः श्रियः पतिम् ।

रात्रौ जागरणं कृत्वा घृतेनोद्बोध्य दीपकम् ॥ १८ ॥

द्वादश्यां प्रातरुत्थाय तथावै नर्मदाजले । विप्रदां पत्यमभ्यर्च्य विधिवत्कुरुनन्दन

वस्त्राभरणताम्बूलपुष्पधूपविलेपनैः । अक्षये विष्णुलोकेऽसौ मोदते चरितव्रतः ॥

यः सदैकादशीतिथौ स्नात्वोपोष्याऽर्चयेद्धरिम् ।

रात्रौ जागरणं कुर्याद्वेदशास्त्रविधानतः ॥ २० ॥

धर्मराजकृतांपापांनसपश्यतियातनाम् । पञ्चरात्रविधानेनश्रीपतिंयोऽर्चयिष्यति

दीक्षामवाप्य विधिवद्वैष्णवीं पापनाशनीम् ।

स्वर्गमोक्षप्रदां पुण्यां भोगदां वित्तदामथ ॥ २२ ॥

राज्यदांवामहाभागपुत्रदांभाग्यदामथ । सुकलत्रप्रदांवापिविष्णोर्भक्तिप्रदामिति

तरिष्यतिभवाम्भोधिंस नरःकुरुनन्दन । योऽर्चयिष्यतितत्रैवदेवतीर्थेश्रियःपतिम्
विश्वरूपमथोसम्यङ्मूलश्रीपतिमेव वा । नारायणगिरिंवाऽपिगृहेवैकादशीतिथौ
भक्तिमाञ्छ्रद्धयायुक्तः क्षीरैस्तीर्थोदकैरपि । सुसूक्ष्मैरहतैर्वस्त्रैर्महाकौशेयकैर्नृप
विचित्रैर्नेत्रजैर्वाऽपि धूपैरगुरुचन्दनैः । गुग्गुलैर्घृतमिश्रैश्च नैवेद्यैर्विविधैरपि ॥ २७॥
पायसाद्यैर्मनुष्येन्द्र पयसा वा युधिष्ठिर । पिष्टदीपैः सुविमलैर्वर्द्धमानैर्मनोहरैः ॥

पूजयित्वा नरो याति यथा तच्छृणु भारत !।
शङ्खी चक्री गदी पद्मी भूत्वाऽसौ गरुडध्वजः ॥ २९ ॥
देवलोकानतिक्रम्य विष्णुलोकं प्रपद्यते ।
यस्तु वै परया भक्त्या श्रीपतेः पादपङ्कजम् ॥ ३० ॥
चतुर्द्धाऽधिष्ठितं पश्येच्छ्रियं त्रैलोक्यमातरम् ।
नृत्यगीतविनोदेन मुच्यते पातकैर्ध्रुवम् ॥ ३१ ॥

नीराजनेतु देवस्यप्रातर्मध्येदिनेतथा । सायं च नियतोनित्यं यःपश्येत्पूजयेद्धरिम्

स तीर्त्वा ह्यापदं दुर्गां नैवार्त्तिं समवाप्नुयात् ।
आयुः श्रीवर्द्धनं पुंसां चक्षुषामपि पूरकम् ॥ ३३ ॥

उपपापहरं चैव सदा नीराजनं हरेः । तदा नीराजनाकाले यो हरेः पठति स्तवम्
स धन्योदेवदेवस्यप्रसन्नेनाऽन्तरात्मना । हरेर्नीराजवाशेषं पाणिभ्यांयःप्रयच्छति
संगृह्यचक्षुषीतेनयोजयेन्मार्जयन्मुखम् । तिमिरादीनक्षिरोगान्नाशयेद्दीप्तिमन्मुखम्
भवत्यशेषदुष्टानां नाशायाऽलंनरोत्तम । दीपप्रज्ज्वलनं यस्य नित्यमग्रे श्रियः पतेः

स्नात्वा रेवाजले पुण्ये प्रदद्यादधिकम्व्रती ।
सप्तद्वीपवती तेन ससागरवनापगा ॥ ३८ ॥
प्रदक्षिणीकृता स्याद्वै धरणी शङ्करोऽब्रवीत् ।
इदं यः पठ्यमानं तु शृणुयात्पठतेऽपिवा ॥ ३९ ॥
स्मरणं सोऽन्तसमये विपाप्मा प्राप्नुयाद्धरेः ।
इदं यशस्यमायुष्यं स्वर्ग्यं पितृगुणप्रियम् ॥ ४० ॥

माहात्म्यं श्रावयेद्विप्राञ्छ्रीपतेः श्राद्धकर्मणि ।
घृतेन मधुना तेन तर्पिताः स्युः पितामहाः ॥ ४१ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे श्रीपतिमाहात्म्यवर्णनं नाम पञ्चनवत्युत्तरशततमोऽध्यायः ॥१९५॥

षण्णवत्यधिकशततमोऽध्यायः

हंसतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेद्धराधीश हंसतीर्थमनुत्तमम् । यत्र हंसस्तपस्तप्त्वा ब्रह्मवाहनतांगतः

हंसतीर्थे नरः स्नात्वा दानं दत्त्वा च काञ्चनम् ।
सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ॥ २ ॥

हंसयुक्तेन यानेन तरुणादित्यवर्चसा । सर्वकामसमृद्धेन सेव्यमानोऽप्सरोगणैः ॥

तत्र भुक्त्वा यथाकामं सर्वान्भोगान्यथेप्सितान् ।
जातिस्मरो हि जायेत पुनर्मानुष्यमागतः ॥ ४ ॥
संन्यासेन त्यजेद्देहं मोक्षमाप्नोति भारत !॥ ५ ॥

एतत्ते कथितं पार्थ! हंसतीर्थस्य यत्फलम् । सर्वपापहरं पुण्यं सर्वदुःखविनाशनम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे हंसतीर्थमाहात्म्यवर्णनंनाम षण्णवत्युत्तरशततमोऽध्यायः ॥१९६॥

सप्तनवत्यधिकशततमोऽध्यायः

मूलस्थानतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवाऽनन्तरं गच्छेत्सूर्यतीर्थमनुत्तमम् ।
मूलस्थानमिति ख्यातं पद्मजस्थापितं शुभम् ॥ १ ॥
मूलश्रीपतिना देवी प्रोक्ता स्थापय भास्करम् ।
श्रुत्वा देवोदितं देवी स्थापयामास भास्करम् ॥ २ ॥
प्रोच्यते नर्मदातीरे मूलस्थानाख्यभास्करः ॥ ३ ॥

तत्रतीर्थे नरोयस्तुस्नात्वानियतमानसः । सन्तर्प्य पितृदेवांश्च पिण्डेनसलिलेनच

मूलस्थानं ततः पश्येत्स गच्छेत्परमां गतिम् ।
गुह्याद्गुह्यतरस्तत्र विशेषस्तु श्रुतो मया ॥ ५ ॥

समागमे मुनीनांतु शङ्कराच्छशिशेखरात् । सदावैशुक्लसप्तम्यांमूलमादित्यवासरः

तदा रेवाजलं गत्वा स्नात्वा सन्तर्प्य देवताः ।
पितृंश्च भरतश्रेष्ठ! दत्त्वा दानं स्वशक्तितः ॥ ७ ॥
करवीरैस्ततो गत्वा रक्तचन्दनवारिणा ।
संस्थाप्य भास्करं भक्त्या सम्पूज्य च यथाविधि ॥ ८ ॥

ततः सागुरुकैर्धूपैः कुन्दरैश्च विशेषतः । धूपयेद्देवदेवेशं दीपान्बोध्य दिशो दश ॥
उपोष्य जागरं कुर्याद्गीतवाद्यं विशेषतः । एवं कृते महीपाल न भवेदुग्रदुःखभाक्
सूर्यलोके वसेत्तावद्यावत्कल्पशतत्रयम् । गन्धर्वैरप्सरोभिश्च सेव्यमानो नृपोत्तम

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्त्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे मूलस्थानतीर्थमाहात्म्यवर्णनंनामैकसप्तनवत्यधिकशततमोऽध्यायः

अष्टनवत्यधिकशततमोऽध्यायः

शूलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेन्महीपालभद्रकालीतिसङ्गमम् । शूलतीर्थमितिख्यातंस्वयंदेवेननिर्मितम्
पञ्चायतनमध्ये तु तिष्ठते परमेश्वरः । शूलपाणिर्महादेवः सर्वदैवतपूजितः ॥ २ ॥
स सङ्गमो नृपश्रेष्ठ नित्यं देवैर्निषेवितः । दर्शनात्तस्य तीर्थस्य स्नानदानाद्विशेषतः

दौर्भाग्यं दुर्निमित्तं च ह्यभिशापो नृपग्रहः ।
यदन्यद्दुष्कृतं कर्म नश्यते शङ्करोऽब्रवीत् ॥ ४ ॥

युधिष्ठिर उवाच

कथं शूलेश्वरी देवी कथं शूलेश्वरो हरः । प्रथितो नर्मदातीरे एतद्विस्तरतो वद ॥

मार्कण्डेय उवाच

बभूव ब्राह्मणः कश्चिन्माण्डव्य इति विश्रुतः ।
वृत्तिमान्सर्वधर्मज्ञः सत्ये तपसि च स्थितः ॥ ६ ॥
अशोकाश्रममध्यस्थो वृक्षमूले महातपाः ।
ऊर्द्ध्वबाहुर्महातेजास्तस्थौ मौनव्रतान्वितः ॥ ७ ॥

तस्यकालेनमहता तीव्रे तपसि वर्त्ततः । तमाश्रममनुप्राप्तादस्य वोलोप्त्रहारिणः
अनुसर्प्यमाणा बहुभिः पुरुषैर्भरतर्षभ । ते तस्यावसथे लोप्त्रं न्यदधुः कुरुनन्दन

निधाय च तदा लीनास्तत्रैवाऽऽश्रममण्डले ।
तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलम् ॥ १० ॥
आजगाम ततोऽपश्यंस्तमृषिं तस्करानुगाः ।
तमपृच्छंस्तदा वृत्तं रक्षिणस्तं तपोधनम् ॥ ११ ॥

वद केन पथा याता दस्यवो द्विजसत्तम । तेनगच्छामहेब्रह्मन्यथाशीघ्रतरं वयम् ॥

तथा तु वचनं तेषां ब्रुवतां स तपोधनः । न किञ्चिद्वचनंराजन्नवदत्साध्वसाधुवा
ततस्ते राजपुरुषा विचिन्वन्तस्तमाश्रमम् ।
संयम्यैनं ततो राज्ञे सर्वान्दस्यून्न्यवेदयन् ॥ १४ ॥
तंराजासहितैश्चोरैरन्वशाद्वध्यतामिति । सम्वध्यतंच तैराजञ्छूलेप्रोतोमहातपाः
ततस्तेशूलमारोप्यतं मुनिं रक्षिणस्तदा । प्रतिजग्मुर्महीपाल धनान्यादायतान्यथ
शूलस्थः स तु धर्मात्मा कालेन महता तदा ।
ध्यायन्देवं त्रिलोकेशं शङ्करं तमुमापतिम् ॥ १७ ॥
बहुकालंमहेशानंमनसाऽऽध्यायसंस्थितः ।निराहारोऽपिविप्रर्षिर्मरणंनाऽभ्यपद्यत
धारयामास विप्राणामृषभः स हृदा हरिम् । शूलाग्रे तप्यमानेनतपस्तेनकृतं तदा
सन्तापंपरमंजग्मुःश्रुत्वैतन्मुनयोऽखिलाः । ते रात्रौशकुनाभूत्वासंन्यवर्त्तन्तभारत
दर्शयन्तो मुनेः शक्तिं तमपृच्छन्द्विजोत्तमम् ।
श्रोतुमिच्छाम ते ब्रह्मन्किं पापं कृतवानसि ॥ २१ ॥

श्रीमार्कण्डेय उवाच

ततः स मुनिशार्दूलस्तानुवाच तपोधनान् ।
दोषतः किं गमिष्यामि न हि मेऽन्योपराध्यति ॥ २२ ॥
एवमुक्त्वा ततः सर्वानाचचक्षे ततो मुनिः ।
मुनयश्च ततो राज्ञे द्वितीयेऽह्नि न्यवेदयन् ॥ २३ ॥
राजा तु तमृषिंश्रुत्वा निष्क्रान्तः सह बन्धुभिः ।
प्रसादयामास तदा शूलस्थमृषिरुत्तमम् ॥ २४ ॥

राजोवाच

यन्मयाऽपकृतं तात तवाऽज्ञानवशाद्बहु । प्रसादयेत्वांतत्राऽहंनमेत्वंक्रोद्धुमर्हसि
एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः । कृतप्रसादंराजा तं ततः समवतारयत्
अवतीर्यमाणस्तु मुनिः शूले मां सत्वमागते ।
अतिसम्पीडितोविप्रः शङ्करं मनसाऽगमत् ॥ २७ ॥

सन्ध्यातः शङ्करस्तेन बहुकालोपवासतः ।
प्रादुर्भूतो महादेवः शूलं तस्य तथाऽच्छिनत् ॥ २८ ॥
शूलमूलस्थितः शम्भुस्तुष्टःप्राहपुनःपुनः । ब्रूहिकिंक्रियतां विप्रसत्त्वस्थानपरायण
अदेयमपि दास्यामि तुष्टोऽस्म्यद्योमया सह ।
किं तु सत्यवतां लोके सिद्धिर्न स्याच्च भूयसी ॥ ३० ॥
स्वकर्मणोऽनुरूपंहि फलं भुञ्जन्तिजन्तवः । शुभेनकर्मणा भूतिर्दुःखंस्यात्पातकेनतु
बहुभेदप्रभिन्नं तु मनुष्येषु विपच्यते । केषां दरिद्रभावेन केषां धनविपत्तिजम् ॥
सन्तत्यभावजं केषां केषाञ्चित्तद्विपर्यये ।
तथा दुर्वृत्तितस्तेषां फलमाविर्भवेन्नृणाम् ॥ ३३ ॥
केषांचित्पुत्रमरणे वियोगात्प्रियमित्रयोः ।
राजचौराग्नितः केषां दुःखं स्याद्दैवनिर्मितम् ॥ ३४ ॥
तच्छरीरे तुकेषांचित्कर्मणासंप्रदृश्यते । जराश्चविविधाः केषांदृश्यतेव्याधयस्तथा
दृश्यन्ते चाऽभिशापाश्च पूर्वकर्मानुसञ्चिताः ।
कष्टाः कष्टतरावस्था गताः केचिदनागसः ॥ ३६ ॥
पूर्वकर्मविपाकेन धर्मेणतपसिसंस्थिताः । दान्ताःस्वदारनिरताभूरिदाःपरिपूजकाः
ह्रीमन्तो नयसंयुक्ता अन्ये बहुगुणैर्युताः । दुर्गमामापदंप्राप्य निजकर्मसमुद्भवाम्
न संज्वरन्ति ये मर्त्या धर्मनिन्दां न कुर्वते ।
इदमेव तपो मत्त्वा क्षिपन्ति सुविचेतसः ॥ ३६ ॥
हा भ्रातर्मातः पुत्रेति कष्टेषु न वदन्तिये । स्मरन्तिमां महेशानमथवापुष्करेक्षणम्
दुष्कृतं पूर्वजं भोक्तुं ध्रुवं तदुपशाम्यति ॥ ४१ ॥
दिनानि यावन्ति वसेत्स कष्टे यथाकृतं चिन्तयद्दैवमीशम् ।
तावन्ति सौम्यानि कृतानि तेन भवन्ति विप्र! श्रुतिनोदनैषा ॥ ४२ ॥
यस्मात्त्वया कष्टगतेन नित्यं स्मृतश्चाहं मनसा पूजितश्च ।
गौरीसहायस्तेन इहाऽगतोऽस्मि ब्रूह्यद्य कृत्यं क्रियतां किं नु विप्र ! ॥

श्रीमार्कण्डेय उवाच

तुष्टो यद्यमया सार्धं वरदो यदि शङ्कर। तदा मे शूलसंस्थस्य संशयं परमं वद ॥
न रुजा मम काऽपि स्याच्छूलसम्प्रोतितेऽगके।
अमृतस्त्रावि तच्छूलं प्रभावात्कस्य शंस मे ॥ ४५ ॥

श्रीशूलपाणिरुवाच

शूलस्थेन त्वया विप्र मनसा चिन्तितोऽस्मि यत्।
अनयानां निहन्ताऽहं दुःखानां विनिवर्हणः ॥ ४६ ॥
ध्यातमात्रो ह्यहं विप्र! पाताले वाऽपि संस्थितः।
शूलमूले त्वहं शंभुरग्रे देवी स्वयं स्थिता ॥
जगन्माताऽम्बिका देवी त्वाऽमृतेनान्वपूरयत् ॥ ४७ ॥

श्रीमार्कण्डेय उवाच

पूर्वमेवस्थितोयस्माच्छूलं व्याप्योमयासह। प्रसादप्रवणोमह्यमिदानींचानयासह
यस्याः संस्मरणादेव दौर्भाग्यं प्रलयं व्रजेत्।
न दौर्भाग्यात्परं लोके दुःखाद्दुःखतरं किल ॥ ४९ ॥
किलैवं श्रूयतेगाथा पुराणेषुसुरोत्तम!। त्रैलोक्यं दहतस्तुभ्यं सौभाग्यमेकतांगतम्
विष्णोर्वक्षःस्थलं प्राप्य तत्स्थितं चेति नः श्रुतम्।
पीतं तद्वक्षसस्त्रस्तदक्षेण परमेष्ठिना ॥ ५१ ॥
तस्मात्सतीति संजज्ञ इयमिन्दीवरेक्षणा। यजतस्तस्यदेवेशतव मानावखण्डनात्
जुहावाऽग्नौ तु सा देवी ह्यात्मानं प्राणसञ्ज्ञिकम्।
आत्मानं भस्मसात्कृत्वा प्रालेयाद्रेस्ततः सुता ॥ ५३ ॥
मेनकायांप्रभोजाता साम्प्रतंयाह्युमाभिधा। अनादिनिधनादेवीह्यप्रतर्क्यासुरेश्वर
यदि तुष्टोसि देवेश! ह्युमा मे वरदा यदि।
उभावप्यत्र वै स्थाने स्थितौ शूलाग्रमूलयोः।
अवतारो यत्र तत्र संस्थितिं वै ततः कुरु ॥ ५६ ॥

श्रीमार्कण्डेय उवाच

तेनैवमुक्तेसहसाकृत्वाभूमण्डलंद्विधा। निःसृतौ शूलमूलाग्रालिंगार्चाप्रतिरूपिणौ
प्रद्योतयद्दिशः सर्वालिङ्गं मूलेप्रदृश्यते। वामतः प्रतिमादेवी तदाशूलेश्वरीस्थिता
विलोभयन्ती च जगद्भाति पूरयतीदिशः। दृष्ट्वा कृताञ्जलिपुटःस्तुतिंचक्रेद्विजोत्तमः

श्रीमार्कण्डेय उवाच

त्वमस्य जगतो माता जगत्सौभाग्यदेवता।
न त्वया रहितं किञ्चिद् ब्रह्माण्डेऽस्ति वरानने!॥ ६० ॥
प्रसादं कुरु धर्मज्ञे! ममत्वाज्ञप्तुमर्हसि। ईदृशेनैव रूपेण केषु स्थानेषु तिष्ठसि ॥
प्रसादप्रवणा भूत्वा वद तानि महेश्वरि!॥ ६१ ॥

श्रीदेव्युवाच

सर्वगा सर्वभूतेषु द्रष्टव्यासर्वतो भुवि। सर्वलोकेषु यत्किंचिद्विहितंन मया विना
तथापि येषु स्थानेषु द्रष्टव्या सिद्धिमीप्सुभिः।
स्मर्त्तव्या भूतिकामेन तानि वक्ष्यामि तत्त्वतः ॥ ६३ ॥
वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी।
प्रयागे ललिता देवी कामुका गन्धमादने ॥ ६४ ॥
मानसे कुमुदानामविश्वकायातथाऽपरे। गोमन्तेगोमती नाममन्दरेकामचारिणी
मदोत्कटा चैत्ररथे हयन्तीहास्तिनेपुरे। कान्यकुब्जेस्थिता गौरीरम्भाह्यमलपर्वते
एकाम्रके कीर्त्तिमती विश्वांविश्वेश्वरींविदुः। पुष्करेपुरुहूताच केदारेमार्गदायिनी
नन्दा हिमवतः प्रस्थे गोकर्णे भद्रकर्णिका।
स्थानेश्वरे भवानी तु बिल्वके बिल्वपत्रिका ॥ ६८ ॥
श्रीशैले माधवीनाम भद्रे भद्रेश्वरीतिच। जयावराहशैले तु कमला कमलालये ॥
रुद्रकोट्यां तु कल्याणी काली कालञ्जरे तथा।
महालिङ्गे तु कपिला माकोटे मुकुटेश्वरी ॥ ७० ॥
शालिग्रामे महादेवी शिवलिङ्गे जलप्रिया।

मायापुर्यां कुमारी तु सन्ताने ललिता तथा ॥ ७३ ॥

उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला । गयायांविमलानाममङ्गलापुरुषोत्तमे विपाशायाममोघाक्षी पाटलापुण्ड्रवर्धने । नारायणीसुपार्श्वे तुत्रिकूटेभद्रसुन्दरी विपुले विपुलानामकल्याणीमलयाचले । कोटवीकोटितीर्थेषु सुगन्धागन्धमादने

गोदाश्रमे त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ।

शिवचण्डे सभानन्दा नन्दिनी देविकातटे ॥ ७५ ॥

रुक्मिणी द्वारवत्यां तुराधावृन्दावनेवने । देवकी मथुरायां तु पाताले परमेश्वरी

चित्रकूटे तथा सीता विन्ध्ये विन्ध्यनिवासिनी ।

सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चण्डिका ॥ ७७ ॥

रमणा रामतीर्थे तुयमुनायां मृगावती । करवीरे महालक्ष्मी रूपादेवी विनायके आरोग्यावैद्यनाथेतुमहाकाले महेश्वरी । अभयेत्युष्णतीर्थेतु मृगीवाविन्ध्यकन्दरे

माण्डव्ये माण्डुकीनाम स्वाहा माहेश्वरे पुरे ।

छागलिङ्गे प्रचण्डा तु चण्डिकाऽमरकण्टके ॥ ८० ॥

सोमेश्वरे वरारोहा प्रभासे पुष्करावती । वेदमातासरस्वत्यां पारापारातटे मुने

महालये महाभागा पयोष्ण्यां पिङ्गलेश्वरी ।

सिंहिका कृतशौचे तु कार्त्तिके चैव शाङ्करी ॥ ८२ ॥

उत्पलावर्तके लोला सुभद्राशोणसङ्गमे । मता सिद्धवटे लक्ष्मीस्तरङ्गा भारताश्रमे जालन्धरे विश्वमुखीतारा किष्किन्धपर्वते । देवदारुवनेपुष्टिर्मेधा काश्मीरमण्डले भीमादेवी हिमाद्रौ तुपुष्टिर्वस्त्रेश्वरेतथा । कपालमोचने शुद्धिर्माताकायावरोहणे

शङ्खोद्धारे ध्वनिर्नाम धृतिः पिण्डारके तथा ।

काला तु चन्द्रभागायामच्छोदे शक्तिधारिणी ॥ ८६ ॥

वेणायाममृतानाम बदर्यामुर्वशी तथा । ओषधी चोत्तरकुरौ कुशद्वीपे कुशोदका ॥ मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी । अश्वत्थे वन्दिनीकातुनिधिर्वैश्रवणालये गायत्री वेदवदने पार्वती शिवसन्निधौ । देवलोकेतथेन्द्राणी ब्रह्मास्येतु सरस्वती

सूर्यबिम्बे प्रभानाम मातृणां वैष्णवी मता ।

अरुन्धती सतीनां तु रामासु च तिलोत्तमा ॥ ९० ॥

चित्रे ब्रह्मकलानाम शक्तिः सर्वशरीरिणाम् ।

शूलेश्वरी भृगुक्षेत्रे भृगौ सौभाग्यसुन्दरी ॥ ९१ ॥

एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमम् । अष्टोत्तरं च तीर्थानां शतमेतदुदाहृतम् ॥ इदमेव परं विप्र सर्वेषां तु भविष्यति । पठत्यष्टोत्तरशतं नाम्नां यः शिवसन्निधौ ॥

स मुच्यते नरः पापैः प्राप्नोति स्त्रियमीप्सिताम् ।

स्नात्वा नारी तृतीयायां मां समभ्यर्च्य भक्तितः ॥ ९४ ॥

न सा स्याद् दुःखिनी जातु मत्प्रभावान्नरोत्तम !।

नित्यं मद्दर्शने नारी नियता या भविष्यति ॥ ९५ ॥

पतिपुत्रकृतं दुःखं नसाप्राप्स्यतिकर्हिचित् । मदालयेतुया नारीतुलापुरुषसंज्ञितम्

संपूज्य मण्डयेद्देवाँल्लोकपालांश्च साग्निकान् ।

सपत्नीकान्द्विजान्पूज्य वासोभिर्भूषणैस्तथा ॥ ९७ ॥

भूतेभ्यस्तु बलिं दद्यादृत्विग्भिः सह देशिकः ।

ततः प्रदक्षिणीकृत्य तुलामित्यभिमन्त्रयेत् ॥ ९८ ॥

शुचिरक्ताम्बरो वा स्याद्गृहीत्वा कुसुमाञ्जलिम् ।

नमस्ते सर्वदेवानां शक्तिस्त्वं परमा स्थिता ॥ ९९ ॥

साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ।

त्वं तुले सर्वभूतानां प्रमाणमिहकीर्त्तिता ॥ १०० ॥

कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन्नुमामुखम् ।

ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः ॥ १०१ ॥

द्रव्यमष्टविधं तत्रह्यात्मवित्तानुसारतः । मदंशभूतं विप्रेन्द्र! पृथिव्यां यदधिष्ठितम् सुवर्णंचैवनिष्पावांस्तथाराजिकुसुम्भकम् । तृणराजेन्दुलवणं कुङ्कुमं तुतथाष्टमम्

एषामेकतमं कुर्याद्यथावित्तानुसारतः ।

साम्यादभ्यधिकं यावत्काञ्चनादि भवेद् द्विज !॥ १०४ ॥
तावत्तिष्ठेन्नरो नारी पश्चादिदमुदीरयेत्। नमो नमस्ते ललिते तुलापुरुषसंज्ञिते !॥
त्वमुमे तारयस्वास्मानस्मात्संसारकर्दमात्। ततोऽवतीर्य गुरवेपूर्वमर्द्धंनिवेदयेत्
ऋत्विग्भ्योऽपरमर्द्धं च दद्यादुदकपूर्वकम्।
तेभ्यो लब्धा ततोऽनुज्ञां दद्यादन्येषु चार्थिषु ॥ १०७ ॥
सपत्नीकं गुरुं रक्तवाससी परिधापयेत्।
अन्यांश्च ऋत्विजः शक्त्या गुरुं केयूरकङ्कणैः ॥ १०८ ॥
शुक्लां गांक्षीरिणींदद्याल्ललिताप्रीयतामिति। अनेनविधिनायातुकुर्यान्नारीममालये
मत्तुल्या सा भवेद्राज्ञां तेजसा श्रीरिवामला।
सावित्रीव च सौन्दर्ये जन्मानि दशपञ्च च ॥ ११० ॥

श्रीमार्कण्डेय उवाच

एवं निशम्य वचनं गौर्या द्विजवरोत्तमः। नमस्कृत्यजगामाऽऽशुधर्मराजनिवेशनम्
तदा प्रभृति तत्तीर्थं ख्यातं शूलेश्वरीतिच।
तस्मिंस्तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ ११२ ॥
ब्राह्मणानन्नवासोभिः पिण्डैःपितृपितामहान्। भक्तोपहारैर्देवेशमुमयासह शङ्करम्
धूपगुग्गुलदानैश्च दीपदानैःसुबोधितैः। सर्वपापविनिर्मुक्तःसगच्छेच्छिवसन्निधिम्
तस्मिंस्तीर्थे तुयःकश्चिदभियुक्तोनरेश्वर। अभिशापी तथास्नातस्त्रिदिनंमुच्यतेनरः
कृष्णपक्षे चतुर्दश्यां रात्रौ जागर्त्तियोनरः। उपवासपरःशुद्धः शिवं सम्पूजयेन्नरः॥
प्रमुच्य पापसम्मोहं रुद्रलोकं स गच्छति ॥ ११६ ॥
त्रिनेत्रश्चचतुर्बाहुः साक्षाद्रुद्रइवाऽपरः। क्रीडते देवकन्याभिर्यावच्चन्द्रार्कतारकम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शूलेश्वरतीर्थमाहात्म्यवर्णनं नामाष्टनवत्युत्तरशततमोऽध्यायः ॥

एकोनद्विशततमोऽध्यायः

आश्विनतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं राजन्नाश्विनं तीर्थमुत्तमम्।
कामिकं सर्वतीर्थानां प्राणिनां सिद्धिदायकम् ॥ १ ॥
तत्रतीर्थेऽश्विनौ देवौसुरूपौभिषजांवरौ। तपःकृत्वासुविपुलं सञ्जातौयज्ञभागिनौ
सम्मतौ सर्वदेवानामादित्यतनयावुभौ। नासत्यौ सत्त्वसंपन्नौ सर्वदुःखघ्नसत्तमौ

युधिष्ठिर उवाच

आदित्यस्य सुतौ तात नासत्यौ येन हेतुना।
संजातौ श्रोतुमिच्छामि निर्णयं परमं द्विज !॥ ४ ॥

मार्कण्डेय उवाच

पुराणे भास्करे तात एतद्धि स्तरतो मया। संश्रुतंदेवदेवस्य मार्त्तण्डस्यमहात्मनः
तत्संक्षेपतः सर्वं भक्तियुक्तस्यभारत। कथयामि नसंदेहो वृद्धभावेन कर्शितः॥
अतितेजो रवेर्दृष्ट्वा राज्ञी देवान्नरोत्तम। चचार मेरुकान्तारे वडवा तप उल्वणम्
ततः कतिपयाऽहस्य कालस्यभगवान्रविः। दृष्ट्वातुरूपमुत्सृज्य परमंतेजउज्ज्वलम्
मनोभववशीभूतो हयोभूत्वालघुक्रमः। विस्फुरन्तीयथाप्राणं धावमानाइतस्ततः
हेषमाणः स्वरेणाऽसौ मैथुनायोपचक्रमे। सम्मुखीतुततोदेवी निवृत्तालघुविक्रमा
यथा तथा नासिकायां प्रविष्टं बीजमुत्तमम्।
ततो नासागते बीजे सञ्जातो गर्भ उत्तमः ॥ ११ ॥
जातौ यतः सुतौ पार्थ! नासत्यौ विश्रुतौ ततः।
सुसमौ सुविभक्ताङ्गौ बिम्बाद्बिम्बमिवोद्यतौ ॥ १२ ॥
अधिकौ सर्वदेवानां रूपैश्वर्यसमन्वितौ। नर्मदातटमाश्रित्य भृगुकच्छेगतावुभौ

परां सिद्धिमनुप्राप्तौ तपः कृत्वा सुदुश्चरम् ॥ १३ ॥
तत्रतीर्थे तुयः स्नात्वा तर्पयेत्पितृदेवताः । सुरूपः सुभगः पार्थ जायते यत्र तत्र ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे आश्विनतीर्थमाहात्म्यवर्णनंनामैकोनद्विशततमोऽध्यायः ॥

द्विशततमोऽध्यायः

सावित्रीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं पार्थ! सावित्रीतीर्थमुत्तमम् ।
यत्र सिद्धा महाभागा सावित्री वेदमातृका ॥ १ ॥

युधिष्ठिर उवाच

सावित्रीकाद्विजश्रेष्ठ कथंवाऽऽराध्यतेबुधैः । प्रसन्नावावरंकं चददातिकथयस्व मे ॥

श्रीमार्कण्डेय उवाच

पद्मा पद्मासनस्थेनाऽधिष्ठिता पद्मयोगिनी ।
सावित्रतेजःसदृशी सावित्री तेन चोच्यते ॥ ३ ॥
पद्मानना पद्मवर्णा पद्मपत्रनिभेक्षणा । ध्यातव्याब्राह्मणैर्नित्यं क्षत्रवैश्यैर्यथाविधि ॥
ब्रह्महत्याभयात्सा हिन तु शूद्रैः कदाचन । उच्चारणाद्धारणाद्वानरकेपतति ध्रुवम् ॥
वेदोच्चारणमात्रेण क्षत्रियैर्द्धर्मपालकैः ।
जिह्वाच्छेदोऽस्य कर्त्तव्यः शूद्रस्येति विनिश्चयः ॥ ६ ॥
बाला बालेन्दुसदृशी रक्तवस्त्रानुलेपना ।
उषःकाले तु ध्यातव्या सन्ध्या सन्धान उत्तमे ॥ ७ ॥
उत्तुङ्गपीवरकुचा सुमुखीशुभदर्शना । सर्वाभरणसम्पन्ना श्वेतमाल्यानुलेपना ॥ ८ ॥

श्वेतवस्त्रपरिच्छन्ना श्वेतयज्ञोपवीतिनी ।
मध्याह्नसन्ध्या ध्यातव्या तरुणा भुक्तिमुक्तिदा ॥ ९ ॥
प्रदोषे तुपुनः पार्थ!श्वेतापाण्डुरमूर्द्धजा । स्मृतातुदुर्गकान्तारे मातृवत्परिरक्षति ॥
विशेषेण तु राजेन्द्र सावित्रीतीर्थमुत्तमम् ।
स्नात्वाऽऽचम्य विधानेन मनोवाक्कायकर्मभिः ॥ ११ ॥
प्राणायामैर्दहेद्दोषान्सप्तजन्मार्जितान्बहून् ।
आपोहिष्ठेति मन्त्रेण प्रोक्षयेदात्मनस्तनुम् ॥ १२ ॥
द्रुपदं चतथातिस्रस्तत्रतीर्थेनृपोत्तम । आपोहिष्ठेतित्रिरावृत्य प्रतिग्राहैर्नलिप्यते ॥
अघमर्षणं त्र्यृचं तोये यथा वेदमथाऽपिवा । उपपापैर्न लिप्येत पद्मपत्रमिवांभसा ॥
पापं हि कुरुते विप्र उल्लेखत्रयमाचरेत् । चतुर्थं कारयेद्यस्तु ब्रह्महत्यांव्यपोहति ॥
द्रुपदाख्यश्च यो मन्त्रो वेदे वाजसनेयके । अन्तर्जले सकृज्जप्तः सर्वपापक्षयं करः ॥
उदुत्यमिति मन्त्रेण पूजयित्वा दिवाकरम् । गायत्रींचजपेद्देवीं पवित्रांवेदमातरम् ॥
गायत्रीं तुजपेद्देवीं यः सन्ध्यानन्तरंद्विजः । सर्वपापविनिर्मुक्तो ब्रह्मलोकंसगच्छति ॥
दशभिर्जन्मभिर्लब्धं शतेन तुपुराकृतम् । त्रियुगंतुसहस्रेणगायत्री हन्तिकिल्बिषम् ॥
गायत्रीसारमात्रोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥ २० ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते किंचिन्न तस्य फलभाग्भवेत् ॥ २१ ॥
सन्ध्यां नोपासते यस्तु ब्राह्मणो मन्दबुद्धिमान् ।
स जीवन्नेव शूद्रः स्यान्मृतः श्वा संप्रजायते ॥ २२ ॥
सावित्रीतीर्थमासाद्य सावित्रीं यो जपेद् द्विजः ।
त्रैविद्यं तु फलं तस्य जायते नाऽत्र संशयः ॥ २३ ॥
पितॄनुद्दिश्य यः स्नात्वा पिण्डनिर्वपणं नृप !।
कुरुते द्वादशाब्दानि तृप्यन्ति तत्पितामहाः ॥ २४ ॥

सावित्रीतीर्थमासाद्य यः कुर्यात्प्राणसंक्षयम् ।
ब्रह्मलोकं वसेत्तावद्यावदाभूतसंप्लवम् ॥ २५ ॥
पूर्णे चैव ततः काल इह मानुष्यतां गतः । चतुर्वेदो द्विजो राजञ्जायते विमले कुले
धनधान्यचयोपेतः पुत्रपौत्रसमन्वितः । व्याधिशोकविनिर्मुक्तो जीवेच्चशरदांशतम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे सावित्रीतर्थमाहात्म्यवर्णनंनाम द्विशततमोऽध्यायः ॥ २०० ॥

एकोत्तरद्विशततमोऽध्यायः
देवतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्महीपाल देवतीर्थमनुत्तमम् ।
यत्र सिद्धा महाभागा देवाः सेन्द्रा युधिष्ठिर !॥ १ ॥
स्नानंदानं जपोहोमःस्वाध्यायोदेवतार्च्चनम् । तत्रतीर्थप्रभावेण कृतमानंत्यमश्नुते
विशेषाद्भाद्रपदे तु कृष्णपक्षेत्रयोदशीम् । प्रधानं सर्वतीर्थानां देवैरध्यासितं पुरा
स्नात्वा त्रयोदशीदिने श्राद्धं कृत्वाविधानतः ।
देवैः संस्थापितं देवं सम्पूज्य वृषभध्वजम् ॥
सर्वपापविनिर्मुक्तो रुद्रलोकमवाप्नुयात् ॥ ४ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे देवतीर्थमाहात्म्यवर्णनं नामैकोत्तरद्विशततमोऽध्यायः ॥ २०१ ॥

द्व्यधिकद्विशततमोऽध्यायः
शिखितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं चान्यच्छिखितीर्थमनुत्तमम् ।
प्रधानं सर्वतीर्थानां पञ्चायतनमुत्तमम् ॥ १ ॥
तत्र तीर्थे तपस्तप्त्वा शिखार्थं हव्यवाहनः ।
शिखां प्राप्य शिखी भूत्वा शिखाख्यं स्थापयञ्छिवम् ॥ २ ॥
प्रतिपच्छुक्लपक्षे या भवेदाश्वयुजे नृप । तदातीर्थवरे गत्वा स्नात्वा वै नर्मदाजले
देवानृषीन्पितृंश्चान्यांस्तर्प्पयेत्तिलवारिणा ।
हिरण्यं ब्राह्मणे दद्यात्संतर्प्य च हुताशनम् ॥ ४ ॥
गन्धमाल्यैस्तथा धूपैस्ततः सम्पूजयेच्छिवम् ।
अनेन विधिनाऽभ्यर्च्य शिखितीर्थे महेश्वरम् ॥ ५ ॥
विमानेनाऽर्कवर्णेन ह्यप्सरोगणसम्वृतः । गीयमानस्तुगन्धर्वै रुद्रलोकं सगच्छति
शत्रुक्षयमवाप्नोति तेजस्वी जायते भुवि ॥ ७ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे शिखितीर्थमाहात्म्यवर्णनंनाम द्व्यधिकशततमोऽध्यायः ॥ २०२ ॥

त्र्यधिकद्विशततमोऽध्यायः

कोटितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेन्नराधीश! कोटितीर्थमनुत्तमम् ।
यत्र सिद्धा महाभागाः कोटिसङ्ख्या महर्षयः ॥ १ ॥
तपः कृत्वा सुविपुलमृषिभिः स्थापितः शिवः ।
तथा कोटीश्वरी देवी चामुण्डा महिषार्दिनी ॥ २ ॥
कृष्णपक्षे चतुर्द्दश्यां मासि भाद्रपदे नृप !।
तीर्थकोटीः समाहूय मुनिभिः स्थापितः शिवः ॥ ३ ॥
तस्यां तिथौ च हस्तर्क्षे सर्वपापप्रणाशनम् ।
तत्र तीर्थे तदा गत्वा स्नानं कृत्वा समाहितः ॥ ४ ॥
नरकादुद्धरत्याशु पुरुषानेकविंशतिम् । तिलोदकप्रदानेन किमुत श्राद्धदो नरः ॥
स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनम् ।
तस्य तीर्थस्य योगेन सर्वं कोटिगुणं भवेत् ॥ ६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनंनाम त्र्युत्तरद्विशततमोऽध्यायः ॥ २०३ ॥

चतुरधिकद्विशततमोऽध्यायः

पैतामहतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

भृगुतीर्थं ततो गच्छेत्तीर्थराजमनुत्तमम् । पैतामहं महापुण्यं सर्वपातकनाशनम्
ब्रह्मणा तत्रतीर्थेतुपुरा वर्षशतत्रयम् । आराधनंकृतंशम्भोः कस्मिंश्चित्कारणान्तरे

युधिष्ठिर उवाच

किमर्थं मुनिशार्दूल ब्रह्मालोकपितामहः । आराधयद्देवदेवं महाभक्त्या महेश्वरम्
आराध्यः सर्वभूतानां जगद्भर्त्ता जगद्गुरुः ।
श्रोतव्यं श्रोतुमिच्छामि महदाश्चर्यमुत्तमम् ॥ ४ ॥
धर्मपुत्रवचः श्रुत्वा मार्कण्डेयो मुनीश्वरः । कथयामासतद्वृत्तमितिहासपुरातनम्

मार्कण्डेय उवाच

स्वपुत्रिकामभिगन्तुमिच्छन्पूर्वं पितामहः । शप्तस्तु देवदेवेन कोपाविष्टेन सत्तम॥
वेदास्तव विनश्यन्ति ज्ञानंचकमलासन । अपूज्यःसर्वलोकानांभविष्यसिनसंशयः
एवं दत्ते ततः शापे ब्रह्मा खेदावृतस्तदा । रेवायाउत्तरे कूलेस्नात्वा वर्षशतत्रयम्
तोषयामास देवेशं तुष्टः प्रोवाच शङ्करः ॥ ८ ॥
पूज्यस्त्वं भवितालोके प्राप्ते पर्वणिपर्वणि । अहमत्रच वत्स्यामिदेवैश्चपितृभिःसह

श्रीमार्कण्डेय उवाच

तदाप्रभृति यत्तीर्थं ख्यातिंप्राप्तं पितामहात् । सर्वपापहरंपुण्यं सर्वतीर्थेष्वनुत्तमम्
तत्र भाद्रपदे मासिकृष्णपक्षेविशेषतः । अमावास्यांतुयःस्नात्वातर्पयेत्पितृदेवताः
पिण्डदानेन चैकेन तिलतोयेनवा नृप । तृप्यन्ति द्वादशाब्दानिपितरोनाऽत्रसंशयः
कन्यागते तुयस्तत्रनित्यं श्राद्धप्रदोभवेत् । अवाप्यतृप्तिं तत्पूर्वेवल्गन्तिचहसन्तिच
सर्वेषु पितृतीर्थेषु श्राद्धंकृत्वाऽस्तियत्फलम् । तत्फलंसमवाप्नोतिदर्शेतत्र नसंशयः

पैतामहे नरः स्नात्वा पूजयन्पार्वतीपतिम् ।
मुच्यते नाऽत्र सन्देहः पातकैश्चोपपातकैः ॥ १५ ॥
तत्र तीर्थे मृतानां तु नराणां भावितात्मनाम् ।
अनिवर्तिका गती राजन्रुद्रलोकादसंशयम् ॥ १६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे पैतामहतीर्थमाहात्म्यवर्णनंनाम चतुरधिकद्विशततमोऽध्यायः ॥

पञ्चाधिकद्विशततमोऽध्यायः

कुकुरीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

गच्छेत्ततः क्षोणिनाथ! तीर्थं परमशोभनम् ।
कुकुरीनाम विख्यातं सर्वपापप्रणाशनम् ॥ १ ॥
यंयं प्रार्थयते कामं पशुपुत्रधनादिकम् । तं तं ददाति देवेशी कुकुरी तीर्थदेवता
क्षेत्रपालो वसेत्तत्र ढौण्ढेशो नाम नामतः ।
तस्य चाऽऽराधनं कृत्वा नारी वा पुरुषोऽपि वा ॥ ३ ॥
वन्दनादपि राजेन्द्र दौर्भाग्यं नाशमाप्नुयात् । अपुत्रोलभते पुत्रमधनो धनमुत्तमम्
नारी नरस्तथाप्येवं लभते काममुत्तमम् ।
स्पर्शनाद्दर्शनात्तस्य तीर्थस्य विधिपूर्वकम् ॥ ५ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे कुकुरीतीर्थमाहात्म्यवर्णनंनाम पञ्चाधिकद्विशततमोऽध्यायः ॥

षडधिकद्विशततमोऽध्यायः

दशकन्यातीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

गच्छेत्ततः क्षोणिनाथ!तीर्थं परमशोभनम् । सर्वपापहरं पुण्यंदशकन्येति विश्रुतम्
महादेवकृतं पुण्यं सर्वकामफलप्रदम् ॥ १ ॥
तत्र तीर्थे महादेवो दशकन्या गुणान्विताः । ब्रह्मणोवरयामास ह्युद्वाहेनयुयोजह
तदाप्रभृति तत्तर्थं दशकन्येति विश्रुतम् । सर्वपापहरं पुण्यमक्षयं कीर्त्तितं फलम्
तत्र तीर्थे तु यः कन्यां ददाति समलङ्कृतम् ।
प्राप्नोति पुरुषो दत्वा यथाशक्त्या स्वलङ्कृताम् ॥ ४ ॥
तेन दानोत्थपुण्येन पूतात्मानो नरधिप !।
वसन्ति रोमसङ्ख्यानि वर्षाणि शिवसन्निधौ ॥ ५ ॥
ततः कालेन महतात्विहलोके नरेश्वर । मानुष्यंप्राप्यदुष्प्राप्यं धनकोटीपतिर्भवेत्
तत्र तीर्थे तु यो भक्त्या स्नात्वा विप्राय काञ्चनम् ।
संप्रयच्छति शान्ताय सोऽत्यन्तं सुखमश्नुते ॥ ७ ॥
वाचिकं मानसंवाऽपि कर्मजंयत्पुराकृतम् । तत्सर्वं विलयंयातिस्वर्णदानेनभारत
नरो दत्त्वा सुवर्णं च अपि वालाग्रमात्रकम् ।
तत्र तीर्थे दिवं याति मृतो नाऽस्त्यत्र संशयः ॥ ६ ॥
तत्रविद्याधरैःसिद्धैर्विमानवरमास्थितः । पूज्यमानोवसेत्तावद्यावदाभूतसम्प्लवम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे दशकन्यातीर्थमाहात्म्यवर्णनं नामषडुत्तरद्विशततमोऽध्यायः ॥

सप्ताधिकद्विशततमोऽध्यायः

सुवर्णबिन्दुतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्याऽग्रे पावनं तीर्थं स्वर्णबिन्द्विति विश्रुतम् ।
यत्र स्नात्वा दिवं यान्ति मृताश्च न पुनर्भवम् ॥ १ ॥

तत्रतीर्थे तुयः स्नात्वा दत्तेविप्रायकाञ्चनम् । तेनयत्तुफलंप्रोक्तं तच्छृणुष्वमहीपते
सर्वेषामेवरत्नानां काञ्चनं रत्नमुत्तमम् । अग्नितेजः समुद्भूतं तेन तत्परमम्भुवि ॥
तेनैव दत्ता पृथिवी सशैलवनकानना । सपत्तनपुरा सर्वा काञ्चनं यः प्रयच्छति ॥

मानसं वाचिकं पापं कर्मणा यत्पुरा कृतम् ।
तत्सर्वं नश्यति क्षिप्रं स्वर्णदानेन भारत !॥ ५ ॥
स्वर्णदानं तु यो दत्त्वा ह्यपि बालाग्रमात्रकम् ।
तत्र तीर्थे मृतो याति दिवं नास्त्यत्र संशयः ॥ ६ ॥

तत्रविद्याधरैःसिद्धैर्विमानवरमास्थितः । पूज्यमानोवसेत्तावद्यावदाभूतसम्प्लवम्
पूर्णे तत्र ततः काले प्राप्य मानुष्यमुत्तमम् । सुवर्णकोटिसहितेगृहेवै जायते द्विजः
सर्वव्याधिविनिर्मुक्तः सर्वलोकेषुपूजितः । जीवेद्वर्षशतंसाग्रं राजसंसत्सु विश्रुतः

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे सुवर्णविन्दुतीर्थमाहात्म्यवर्णनं नाम सप्ताधिकद्विशततमोऽध्यायः ॥

अष्टाधिकद्विशततमोऽध्यायः

ऋणमोचनतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

भूमिपाल!ततोगच्छेत्तीर्थंपरमशोभनम् । विख्यातं त्रिषुलोकेषुपितॄणामृणमोचनम्

तत्र स्नात्वा विधानेन सन्तर्प्य पितृदेवताः ।
मनुष्यश्च नृपश्रेष्ठ! दानं दत्त्वाऽनृणो भवेत् ॥ २ ॥
इच्छन्ति पितरः सर्वे स्वार्थहेतो सुतं यतः ।
पुन्नाम्नो नरकात्पुत्रोऽस्मानयं मोचयिष्यति ॥ ३ ॥

पिण्डदानं जलं तात ऋणमुत्तममुच्यते । पितॄणां तद्धि वै प्रोक्तमृणं दैवमतः परम्
अग्निहोत्रं तथा यज्ञाः पशुबन्धास्तथेष्टयः । इति देवऋणं प्रोक्तं शृणुमानुष्यकंततः
ब्राह्मणेषु च तीर्थेषु देवायतनकर्मसु । प्रतिश्रुत्य ददेत्तत्तद्व्यवहारः कृतो यथा ॥
ऋणत्रयमिदंप्रोक्तं पुत्राणांधर्मनन्दन !। सत्पुत्रास्ते तु राजेन्द्र! स्नातायऋणमोचने

ऋणत्रयाद्विमुच्यन्ते ह्यपुत्राः पुत्रिणस्तथा ।
तस्मात्तीर्थवरम्प्राप्य पुत्रेण नियतात्मना ॥
पितृभ्यस्तर्पणं कार्यं पिण्डदानं विशेषतः ॥ ८ ॥

तत्र तीर्थे हुतं दत्तं गुरवस्तोषिता यदि । मृतानां सप्त जन्मानि फलमक्षयमश्नुते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे ऋणमोचनतीर्थमाहात्म्यवर्णनं नामाष्टोत्तरद्विशततमोऽध्यायः ॥

नवाधिकद्विशततमोऽध्यायः

भारभूतितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं पार्थ पुष्कलीतीर्थमुत्तमम् । तत्र तीर्थेनरःस्नात्वाह्यश्वमेधफलंलभेत्

क्षमानाथ! ततो गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ।

देवदानवगन्धर्वैरप्सरोभिश्च सेवितम् ॥ २ ॥

तत्र तिष्ठति देवेशः साक्षाद्रुद्रोमहेश्वरः । भारेणमहताजातो भारभूतिरितिस्मृतः

युधिष्ठिर उवाच

भारभूतीति विख्यातं तीर्थं सर्वगुणान्वितम् ।

श्रोतुमिच्छामि विप्रेन्द्र! परं कौतूहलं हि मे ॥ ४ ॥

श्रीमार्कण्डेय उवाच

भारभूतिसमुत्पत्तिं शृणु पाण्डवसत्तम !। विस्तरेण यथाप्रोक्ता पुरादेवेनशम्भुना

आसीत्कृतयुगेविप्रो वेदवेदाङ्गपारगः । विष्णुशर्मेतिविख्यातःसर्वशास्त्रार्थपारगः

क्षमा दमो दया दानं सत्यं शौचं धृतिस्तथा ।

विद्याविज्ञानमास्तिक्यं सर्वं तस्मिन्प्रतिष्ठितम् ॥ ७ ॥

ईदृग्गुणा हि ये विप्रा भवन्ति नृपसत्तम । पतितान्नरकेघोरेतारयन्तिपितॄंस्तुते

इन्द्रियैर्लोलुपा विप्रा ये भवन्तिनृपोत्तम । पतन्ति नरके घोरे रौरवे पापमोहिताः

ये क्षान्तदान्ताः श्रुतिपूर्णकर्णा जितेन्द्रियाः प्राणिवधान्निवृत्ताः ।

प्रतिग्रहे सङ्कुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ १० ॥

एवं गुणगणाकीर्णोब्राह्मणोनर्मदातटे । वसते ब्राह्मणैःसार्धं शिलोञ्छवृत्तिजीवनः

तादृशंब्राह्मणंज्ञात्वादेवदेवोमहेश्वरः । द्विजरूपधरोभूत्वा तस्याश्रममगात्स्वयम्

दृष्ट्वा तं ब्राह्मणैः सार्धमुच्चरन्तं पदक्रमम् ।

अभिवादयते विप्रं स्वागतेन च पूजितः ॥ १३ ॥

प्रोवाच तं मुहूर्त्तेन ब्राह्मणो विस्मयान्वितः ।

किमर्थं तद्बटो! ब्रूहि किं करोमि तवेप्सितम् ॥ १४ ॥

बटुरुवाच

विद्यार्थिनमनुप्राप्तंविद्धिमांद्विजसत्तम । ददासियदिमेविद्यांततः स्थास्यामितेगृहे

ब्राह्मण उवाच

सर्वेषामेव विप्राणां बटो! त्वं गोत्र उत्तमे ।

दानानां परमं दानं कथं विद्या च दीयते ॥ १६ ॥

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा । अथवा विद्यया विद्या भवतीह फलप्रदा

बटुरुवाच

यथान्ये बालकाः स्नाताः शुश्रूषन्ति ह्यहर्निशम् ।

तथाऽहं बटुभिः सार्धं शुश्रूषामि न संशयः ॥ १८ ॥

तथेति चोक्त्वा विप्रेन्द्रः पाठयंस्तं दिने दिने ।

वर्त्तते सह शिष्यैः स शिलोञ्छानुपहारयन् ॥ १९ ॥

ततः कतिपयाहोभिः प्रोक्तोबटुभिरीश्वरः । पचनाद्यं बटो कर्म कुरु क्रमतआगतम्

तथेतिचोक्तोदेवेशो भारग्राममुपागतः । ध्यात्वावनस्पतीःसर्वाः इदंवचनमब्रवीत्

यावदागच्छते विप्रो बटुभिः सह मन्दिरम् ।

अदर्शनाभिः कर्त्तव्यं तावदन्नं सुसंस्कृतम् ॥ २२ ॥

एवमुक्त्वा तु ताः सर्वा विश्वरूपो महेश्वरः । क्रीडनार्थंगतस्तत्रबटुवेषधरः पृथक्

दृष्ट्वा समागतं तत्र बटुवेषधरं पृथक् । धिक्त्वां च परुषंवाक्यमूचुस्तेगिरिसन्निधौ

क्षुत्क्षामकण्ठाः सर्वे च गत्वा तु किल मन्दिरम् ।

त्वया सिद्धेन चाऽन्नेन तृप्तिं यास्यामहे वयम् ॥ २५ ॥

तद्वृथा चिन्तितं सर्वं त्वयागत्य कृतं द्विज !।

मिथ्याप्रतिज्ञेन सता दुरनुष्ठितमद्य ते ॥ २६ ॥

बटुरुवाच

सन्तापमनुतापं वाभोजनार्थंद्विजर्षभाः। माकुरुध्वंयथान्यायं सिद्धेऽन्नेगृहमेष्यथ

बटुरुवाच

दिनशेषेण चास्माकं पञ्चतां च दिनेदिने। निष्पत्तियातिवानेतितदसिद्धमशेषतः

असिद्धं सिद्धमस्माकं यत्त्वया समुदाहृतम्।

दृष्ट्वाऽनृतं गतास्तत्र त्वां बद्ध्वाऽम्भसि निक्षिपे ॥ २६ ॥

बटुरुवाच

भोभो श्रणुद्ध्वं सर्वेऽत्र सोपाध्याया द्विजोत्तमाः।

प्रतिज्ञां मम दुर्द्धर्षां यां श्रुत्वा विस्मयो भवेत् ॥ ३० ॥

यदि सिद्धमिदं सर्वमन्नं स्यादाश्रमे गुरोः।

यूयं बध्वा मया सर्वे क्षेप्तव्या नर्मदाम्भसि ॥ ३१ ॥

अथवाऽन्नं न सिद्धं स्याद्भवद्भिर्दृढबन्धनैः।

गुरोस्तु पश्यतो बध्वा क्षेप्तव्योऽहं नर्मदाह्रदे ॥ ३२ ॥

तथेति कृत्वा ते सर्वेसमयं गुरुसन्निधौ। स्नात्वाजाप्यविधानेन भूतग्रामंततोययुः

दृष्ट्वातेविस्मयंजग्मुर्विस्तृते भक्ष्यभोजने। षड्रसेननृपश्रेष्ठ भुक्त्वा हुत्वापृथक्पृथक्

ततः प्रोवाच वचनं हृष्टपुष्टो द्विजोत्तमः। वरदोऽस्मि वरंवत्स! वृणु यत्तव रोचते

साङ्गोपाङ्गास्तु ते वेदा शास्त्राणि विविधानि च।

प्रतिभास्यन्ति ते विप्र! मदीयोऽस्तु वरस्त्वयम् ॥ ३५ ॥

प्रणम्य बटुभिः सार्धं स चिक्रीड यथासुखम्।

द्वितीये तु ततः प्राप्ते दिवसे नर्मदाजले ॥ ३७ ॥

क्रीडनार्थं गताः सर्वे सोपाध्याया युधिष्ठिर!।

ततः स्मृत्वा पणं सर्वे भाषयित्वा विधानतः ॥ ३८ ॥

उपाध्यायमथोवाच नत्वा देवः कृताञ्जलिः।

जले प्रक्षेपयाम्यद्य निष्प्रतिज्ञान्बटून्प्रभो ॥ ३६ ॥

तद्देवस्य वचःश्रुत्वा नष्टास्तेबटवो नृप। गुरोस्तुपश्यतोराजन्धावमानादिशोदश

वायुवेगेन देवेन लुञ्चितास्तेसमन्ततः। भारं बध्वा तु सर्वेषां बटूनाञ्च नरेश्वर ॥

शापानुग्रहको देवोऽक्षिपत्तोये यथा गृहे। ततोविषादमगमद्दृष्ट्वा तान्नर्मदाजले ॥

गुरुणा बटुरुक्तोऽथ किमेतत्साहसंकृतम्। एतेषां मातृपितरोबालकानांगृहेऽङ्गनाः

यदि पृच्छन्ति ते बालान्कगतान्कथयाम्यहम्।

एवं स्थिते महाभाग यदि कश्चिन्मरिष्यति ॥ ४४ ॥

तदा स्वकीयजीवेन त्वं योजयितुमर्हसि। मृतेषु तेषु विप्रेषु न जीवेनिश्चयो मृतः

ब्रह्महत्याश्च ते बह्वयो भविष्यन्तिमृतेमयि। द्विजबन्धनमात्रेण नरकोभवतिध्रुवम्

मरणाद्यां गतिं यासि न तां वेद्मि द्विजाधम !।

एवमुक्तः स्मितं कृत्वा देवदेवो महेश्वरः ॥ ४७ ॥

भारभूतेश्वरे तीर्थे उज्जहार जलाद् द्विजान्।

मुक्त्वा भारं तु देवेन च्छादयित्वा तु तान्द्विजान् ॥ ४८ ॥

लिङ्गं प्रतिष्ठितं तत्र भारभूतेति विश्रुतम्।

मृतांस्तान्वै द्विजान्दृष्ट्वा ब्रह्महत्या निराकृता ॥ ४६ ॥

गतानिपञ्चवैदृष्ट्वाब्रह्महत्याशतानिवै। ततः स विस्मयाविष्टोदृष्ट्वातान्बालकान्गुरुः

नाऽन्यस्य कस्यचिच्छक्तिरेवं स्यादीश्वरं विना।

ज्ञात्वा तं देवदेवेशं प्रणाममकरोद् द्विजः ॥ ५१ ॥

अज्ञानेन मया सर्वं यदुक्तं परमेश्वर !। अप्रियं यत्कृतं सर्वं क्षन्तव्यं तन्मम प्रभो !॥

देव उवाच

भगवन्गुरुर्भवान्देवो भवान्मम पितामहः।

वेदगर्भ! नमस्तेऽस्तु नास्ति कश्चिद्व्यतिक्रमः ॥ ५३ ॥

जनिता चोपनेता च यस्तु विद्यां प्रयच्छति।

अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ ५४ ॥

एवमुक्त्वा जगन्नाथो विष्णुशर्माणमानतः।

तत्र तीर्थे जगामाऽऽशु कैलासं धरणीधरम् ॥ ५५ ॥

तदाप्रभृतितत्तीर्थं भारभूतीति विश्रुतम् । विख्यातंसर्वलोकेषु महापातकनाशनम्
तत तीर्थे पुनर्वृत्तमितिहासं ब्रवीमिते । सर्वपापहरं दिव्यमेकाग्रस्त्वंश्रृणुष्व तत्

पुरा कृतयुगस्यादौ वैश्यः कश्चिन्महामनाः ।
सुकेश इति विख्यातस्तस्य पुत्रोऽतिधार्मिकः ॥ ५८ ॥

सोमशर्मेतिविख्यातोमृतःपृथुललोचनः । स सखायंवणिक्पुत्रंकञ्चिच्चक्रेदरिद्रिणम्
सहदेवमितिख्यातं सर्वकर्मसुकोविदम् । एकदा तु समन्तेन व्यवहारमचिन्तयत् ॥
सखे समुद्रयानेन गच्छावोत्तरणैःशुभैः । भाण्डं बहु समादाय मदीये द्रव्यसाधने

परं तीरं गमिष्याव उत्कर्षस्त्वावयोः समः ।
इति तौ मन्त्रयित्वा तु मन्त्रवत्समभीप्सितम् ॥ ६२ ॥

सर्वं प्रयाणकं गृह्य ह्यारूढौ लवणोदधिम् । तौगत्वातुपरंभाण्डंविक्रीयपुरतस्तदा
प्राप्तौबहुसुवर्णंचरत्नानिविविधानि च । नावंतांसङ्गतांकृत्वा पश्चात्तावारुरोहतुः
नावमन्तर्जलेदृष्ट्वा निशीथेस्वर्णसम्भृताम् । दृष्ट्वातुसोमशर्माणमुत्सङ्गेकृतमस्तकम्
शयानमतिविश्वस्तंसहदेवोव्यचिन्तयत् । एषनिद्रावशंयातोमयिप्राणान्निधाय वै
अस्याधीनमिदं सर्वं द्रव्यरत्नमशेषतः । उत्कर्षार्द्धं तु मे दद्यात्तत्र गत्वेति वा नवा
इति निश्चित्य मनसा पापस्तंलवणोदधौ । चिक्षेपसोमशर्माणं पापध्यातेनचेतसा

उत्तीर्य तरणात्तस्माद्गत्वा संगृह्य तद्धनम् ।
ततः कतिपयाहोभिः संयुक्तः कालधर्मणा ॥ ६६ ॥

गतो यमपुरं घोरं गृहीतो यमकिङ्करैः । स नीतस्तेनमार्गेण यत्र सन्तपते रविः ॥

कृत्वा द्वादशधात्मानं सम्प्राप्ते प्रलये यथा ।
सुतीक्ष्णाः कण्टका यत्र यत्र श्वानः सुदारुणाः ॥ ७१ ॥
तीक्ष्णदंष्ट्रा महाव्याला व्याघ्रा यत्र महावृकाः ।
सुतप्ता वालुका यत्र क्षुधा तृष्णा तमो महत् ॥ ७२ ॥
पानीयस्य कथा नास्ति न च्छाया नाऽऽश्रमं क्वचित् ।

अन्नं पानीयसहितं यावत्तद्दीयते विषम् ॥ ७३ ॥

छायां सम्प्रार्थमानानांभृशं ज्वलतिपावकः । तैर्दह्यमानाबहुशोविलपन्तिमुहुर्मुहुः

हाभ्रातर्मातः पुत्रेति पतन्ति पथि मूर्च्छिताः ।
इत्थंभूतेन मार्गेण स नीतो यमकिङ्करैः ॥ ७५ ॥

यत्र तिष्ठति देवेशः प्रजासंयमनोयमः । ते द्वारदेशे तंमुक्त्वाऽऽचचक्षुर्यमकिङ्कराः

बद्ध्वा तं गलपाशेन ह्यासीनं मित्रघातिनम् ।
अवधारय देवेश! बुध्यस्व यदनन्तरम् ॥ ७७ ॥

यम उवाच

न तु पूर्वं मुखं दृष्टं मया विश्वासघातिनाम् ।
ये मित्रद्रोहिणः पापास्तेषां किं शासनं भवेत् ॥ ७८ ॥
ऋषयोऽत्र विचारार्थं नियुक्ता निपुणाः स्थिताः ।
ते यत्र ब्रुवते तत्र क्षिपध्वं मा विचार्यताम् ॥ ७९ ॥

इत्युक्तास्तेतमादायकिङ्कराःशीघ्रगामिनः । मुनीशांस्तत्रतानूचुस्तंनिवेद्ययमाज्ञया

द्विजा अनेन मित्रं स्वं प्रसुप्तंनिशि घातितम् ।
विश्वस्तं धनलोभेन को दण्डोऽस्य भविष्यति ॥ ८१ ॥

अदृष्टपूर्वमस्माभिर्वदनंमित्रघातिनाम् । कृत्वापटान्तरेह्येनंश्रृणवन्तु गतिमस्यताम्
तेशास्त्राणि विचार्याथ ऋषयश्चपरस्परम् । आहूय यमदूतांस्तानूचुर्ब्राह्मणपुङ्गवाः

आलोकितानि शास्त्राणि वेदाः साङ्गाः स्मृतीरपि ।
पुराणानि च मीमांसा दृष्टमस्माभिरत्र च ॥ ८४ ॥
ब्रह्मघ्ने च सुरापे च स्तेये गुर्वङ्गनागमे ।
निष्कृतिर्विहिता शास्त्रे कृतघ्ने नाऽस्ति निष्कृतिः ॥ ८५ ॥
ये स्त्रीघ्नाश्च गुरुघ्नाश्च ये बालब्रह्मघातिनः ।
विहिता निष्कृतिः शास्त्रे कृतघ्ने नाऽस्ति निष्कृतिः ॥ ८६ ॥

वापीकूपतडागानां भेत्तारोयेचपापिनः । उद्यानवाटिकानां चछेत्तारोयेचदुर्जनाः

दावाग्निदाहका ये च सततं येऽसुहिंसकाः ।
न्यासापहारिणो ये च गरदाः स्वामिवञ्चकाः ॥ ८८ ॥
मातापितृगुरूणां चत्यागिनोदोषदायिनः । स्वभर्तृवञ्चनपरायास्त्रीगर्भप्रघातिनी
विवेकरहिता या स्त्री याऽस्नाता भोजने रता ।
द्विकालभोजनरतास्तथा वैष्णववासरे ॥ ९० ॥
तासां स्त्रीणां गतिर्दृष्टा न तु विश्वासघातिनाम् ।
विश्वासघातिनां पुंसां मित्रद्रोहकृतां तथा ॥ ९१ ॥
तेषां गतिर्न वेदेषु पुराणेषु च का कथा । इति स्थितेषु पापेषु गतिरेषांन विद्यते
नाऽन्या गतिर्मित्रहनने विश्वस्तघ्ने च नः श्रुतम् ।
इतो नीत्वा यमदूता एनं विश्वस्तघातिनम् ॥ ९३ ॥
कल्पकोटिशतं साग्रं पर्यायेणपृथक्पृथक् । नरकेषुच सर्वेषुत्रिंशत्कोटिषु संख्यया
क्षिप्यतामेष मित्रघ्नो विचारो मा विधीयताम् ।
इति ते वचनं श्रुत्वा किङ्करास्तं निगृह्य च ॥ ९५ ॥
यत्र ते नरका घोरास्तत्रक्षेप्तुं गतास्ततः । तेतमादाय हि नरके घोरे रौरवसंज्ञिते
चिक्षिपुस्तत्र पापिष्ठं क्षिप्ते रावोऽभवन्महान् ।
नरकस्थितभूतेषु मोक्तव्यो नैव पापकृत् ॥ ९७ ॥
अस्य संस्पर्शनादेव पीडा शतगुणा भवेत् ।
यथा व्यथासिकाष्ठैश्च समिद्धैर्दहनात्मकैः ॥ ९८ ॥
भवति स्पर्शनात्तस्य किमेतेनकृतामलम् । यथादुर्जनसंसर्गात्सुजनोयातिलाघवम्
सन्निधानात्तथास्याऽऽशु क्षते क्षारावसेचनम् ।
प्रसादः क्रियतामाशु नीयतां नरकेऽन्यतः ॥ १०० ॥
देवमुक्तास्ततस्तैस्तु गतास्तेत्वशुचिंप्रति । तत्रतेनारकाः सन्तिपूर्वधत्तेऽपिचुक्रुशुः
एवं ते किङ्कराः सर्वेऽपर्यटन्नरकमण्डले ।
नरकेऽपि स्थितिस्तस्य नास्ति पापस्य दुर्मतेः ॥ १०२ ॥

यदा यदा तु ते सर्वे तं गृह्य यमसन्निधौ । गत्वा निवेद्य तत्सर्वं यदुक्तं नारकैर्नरैः
नरके न स्थितिर्यस्य तस्य किं क्रियतां वद ॥ १०३ ॥

यम उवाच

पापिष्ठ एष वै यातु योनिं तिर्यङ्निषेविताम् ।
कालं मुनिभिरुद्दिष्टः तीर्यग्योनिं प्रवेश्यताम् ॥ १०४ ॥
एवमुक्तेतु वचने प्रजासंयमनेन च । स गतः कृमितां पापो विष्ठासु च पृथक्पृथक्
ततोऽसौ दंशमशकान्पिपीलिकसमुद्भवान् ।
यूकामत्कुणकाद्यांश्च गत्वा पक्षित्वमागतः ॥ १०६ ॥
स्थावरत्वं गतः पश्चात्पाषाणत्वं ततःपरम् । सरीसृपानजगरवराहमृगहस्तिनः ॥
वृकश्वानखरोष्ट्रांश्च शूकरीं ग्रामजातिकाम् ।
योनिमाश्वतरीं प्राप्य तथा महिषसम्भवाम् ॥ १०८ ॥
एताश्चान्याश्चबह्वीर्वै प्रापयोनीःक्रमेणवै । सता योनीरनुप्राप्य धुर्योऽभूद्भारवाहकः
सगृहे पार्थिवेशस्यधार्मिकस्ययशस्विनः । सदृष्ट्वा कार्त्तिकींप्राप्तामेकदानृपसत्तमः
पुरोहितं समाहूय ब्राह्मणांश्चतथाबहून् । न गृहे कार्त्तिकीं कुर्यादेतन्मेबहुशःश्रुतम्
समेता कुत्र यास्याम इति ब्रूत द्विजोत्तमाः ।
यो गृहे कार्त्तिकीं कुर्यात्स्नानदानादिवर्जितः ॥ ११२ ॥
सम्वत्सरकृतात्पुण्यात्स बहिर्भवति श्रुतिः ।
तस्मात्सर्वप्रयत्नेन तीर्थं सर्वगुणान्वितम् ॥ ११३ ॥
सहितास्तत्र गच्छामःस्नातुं दातुं चशक्तितः । एवमुक्तेतुवचने पार्थिवेनद्विजोत्तमाः
ऊचुः श्रेष्ठं नृपश्रेष्ठ! रेवाया उत्तरे तटे । भारेश्वरेति विख्यातं मुक्तितीर्थंनृपोत्तम
तत्र यामो वयं सर्वे सर्वपापक्षयावहम् । एवमुक्तः सनृपतिर्गृहीत्वा प्रचुरं वसु ॥
शकटं सम्भृतं कृत्वा तत्र युक्तः सधूर्वहः । यः कृत्वा मित्रहननं गोयोनिंसमुपागतः
इत्थं स नर्मदातीरे सम्प्राप्तस्तीर्थमुत्तमम् । गत्वा चतुर्द्दशीदिने ह्युपवासकृतक्षणः
गत्वा स नर्मदातीरे नाम रुद्रेत्यनुस्मरन् । शुचिप्रदेशाच्च मृदंमन्त्रेणाऽनेनगृह्यताम्

उद्धृताऽसि वराहेण रुद्रेण शतबाहुना । अहमप्युद्धरिष्यामि प्रजया बन्धनेन च

स एवं तां मृदं नीत्वा मुक्त्वा तीरे तथोत्तरे ।

ददर्श भास्करं पश्चान्मन्त्रेणाऽनेन चाऽऽलभेत् ॥ १२१ ॥

अश्वक्रान्तेरथक्रान्ते विष्णुक्रान्तेवसुन्धरे । मृत्तिकेहरमे पापंजन्मकोटिशतार्जितम्

तत एवं विगाह्यापो मन्त्रमेतमुदीरयेत् । त्वंनर्मदे पुण्यजले तवाम्भः शङ्करोद्भवम् ॥

स्नानं प्रकुर्वतो मेऽद्य पापं हरतु चाऽर्जितम् ।

स स्नात्वाऽनेन विधिना सन्तर्प्य पितृदेवताः ॥ १२४ ॥

ययौ देवालयं पश्चादुपहारैः समन्वितः ।

भक्त्या सञ्चिन्त्य सान्निध्ये शङ्करं लोकशङ्करम् ॥ १२५ ॥

पुराणोक्तविधानेन पूजां समुपचक्रमे । पूजाचतुष्टयं देवि! शिवरात्र्यां निगद्यते ॥

संस्नाप्य प्रथमं यामे पञ्चगव्येन शङ्करम् । घृतेन पूरणं पश्चात्कृतं नृपवरेण तु ॥

धूपदापौनिवेद्याद्यं संकल्प्य च यथाविधि । अर्घ्येणानेन देवेशंमन्त्रेणानेन शङ्करम्

नमस्ते देवदेवेश शम्भो परमकारण ! । गृहाणार्घमिमं देव संसारार्णवमपाकुरु ॥

वित्तानुरूपतो दत्तं सुवर्णं मन्त्रकल्पितम् । अग्निर्हिदेवाः सर्वे सुवर्णं च हुताशनम्

अतः सुवर्णदानेन प्रीताः स्युः सर्वदेवताः । तदर्थंसर्वदा दातुः प्रीतोभवतु शङ्करः

अनेन विधिना तेन पूजितःप्रथमेशिवः । यामे द्वितीये तु पुनः पूर्वोक्तविधिनाचरेत्

स्नापयामासदुग्धेनगव्येनत्रिपुरान्तकम् । तन्दुलैःपूरणंपश्चात्कृतं लिङ्गस्यशूलिनः

कृत्वा विधानं पूर्वोक्तं दत्तं वस्त्रयुगं सितम् ।

श्वेतवस्त्रयुगं यस्माच्छङ्करस्याऽतिवल्लभम् ॥ १३४ ॥

प्रीतो भवति वैशम्भुर्दत्तेन श्वेतवाससा । यामं तृतीयं सम्प्राप्तं दृष्ट्वा नृपतिसत्तमः

देवंसंस्नाप्यमधुनापूरणं चक्रिवांस्तिलैः । तिलद्रोणप्रदानं चकुर्यान्मन्त्रमुदीरयन्

तिलाः श्वेतास्तिलाः कृष्णाः सर्वपापहरास्तिलाः ।

तिलद्रोणप्रदानेन संसारश्छिद्यतां मम ॥ १३७ ॥

अनेन विधिनाराजा यामिनीयामपूजनम् । अतिवाह्यविनोदेन ब्रह्मघोषेणजागरम्

चकार पूजनं शम्भोर्बहुपुण्यप्रसाधकम् ।

ये जागरे त्रिनेत्रस्य शिवरात्र्यां शिवस्थिताः ॥ १३९ ॥

ते यां गतिं गताः पार्थ! न तां गच्छन्ति यज्विनः ।

पापानि यानि कानि स्युः कोटिजन्मार्जितान्यपि ॥ १४० ॥

हरकेशवयोः स्नान्ति जागरे यान्ति संक्षयम् ।

यावन्तो निमिषा नृणां भवन्ति निशि जाग्रताम् ॥ १४१ ॥

निमिषेनिमिषे राजन्नश्वमेधफलं ध्रुवम् । उपवासपराणां च देवायतनवासिनाम्

शृण्वतां धर्ममाख्यानं ध्यायतांहरकेशवौ । न तां बहुसुवर्णेन क्रतुनागतिमाप्नुयुः

शिवरात्रिस्तिथिःपुण्याकार्त्तिकीच विशेषतः । रेवायाउत्तरंकूलंतीरंभारेश्वरेतिच

जागृतश्चातिदुःखेन कथंपापंनहास्यति । इत्थंसजागरं कृत्वा शिवरात्र्यांनरेश्वरः

प्रभाते विमलेगत्वा नर्मदातीरमुत्तमम् । स्नापितास्तेन ते सर्वेवाहनानिगजादयः

यैस्तु वाहैर्गतस्तीर्थं स्नातोऽहं स्नापयामि तान् ।

तत्र मध्यस्थितः स्नातस्तिर्यक्त्वान्निर्गतो वणिक् ॥ १४७ ॥

दानंददौतानुदिश्य किंचिच्छक्त्यनुरूपतः । तेन वाहकृताद्दोषान्मुक्तोभवतिमानवः

अन्यथाऽसौ कुतो लाभः कुतो व्रजति तान्प्रति ।

संस्नाप्य तं ततो राजा स्वयं स्नात्वा विधानतः ॥ १४९ ॥

संतर्प्य पितृदेवांश्च कृत्वा श्राद्धं यथाविधि ।

कृत्वा पिण्डान्पितृभ्यश्च वृषमुत्सृज्य लक्षणम् ॥ १५० ॥

गत्वा देवालयं पश्चाद्देवं तीर्थोदकेनच । संस्नाप्य पञ्चगव्येनततः पञ्चामृतेन च

सर्वौषधिजलेनैव ततः शुद्धोदकेन च । चन्दनेन सुगन्धेन समालभ्य च शङ्करम् ॥

कुङ्कुमैश्च सकर्पूरैर्गन्धैश्चविविधैस्तथा । पुष्पैर्धूपैश्च सुगन्धाढ्यैश्चतुर्थंलिङ्गपूरणम्

कृतं नृपवरेणाऽत्र कुर्वता पूर्वकं विधिम् । गोदानं चकृतं पश्चाद्विधिदृष्टेनकर्मणा

धेनुके रुद्ररूपाऽसि रुद्रेण परिनिर्मिता । अस्मिन्नगाधे संसारे पतन्तं मां समुद्धर

धेनुं स्वलंकृतां दद्यादनेन विधिनाततः । क्षमाप्य देवदेवेशं ब्राह्मणान्भोजयेद्बहून्

षड्विधैर्भोजनैर्भक्ष्यैर्वासोभिस्तान्समर्चयेत् ।
दक्षिणाभिर्विचित्राभिः पूजयित्वा क्षमापयेत् ॥ १५७ ॥
सस्वयं बुभुजे पश्चात्परिवारसमन्वितः । तामेव रजनींतत्र न्यवसज्जगतीपतिः
तस्य तत्रोषितस्यैवं निशीथेऽथ नरेश्वर !।
आकाशे सोऽति शुश्राव दिव्यवाणीसमीरितम् ॥ १५९ ॥

वागुवाच

राजन्समन्ततो लोके फलं भवति साम्प्रतम् ।
संसारसागरे ह्यत्र पतितानां दुरात्मनाम् ॥ १६० ॥
यदि सन्निधिमात्रेण फलंतत्रोच्यतेकथम् । यदिशन्तनुवंशस्य तत्रोन्मादकरंभवेत्
य एष त्वद्गृहे वोढा ह्यतिभारधुरंधरः । अनेन मित्रहननं पापं विश्वासघातनम्
कृतं जन्मसहस्राणामतीते परिजन्मनि ।
गतेन पाप्मनाऽऽत्मानं नरकेषु च संस्थितिः ॥ १६३ ॥
ततो योनिसहस्रेषु गतिस्तिर्यक्षु चैवहि । गोयोनिं समनुप्राप्तस्त्वद्गृहेससुदुर्मतिः
स्नापितश्च त्वया तीर्थे ह्यस्मिन्पर्वसमागमे ।
दृष्ट्वा पूजां त्वया क्लृप्तां कृता जागरणक्रिया ॥ १६५ ॥
तेन निष्कल्मषो जातो मुक्त्वा देहं तवाऽग्रतः ।
स्वर्गं प्रति विमानस्थः सोऽद्य राजन्गमिष्यति ॥ १६६ ॥

श्रीमार्कण्डेय उवाच

एवमुक्ते निपतितो धुर्यः प्राणैर्व्ययुज्यत । विमानवरमारूढस्तत्क्षणात्समदृश्यत
स तं प्रणम्य राजेन्द्रमुवाच प्रहसन्निव ॥ १६८ ॥

वृष उवाच

भोभो नृपवरश्रेष्ठतीर्थमाहात्म्यमुत्तमम् । यत्रचाऽस्मद्विधस्तीर्थे मुच्यतेपातकैर्नरः
मया ज्ञातमशेषेण मत्समो नाऽस्ति पातकी ॥ १६९ ॥
अतः परं किं तु कुर्यां परं तीर्थाऽनुकीर्त्तनम् ।

भवान्माता भवान्भ्राता भवांश्चैव पितामहः ॥ १७० ॥
क्षन्तव्यं प्रणतोऽस्म्यद्य यस्मिंस्तीर्थे हि मादृशाः ।
गतिमीदृग्विधां यान्ति न जाने तव का गतिः ॥ १७१ ॥
समाराध्य महेशानं संपूज्यचयथाविधि । कागतिस्तव संभाष्यादेह्यनुज्ञांममप्रभो
त्वरयन्ति च मां ह्येते दिविस्थाः प्रणयाद्गणाः ।
स्वस्त्यस्तु ते गमिष्यामीत्युक्त्वा सोऽन्तर्दधे क्षणात् ॥ १७३ ॥

श्रीमार्कण्डेय उवाच

गतेचाऽदर्शनंतत्र सराजाविस्मयान्वितः । तीर्थमाहात्म्यमतुलं वर्णयन्स्वपुरंगतः
इत्थं भूतं हि तत्तीर्थं नर्मदायां व्यवस्थितम् ।
सर्वपापक्षयकरं सर्वदुःखघ्नमुत्तमम् ॥ १७५ ॥
उपपापानि नश्यन्तिस्नानमात्रेणभारत !। कार्त्तिकस्यचतुर्द्दश्यामुपवासपरायणः
चतुर्द्धा पूरयेल्लिङ्गं तस्य पुण्यफलं शृणु । ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः
महापापानि चत्वारि चतुर्भिर्यान्ति संक्षयम् ।
सोऽश्वमेधस्य यज्ञस्य लभते फलमुत्तमम् ॥ १७८ ॥
कार्त्तिकेशुक्लपक्षस्य चतुर्द्दश्यामुपोषितः । स्वर्णदानाच्च तत्तीर्थे यज्ञस्यलभतेफलम्
अष्टम्यां वा चतुर्द्दश्यां वैशाखे मासि पूर्ववत् ।
दीपं पिष्टमयं कृत्वा पितॄन्सर्वान्विमोक्षयेत् ॥ १८० ॥
तत्र यद्दीयते दानमपि वालाग्रमात्रकम् । तदक्षयफलं सर्वमेवमाह महेश्वरः ॥ १८१
भारभूत्यां मृतानां तु नराणां भावितात्मनाम् ।
अनिवर्त्तिका गती राजञ्छिवलोकान्निरन्तरम् ॥ १८२ ॥
अथवा लोकवृत्त्यर्थं मर्त्यलोकं जिगीषति । साङ्गवेदज्ञविप्राणांजायते विमलेकुले
धनधान्यसमायुक्तो वेदविद्यासमन्वितः ।
सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ १८४ ॥
पुनस्तत्तीर्थमासाद्य ह्यक्षयं पदमाप्नुयात् ॥ १८५ ॥

एतत्पुण्यं पापहरं कथितं ते नृपोत्तम !। भारतेदं महाख्यानं शृणुष्वैव ततः परम् ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे भारभूतितीर्थमाहात्म्यवर्णनंनाम नवाधिकद्विशततमोऽध्यायः ॥

दशाधिकद्विशततमोऽध्यायः

पुङ्खिलतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

तस्यैवानन्तरं तात! पुङ्खिलं तीर्थमुत्तमम् । तत्रतीर्थेपुरा पुङ्खःपार्थसिद्धिमुपागतः
जामदग्न्यो महातेजाःक्षत्रियांतकरःप्रभुः । तपःकृत्वा सुविपुलं नर्मदोत्तरतीरभाक्
ततःप्रभृतिविख्यातंपुङ्खतीर्थं नरेश्वर । तत्र तीर्थे तु यः स्नात्वाह्याराध्यपरमेश्वरम्
इहलोके बलैर्युक्तः परे मोक्षमवाप्नुयात् ।
देवान्पितॄन्समभ्यर्च्य पितॄणामनृणी भवेत् ॥ ४ ॥
तत्र तीर्थे नरो यस्तु प्राणत्यागं करोति वै ।
अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ५ ॥
तत्र तीर्थे नरः स्नात्वा हयमेधफलं लभेत् ॥ ६ ॥
तत्र तीर्थे नरो यस्तु ब्राह्मणान्भोजयेन्नृप ।
एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिता ॥ ७ ॥
तत्र तीर्थे तुयः कश्चित्पूयेद्वृषभध्वजम् । वाजपेयस्ययज्ञस्य फलं प्राप्नोत्यसंशयम्

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे पुङ्खिलतीर्थमाहात्म्यवर्णनंनाम दशोत्तरद्विशततमोऽध्यायः ॥

एकादशाधिकद्विशततमोऽध्यायः

मुण्डितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

आश्चर्यभूतं लोकस्य देवदेवेन यत्कृतम् । तत्ते सर्वं प्रवक्ष्यामि नर्मदातटवासिनाम्
द्विजान्सुकृपणान्देवः कुष्ठीभूत्वा ययाचह । श्राद्धकालेतु संप्राप्ते रक्तगन्धानुलेपनः
स्रवद्बुद्बुदगात्रस्तु मक्षिकाकृमिसंवृतः । दुश्चर्मादुर्मुखो गन्धी प्रस्खलंश्चपदेपदे
ब्राह्मणावसथं गत्वा स्खलन्द्वारेऽब्रवीदिदम् ।
भोभो गृहपते! त्वद्य ब्राह्मणैः सह भोजनम् ॥ ४ ॥
त्वद्गृहे कर्तुमिच्छामि ह्येभिः सह सुसंस्कृतम् ।
ततस्तं ब्राह्मणं दृष्ट्वा यजमानसमन्विताः ॥ ५ ॥
स्रवन्तं सर्वगात्रेषु धिग्धिगित्येवमब्रुवन् ।
निर्गच्छस्वाऽऽशु दुर्गन्ध! गृहाच्छीघ्रं द्विजाधम !॥ ६ ॥
अभोज्यमेतत्सर्वेषां दर्शनात्तव सत्कृतम् । एवमेव तथेत्युक्त्वा देवदेवो महेश्वरः
जगामाऽऽकाशममलं दृश्यमानो द्विजोत्तमैः ।
गते चाऽदर्शनं देवे स्नात्वाऽभ्युक्ष्य समन्ततः ॥ ८ ॥
भुञ्जतेऽस्म द्विजा राजन्यावत्पात्रेपृथक्पृथक् । यत्रयत्र चपश्यन्तितत्रतत्रकृमिर्बहुः
दृष्ट्वा विस्मयमापन्नाः सर्वे किमिति चाऽब्रुवन् ।
ततः कश्चिदुवाचेदं ब्राह्मणो गुणवानजः ॥ १० ॥
योगीन्द्रः शङ्कया तत्र बहुविप्रसमागमे । योऽत्रपूर्वं समायातःसयोगीपरमेश्वरः ॥
तस्येदं क्रीडितं मन्ये भर्त्सितस्य विपाकजम् ।
फलं भवति नाऽन्यस्य ह्यतिथेः शास्त्रनिश्चयात् ॥ १२ ॥
सम्पूज्य परमात्मावै ह्यतिथिश्चविशेषतः । श्राद्धकालेतुसम्प्राप्तमतिथिंयोनपूजयेत्

पिशाचा राक्षसास्तस्य तद्विलुम्पन्त्यसंशयम् ।
रूपान्वितं विरूपं वा मलिनं मलिनाम्बरम् ॥ १४ ॥
योगीन्द्रं श्वपचश्च वाऽपि अतिथिं न विचारयेत् ।
तच्छ्रुत्वा वचनं तस्य यजमानपुरोगमाः ॥ १५ ॥
ब्राह्मणा द्विजमन्वेष्टुं धाविताः सर्वतोदिशम् ।
तावत्कथञ्चित्केनाऽपि गहनं वनमाश्रितः ॥ १६ ॥
दृष्टोदृष्टइतिप्रोक्तेतेन ते सर्वआगताः । ततःपश्यन्ति तं विप्रंस्थाणुवन्निश्चलंस्थितम्
नक्रन्दते नचलति स्पन्दते न चपश्यति । जल्पन्तिकरुणंकेचित्स्तुवन्तिचतथाऽपरे
वाग्भिः सततमिष्टाभिः स्तूयमानस्त्रिलोचनः ।
क्षुधार्दितानां देवेश! ब्राह्मणानां विशेषतः ॥
विनष्टमन्नं सर्वेषां पुनः संकर्तुमर्हसि ॥ १९ ॥
श्रुत्वा तुवचनं तेषां ब्राह्मणानां युधिष्ठिर । परयाकृपया देवः प्रसन्नस्तानुवाच ह
मया प्रसन्नेन महानुभावास्तदेव वोऽन्नं विहितं सुभ्रेव ।
भुञ्जन्तु विप्राः सह बन्धुभृत्यैरर्चन्तु नित्यं मम मण्डलं च ॥ २१ ॥
ततश्चायतनं पार्थ देवदेवस्य शूलिनः । मुण्डिनामेति विख्यातं सर्वपापहरं शुभम्
कार्तिक्यां तु विशेषेण गयातीर्थेन तत्समम् ॥ २२ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे मुण्डितीर्थमाहात्म्यवर्णनंनामैकादशोत्तरद्विशततमोऽध्यायः

द्वादशाधिकद्विशततमोऽध्यायः
एकशालडिण्डिमेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच
अथान्यत्यसंप्रवक्ष्यामि देवस्यचरितंमहत् । श्रुतमात्रेणयेनाऽऽशुसर्वपापैःप्रमुच्यते
भिक्षुरूपं परं कृत्वा देवदेवो महेश्वरः । एकशालां गतोग्रामं भिक्षार्थीक्षुत्पिपासितः
अक्षसूत्रोद्यतकरो भस्मगुण्ठितविग्रहः ।
स्फुरत्त्रिशूलो विश्वेशो जटाकुण्डलभूषितः ॥ ३ ॥
कृत्तिवासामहाकायो महाहिकृतभूषणः । वादयन्वै डमरुकं डिण्डिमप्रतिमंशुभम्
कपालपाणिर्भगवान्बालकैर्बहुभिर्वृतः ।
क्वचिद्गायन्हसंश्चैव नृत्यन्वादन्क्वचित्क्वचित् ॥ ५ ॥
यत्रयत्र गृहे देवो लीलयाडिण्डिमंन्यसेत् । भाराक्रान्तंगृहं पार्थ तत्रतत्रविनश्यति
एवं संप्रचरन्देवो वेष्टितो बहुभिर्जनैः । दृश्यादृश्येन रूपेण निर्जगामबहिः प्रभुः ॥
इतश्चेतश्च धावन्तं न पश्यन्ति यदा जनाः ।
विस्मितास्ते स्थिताः शम्भुर्भविष्यति ततोऽस्तुवन् ॥ ८ ॥
तेषां तु स्तुवतां भक्त्या शङ्करं जगतां पतिम् ।
डिण्डिरूपो हि भगवान्स्तदाऽसौ प्रत्यदृश्यत ॥ ९ ॥
तदाप्रभृति देवेशो डिण्डिमेश्वरउच्यते । दर्शनात्स्पर्शनाद्राजन्सर्वपापैः प्रमुच्यते
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्त्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे एकशालडिण्डिमेश्वरतीर्थमाहात्म्यवर्णनं नाम
द्वादशोत्तरद्विशततमोऽध्यायः ॥ २१२ ॥

त्रयोदशाधिकद्विशततमोऽध्यायः

आमलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

पुनरन्यत्प्रवक्ष्यामि देवस्य चरितं महत्। श्रुतमात्रेण येनैव सर्वपापैः प्रमुच्यते ॥
अबालो बालरूपेण ग्रामण्यैर्बालकैःसह । आमलैःक्रीडते शम्भुस्तत्तेवक्ष्यामिभारत

सर्वैस्तैरामलाः क्षिप्ता ये ते देवेन पाण्डव !।
आनीतास्तत्क्षणादेव ततः पश्चात्क्षिपेद्धरः ॥ ३ ॥
यावद्गत्वा दिशो दिग्भ्य आगच्छन्ति पृथक्पृथक् ।
तावत्तमामलं भूतं पश्यन्ति परमेश्वरम् ॥ ४ ॥

तृतीये चैव यत्कर्म देवदेवस्य श्रीमतः । स्थानानां परमं स्थानमामलेश्वरमुत्तमम्

तेन पूजितमात्रेण प्राप्यते परमं पदम् ॥ ६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे आमलेश्वरतीर्थमाहात्म्यवर्णनं नाम त्रयोदशोत्तरद्विशततमोऽध्यायः

चतुर्दशाधिकद्विशततमोऽध्यायः

श्रीकपालतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

चतुर्थं संप्रवक्ष्यामि देवस्य चरितंमहत् । श्रुतमात्रेण येनैवसर्वपापैः प्रमुच्यते ॥

कपाली कान्थिको भूत्वा यथा स व्यचरन्महीम् ।
पिशाचै राक्षसैर्भूतैर्डाकिनीयोगिनीवृतः ॥ २ ॥

भैरवं रूपमास्थाय प्रेतासनपरिग्रहः । त्रैलोक्यस्याऽभयं दत्त्वाचचार विपुलं तपः
आषाढीतु कृतातत्रह्याषाढीनामविश्रुतम् । कन्थामुक्ता ततोऽन्यत्रदेवेनपरमेष्ठिना
तदाप्रभृतिराजेन्द्र! स कन्थेश्वर उच्यते । तस्य दर्शनमात्रेण ह्यश्वमेधफलं लभेत् ॥
देवो मार्गे पुनस्तत्र भ्रमते चयदृच्छया । विक्रीणातिबलाकारो दृष्ट्वाचोक्तोहरेणतु
यदि भद्रन चेत्कोपं करोषिमयिसाम्प्रतम् । बलाभिर्भरमेलिङ्गं ददामिबहुते धनम्

एवमुक्तोऽथ देवेन स वणिग्लोभमोहितः ।
योजयामास बलका लिङ्गे चोत्तममध्यमान् ॥ ८ ॥
तावद्यावत्क्षयं सर्वे गताः काले सुसञ्चिताः ।
स्थितं समुन्नतं लिङ्गं दृष्ट्वा शोकमुपागतम् ॥ ९ ॥

कृत्वा तुखण्डखण्डानिस देवःपरमेश्वरः । उवाचप्रहसन्वाक्यं तंदृष्ट्वागतसाध्वसम्
नचमे पूरितं लिङ्गंयास्यामियदिमन्यसे । ददामि तत्रवित्तंतेयदि लिङ्गंप्रपूरितम्

वणिगुवाच

अधन्योकृतपुण्योऽहं निग्राह्यःपरमेश्वर । तवप्रियमकुर्वाणःशोचिष्येशाश्वतीःसमाः
एतच्छ्रुत्वावचस्तस्यवणिक्पुत्रस्य भारत । असंक्षयंधनं दत्त्वास्थितस्तत्रमहेश्वरः

तदा प्रभृति राजेन्द्र! बलाकैरिव भूषितम् ।
प्रत्ययार्थं स्थितं लिङ्गं लोकानुग्रहकाम्यया ॥ १४ ॥

देवेन रचितं पार्थक्रीडया सुप्रतिष्ठितम् । देवमार्गमिति ख्यातंत्रिषुलोकेषुविश्रुतम्

पश्यन्प्रपूजयन्वाऽपि सर्वपापैः प्रमुच्यते ॥ १५ ॥

देवमार्गे तुयो गत्वापूजयेद्बलाकेश्वरम् । पञ्चायतनमासाद्य रुद्रलोकं सगच्छति
देवमार्गे मृतानां तुनराणांभावितात्मनाम् । नभवेत्पुनरावृत्तीरुद्रलोकात्कदाचन

देवमार्गस्य माहात्म्यं भक्त्या श्रुत्वा नरोत्तम !।
मुच्यते सर्वपापेभ्यो नाऽत्र कार्या विचारणा ॥ १८ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीकपालतीर्थमाहात्म्यवर्णनंनाम चतुर्दशोत्तरद्विशततमोऽध्यायः॥

पञ्चदशाधिकद्विशततमोऽध्यायः

शृङ्गितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

शृङ्गितीर्थंततोगच्छेन्मोक्षदं सर्वदेहिनाम् । मृतानांतत्र राजेन्द्र मोक्षप्राप्तिर्नसंशयः
तत्रैव पिण्डदानेन पितृणामनृणोभवेत् । तेनपुण्येन पूतात्मा लभेद्गाणेश्वरींगतिम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे शृङ्गितीर्थमाहात्म्यवर्णनं नाम पञ्चदशोत्तरद्विशततमोऽध्यायः ॥

षोडशाधिकद्विशततमोऽध्यायः

अषाढीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

अषाढीतीर्थमागच्छेत्ततो भूपालनन्दन !। कामिकंरूपमास्थायस्थितोयत्रमहेश्वरः
चातुर्युगमिदं तीर्थंसर्वतीर्थेष्वनुत्तमम् । तत्रस्नात्वानरो राजन्रुद्रस्यानुचरोभवेत्
तत्र तीर्थे तु यः कश्चित्कुरुते प्राणमोक्षणम् ।
अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डेऽषाढीतीर्थमाहात्म्यवर्णनंनाम षोडशोत्तरद्विशततमोऽध्यायः ॥

सप्तदशाधिकद्विशततमोऽध्यायः

एरण्डीतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

एरण्डीसङ्गमं गच्छेत्सुरासुरनमस्कृतम् । तत्तु तीर्थं महापुण्यं महापातकनाशनम्
उपवासपरो भूत्वानियतेन्द्रियमानसः । तत्र स्नात्वाविधानेन मुच्यतेब्रह्महत्यया
तत्र तीर्थे तु यो भक्त्या प्राणत्यागपरो भवेत् ।
अनिवर्त्तिका गतिस्तस्य रुद्रलोकादसंशयम् ॥ ३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे एरण्डीतीर्थमाहात्म्यवर्णनं नाम सप्तदशोत्तरद्विशततमोऽध्यायः

अष्टादशाधिकद्विशततमोऽध्यायः

जामदग्न्यतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततोगच्छेद्धराधीश!तीर्थं परमशोभनम् । जमदग्निरितिख्यातं यत्रसिद्धो जनार्द्नः

युधिष्ठिर उवाच

कथं सिद्धो द्विजश्रेष्ठ! वासुदेवो जगद्गुरुः ।
मानुषं रूपमास्थाय लोकानां हितकाम्यया ॥ २ ॥
एतत्सर्वं यथान्यायंदेवदेवस्यचक्रिणः । चरितं श्रोतुमिच्छामिकथ्यमानंत्वयाऽनघ

श्रीमार्कण्डेय उवाच

आसीत्पूर्वं महाराज! हैहयाधिपतिर्महान् ।

कार्त्तवीर्य इति ख्यातो राजा बाहुसहस्रवान् ॥ ४ ॥
हस्त्यश्वरथसम्पन्नः सर्वशस्त्रभृतां वरः । वेदविद्याव्रतस्नातः सर्वभूताभयप्रदः ॥ ५
माहिष्मत्याः पतिः श्रीमान्राजा ह्यक्षौहिणीपतिः ।
स कदाचिन्मृगान्हन्तुं निर्जगाम महाबलः ॥ ६ ॥
बहुभिर्द्दिवसैः प्राप्तो भृगुकच्छमनुत्तमम् । जमदग्निर्महातेजा यत्र तिष्ठति तापसः
रेणुकासहितः श्रीमान्सर्वभूताभयप्रदः । तस्यपुत्रोऽभवद्रामःसाक्षान्नारायणःप्रभुः
सर्वक्षत्रगुणैर्युक्तो ब्रह्मविद्ब्राह्मणोत्तमः । तोषयन्परया भक्त्या पितरौपरमार्थवत्
तंतदाचार्जुनंदृष्ट्वाजमदग्निः प्रतापवान् । चरन्तंमृगयांगत्वा ह्यातिथ्येनन्यमन्त्रयत्
तथेति चोक्त्वा स नृपः सभृत्यबलवाहनः ।
जगाम चाऽऽश्रमं पुण्यमृषेस्तस्य महात्मनः ॥ ११ ॥
तत्क्षणादेव सम्पन्नं श्रिया परमयावृतम् । विस्मयं परमं तत्र दृष्ट्वा राजा जगामह
गतमात्रस्तु सिद्धेन परमान्नेनभोजितः । सभृत्यबलवान्राजा ब्राह्मणेन यदृच्छया
किमेतदिति पप्रच्छ कारणं शक्तिमेव च ॥ १३ ॥
कामधेनोः प्रभावं तं ज्ञात्वा प्राह ततो द्विजम् ।
दक्षिणां देहि मे विप्र! कल्मषां धेनुमुत्तमाम् ॥ १४ ॥
शतं शतसहस्राणामयुतं नियुतं परम् । भूषितानां च धेनूनां ददामि तवचार्बुदम्

जमदग्निरुवाच

अयुतैःप्रयुतैर्नाऽहं शतकोटिभिरुत्तमाम् । कामधेनुमिमांतात नदद्मिप्रतिगम्यताम्
एवमुक्तः सराजेन्द्रस्तेन विप्रेणभारत । क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥ १७
यस्येदृशः कामचारो मय्यपि द्विजपांसन !।
अहं ते पश्यतस्तस्मान्नयामि सुरभिं गृहात् ॥ १८ ॥

द्विज उवाच

कः क्रीडति सरोषेण निर्भयोहिमहाहिना । मृत्युदृष्टोऽन्तरेणाऽपिममधेनुंनयेतयः
एवमुक्त्वा महादण्डं ब्रह्मदण्डमिवाऽपरम् । गृहीत्वा परमक्रुद्धो जमदग्निरुवाचह

यस्याऽस्ति शक्तिस्तेजो वा क्षत्रियस्य कुलाऽधमः ।
धेनुं नयतु मे सद्यः क्षीणायुः सपरिच्छदः ॥ २१ ॥
तच्छ्रुत्वा वचःक्रूरं हैहयः शतशोवृतः । धावमानःक्षितितले ब्रह्मदण्डहतोऽपतत्
हुङ्कृतेन ततो धेन्वाः खड्गपाशासिपाणयः ।
निर्गच्छन्तः प्रदृश्यन्ते कल्मषायाः सहस्रशः ॥ २३ ॥
नासापुटाग्राद्रोमाग्रात्किराता मागधा गुहात् ।
रन्ध्रान्तरेषु चोत्पन्नाः शतशोऽथ सहस्रशः ॥ २४ ॥
चमन्योऽन्यमाहत्य हैहयष्टंकणान्दहन् । विनाशं सह विप्रेण गता ह्यर्जुनतेजसा
कार्त्तवीर्यो जयं लब्ध्वा सङ्ख्ये हत्वा द्विजोत्तमम् ।
जगाम स्वां पुरीं दृष्टः कृतान्तवशमोहितः ॥ २६ ॥
ततस्त्वरान्वितः प्राप्तःपश्चाद्रामोगतेरिपौ । आक्रन्दमानांजननीं ददर्शपितुरन्तिके

राम उवाच

केनेदमात्मनाशाय ह्यज्ञानात्साहसं कृतम् ।
मम तातं जिघांसुर्यो द्रष्टुं मृत्युमिहेच्छति ॥ २८ ॥
ततःसा रामवाक्येन गतसत्त्वेवविह्वला । उदरं करयुग्मेन ताडयन्ती ह्युवाच तम्
अर्जुनेन नृशंसेन क्षत्रियैरपरैः सह । इहाऽऽगत्यपिता तेन निहतो बाहुशालिना
तंपश्य निहतं तातं गतासुं गतचेतसम् । संस्कृत्य विधिवत्पुत्र तर्पयस्वयथातथम्
तच्छ्रुत्वासवचनं जननीमभिवाद्यताम् । प्रतिज्ञामकरोद्यांतां शृणुष्वचनराधिप
त्रिः सप्तकृत्वः पृथिवीं निः क्षत्रियकुलान्वयाम् ।
स्नात्वा च तेषामसृजा तर्पयिष्यामि ते पतिम् ॥ ३३ ॥
तस्यापि परशुना बाहून्कार्त्तवीर्यस्य दुर्मतेः ।
छित्वा पास्यामि रुधिरमिति सत्यं शृणुष्व मे ॥ ३४ ॥
एवं प्रतिज्ञां कृत्वाऽसौ जामदग्न्यः प्रतापवान् ।
क्रोधेन महताऽऽविष्टाः संस्कृत्य पितरं ततः ॥ ३५ ॥

माहिष्मतीं पुरीं रामो जगाम क्रोधमूर्च्छितः ।
छित्वा बाहुवनं तस्य हत्वा तं क्षत्रियाधमम् ॥ ३६ ॥
जगामक्षत्रियान्ताय पृथिवीमवलोकयन् । सप्तद्वीपार्णवयुतां सशैलवनकाननाम्
पूर्वतः पश्चिमामाशां दक्षिणोत्तरतःकुरून् । स्यमन्तपञ्चके पञ्च चकार रुधिरह्रदान्
सतेषुरुधिराम्भस्सुह्रदेषु क्रोधमूर्च्छितः । पितृन्सन्तर्प्पयामासरुधिरेणेतिनःश्रुतम्
अथर्चीकादयोपेत्य पितरो ब्राह्मणर्षभम् । तंक्षमस्वेति जगदुस्ततः स विरराम ह
तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम् ।
स (स्य) मन्तपञ्चकमिति पुण्यं तत्परिकीर्त्तितम् ॥ ४१ ॥
निर्वर्त्यकर्मणस्तस्मात्पितृन्प्रोवाचपाण्डव । रामः परमधर्मात्मायदिदंरुधिरंमया
क्षिप्तं पञ्चसु तीर्थेषु तद्भूयात्तीर्थमुत्तमम् ।
तथेत्युक्त्वा तु ते सर्वे पितरोऽदृश्यतां गताः ॥ ४३ ॥
एवं रामस्य संसर्गोदिवमार्गे युधिष्ठिर । सर्वपापक्षयकरो दर्शनात्स्पर्शनान्नृणाम्
रेणुकाप्रत्ययार्थाय अद्यापि पितृदेवताः । दृश्यन्तेदेव मार्गस्थाःसर्वपापक्षयंकराः
तत्र तीर्थे तुराजेन्द्र नर्मदोदधिसङ्गमे ।
स्थानं कृत्वा विधानेनमुच्यन्तेपातकैर्नराः ॥ ४६ ॥
कुशाग्रेणाऽपि कौन्तेयनस्पृष्टव्यो महोदधिः । अनेन तत्रमन्त्रेण स्नातव्यं नृपसत्तम
नमस्ते विष्णुरूपाय नमस्तुभ्यमपांपते । सान्निध्यंकुरु देवेश सागरे लवणाम्भसि
इति स्पर्शनमन्त्रः
अग्निश्च तेजो मृडया च देहे रेतोऽथ विष्णुरमृतस्य नाभिः ।
एतद्ब्रुवन्पाण्डव सत्यवाक्यं ततोऽवगाहेत पतिं नदीनाम् ॥ ४६ ॥
पञ्चरत्नसमायुक्तं फलपुष्पाक्षतैर्युतम् । मन्त्रेणाऽनेन राजेन्द्र दद्यादर्घं महोदधेः
सर्वरत्ननिधानस्त्वं सर्वरत्नाकराकरः । सर्वामरप्रधानेश गृहाणार्घं नमोऽस्तु ते
इत्यर्घमन्त्रः
आजन्मजनितात्पापान्मामुद्धर महोदधे । याह्यर्चितोरत्ननिधे पर्वतान्पार्वणोत्तम

इति विसर्ज्जनमन्त्रः
कोऽपरः सागराद्देवात्स्वर्गद्वारविपाटन । तत्र सागरपर्यन्तं महातीर्थमनुत्तमम्
जामदग्न्येन रामेण तत्र देवः प्रतिष्ठितः ।
यत्र देवाः स गन्धर्वा मुनयः सिद्धचारणाः ॥ ५४ ॥
उपासते विरूपाक्षं जमदग्निमनुत्तमम् । रेणुकांचैव येदेवीं पश्यन्ति भुवि मानवाः
प्रियवासे शिवे लोके वसन्ति कालमीप्सितम् ।
तत्र स्नात्वा नरो राजंस्तर्पयन्पितृदेवताः ॥ ५६ ॥
तारयेन्नरकाद्घोरात्कुलानां शतमुत्तरम् ।
स्नात्वा दत्त्वाऽत्र सहिताः श्रुत्वा वै भक्तिपूर्वकम् ॥ ५७ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे जामदग्न्यतीर्थमाहात्म्यवर्णननामाष्टादशाधिकद्विशततमोऽध्यायः

एकोनविंशत्यधिकद्विशततमोऽध्यायः

कोटितीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

नर्मदादक्षिणे कूले तीर्थं कोटीश्वरंपरम् । यत्रस्नानं चदानं चसर्वं कोटिगुणंभवेत्
तत्र देवाः सगन्धर्वा ऋषयो ये तथाऽमलाः ।
कोटितीर्थे परां सिद्धिं संप्राप्ता भुवि दुर्लभाम् ॥ २ ॥
स्थापितश्च महादेवस्तत्र कोटीश्वरोनृप । तंदृष्ट्वादेवदेवेशं सिद्धिं प्राप्नोत्यनुत्तमाम्
तत्र तीर्थे तु यत्किंचिच्छुभं वा यदि वाऽशुभम्
क्रियते तन्नृपश्रेष्ठ! सर्वं कोटिगुणं भवेत् ॥ ४ ॥
तत्र दक्षिणमार्गस्था ये केचिन्मुनिसत्तमाः ।

सिद्धा मृताः पदं यान्ति पितृलोकं ध्रुवं हि ते ॥ ५ ॥

उत्तरं नर्मदाकूलं ये श्रेष्ठा मुनिपुङ्गवाः। देवलोकंगताः पूर्वमिति शास्त्रस्यनिश्चयः

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे कोटितीर्थमाहात्म्यवर्णनंनामैकोनविंशदधिकद्विशततमोऽध्यायः

———

विंशत्यधिकद्विशततमोऽध्यायः

लोटणेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेद्धराधीश लोटणेश्वरमुत्तमम्। उत्तरे नर्मदाकूले सर्वपातकनाशनम्॥

तत्क्षणादेव तत्सर्वं सप्तजन्मार्जितं त्वघम्। नश्यते देवदेवस्य दर्शनादेव तन्नृप!

बाल्यात्प्रभृति यत्पापं यौवने चाऽपि यत्कृतम्।

तत्सर्वं विलयं याति देवदेवस्य दर्शनात् ॥ ३ ॥

युधिष्ठिर उवाच

आश्चर्यभूतं लोकेषु नर्मदाचरितं महत्। त्वया वै कथितं विप्र सकलं पापनाशनम्

यदेकं परमं तीर्थं सर्वतीर्थफलप्रदम्। श्रोतुमिच्छामितत्सर्वं दयां कृत्वावदाऽऽशुमे

ये केचिद्दुर्लभाःप्रश्नास्त्रिषु लोकेषुसत्तम। त्वत्प्रसादेनते सर्वे श्रुतामेसहबान्धवैः

एतमेकं परं प्रश्नं सर्वप्रश्नविदां वर। श्रुत्वाऽहं त्वत्प्रसादेन यत्र यामि सबान्धवः

श्रीमार्कण्डेय उवाच

साधुसाधु महाप्राज्ञ! यस्य ते मतिरीदृशी।

दुर्लभं त्रिषु लोकेषु तस्य ते नाऽस्ति किञ्चन ॥ ८ ॥

धर्ममर्थं चकामं चमोक्षं चभरतर्षभ। कालेकालेचयो वेत्ति कर्त्तव्यस्तेन धीमता ॥

तस्मात्ते सम्प्रवक्ष्यामि प्रश्नस्यास्योत्तरं शुभम्।

यच्छ्रुत्वा सर्वपापेभ्यो मुच्यन्ते भुवि मानवाः ॥ १० ॥

नर्मदा सरितां श्रेष्ठासर्वतीर्थमयीशुभा। विशेषः कथितस्तस्यारेवासागरसङ्गमे

आगच्छन्तीं नृपश्रेष्ठ! दृष्ट्वा रेवां महोदधिः। प्रणम्यच पुनर्देवीं सङ्गमे रेवया सह॥

सञ्चिन्त्य मनसा केयमिति मां वै सरिद्वरा।

ज्ञात्वा सञ्चिन्त्य मनसा रेवां लिङ्गोद्भवां पराम् ॥ १३ ॥

लुठन्वै सम्मुखस्तात गतोरेवां महोदधिः। समुद्रेनर्मदा यत्रप्रविष्टाऽस्तिमहानदी

तत्र देवाधिदेवस्य समुद्रे लिङ्गमुत्थितम्।

लिङ्गोद्भूता महाभागा नर्मदा सरितां वरा ॥ १५ ॥

लयंगता तत्र लिङ्गे तेन पुण्यतमाहिसा। नर्मदायां वसन्नित्यं नर्मदाम्बुपिबन्सदा

दीक्षितः सर्वयज्ञेषु सोमपानं दिने दिने ॥ १६ ॥

सङ्गमे तत्र यः स्नात्वा लोटणेश्वरमर्च्चयेत्।

सोऽश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १७ ॥

वाचिकं मानसं पापंकर्मणा यत्कृतंनृप। लोटणेश्वरमासाद्य सर्वंविलयतां व्रजेत्

कार्त्तिक्यां तु विशेषेण कथितंशङ्करेणतु। तच्छृणुष्व नृपश्रेष्ठ सर्वपापापनोदनम्

संप्राप्तां कार्त्तिकींदृष्ट्वा गत्वातत्रनृपोत्तम। चतुर्दश्यामुपोष्यैव स्नात्वावैनर्मदाजले

संतर्प्य पितृदेवांश्च श्राद्धं कृत्वा यथाविधि।

रात्रौ जागरणं कुर्यात्सम्पूज्य लोटणेश्वरम् ॥ २१ ॥

सफलंजीवितं यस्य सफलं तस्यचेष्टितम्। पङ्गवस्तेन सन्देहोजन्म तेषांनिरर्थकम्

एकाग्रमनसा यैस्तु नदृष्टो लोटणेश्वरः। पिशाचत्वं वियोनित्वंनभवेत्तस्यवै कुले

सङ्गमे तत्र योगत्वा स्नानं कृत्वा यथाविधि।

पुण्यैश्चैव तथा कुर्याद्गीतैर्नृत्यैःप्रबोधनम् ॥ २४ ॥

ततः प्रभातां रजनीं दृष्ट्वा नत्वा महोदधिम्।

आमन्त्र्य स्नानविधिना स्नानं तत्र तु कारयेत् ॥ २५ ॥

ॐ नमो विष्णुरूपायतीर्थनाथायतेनमः। सान्निध्यंकुरु मे देवसमुद्रलवणाम्भसि

इत्यामन्त्रणमन्त्रः

अग्निश्चश्च तेजो मृडया च देहो रेतोऽधा विष्णुरमृतस्य नाभिः ।
एवं ब्रुवन्पाण्डव! सत्यवाक्यं ततोऽवगाहेत पतिं नदीनाम् ॥ २७ ॥

इति स्नानमन्त्रः

आजन्मसतसाहस्रंयत्पापं कृतवान्नरः । सकृत्स्नानाद्व्यपोहेत पापौघंलवणाम्भसि
अन्यथा हिकुरुश्रेष्ठदेवयोनिरसौविभुः । कुशाग्रेणाऽपि विबुधैर्नस्प्रष्टव्योमहार्णवः
सर्वरत्नप्रधानस्त्वं सर्वरत्नाकराकर ॥ सर्वामरप्रधानेश! गृहणार्घं नमोऽस्तु ते ॥

इति अर्घमन्त्रः

पितृदेवमनुष्यांश्च सन्तर्प्य सदनंतरम् । उत्तीर्य तीरेतस्यैव पञ्चभिर्द्विजपुङ्गवैः ॥
श्राद्धं समाचरेत्पश्चाल्लोकपालानुरूपिभिः ।
कृत्वाऽग्रे लोकपालांस्तु प्रतिष्ठाप्य यथाविधि ॥ ३२ ॥

सम्पूज्य च यथान्यायं तानेव ब्राह्मणैःसह । सुकृतंदुष्कृतं पश्चात्तेभ्यःसर्वंनिवेदयेत्
बाल्यात्प्रभृति यत्पापं कृतं वार्धकयौवने ।
प्रख्यापयित्वा तेभ्योऽग्रे लोकपालान्निमन्त्रयेत् ॥ ३४ ॥
बाल्यात्प्रभृति यत्किञ्चित्कृतमाजन्मतोऽशुभम् ।
विप्रेभ्यः कथितं सर्वं तत्सान्निध्यं स्थितेषु मे ॥ ३५ ॥
इत्युक्त्वा स लुठेत्पश्चात्तेभ्योऽग्रेण च सम्मुखम् ।
अनुमान्य च तान्पञ्च पश्चात्स्नानं समाचरेत् ॥ ३६ ॥

श्राद्धंचकार्यं विधिवत्पितृभ्यो नृपसत्तम! । एवंकृते नृपश्रेष्ठ सर्वपापक्षयो भवेत्
जिज्ञासार्थं तु यः कश्चिदात्मानं ज्ञातुमिच्छति ।
शुभाऽशुभं च यत्कर्म तस्य निष्ठामिमां शृणु ॥ ३८ ॥

स्नात्वा तत्र महातीर्थेलुठमानो व्रजेन्नरः । पापकर्माऽन्यतोयातिधर्मकर्माव्रजेन्नदीम्
पापकर्मा ततो ज्ञात्वा पापं मे पूर्वसञ्चितम् ।
स्नात्वा तीर्थवरे तस्मिन्दानं दद्याद्यथाविधि ॥ ४० ॥

लोटणेश्वरमभ्यर्च्य सर्वपापैः प्रमुच्यते । अवक्रगमनं गत्वा मुच्यते सर्वपातकैः ॥
तस्मात्सर्वप्रयत्नेन ज्ञात्वैवं नृपसत्तम !। स्नातव्यंमानवैस्तत्र यत्र सन्निहितो हरः
एवं स्नात्वा विधानेन ब्राह्मणान्वेदपारगान् ।
पूजयेत्पृथिवीपाल सर्वपापोपशान्तये ॥ ४३ ॥

एवंगुणविशिष्टं हितत्तीर्थं नृपसत्तम । तस्य तीर्थस्य माहात्म्यं शृणुष्वैकमनानृप
तत्रतीर्थेनरःस्नात्वा संतर्प्यपितृदेवताः । श्राद्धंयःकुरुते तत्रपितॄणांभक्तिभावितः
दानं ददातिविप्रेभ्यो गोभूतिलहिरण्यकम् । षष्टिवर्षसहस्राणिकोटिवर्षशतानिच
विमानवरमारूढः स्वर्गलोके महीयते । नर्मदासर्वतीर्थेभ्यः स्नानेदाने च यत्फलम्
तत्फलंसमवाप्नोति रेवासागरसङ्गमे । सुवर्णं रजतं ताम्रं मणिमौक्तिकभूषणम्
गोवृषं चमहींधान्यं तत्रदत्त्वाऽक्षयंफलम् । शुभस्याप्यशुभस्यापितत्रतीर्थेनसंशयः
तत्र तीर्थे नरः कश्चित्प्राणत्यागं युधिष्ठिर !।
करोति भक्त्या विधिवत्तस्य पुण्यफलं शृणु ॥ ५० ॥

कोटिवर्षं तु वर्षाणां क्रीडित्वाशिवमन्दिरे । वेदवेदाङ्गविद्विप्रो जायतेविमलेकुले
पुत्रपौत्रसमृद्धोऽसौ धनधान्यसमन्वितः ।
सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदां शतम् ॥ ५२ ॥

अपि द्वादशयात्रासुसोमनाथे यदर्चिते । कार्त्तिक्यांकृत्तिकायोगे तत्पुण्यंलोटणेश्वरे
गयागङ्गाकुरुक्षेत्रे नैमिषेपुष्करे तथा । तत्पुण्यं लभते पार्थ लोटणेश्वरदर्शनात् ॥
यः शृणोति नरो भक्त्या पठ्यमानमिदं शुभम् ।
सर्वपापविनिर्मुक्तो रुद्रलोकं स गच्छति ॥ ५५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे लोटणेश्वरतीर्थमाहात्म्यवर्णनं नाम विंशत्युत्तरद्विशततमोऽध्यायः

———

एकविंशत्यधिकद्विशततमोऽध्यायः

हंसेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततो गच्छेत्तु राजेन्द्र! रेवायादक्षिणेतटे। क्रोशद्वयान्तरे तीर्थं मातृतीर्थादनुत्तमम्,
नाम्ना हंसेश्वरं पुण्यं वैमनस्यविनाशनम्।
कश्यपस्य कुले जातो हंसो दाक्षायणीसुतः॥ २॥
ब्रह्मणो वाहनं जातः पुरा तप्त्वा तपो महत्।
सैकदाविधिनिर्देशं विनावैयग्र्यमास्थितः॥ ३॥
अभिभूतः शिवगणैः प्रणनाश युधिष्ठिर। दक्षयज्ञप्रमथने कान्दिशीकोविधिंविना
ब्रह्मणा संस्मृतोऽप्याशु नायाति स यदा खगः।
तदा तं शप्तवान्ब्रह्मा पातयामास वै पदात्॥ ५॥
ततः स शप्तमात्मानं मत्वा हंसस्त्वरान्वितः।
पितामहमुपागम्य प्रणिपत्येदमब्रवीत्॥ ६॥

हंस उवाच

तिर्यग्योनिसमुत्पन्नं भवाञ्छप्तुं नचार्हसि। स्वभावएवतिर्यक्षु विवेकविकलंमनः
तथापिदेवपापोऽस्मियदहं स्वामिनंत्यजे। किंतुधावद्भिरत्युग्रैर्गणैःशार्वैःपितामह
सहसाऽहं भयाक्रान्तस्त्रस्तस्त्यक्त्वा पलायितः॥ ८॥
अद्यापि भयमेवाहं पश्यन्नस्मिविभो पुरः। तेनस्मृतोऽपि भवतानाव्रजंभवदन्तिके
श्रीमार्कण्डेय उवाच

इति ब्रुवन्नेव हि धातुरग्रे हंसः श्वसत्यक्षिपूज्यः सुदीनः।
तिर्यञ्चं मां पापिनं मूढबुद्धिं प्रभो पुरः पतितं पाहिपाहि॥ १०॥
एको देवस्त्वं हि सर्गस्य कर्ता नानाविधं सृष्टमेतत्त्वयैव।

अहं सृष्टस्त्वीदृशो यत्त्वया वै सोऽयं दोषो धातरद्धा तवैव॥ ११॥
शापस्य वानुग्रहस्यापि शक्तस्त्वत्तो नान्यः शरणं कं व्रजामि।
सेवाधर्माद्विच्युतं दासभूतं चपेटैर्हन्तव्यं वै तात! मां त्राहि भक्तम्॥ १२॥
विद्याविद्ये त्वत्त एवाविरास्तां धर्माधर्मौ सदसद्द्युनिशे च।
नानाभावाञ्जगतस्त्वं विधत्सेस्तं त्वामेकं शरणं वै प्रपद्ये॥ १३॥
एकोऽसि बहुरूपोऽसि नानाचित्रैककर्मतः।
निष्कर्माखिलकर्माऽसि त्वामतः शरणं व्रजे॥ १४॥
नमोनमो वरेण्याय वरदाय नमोनमः। नमो धात्रे विधात्रे चशरण्याय नमोनमः
शिक्षाक्षरवियुक्तेयं वाणी मे स्तौति किं विभो!।
का शक्तिः किं परिज्ञानमिदमुक्तं क्षमस्व मे॥ १६॥

श्रीमार्कण्डेय उवाच

एवं वदतिहंसे वै ब्रह्मा प्राहप्रसन्नधीः। शिक्षादत्ता तवैवेयं मा विषादंकृथाःखग
तपसा शोधयाऽऽत्मानं यथा शापान्तमाप्नुयाः।
रेवासेवां कुरु स्नात्वा स्थापयित्वा महेश्वरम्॥
अचिरेणैव कालेन ततः संस्थानमाप्स्यसि॥ १८॥
यज्ञेष्ट्वाबहुभिर्यज्ञैः समाप्तवरदक्षिणैः। गोस्वर्णकोटिदानैश्च तत्फलंस्थापितेशिवे
ब्रह्मघ्नो वा सुरापो वा स्वर्णहृद्गुरुतल्पगः।
रेवातीरे शिवं स्थाप्य मुच्यते सर्वपातकैः॥ २०॥
तस्माद्वर्गसरित्तीरे स्थापयित्वा त्रियम्बकम्।
वियुक्तः सर्वदोषैस्त्वं यास्यसे पदमुत्तमम्॥ २१॥
एवमुक्तः सविधिना हृष्टतुष्टःखगोत्तमः। तथेत्युक्त्वा जगामाशु नर्मदातीरमुत्तमम्
तपस्तप्त्वा कियत्कालं स्थापयामास शङ्करम्॥ २३॥
स्वनाम्ना भरतश्रेष्ठ हंसेश्वरमनुत्तमम्। पूजयित्वापरं स्थानं प्राप्तवान्खगसत्तमः
तत्र हंसेश्वरे तीर्थे गत्वा स्नात्वा युधिष्ठिर!। पूजयेत्परमेशानं सपापैःपरिमुच्यते

स्तुवन्नेकमना देवंनदैन्यंप्राप्नुयात्कचित् । श्राद्धंदीपप्रदानं चब्राह्मणानांचभोजनम्

दत्त्वा शक्त्या नृपश्रेष्ठ! स्वर्गलोके महीयते ॥ २६ ॥

त्रिकालमेककालं वा यो भक्त्या पूजयेच्छिवम् ।

नवप्रसूतां धेनुं च दत्त्वा पार्थ! द्विजोत्तमे ॥

षष्टिवर्षसहस्राणि शिवलोके महीयते ॥ २७ ॥

इति श्रीस्कान्दंमहापुराण एकाशीतिसाहस्रयांसंहितायांपञ्चमेऽवन्तीखण्डे-रेवाखण्डे हंसेश्वरतीर्थमाहात्म्यवर्णननामैकविंशदधिकद्विशततमोऽध्यायः ॥

द्वाविंशत्यधिकद्विशततमोऽध्यायः

तिलादेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः क्रोशान्तरे गच्छेत्तिलादं तीर्थमुत्तमम् ।

तिलप्राशनकृद्यत्र जाबालिः शुद्धिमाप्तवान् ॥ १ ॥

पितृमातृपरित्यागी भ्रातुर्भार्याभिलाषकृत् । पुत्रविक्रयकृत्पापश्छलकृद्गुरुणासह

एवंदोषसमाविष्टो यत्रयत्रापि गच्छति । तत्र तत्रापि धिक्कारंलभते सत्सु भारत!

न कोऽपि सङ्गतिं धत्ते तेन सार्द्धं सभास्वपि ॥ ३ ॥

इति लज्जान्वितो विप्रः कालेन महतानृप । चिन्तामवापमहतीमगतिर्ज्ञोहि पावने

चकार सर्वतीर्थानि रेवां चाप्यवगाहयत् ॥ ५ ॥

अणिवापान्तमासाद्य दक्षिणे नर्मदातटे ।

तस्थौ यत्र व्रती पार्थ! जाबालिः प्राशयंस्तिलान् ॥ ६ ॥

तिलैरेकाशनं कुर्वंस्तथैवैकान्तराशनम् । त्र्यहषड्द्वादशाहाशीपक्षमासाशनस्तथा

कृच्छ्रचान्द्रायणादीनि व्रतानि च तिलैरपि ।

तिलादत्वमनुप्राप्तो ह्यब्दद्वासप्तति क्रमात् ॥ ८ ॥

कालेन गच्छता तस्य प्रसन्नोऽभवदीश्वरः ।

प्रादादिहामुत्रिकीं तु शुद्धिं सालोक्यमात्मकम् ॥ ९ ॥

तेनस स्थापितोदेवः स्वनाम्नाभरतर्षभ । तिलादेश्वरसञ्ज्ञाञ्च प्रापलोकादपिप्रभुः

तदा प्रभृति विख्यातं तीर्थंपापप्रणाशनम् । तत्रतीर्थेनरः स्नात्वाचतुर्दश्यष्टमीषुच

उपवासपरः पार्थ तथैव हरिवासरे । तिलहोमी तिलोद्वर्तीतिलस्नायीतिलोदकी

तिलदाता चभोक्ता च नानापापैःप्रमुच्यते । तिलैरापूरयेल्लिङ्गं तिलतैलेन दीपदः

रुद्रलोकमवाप्नोति पुनात्यासप्तमं कुलम् ॥ १३ ॥

तिलपिण्डप्रदानेनश्राद्धेनृपतिसत्तम !। विकर्मस्थाश्चगच्छन्तिगतिमिष्टांहिपूर्वजाः

स्वर्गलोकस्थिताः श्राद्धैर्ब्राह्मणानां च भोजनैः ।

अक्षयां तृप्तिमासाद्य मोदन्ते शाश्वतीः समाः ॥ १५ ॥

पितुः कुलं मातृकुलं तथा भार्याकुलं नृप । कुलत्रयं समुद्धृत्यस्वर्गंनयति वै नरः

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्रयांसंहितायांपञ्चमेऽवन्तीखण्डे रेवाखण्डे तिलादेश्वरतीर्थमाहात्म्यवर्णनंनाम द्वाविंशत्यधिकद्विशततमोऽध्यायः

त्रयोविंशत्यधिकद्विशततमोऽध्यायः

वासवेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः क्रोशान्तरे पार्थ! वासवं तीर्थमुत्तमम् ।

वसुभिः स्थापितं तत्र स्थित्वा वै द्वादशाब्दकम् ॥ १ ॥

धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः । प्रत्यूषश्चप्रभासश्चवसवोऽष्टाविमेपुरा

पितृशापपरिक्लिष्टा गर्भवासाय भारत । नार्मदं तीर्थमासाद्य तपश्चक्रुर्यतेन्द्रियाः

आराधयन्तः परमं भवानीपतिमव्ययम्। द्वादशाब्दानि राजेन्द्र ततस्तुष्टो महेश्वर
प्रत्यक्षः प्रददौ तेभ्यस्त्वभीष्टंवरमुत्तमम्। ततःस्वनाम्नासंस्थाप्यघसवस्तंमहेश्वरम्
जग्मुराकाशमाविश्य प्रसन्ने सति शङ्करे ॥ ५ ॥
ततः प्रभृति विख्यातं तीर्थं तद्वासवाह्वयम्।
तस्मिंस्तीर्थे महाराज! यो भक्त्या पूजयेच्छिवम्॥
यथालब्धोपहारैश्च दीपं दद्यात्प्रयत्नतः ॥ ६ ॥
शुक्लपक्षे तदाष्टम्यांप्रत्यहं वापिशक्तितः। अष्टौवर्षसहस्राणि सवसेच्छिवसन्निधौ
ततःशिवालयं यातिगर्भवासं नपश्यति। पुष्पैर्वापल्लवैर्वापि फलैर्धान्यैस्तथापिवा
पूजयेद्देवमीशानं सदैन्यं नाप्नुयात्क्वचित्। सर्वशोकविनिर्मुक्तः स्वर्गलोकेमहीयते
एकाहमपि कौन्तेय योवसेद्वासवेश्वरे। पापराशिं विनिर्धूय भानुवद्दिवि मोदते
विप्रांश्च भोजयेद्भक्त्या दद्याद्वासांसि दक्षिणाम् ॥ ११ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे वासवेश्वरतीर्थमाहात्म्यवर्णनंनाम त्रयोविंशत्यधिकद्विशततमोऽध्यायः

चतुर्विंशत्यधिकद्विशततमोऽध्यायः

कोटीश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः क्रोशान्तरेपार्थतीर्थं कोटीश्वरंपरम्। यत्रस्नानंच दानंचजपहोमार्चनादिकम्
भक्त्या कृतं नरैस्तत्र सर्वं कोटिगुणं भवेत् ॥ १ ॥
तत्रदेवाःसगन्धर्वाऋषयः सिद्धचारणाः। जलधिंप्रति गच्छन्तिनर्मदांवीक्षितुंकिल
मिलिताः कोटिशो राजन्रेवासागरसङ्गमे। विनोदमतुलं दृष्ट्वा रेवार्णवसमागमे
स्नात्वा शिवं च संस्थाप्य पूजयित्वा महेश्वरम्।

कोटीश्वराभिधानं तु स्वस्वभक्त्या विधानतः ॥ ४ ॥
कोटीतीर्थे परां सिद्धिं सम्प्राप्ताः सर्वतोषणात्।
तेन तत्पुण्यमतुलं सर्वतीर्थेषु चोत्तमम् ॥ ५ ॥
तत्र तीर्थे तु यत्किंचिच्छुभं वा यदि वाऽशुभम्।
क्रियते नृपशार्दूल! सर्वं कोटिगुणं भवेत् ॥ ६ ॥
तत्रतीर्थेतुमार्गस्थायेकेचिद्वृषिसत्तमाः। सिद्धामृतपदं यान्तिपितृलोकंतथोत्तमम्
उत्तरे नर्मदातीरे दक्षिणेचाश्रिताश्चये। देवलोकं गतास्तत्र इति मेनिश्चिता मतिः
बिल्वार्कपुष्पैर्धत्तूरकुशकाशप्रसूनकैः। ऋतूद्भवैस्तथान्यैश्च पूजयित्वा महेश्वरम्
नानोपचारैर्विधिवन्मन्त्रपूर्वं युधिष्ठिर। धूपदीपार्घनैवेद्यैस्तोषयित्वा चधूर्जटिम्
शिवलोकमवाप्नोति यावदिन्द्राश्चतुर्दश। पौषकृष्णाष्टमीयोगेविशेषः पूजनेस्मृतः
नित्यं चनृपतिश्रेष्ठ चतुर्दश्यष्टमीषु च। शिवमभ्यर्च्य विप्रांश्चभोजयेद्भक्तितो वरान्
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे कोटीश्वरतीर्थमाहात्म्यवर्णनंनामचतुर्विंशत्यधिकद्विशततमोऽध्यायः

पञ्चविंशत्यधिकद्विशततमोऽध्यायः

अलिकेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः क्रोशान्तरे गच्छेदलिकातीर्थमुत्तमम्।
अलिकानाम गान्धर्वी कुशीला कुटिलाशया ॥ १ ॥
चित्रसेनस्य दौहित्री विद्यानन्दमृषिंगता। वव्रे तंस्वीकृतातेन दशवर्षाणितंश्रिता
पतिं जघान तंसुप्तं कस्मिंश्चित्कारणान्तरे। गत्वानिवेदयामासपितरंरत्नवल्लभम्
पित्रा मात्रा च संत्यक्ता बहुभिर्भर्त्सिता नृप!।

गर्भघ्नी त्वं पतिघ्नी त्वमिति दर्शय मा मुखम् ॥ ४ ॥
ब्रह्मघ्नी याहि पापिष्ठे! परित्यक्ता गृहाद्व्रज ॥ ५ ॥

मार्कण्डेय उवाच

इति दुःखान्विता मूढा ताभ्यां निर्भर्त्सिता सती।
तनुं त्यक्तुं मनश्चक्रे प्राप्य तीर्थान्तरं क्वचित् ॥ ६ ॥
सम्पृच्छयमाना तीर्थानि ब्राह्मणेभ्यो युधिष्ठिर !।
श्रुत्वा पापहरं तीर्थं रेवासागरसङ्गमे ॥ ७ ॥
तत्रपार्थतपश्चक्रेनिराहाराजितव्रता । कृच्छ्रातिकृच्छ्रपाराकमहासान्तपनादिभिः
चान्द्रायणैर्ब्रह्मकूर्चैः कर्शयामासचैतनुम् । एवं वर्षशतंसार्द्धं व्यतीतं तपसा नृप !॥
तस्या विशुद्धिमिच्छन्त्या शिवध्यानार्चनादिभिः।
ततः कतिपयाहोभिस्तस्या ज्ञात्वा हठं परम् ॥
परितुष्टः शिवः प्राह पार्वत्या परिनोदितः ॥ १० ॥

ईश्वर उवाच

पुत्रि मा साहसं कार्षीः शुद्धदेहाऽसि साम्प्रतम्।
तुष्टोऽहं तपसा तेऽद्य वरं वरय वाञ्छितम् ॥ ११ ॥

अलिकोवाच

यदि तुष्टोऽसि देवेश! वराहीयद्यहंमता । नानापापाग्नितप्ताया देहिशुद्धिपरां मम
त्वं मे नाथो ह्यनाथायास्त्वमेव जगतां गुरुः ।
दीनानाथसमुद्धर्त्ता शरण्यः सर्वदेहिनाम् ॥ १३ ॥

ईश्वर उवाच

त्वं भद्रे! शुद्धदेहाऽसि मा किञ्चिदनुशोचिथाः ।
स्वनाम्ना स्थापयित्वेह मां ततः स्वर्गमेष्यसि ॥ १४ ॥
इत्युक्त्वा देवदेवेशस्तत्रैवाऽन्तरधीयत ।
अलिकाऽपि ततो भक्त्या स्नात्वा संस्थाप्य शङ्करम् ॥ १५ ॥

दत्त्वादानंच विप्रेभ्योलोकमापमहोत्कटम् । पितरंचसमासाद्यमातरं च युधिष्ठिर!
तैश्चसन्मानिता प्रीत्या बन्धुभिः साऽलिका ततः ।
विमानवरमारूढा दिव्यमालान्विता नृप !॥ १७ ॥
गौरीलोकमनुप्राप्तासखित्वेऽद्यापिमोदते। ततःप्रभृतितत्पार्थविख्यातमलिकेश्वरम्
तत्र तीर्थे तु या नारी पुरुषो वा युधिष्ठिर !।
स्नात्वा सम्पूजयेद्भक्त्या महादेवमुमायुतम् ॥ १९ ॥
सपापैर्विविधैर्मुक्तो लोकमाप्नोति शाङ्करम्।
मानसं वाचिकं पापं कायिकं यत्पुरा कृतम् ॥ २० ॥
सर्वं तद्विलयं यातिभोजयित्वा द्विजान्सदा । दीपंदत्त्वाचदेवाग्रे नरोगैःपरिभूयते
धूपपात्रं विमानं चघण्टांकलशमेवच । दत्त्वा देवायराजेन्द्रशाक्रं लोकमवाप्नुयात्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
रेवाखण्डे रेवासागरसङ्गमेऽलिकेश्वरतीर्थमाहात्म्यवर्णनंनाम
पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥

———

षड्विंशत्यधिकद्विशततमोऽध्यायः

विमलेश्वरतीर्थमाहात्म्यवर्णनम्

श्रीमार्कण्डेय उवाच

ततः क्रोशान्तरे पुण्यंतीर्थं तद्विमलेश्वरम् । यत्र स्नानेन दानेन जपहोमार्चनादिभिः
विमलेश्वरमाराध्य यो यदिच्छेत्स तल्लभेत् ।
स्वर्गलाभादिकं वापि पार्थिवं वा यथेप्सितम् ॥ २ ॥
पुरात्रिशिरसं हत्वा त्वष्टुःपुत्रं शतक्रतुः । यस्यतीर्थस्यमाहात्म्याद्वैमल्यंपरमंगतः
यत्रवेदनिधिर्विप्रो महत्तप्त्वा तपःपुरा । नानाकर्ममलैः क्षीणैर्विमलोऽभवदर्कवत्

महादेवप्रसादेन सोमवत्प्रियदर्शनः । पुरा भानुमतीं भानुः सुतां स्मरशरार्दितः
चकमे तेनदोषेण कुष्ठरोगार्द्दितोऽभजत् । सचाप्यत्र तपस्तप्त्वा विमलत्वमुपागतः
महादेवेन तुष्टेनस्वस्थानं मुदितोऽभजत् । तथैवचपुरापार्थ विभाण्डकसुतोमुनिः
योगिसङ्गं वनेप्राप्य पुरे च नृपतेस्तथा । राजसंसर्गदोषाद्वै मालिन्यं परमात्मनः

विचारयन्नभ्युपेत्य रेवासागरसङ्गमम् ।
शान्तया भार्यया सार्द्धं तप्त्वा द्वादशवत्सरान् ॥ ६ ॥
कृच्छ्रचान्द्रायणैर्देवं तोषयंस्त्र्यम्बकं मुनिः ।
महादेवेन तुष्टेन सोऽपि वैमल्यमाप्तवान् ॥ १० ॥

शर्वाण्याप्रेरितःशर्वः पुरादारुवनेनृप । मोहनान्मुनिपत्नीनां स्वंवीक्ष्यविमलंकिल

विचार्य परमस्थानं नर्मदोदधिसङ्गमम् ।
तत्र स्थित्वा महाराज! तपस्तप्त्वा सहोमया ॥ १२ ॥
विमलोऽसौ यतो जातस्तेनाऽसौ विमलेश्वरः ।
तेन नाम्ना स्वयं तस्थौ लोकानां हितकाम्यया ॥ १३ ॥
ततस्तिलोत्तमां सृष्ट्वा ब्रह्मा लोकपितामहः ।
प्रजानाथोऽपि तां सृष्ट्वां दृष्ट्वाऽग्रे सुमनोहराम् ॥ १४ ॥
भावियोगबलाक्रान्तः स तस्यामभिकोऽभवत् ।
तेन वीक्ष्य सदोषत्वं रेवातीरद्वयं श्रितः ॥ १५ ॥
तीर्थान्यनुसरन्मौनी त्रिस्नायी संस्मरञ्छिवम् ।
रेवार्णवसमायोगे स्नात्वा सम्पूज्य शङ्करम् ॥
कालेनाऽल्पेन राजर्षे! ब्रह्माऽप्यामलतां गतः ॥ १६ ॥

एवमन्येऽपि बहुशो देवर्षिनृपसत्तमाः । त्यक्त्वादोषमलं तत्र विमला बहवोऽभवन्

तथा त्वमपि राजेन्द्र! तत्र स्नात्वा शिवार्चनात् ।
अमलोऽपिविशेषेण वैमल्यं प्राप्स्यसे परम् ॥ १८ ॥

तत्र स्नात्वानरो नारी पूजयित्वामहेश्वरम् । पापदोषविनिर्मुक्तो ब्रह्मलोकेमहीयते

तत्रोपवासं यःकृत्वा पश्येतविमलेश्वरम् । अष्टम्यांच चतुर्दश्यां सर्वपर्वसु पार्थिव

सप्तजन्मकृतं पापं हित्वा याति शिवालयम् ।
श्राद्धं कृत्वा विधानेन पितृणामनृणी भवेत् ॥
ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥ २१ ॥

यद्यदिष्टतमं लोके यच्चैवाऽऽत्महितं गृहे । तत्तद्गुणवते देयं तत्रैवाऽक्षयमिच्छता

स्वर्णधान्यानि वासांसि छत्रोपानत्कमण्डलुम् ॥ २२ ॥

गृहं देवस्यवैशक्त्या कृत्वास्याद्भुविभूपतिः । गीतनृत्यकथाभिश्च तोषयेत्परमेश्वर

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे विमलेश्वरतीर्थमाहात्म्यवर्णनंनाम षड्विंशत्यधिकद्विशततमोऽध्यायः

सप्तविंशत्यधिकद्विशततमोऽध्यायः

तीर्थयात्रादिविशेषविधानकथनम्

मार्कण्डेय उवाच

एतानि तव सङ्क्षेपात्प्राधान्यात्कथितानि च ।
न शक्यो विस्तराद्वक्तुं सङ्ख्यां तीर्थेषु पाण्डव !॥ १ ॥

एषा पवित्रा विमला नदीत्रैलोक्यविश्रुता । नर्मदासरितां श्रेष्ठामहादेवस्यवल्लभा
मनसा संस्मरेद्यस्तु नर्मदां सततं नृप । चान्द्रायणशतस्याशु लभते फलमुत्तमम्
अश्रद्दधानाः पुरुषा नास्तिकाश्चात्रयेस्थिताः । पतन्तिनरके घोरेप्राहैवं परमेश्वरः
नर्मदां सेवते नित्यं स्वयं देवोमहेश्वरः । तेनपुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी
इयं माहेश्वरी गङ्गा महेश्वरतनूद्भवा । प्रोक्ता दक्षिणगङ्गेति भारतस्य युधिष्ठिर

जाह्नवी वैष्णवी गङ्गा ब्राह्मी गङ्गा सरस्वती ।
इयं माहेश्वरी गङ्गा रेवा नास्त्यत्र संशयः ॥ ७ ॥

यथा हि पुरुषे देवस्त्रैमूर्तत्वमुपाश्रितः । ब्रह्मविष्णुमहेशाख्यं न भेदस्तत्र वै यथा
तथा सरित्त्रये पार्थ! भेदं मनसि मा कृथाः ॥ ८ ॥
कोटिशो ह्यत्रतीर्थानिलक्षशश्चाऽपिभारत !। तथासहस्रशो रेवातीरद्वयगतानि तु
वृक्षान्तरिक्षसंस्थानि जलस्थलगतानि च ।
कः शक्तस्तानि निर्णेतुं वागीशो वा महेश्वरः ॥ १० ॥
स्मरणाज्जन्मजनितं दर्शनाच्चत्रिजन्मजम् । सप्तजन्मकृतं नश्येत्पापंरेवावगाहनात्
देवकार्यं कृतं तेन अग्नयो विधिवद्धुताः । वेदा अधीताश्चत्वारोयेनरेवावगाहिता
प्राधान्याच्चाऽपि सङ्क्षेपात्तीर्थान्युक्तानि ते मया ।
न शक्यो विस्तरः पार्थ! श्रोतुं वक्तुं च वै मया ॥ १३ ॥

युधिष्ठिर उवाच

विधानंच यमांश्चैव नियमांश्चवदस्वमे । प्रायश्चित्तार्थगमनेको विधिस्तंवदस्व मे

श्रीमार्कण्डेय उवाच

साधुपृष्टं महाराजयच्छ्रेयःपारलौकिकम् ।शृणुष्वावहितो भूत्वायथाज्ञानंवदमिते
अध्रुवेण शरीरेण ध्रुवं कर्मसमाचरेत् । अवश्यमेवयास्यन्ति प्राणाः प्राघूर्णिकाइव
दानंवित्तादृतं वाचः कीर्तिधर्मौतथायुषः । परोपकरणं कायादसारात्सारमुद्धरेत्
अस्मिन्महामोहमये कटाहे सूर्याग्निना रात्रिदिवेन्धनेन ।
मासर्त्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता ॥ १८ ॥
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि ।
नाऽयं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ १६ ॥
मन्त्रेतीर्थे द्विजे देवे दैवज्ञेभेषजेगरौ । यादृशी भावना यस्य सिद्धिर्भवतितादृशी
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतंचयत् । असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह
यः शास्त्रविधिमुत्सृज्यवर्ततेकामकारतः । नससिद्धिमवप्नोति नसुखंनपरांगतिम्
सन्तीह विविधोपाया नृणां देहविशोधनाः ।
तीर्थसेवासमं नास्ति स्वशरीरस्य शोधनम् ॥ २३ ॥

कृच्छ्रचान्द्रायणाद्यैर्वा द्वितीयं तीर्थसेवया ।
यदा तीर्थं समुद्दिश्य प्रयाति पुरुषो नृप !॥
तदा देवाश्च पितरस्तं व्रजन्त्यनु खेचराः ॥ २४ ॥
परमामोदपूर्णास्ते प्रयान्त्यस्यानुयायिनः ।
कृत्वाऽऽभ्युदयिकं श्राद्धं समापृच्छय तु देवताम् ॥ २५ ॥
इष्टबन्धूंश्च विष्णुंचशङ्करंसगणेश्वरम् । व्रजेद्द्विजाभ्यनुज्ञातो गृहीत्वानियमानपि
एकाशनं ब्रह्मचर्यंभूशय्यां सत्यवादिताम् । वर्जनं च परान्नस्य प्रतिग्रहविवर्जनम्
वर्जयित्वा तथा द्रोहवञ्चनादिनृपोत्तम । साधुवेषं समास्थाय विनयेनविभूषितः
दम्भाहंकारमुक्तो यः सतीर्थफलमश्नुते । यस्य हस्तौ चपादौ चमनश्चैवसुसंयतम्
विद्या तपश्च कीर्तिश्चस तीर्थफलमश्नुते । अक्रोधनश्च राजेन्द्रसत्यशीलो दृढव्रतः
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते । मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः
वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ।
स्नानं सुरार्चनं चैव श्राद्धे वै पिण्डपातनम् ॥ ३२ ॥
विप्राणां भोजनं शक्त्या सर्वतीर्थेष्वयं विधिः ।
प्रायश्चित्तनिमित्तं च यो व्रजेद्यतमानसः ॥ ३३ ॥
तस्यापि च विधिं वक्ष्ये शृणुपार्थसमाहितः । एकाशनंब्रह्मचर्यमक्षारलवणाशनम्
स्नात्वा तीर्थाभिगमनं हविष्यैकान्नभोजनम् । वर्जयेत्पतितालापंबहुभाषणमेवच
परीवादं परान्नंचनीचसङ्गं विवर्जयेत् । व्रजेच्च निरुपानत्को वासानोवसर्सीशुचिः
सङ्कल्पं मनसा कृत्वा ब्राह्मणानुज्ञया व्रजेत् ।
तीर्थे गत्वा तथा स्नात्वा कृत्वा चैव सुरार्चनम् ॥ ३७ ॥
दुष्कर्मतो विमुक्तः स्यादनुतापीभवेद्यदि । वेदेतीर्थे च देवेच दैवज्ञे चौषधे गुरौ ॥
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ।
उक्ततीर्थफलानां च पुराणेषु स्मृतिष्वपि ॥ ३६ ॥
अर्थवादभवांशङ्कांविहाय भरतर्षभ !। कृत्वाविचारंशास्त्रोक्तंपरिकल्प्ययथोचितम्

कायेन कृच्छ्रमरणे ह्यशक्तानांविशुद्धये । ज्ञात्वातीर्थविशेषंहि प्रायश्चित्तंसमाचरेत्
तच्छृणुष्व महाराज! नर्मदायां यथोचितम् ।
चतुर्विंशतिसङ्ख्येभ्यो योजनेभ्यो व्रजेन्नरः ॥ ४२ ॥
चतुर्विंशति कृच्छ्राणां फलमाप्नोतिशोभनम् । अतऊर्ध्वंयोजनेषु पादकृच्छ्रउदाहृतः
तन्मध्ये च महाराज यो व्रजेच्छुद्धिकाङ्क्षया ।
योजने योजने तस्य प्रायश्चित्तं विदुर्बुधाः ॥ ४४ ॥
प्रणवाख्ये महाराज!तथारेवोरिसङ्गमे । भृगुक्षेत्रेतथागत्वा फलं तद्द्विगुणंस्मृतम्
सङ्गमे देवनद्याश्च शूलभेदे नृपोत्तम! । द्विगुणं पादहीनं स्यात्करजासङ्गमे तथा
एरण्डीसङ्गमे तद्वत्कपिलायाश्चसङ्गमे । केचित्त्रिगुणितंप्राहुः कुब्जारेवोत्थसङ्गमे
ओङ्कारेचमहाराजतदपिस्यात्समञ्जसम् । सङ्गमेषुतथाऽन्यासांनदीनांरेवयासह
प्राहुस्ते सार्द्धकृच्छ्रं वै फलंपूर्वं युधिष्ठिर !। त्रिगुणंकृच्छ्रमाप्नोतिरेवासागरसङ्गमे
कृच्छ्रं चतुर्गुणंप्रोक्तं शुक्लतीर्थेयुधिष्ठिर । योजनेयोजने गत्वाचतुर्विंशतियोजनम्
तत्र तत्र वसेद्यस्तु सुचिरं नृवरोत्तम !॥ ५० ॥
रेवासेवासमाचारः संयुक्तःशुद्धबुद्धिमान् । दम्भाहंकाररहितः शुद्ध्यर्थंसविमुच्यते
इतिते कथितं पार्थ प्रायश्चित्तार्थलक्षणम् । रेवायात्राविधानंच गुह्यमेतद्युधिष्ठिर

युधिष्ठिर उवाच

योजनस्य प्रमाणं मे वद त्वं मुनिसत्तम !।
यज्ज्ञात्वा निश्चितं मे स्यान्मनः शुद्धेस्तु कारणम् ॥ ५३ ॥

मार्कण्डेय उवाच

शृणु पाण्डव! वक्ष्यामि प्रमाणं योजनस्य यत् ।
तथा यात्राविशेषेण विशेषं कृच्छ्रसम्भवम् ॥ ५४ ॥
तिर्यग्यवोदराण्यष्टावूर्ध्वा वाव्रीहयस्त्रयः । प्रमाणमङ्गुलस्याहुर्वितस्तिर्द्वादशाङ्गुला
वितस्तिद्वितयं हस्तश्चतुर्हस्तं धनुः स्मृतम् ।
स एव दण्डो गदितो विशेषज्ञैर्युधिष्ठिर !॥ ५६ ॥

धनुःसहस्रे द्वेक्रोशश्चतुःक्रोशं च योजनम् । एतद्योजनमानं ते कथितं भरतर्षभ ॥
येन यात्रां व्रजन्वेत्ति फलमानंनिजार्जितम् । उक्तंकृच्छ्रफलं तीर्थे जलरूपेनृपोत्तम
यथाविशेषं ते वच्मि पूर्वोक्ते तत्र तत्र च । तन्मे शृणु महीपाल श्रद्दधानायकथ्यते
यस्मिंस्तीर्थे हि यत्प्रोक्तं फलं कृच्छ्रादिकं नृप !।
तत्राप्युपोषणात्कृच्छ्रफलं प्राप्नोत्यथाधिकम् ॥ ६० ॥
दीनजाप्याच्च लभते फलं कृच्छ्रस्य शक्तितः ।
तत्र विख्यातदेवेशं स्नात्वा दृष्ट्वाभिपूज्य च ॥ ६१ ॥
प्रणम्य लभते पार्थ फलं कृच्छ्रभवं सुधीः ।
तीर्थे मुख्यफलं स्नानाद्द्वितीयं चाप्युपोषणात् ॥ ६२ ॥
तृतीयंख्यातदेवस्य दर्शनाभ्यर्चनादिभिः । चतुर्थंजाप्ययोगेनदेहशक्त्यात्वहर्निशम्
पञ्चमं सर्वतीर्थेषु कल्पनीयं हि दूरतः । तीरस्थोयोजनादर्वाग्दशांशं लभते फलम्
उक्ततीर्थफलात्पार्थ! नात्र कार्या विचारणा ॥ ६५ ॥
उपवासेन सहितं महानद्यां हि मज्जनम् ।
अप्यर्वाग्योजनात्पार्थ! दद्यात्कृच्छ्रफलं नृणाम् ॥ ६६ ॥
षड्योजनवहा कुल्या नद्योऽल्पा द्वादशैव च ।
चतुर्विंशतिगा नद्यो महानद्यस्ततोऽधिकाः ॥ ६७ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डेतीर्थयात्रादिविशेषविधानकथनंनामसप्तविंशत्यधिकद्विशततमोऽध्यायः

अष्टाविंशत्यधिकद्विशततमोऽध्यायः

परार्थयात्राफलकथनम्

युधिष्ठिर उवाच

परार्थं तीर्थयात्रायां गच्छतः कस्य किं फलम् ।
कियन्मात्रं मुनिश्रेष्ठ! तन्मे ब्रूहि कृपानिधे !॥ १ ॥

मार्कण्डेय उवाच

परार्थंगच्छतस्तन्मेवदतः शृणुपार्थिव । यथायावत्फलंतस्य यात्रादिविहितंभवेत्
उत्तमेनेह वर्णनद्रव्यलोभादिना नृप । नाधमस्यक्वचित्कार्यं तीर्थयात्रादिसेवनम्
धर्मकर्म महाराज! स्वयं विद्वान्समाचरेत् ।
शरीरस्याऽथवा शक्त्या अन्यद्वा कार्ययोगतः ॥ ४ ॥
धर्मकर्म सदा प्रायः सवर्णेनैव कारयेत् । पुत्रपौत्रादिकैर्वापिज्ञातिभिर्गोत्रसंम्भवैः
श्रेष्ठं हि विहितं प्राहुर्धर्मकर्म युधिष्ठिर । तैरेव कारयेत्तस्मान्नोत्तमैर्नाधमैरपि ॥ ६
अधमेन कृतं सम्यङ् नभवेदितिमे मतिः । उत्तमश्चाधमार्थे वैकुर्वन्दुर्गतिमाप्नुयात्
न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ।
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥ ८ ॥
जपस्तपस्तीर्थयात्राप्रव्रज्यामन्त्रसाधनम् । देवताराधनं दीक्षास्त्रीशूद्रपतनानिषट्
पतिवत्नी पतत्येव विधवा सर्वमाचरेत् । सभर्तृकाऽशके पत्यौ सर्वंकुर्यादनुज्ञया
गत्वा परार्थं तीर्थादौषोडशांशफलं लभेत् । गच्छतश्चप्रसङ्गेनतीर्थमर्द्धफलंस्मृतम्
अनुसङ्गेन तीर्थस्य स्नाने स्नानफलं विदुः ।
नैव यात्राफलं तज्ज्ञाः शास्त्रोक्तं कल्मषापहम् ॥ १२ ॥
पित्रर्थं चपितृव्यस्यमातुर्मातामहस्य च । मातुलस्यतथा भ्रातुःश्वशुरस्यसुतस्यच
पोषकार्थादयोश्चापि मातामह्या गुरोस्तथा ।

स्वसुर्मातृष्वसुः पैत्र्या आचार्याध्यापकस्य च ॥ १४ ॥
इत्याद्यर्थे नरः स्नात्वा स्वयमष्टांशमाप्नुयात् ।
साक्षात्पित्रोः प्रकुर्वाणश्चतुर्थांशमवाप्नुयात् ॥ १५ ॥
पतिपत्न्योर्मिथश्चार्द्धं फलं प्राहुर्मनीषिणः ।
भागिनेयस्य शिष्यस्य भ्रातृव्यस्य सुतस्य च ॥
षट्त्रिपञ्चचतुर्भागान्फलमाप्नोति वै नरः ॥ १६ ॥
इति ते कथितं पार्थ पारम्पर्यक्रमागतम् । कर्तव्यं ज्ञातिवर्गस्य परार्थेधर्मसाधनम्
वर्षास्रतुसमायोगेसर्वानद्योरजस्वलाः । मुक्त्वा सरस्वतींगङ्गांनर्मदांयमुनानदीम्
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे परार्थयात्राफलकथनंनामाष्टाविंशत्यधिकद्विशततमोऽध्यायः

एकोनत्रिंशदधिकद्विशततमोऽध्यायः

रेवाखण्डपठनश्रवणदानादिफलश्रुतिवर्णनम्

श्रीमार्कण्डेय उवाच

एवं तेकथितं राजन्पुराणं धर्मसंहितम् । शिवप्रीत्यायथा प्रोक्तं वायुनादेवसंसदि
षष्टितीर्थसहस्राणि षष्टिकोटिस्तथैवच । आदिमध्यावसानेषु नर्मदायां पदेपदे ॥
मया द्वादशसाहस्री संहितायाः श्रुतापुरा । देवदेवस्य गदतः साम्प्रतंकथिता तव
पृष्टस्त्वयाऽहं भूपाल पर्वतेऽमरकण्टके । स्थितःसंक्षेपतः सर्वं मया तत्कथितं तव
नर्मदाचरितं पुण्यं शृणु तस्यास्तियत्फलम् । यत्फलंसर्ववेदैःस्यात्सषडङ्गपदक्रमैः
पठितैश्च श्रुतैर्वाऽपि तस्माद्बहुतरं भवेत् ।
सत्रयाजी फलं यत्र लभते द्वादशाब्दिकम् ॥ ६ ॥
चरितेतु श्रुते देव्यालभते तादृशंफलम् । सर्वतीर्थेषु तत्पुण्यंस्नात्वा सागरमादितः

सकृत्स्नात्वा तथा श्रुत्वा नर्मदायां फलं हि तत् ।
आदिमध्यावसानेन नर्मदाचरितं शुभम् ॥ ८ ॥
यः शृणोति नरो भक्त्या तस्य पुण्यफलं शृणु ।
स प्राप्य शिवसंस्थानं रुद्रकन्यासमावृतः ॥ ६ ॥
रुद्रस्यानुचरो भूत्वा तेनैवसहमोदते । एतद्धर्ममुपाख्यानं सर्वशास्त्रेषु सत्तमम् ॥
देशेवा मण्डलेवाऽपि वाग्रामेनगरेऽपिवा । गृहेवा तिष्ठतेयस्यचातुर्वर्ण्यस्यभारत
सब्रह्मास शिवःसाक्षात्सच देवोजनार्द्दनः । त्रिविधंकारणंलोकेधर्मपन्थानमुत्तमम्
देवतानां गुरुं शास्त्रं परमं सिद्धिकारणम् ।
श्रुत्वेश्वरमुखात्पार्थ मयाऽपि तव कीर्त्तितम् ॥ १३ ॥
दक्षिणे चोत्तरे कूले यानि तीर्थानि कानिचित् ।
प्रधानतः सुपुण्यानि कथितानि विशेषतः ॥ १४ ॥
स्पशनाद्दर्शनात्तेषां कीर्त्तनाच्छ्रवणात्तथा । मुच्यतेसर्वपापेभ्योरुद्रलोकंसगच्छति
इदं यः शृणुयान्नित्यं पुराणं शिवभाषितम् ।
ब्राह्मणो वेदविद्यावान्क्षत्रियो विजयी भवेत् ॥ १६ ॥
धनभागी भवेद्वैश्यः शूद्रो वै धर्मभाग्भवेत् ।
सौभाग्यं सन्ततिं स्वर्गं नारी श्रुत्वाऽप्नुयाद्धनम् ॥ १७ ॥
ब्रह्मघ्नश्चसुरापश्चस्तेयीचगुरुतल्पगः । माहात्म्यंनर्मदायास्तु श्रुत्वापापबहिष्कृताः
पापभेदी कृतघ्नश्च स्वामिविश्वासघातकः । गोघ्नश्चगरदश्चैव कन्याविक्रयकारकः
एतेश्रुत्वैवपापेभ्यो मुच्यन्ते नाऽत्रसंशयः । येपुनर्भावितात्मानः शृण्वन्तिसततंनृप
पूजयन्त इदं देवा पूजिता गुरवश्च तैः । नर्मदा पूजितातेन भगवांश्च महेश्वरः ॥
तस्मात्सर्वप्रयत्नेन गन्धपुष्पविभूषणैः । पूजितं परया भक्त्या शास्त्रमेतत्फलप्रदम्
लेखापयित्वा सकलंनर्मदाचरितं शुभम् । उत्तमं सर्वशास्त्रेभ्योयो ददातिद्विजन्मने
नर्मदा सर्वतीर्थेषु स्नाने दाने चयत्फलम् । तत्फलंसमवाप्नोतिसनरोनाऽत्र संशयः
एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदम् । स्वर्गदंपुत्रदं धन्यं यशस्यं कीर्त्तिवर्द्धनम्

सर्वपापहरं पार्थ दुःखदुःस्वप्ननाशनम् । पठतां शृण्वतांराजन्सर्वकमार्थसिद्धिदम्
शान्तिरस्तु शिवं चास्तु लोकाः सन्तु निरामयाः ।
गोब्राह्मणेभ्यः स्वस्त्यस्तु धर्म्मं धर्म्मात्मजाऽऽश्रयः ॥ २७ ॥
नरकान्तकरी रेवा सतीर्था विश्वपावनी । नर्मदा धर्मदाचास्तु शर्मदापार्थतेसदा
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे मार्कण्डेययुधिष्ठिरसम्वादे रेवाखण्डपठनश्रवणदानादिफलश्रुतिवर्णनंनामैकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२६ ॥

त्रिंशदधिकद्विशततमोऽध्यायः

तीर्थावलिवर्णनम्

सूत उवाच

इत्युक्त्वोपररामाथपाण्डोःपुत्रायवैमुनिः । मृकण्डतनयोधीमान्सप्तकल्पस्मरःपुरः
मार्कण्डेमुनिना प्रोक्त यथा पार्थाय सत्तमाः ।
तथा वः कथितं सर्वं रेवामाहात्म्यमुत्तमम् ॥ २ ॥
इयं पुण्या सरिच्छ्रेष्ठारेवा विश्वैकपावनी । रुद्रदेहसमुद्भूता सर्वभूताभयप्रदा ॥
ॐकारजलधिं यावदुवाच भृगुनन्दनः । तीर्थसङ्गमभेदान्वै धर्मपुत्राय पृच्छते ॥
समासेनैव मुनयस्तथाहं कथयामिवः । सप्तषष्टिसहस्राणि षष्टिकोट्यस्तथैव च
कथं केनात्रशक्यन्ते वक्तुं वर्षशतैरपि । तथाप्यत्र मुनिश्रेष्ठाः प्रोक्तंपार्थाय वै यथा
तीर्थमोङ्कारमारभ्य वक्ष्ये तीर्थावलिं शुभाम् ।
प्रोच्यमानां समासेन तां शृणुध्वं महर्षयः ॥ ७ ॥
नत्वा सोमं महेशानं नत्वाब्रह्माच्युतावुभौ ।
सरस्वतीं गणेशानं वेदव्यासाङ्घ्रिपङ्कजम् ॥ ८ ॥
पूर्वाचार्यांस्तथा सर्वान्दृष्टादृष्टार्थवेदिनः ।

प्रणम्य नर्मदां देवीं वक्ष्ये तीर्थावलिं त्विमाम् ॥ ६ ॥
ॐनमो विश्वरूपाय ॐकारायाऽखिलात्मने ।
यमारभ्य प्रवक्ष्यामि रेवातीर्थावलिं द्विजाः !॥ १० ॥
अस्मिन्मार्कण्डगदिते रेवातीर्थक्रमे शुभे ।
पुराणसंहिताध्याया मार्कण्डाश्रमवर्णनम् ॥ ११ ॥
ततः प्रश्नाधिकारश्च प्रशंसा नर्मदोद्भवा । तथापञ्चदशानां चप्रवाहानांप्रकीर्तनम्
नामनिर्वचनं तद्वत्तथा कल्पसमुद्भवाः । एकविंशतिकल्पानां तद्वन्नामानुकीर्त्तनम्
मार्कण्डेयानुभूतानां सप्तानां लक्षणानि च ।
माहात्म्यं चैव रेवायाः शिवविष्ण्वोस्तथैव च ॥ १४ ॥
संहारलक्षणं तद्वदोङ्कारस्य चसम्भवः । तथैवोङ्कारमाहात्म्यममरङ्कटकीर्तनम् ॥
अमरेश्वरतीर्थं चतथा दारुवनं महत् । दारुकेश्वरतीर्थं च तीर्थं वै चरुकेश्वरम् ॥
चरुकासङ्गमस्तद्वद्व्यतीपातेश्वरं तथा । पातालेश्वरतीर्थं चकोटियज्ञाह्वयं तथा ॥
वरुणेश्वरतीर्थं चलिङ्गान्यष्टोत्तरं शतम् । सिद्धेश्वरंयमेशं च ब्रह्मेश्वरमतः परम् ॥
सारस्वतं चाष्टरुद्रं सावित्रं सोमसञ्ज्ञितम् ।
शिवखातं महातीर्थं रुद्रावर्तं द्विजोत्तमाः ॥ १६ ॥
ब्रह्मावर्तं परं तीर्थं सूर्यावर्तमतः परम् । पिप्पलावर्ततीर्थं चपिप्पल्याश्चैव सङ्गमः
अमरकण्टमाहात्म्यं कपिलासङ्गमस्तथा ।
विशल्यासम्भवश्चापि भृगुतुङ्गाद्रिकीर्तनम् ॥ २१ ॥
विशल्यासङ्गमः पुण्यः करमर्दासमागमः । करमर्देश्वरं तीर्थं चक्रतीर्थमनुत्तमम् ॥
सङ्गमो नीलगङ्गायाःविध्वंसस्त्रिपुरस्यच । कीर्तनंतीर्थदानानां मधुकतृतीयाव्रतम्
अप्सरेश्वरतीर्थं च देहक्षेपे विधिस्ततः ।
तीर्थं ज्वालेश्वरं नाम ज्वालायाः सङ्गमस्तथा ॥ २४ ॥
शक्रतीर्थं कुशावर्तं हंसतीर्थं तथैव च । अम्बरीषस्य तीर्थं चमहाकालेश्वरं तथा ॥
मातृकेश्वरतीर्थं च भृगुतुङ्गानुवर्णनम् । तत्र भैरवमाहात्म्यं चपलेश्वरकीर्तनम् ॥

चण्डपाणेश्चमाहात्म्यं कावेरीसङ्गमस्तथा । कुबेरेश्वरतीर्थं चवाराहीसङ्गमस्तथा
सङ्गमश्चण्डवेगायास्तीर्थं चण्डेश्वरंतथा । एरण्डीसङ्गमः पुण्य एरण्डेश्वरमुत्तमम्
पितृतीर्थं च तत्रैव ॐकारस्य च सम्भवम् ।
माहात्म्यं पञ्चलिङ्गानामोङ्कारस्य मुनीश्वराः ॥ २६ ॥
कोटितीर्थस्य माहात्म्यंतीर्थंकाकह्रदंतथा । जम्बुकेश्वरतीर्थं चसारस्वतमतःपरम्
कपिलासङ्गमस्तद्वत्तीर्थंच कपिलेश्वरम् । दैत्यसूदनतीर्थं चचक्रतीर्थं च वामनम् ॥
तीर्थलक्षं विदुः पूर्वे कपिलायास्तु सङ्गमे ।
स्वर्गस्य नरकस्यापि लक्षणं मुनिभाषितम् ॥ ३२ ॥
व्यवस्थानं शरीरस्य गोप्रदानानुवर्णनम् । अशोकवनिकातीर्थं मतङ्गाश्रमवर्णनम्
अशोकेश्वरतीर्थं च मतङ्गेश्वरमुत्तमम् । तथा मृगवनं पुण्यं तत्र तीर्थं मनोरथम् ॥
सङ्गमोऽङ्गारगतोया अङ्गारेश्वरमुत्तमम् । तथा मेघवनंतीर्थं देव्यानामानुकीर्तनम्
सङ्गमश्चापि कुब्जायास्तीर्थं कुब्जेश्वरं तथा ।
बिल्वाम्रकं तथा तीर्थं पूर्णद्वीपमतः परम् ॥ ३६ ॥
तथा हिरण्यगर्भायाः सङ्गमःपुण्यकीर्तनः । द्वीपेश्वरं नाकतीर्थं पुण्यं यज्ञेश्वरंतथा
माण्डव्याश्रमतीर्थं च विशोकासङ्गमस्तथा ।
वागीश्वरं नाम तीर्थं पुण्यो वै वागुसङ्गमः ॥ ३८ ॥
सहस्रावर्तकं तत्र तीर्थं सौगन्धिकंतथा । सङ्गमश्चसरस्वत्या ईशानं तीर्थमुत्तमम्
देवतात्रयतीर्थं चशूलखातं ततः परम् । ब्रह्मोदं शाङ्करं सौम्यं सारस्वतमतः परम्
सहस्रयज्ञतीर्थं च कपालमोचनं तथा । आग्नेयमदितीसं वाराहं तीर्थमुत्तमम् ॥
तथा देवपथं तीर्थं नीर्थं यज्ञसहस्रकम् । शुक्लतीर्थं दीप्तिकेशं विष्णुतीर्थं चयोधनम्
नर्मदेश्वरतीर्थं चवरुणेशं चमारुतम् । योगेशं रोहिणीतीर्थं दारुतीर्थं च सत्तमाः
ब्रह्मावर्तं चपत्रेशं वाह्नं सौरं चकीर्त्यते । मेघनादं दारुतीर्थं देवतीर्थं गुहाश्रयम् ॥
नर्मदेश्वरसञ्ज्ञं तत्कपिलातीर्थमुत्तमम् । करंजेशं कुण्डलेशं पिपलादमतः परम् ॥
विमलेश्वरतीर्थं चपुष्करिण्याश्चसङ्गमः । प्रशंसाशूलभेदस्य तत्रैवाऽन्धकविक्रमः

देवाश्वासनदानं चतथैवान्धकनिग्रहः । शूलभेदस्य चोत्पत्तिस्तथापात्रपरीक्षणम्

प्रशंसा दानधर्मस्य ऋषिश्रृङ्गानुभावनम् ।

स्वर्गतिं दीर्घतपसो भानुमत्यास्तथेङ्गितम् ॥ ४८ ॥

शबरस्वर्गगमनं माहात्म्यं शूलभेदजम् । कपिलेश्वरतीर्थं च मोक्षतीर्थमतः परम्

सङ्गमो मोक्षनद्याश्च तीर्थं च विमलेश्वरम् ।

तथैवोलूकतीर्थं च पुष्करिण्याश्च सङ्गमः ॥ ५० ॥

आदित्येश्वरतीर्थं च तीर्थं वै सङ्गमेश्वरम् ।

सङ्गमो भीमकुल्यायास्तीर्थं भीमेश्वरं शुभम् ॥ ५१ ॥

मार्कण्डेश्वरतीर्थं चतथावै पिप्पश्वरम् । करोटीश्वरतीर्थं च तीर्थमिन्द्रेश्वरं शुभम्

अगस्त्येशं कुमारेशं व्यासेश्वरमनुत्तमम् । वैद्यनाथं च केदारमानन्देश्वरसंज्ञितम्

मातृतीर्थं च मुण्डेशं चौरं कामेश्वरं तथा । सङ्गमश्चानुदुह्याचैतीर्थेभीमार्जुनाह्वये

तीर्थं धर्मेश्वरं नाम लुङ्केश्वरमतः परम् ॥ ५४ ॥

ततो धनदतीर्थं च जटेशं मङ्गलेश्वरम् । कपिलेश्वर तीर्थं च गोपारेश्वरमुत्तमम् ॥

मणिनागेश्वरं नाम मणिनद्याश्च सङ्गमः । तिलकेश्वरतीर्थं च गौतमेशमतः परम्

भीमेश्वरं च चन्द्रेशमश्ववत्याश्च सङ्गमः । बह्वीश्वरं नारदेशं वैद्यनाथं कपीश्वरम्

कुम्भेश्वरं च मार्कण्डं रामेशं लक्ष्मणेश्वरम् । मेघेश्वरंमत्स्यकेशमप्सराह्रदसञ्ज्ञकम्

दधिस्कन्दं मधुस्कन्दं नन्दिकेशं च वारुणम् ।

पावकेश्वरतीर्थं च तथैव कपिलेश्वरम् ॥ ६० ॥

नारायणाह्वयं तीर्थं चक्रतीर्थमनुत्तमम् ।

चण्डादित्यं परं तीर्थं चण्डिकातीर्थमुत्तमम् ॥ ६१ ॥

यमहासाह्वयं तीर्थं तथा गङ्गेश्वरंशुभम् । नन्दिकेश्वरसञ्ज्ञंच नरनारायणाह्वयम् ॥

नलेश्वरं च मार्कण्डं शुक्लतीर्थमतःपरम् । व्यासेश्वरं परंतीर्थं तत्र सिद्धेश्वरं तथा

कोटितीर्थं प्रभातीर्थं वासुकीश्वरमुत्तमम् । सङ्गमश्चकरञ्जाया मार्कण्डेश्वरमुत्तमम्

तीर्थं कोटीश्वरंनाम तथा सङ्कर्षणाह्वयम् । कनकेशं मन्मथेशंतीर्थंचैवानसूयकम् ॥

एरण्डीसङ्गमःपुण्यो मातृतीर्थं च शोभनम् ।

तीर्थं स्वर्णशलाकाख्यं तथा चैवाम्बिकेश्वरम् ॥ ६६ ॥

करञ्जेशं भारतेशं नागेशं मुकुटेश्वरम् । सौभाग्यसुन्दरीतीर्थं धनदेश्वरमुत्तमम् ॥

रोहिण्यं चक्रतीर्थं च उत्तरेश्वरसञ्ज्ञितम् । भोगेश्वरं च केदारं निष्कलङ्कमतःपरम्

मार्कण्डं धौतपापं च तीर्थमाङ्गिरसेश्वरम् । कोटवीसङ्गमःपुण्यंकोटितीर्थंचतत्रवै

अयोनिजं परं तीर्थमङ्गारेश्वरमुत्तमम् ।

स्कान्दं च नार्मदं ब्राह्मं वाल्मीकेश्वरसञ्ज्ञितम् ॥ ७० ॥

कोटितीर्थं कपालेशं पाण्डुतीर्थं त्रिलोचनम् ।

कपिलेशं कम्बुकेशं प्रभासं कोहनेश्वरम् ॥ ७१ ॥

चन्द्रेशं वालुकेशं च देवेशं शाक्रमेव च । नागेश्वरं गौतमेशमहल्यातीर्थमुत्तमम् ॥

रामेश्वरं मोक्षतीर्थं तथाकुशलवेश्वरौ । नर्मदेशं कपर्द्दीशं सागरेशमतः परम् ॥ ७२

धौरादित्यं परंतीर्थं तीर्थं चापरयोनिजम् । पिङ्गलेश्वरतीर्थं च भृग्वीश्वरमनुत्तमम्

दशाश्वमेधिकं तीर्थं कोटितीर्थं च सत्तमाः ।

मार्कण्डं ब्रह्मतीर्थं च आदिवाराहमुत्तमम् ॥ ७५ ॥

आशापुराभिधं तीर्थं कौबेरं मारुतं तथा । वरुणेशं यमेशं च रामेशं कर्कटेश्वरम्

शक्रेशं सोमतीर्थं च नन्दाह्रदमनुत्तमम् । वैष्णवं चक्रतीर्थं च रामकेशवसञ्ज्ञितम्

तथैवरुक्मिणीतीर्थं शिवतीर्थमनुत्तमम् । जयवाराहतीर्थंच तीर्थमस्माहकाह्वयम्

अङ्गारेशं च सिद्धेशं तापेश्वरमतः परम् । पुनः सिद्धेश्वरं नाम तीर्थं च वरुणेश्वरम्

पाराशरेश्वरं पुण्यं कुसुमेशमनुत्तमम् । कुण्डलेश्वरतीर्थं च तथा कलकलेश्वरम् ॥

त्र्यङ्कुवाराहसञ्ज्ञं च अङ्कोलं तीर्थमुत्तमम् । श्वेतवाराहतीर्थं चभार्गलंसौरमुत्तमम्

हुङ्कारस्वामितीर्थं च शुक्लतीर्थं च शोभनम् ।

सङ्गमो मधुमत्याश्च तीर्थं वै सङ्गमेश्वरम् ॥ ८२ ॥

नर्मदेश्वरसञ्ज्ञं च नदीत्रितयसङ्गमः । अनेकेश्वरतीर्थं च शर्मेशं मोक्षसञ्ज्ञितम् ॥

कावेरीसङ्गमः पुण्यस्तीर्थं गोपेश्वराह्वयम् । मार्कण्डेशंचनागेशमुदम्बर्याश्च सङ्गमः

साम्बादित्याह्वयं तीर्थमुदम्बर्याश्च सङ्गमः ।
सिद्धेश्वरं च मार्क्कण्डं तथा सिद्धेश्वरीकृतम् ॥ ८५ ॥

गोपेशं कपिलेशं च वैद्यनाथमनुत्तमम् । पिङ्गलेश्वरतीर्थं च सैन्धवायतनं महत् ॥ भूर्तीश्वराह्वयं तीर्थं गङ्गावाहमतः परम् । गौतमेश्वरतीर्थं च दशाश्वमेधिकं तथा

भृगुतीर्थं तथा पुण्यं ख्याता सौभाग्यसुन्दरी ।
वृषखातं च तत्रैव केदारं धूतपातकम् ॥ ८८ ॥

तीर्थं धूतेश्वरीसङ्गमेरण्डीसञ्ज्ञकं तथा । तीर्थं च कनकेश्वर्या ज्वालेश्वरं ततः परम् शालग्रामाह्वयं तीर्थं सोमनाथमनुत्तमम् । तथैवोदीर्णवाराहंतीर्थं चन्द्रप्रभासकम् द्वादशादित्यतीर्थंचतथासिद्धेश्वराभिधम् । कपिलेश्वरतीर्थंच तथात्रैविक्रमं शुभम् विश्वरूपाह्वयंतीर्थं नारायणकृतं तथा । मूलश्रीपतितीर्थंच चौलश्रीपतिसञ्ज्ञकम् देवतीर्थं हंसतीर्थं प्रभासं तीर्थमुत्तमम् । मूलस्थानं च कण्टेशमट्टहासमतः परम् ॥ भूभुर्वेश्वरतीर्थंच ख्याताशूलेश्वरी तथा । सारस्वतंदारुकेशमश्विनोस्तीर्थमुत्तमम् सावित्रीतीर्थमतुलंवालखिल्येश्वरं तथा । नर्मदेशं मातृतीर्थंदेवतीर्थमनुत्तमम् ॥

मच्छकेश्वरतीर्थंच शिखितीर्थं च शोभनम् ।
कोटितीर्थं मुनिश्रेष्ठास्तत्रकोटीश्वरी मृडा ॥ ९६ ॥

तीर्थंपैतामहंनाम माण्डव्येश्वरसञ्ज्ञितम् । तत्रनारायणेशश्चअक्रूरेशमतः परम् ॥ देवखातं सिद्धरुद्रं वैद्यनाथमनुत्तमम् । तथैव मातृतीर्थंच उत्तरेशमतः परम् ॥ ९८॥ तथैवनर्मदेशं च मातृतीर्थं तथा पुनः । तथा च कुररीतीर्थं ढौण्ढेशं दशकन्यकम् सुवर्णबिन्दुतीर्थं च ऋणपापप्रमोचनम् । भारभूतेश्वरं तीर्थं तथा मुण्डीश्वरंविदुः

एकशालं डिण्डिपाणिं तीर्थं चाप्सरसं परम् ।
मुन्यालयं च मार्कण्डं गणितादेवताह्वयम् ॥ १०१ ॥

आमलेश्वरतीर्थंश्च तीर्थं कन्थेश्वरं तथा । आषाढीतीर्थमित्याहुःश्रृङ्गीतीर्थंतथैव च श्रीबकेश्वरतीर्थं च कपालेशं तथैव च । मार्कण्डं कपिलेशं च एरण्डीसङ्गमस्तथा एरण्डीदेवतातीर्थं रामतीर्थमतः परम् । जमदग्नेः परं तीर्थं रेवासागरसङ्गमः

लोटणेश्वरतीर्थं तल्लुङ्केशनामकं तथा । वृषखातं तत्र कुण्डं तथैव ऋषिसत्तमाः तथा हंसेयुरंनाम तिलादं वासवेश्वरम् । तथा कोटीश्वरं तीर्थमलिकातीर्थमुत्तमम्

विमलेश्वरतीर्थं च रेवासागरसङ्गमे ॥ १०६ ॥
एवं तीर्थावलिः पुण्या मया प्रोक्ता महर्षयः ।
तीर्थमुक्तावलिः पुण्या ग्रथिता तटरज्जुना ॥ १०७ ॥

नर्मदानीरनिर्णिक्ता मार्कण्डेयविनिर्मिता । मण्डनायेहसाधूनांसर्वलोकहितायच

दुरितध्वान्तशमनी धार्या धर्मार्थिभिः सदा ।
अहोरात्रकृतं पापं सकृज्जप्त्वाऽऽशु नाशयेत् ॥ १०६ ॥
त्रिकालं जप्त्वा मासोत्थं शिवाग्रे च त्रिमासिकम् ।
मासं जप्त्वाऽथ वर्षोत्थं वर्षं जप्त्वा शताब्दिकम् ॥ ११० ॥
श्राद्धकाले च विप्राणां भुञ्जतां पुरतः स्थितः ।
पठँस्तीर्थावलिं पुण्यां गयाश्राद्धप्रदो भवेत् ॥ १११ ॥

पूजाकाले च देवानां श्रद्धया पुरतः पठन् । प्रीणयेत्सर्वदेवांश्च पुनातिसकलंकुलम्

एवं तीर्थावलिः पुण्या रेवातीरद्वयाश्रिता ।
मया प्रोक्ता मुनिश्रेष्ठास्तथैव श्रृणुताऽनघाः ॥ ११३ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे तीर्थावलिकथनंनाम त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥

एकत्रिंशदधिकद्विशततमोऽध्यायः

तीर्थसङ्ख्यापरिगणनवर्णनम्

श्रीसूत उवाच

तथैव तीर्थस्तबकान्वक्ष्येहमृषिसत्तमाः । यैस्तुतीर्थावलीगुम्फःपूर्वोक्तैरेकतः कृतः
विभक्तो भक्तलोकानामानन्दप्रथनः शुभः । मृकण्डतनयः पूर्वं प्राह पार्थाय पृच्छते

यथा तथाऽहं वक्ष्यामि तीर्थानां स्तबकानिह ।
शिवाम्बुपानजा पुण्या रेवाकल्पलता किल ॥ ३ ॥

तीरद्वयोद्भूततीर्थप्रसूनैःपुष्पिताशुभा । यत्पुण्यगन्धलक्ष्म्यावैत्रैलोक्यंसुरभीकृतम्
तत्पुष्पमकरन्दस्य रसास्वादविदुत्तमः । भ्रमरः खलुमार्कण्डो मुनिर्मतिमतां वरः
तत्पुष्पमालां हृदये तीर्थस्तबकचित्रिताम् । दधातिसततंपुण्यांमुनिर्भृगुकुलोद्वहः

तस्याः स्तबकसंस्थानं वक्ष्येऽहमृषिसत्तमाः ॥ ६ ॥

ॐकारतीर्थमारभ्य यावत्पश्चिमसागरम् । सङ्गमाःपञ्चत्रिंशद्वैनदीनां पापनाशनाः
दशैकमुत्तरे तीरे सत्रिविंशति दक्षिणे । पञ्चत्रिंशत्तमः श्रेष्ठो रेवासागरसङ्गमः ॥
सङ्गमैःसहितान्येवंरेवातीरद्वयेऽपिच । चतुःशतानितीर्थानिप्रसिद्धानिद्विजोत्तमाः

त्रिशतं शिवतीर्थानि त्रयस्त्रिंशत्समन्वितम् ।
तत्राऽपि व्यक्तितो वक्ष्ये शृणुध्वं तानि सत्तमाः !॥ १० ॥

मार्कण्डेश्वरतीर्थानि दशतेषु मुनीश्वराः । दशादित्यभवान्यत्र नवैव कपिलेश्वराः

सोमसंस्थापितान्यष्टौ तावन्तो नर्मदेश्वराः ।
कोटितीर्थान्यथाष्टौ च सप्त सिद्धेश्वरास्तथा ॥ १२ ॥

नागेश्वराश्च सप्तैव रेवातीरद्वयेऽपि तु । सप्तैव वह्निविहितान्यथाप्यावर्तसप्तकम्
केदारेश्वरतीर्थानि पञ्च पञ्चेन्द्रजानि च । वरुणेशाश्च पञ्चैव पञ्चैव धनदेश्वराः
देवतीर्थानि पञ्चैव चत्वारोवैयमेश्वराः । वैद्यनाथाश्च चत्वारश्चत्वारोवानरेश्वराः

अङ्गारेश्वतीर्थानितावन्त्येवमुनीश्वराः । सारस्वतानिचत्वारिचत्वारोदारुकेश्वराः
गौतमेश्वरतीर्थानि त्रीणिरामेश्वरास्त्रयः । कपालेश्वरतीर्थानित्रीणिहंसकृतानि च
त्रीण्येव मोक्षतीर्थानि त्रयोवैविमलेश्वराः । सहस्रयज्ञतीर्थानि त्रीण्येवमुनिरब्रवीत्

भीमेश्वरास्त्रयः ख्याताः स्वर्णतीर्थानि त्रीणि च ।
धौतपापद्वयं प्रोक्तं करञ्जेशद्वयं तथा ॥ १६ ॥

ऋणमोचनतीर्थेद्वे तथास्कन्देश्वरद्वयम् । दशाश्वमेधतीर्थे द्वे नन्दीतीर्थद्वयं द्विजाः
मन्मथेशद्वयं चैव भृगुतीर्थद्वयं तथा । पराशरेश्वरौ द्वौ च अयोनीसम्भवद्वयम् ॥
व्यासेश्वरद्वयं प्रोक्तंपितृतीर्थद्वयं तथा । नन्दिकेश्वरतीर्थेद्वे द्वौ चगोपेश्वरौस्मृतौ
मारुतेशद्वयं तद्वद् द्वौच ज्वालेश्वरौ स्मृतौ । शुक्लतीर्थद्वयंपुण्यमप्सरेशद्वयंचथा
पिप्पलेश्वरतीर्थे द्वे माण्डव्येश्वरसञ्ज्ञिते । द्वीपेश्वरद्वयं चैव प्राह तद्वद् भृगूद्वह !

उत्तरेश्वरतीर्थे द्वे अशोकेशद्वयी तथा ॥ २४ ॥

द्वे योधनपुरे चैव रोहिणीतीर्थकद्वयम् । लुङ्केश्वरद्वयंख्यातमाख्यानं मुनिना तथा
सैकोनविंशतिशतं तीर्थान्येकैकशोद्विजाः । स्तबकेषुक्तंतीर्थंद्विशतं स चतुर्दशम् ॥

शैवान्येतानि तीर्थानि वैष्णवानि च सत्तमाः !।
शृणुध्वं प्रोच्यमानानि ब्राह्मशाक्तानि च क्रमात् ॥ २७ ॥

अष्टाविंशति तीर्थानिवैष्णवान्यब्रवीन्मुनिः । तेषुवाराहतीर्थानिषडेवमुनिसत्तमाः

चत्वारि चक्रतीर्थानि शेषाण्यष्टादशैव हि ।
विष्णुनाऽधितिष्ठितान्येव प्राह पूर्वं मृकण्डजः ॥ २९ ॥

तथैव ब्रह्मणा सिद्ध्यै सप्ततीर्थान्यवीवदत् । त्रिषुचब्रह्मणः पूजाब्रह्मेशाश्चतुरोऽपरे

अष्टाविंशन्मया ख्याता यथासङ्ख्यं यथाक्रमम् ।

एतत्पवित्रमतुलं ह्येतत्पापहरं परम् । नर्मदाचरितं पुण्यं माहात्म्यं मुनिभाषितम्

सूत उवाच

एवमुद्देशतःप्रोक्तोरेवातीर्थक्रमो मया । यथापार्थायसङ्क्षेपान्मार्कण्डोमुनिरब्रवीत्
अवान्तराणितीर्थानितेषुगुप्तान्यनेकशः । यत्रयावत्प्रमाणानितान्याकर्णयतानघाः

ॐकारतीर्थपरितः पर्वतादमरङ्कटात् । क्रोशद्वये सर्वदिक्षु सार्द्धकोटीत्रयीमता ॥
तीर्थानां सङ्ख्यया गुप्तप्रकटानां द्विजोत्तमाः ॥
कोटिरेका तु तीर्थानां कपिलासङ्गमे पृथक् ॥ ३५ ॥
अशोकवनिकायाश्च तीर्थं लक्षं प्रतिष्ठितम् । शतमङ्गारगर्तायाःसङ्गमे मुनिसत्तमाः
तीर्थानामयुतं तद्वत्कुब्जायाः सङ्गमे स्थितम् ।
शतं हिरण्यगर्भायाः सङ्गमे समवस्थितम् ॥ ३७ ॥
तीर्थानामष्टषष्टिश्च विशोकासङ्गमे स्थिता ।
तथा सहस्रं तीर्थानां संस्थितं वायुसङ्गमे ॥ ३८ ॥
शतं सरस्वतीसङ्गे शुक्लतीर्थशतद्वयम् । सहस्रंविष्णुतीर्थेषुमाहिष्मत्यामथायुतम्
शूलभेदे च तीर्थानां साग्रं लक्षं स्थितं द्विजाः ।
देवग्रामे सहस्रं च तीर्थानां मुनिरब्रवीत् ॥ ४० ॥
लुङ्केश्वरे च तीर्थानां साग्रासप्तशतीस्थिता । तीर्थान्यष्टोत्तरशतंमणिनद्याश्चसङ्गमे
वैद्यनाथं च तीर्थानां शतमष्टाधिकं विदुः ॥ ४१ ॥
एवं तावत्प्रमाणानितीर्थेकुम्भेश्वरेद्विजाः । साग्रंलक्षंचतीर्थानांस्थितंरेवोरसङ्गमे
ततश्चाऽप्यधिकानि स्युरिति मार्कण्डभाषितम् ।
अष्टाशीतिसहस्राणिव्यासद्वीपाश्रितानि च ॥ ४३ ॥
सङ्गमे चकरञ्जायाः स्थितमष्टोत्तरायुतम् । एरण्डीसङ्गमेतद्वत्तीर्थान्यष्टाधिकंशतम्
धूतपापे च तीर्थानां षष्टिरष्टाधिकास्थिता ।
स्कन्दतीर्थे शतं पुण्यं तीर्थानां मुनिरुक्तवान् ॥ ४५ ॥
कोहनेशे च तीर्थानां षष्टिरष्टाधिका स्थिता ।
सार्द्धकोटी च तीर्थानां स्थिता वै कोरिलापुरे ॥ ४६ ॥
रामकेशवतीर्थं च सहस्रं साग्रमुक्तवान् ।
अस्माहके सहस्रं च तीर्थानि निवसन्ति हि ॥ ४७ ॥
लक्षाष्टकं सहस्रे द्वे शुक्लतीर्थेद्विजोत्तमाः । तीर्थानिकथयामास पुरापार्थायभार्गवः

शतमष्टाधिकं प्राह प्रत्येकं सङ्गमेषु च । नदीनामवशिष्टानां कावेरीसङ्गमं विना
कावेर्याः सङ्गमे विप्राः स्थिता पञ्चशती तथा ।
तीर्थानां पर्वसु तथा विशेषो मुनिनोदितः ॥ ५० ॥
मोक्षतीर्थं हि सत्प्राहुः पुराणपुरुषाश्रितम् ।
भृगोः क्षेत्रे च तीर्थानां कोटिरेका समाश्रिता ॥ ५१ ॥
साधिकानामृषिश्रेष्ठा वक्तुंशक्तोहिकोभवेत् । सर्वामराश्रयंप्रोक्तंसर्वतीर्थाश्रयंतथा
त्रिषु लोकेषु विख्यातं पूजितं सिद्धिसाधनम् ।
भारभूत्यां च तीर्थानां स्थितमष्टोत्तरं शतम् ॥ ५३ ॥
अक्रूरेश्वरतीर्थे च सार्द्धं तीर्थशतं स्थितम् । विमलेश्वरतीर्थे तु रेवासागरसङ्गमे
दशायुतानि तीर्थानां साधिकान्याब्रवीन्मुनिः ॥ ५४ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे तीर्थसंख्यापरिगणनवर्णनं नामैकत्रिंशदधिकद्विशततमोऽध्यायः

द्वात्रिंशदधिकद्विशततमोऽध्यायः

रेवाखण्डपुस्तकदानादिमाहात्म्यवर्णनम्

सूत उवाच

इतिवः कथितं विप्रारेवामाहात्म्यमुत्तमम् । यथोपदिष्टंपार्थाय मार्कण्डेयेनवैपुरा
तथा तीर्थकदम्बाश्च तेषु तीर्थविशेषतः ।
प्राधान्येन मया ख्याता यथासङ्ख्यं यथाक्रमम् ॥ २ ॥
एतत्पवित्रमतुलं ह्येतत्पापहरं परम् । नर्मदाचरितं पुण्यं माहात्म्यं मुनिभाषितम्
सप्तकल्पानुगो विप्रो नर्मदायांमुनीश्वराः । मृकण्डतनयो धीमान्परमार्थविदुत्तमः
संसेव्य सर्वतीर्थानि नदीःसर्वाश्चवैपुरा । बहुकल्पस्मरां रेवामालक्ष्यशिवदेहजाम्

मेकलेति चशर्वोक्तां शरणंशर्वजां ययौ । अजराममरांदेवीं दैत्यध्वंसकरीं पराम्
महाविभवसंयुक्तां भवघ्नीं भवजाह्नवीम् ।
तस्यामाबध्य सत्प्रेम जातः सोऽप्यजरामरः ॥ ७ ॥
षष्टितीर्थसहस्राणिषष्टिकोट्यश्चसत्तमाः । व्यवस्थितानि रेवायास्तीरयुग्मेपदेपदे
सरितः परितः सन्ति सतीर्थास्तु सहस्रशः ।
नतुलां यान्ति रेवायास्ताश्च मन्ये मुनीश्वराः !॥ ६ ॥
एतद्वः कथितंसर्वंयत्पृष्टमखिलंद्विजाः । यन्महेशमुखाच्छ्रुत्वावायुराह ऋषीन्प्रति
तद्वन्मृकण्डतनयोऽप्यनूभूयाखिलां नदीम् ।
सतीर्थां पदशः प्राह पाण्डुपुत्राय पावनीम् ॥ ११ ॥
एतच्च कथितं सर्वं सङ्क्षेपेणद्विजोत्तमाः । नर्मदाचरितंपुण्यं त्रिषु लोकेषु दुर्लभम्
किमन्यैः सरितां तोयैः सेवितैस्तु सहस्रशः ।
यदि संसेव्यते तोयं रेवायाः पापनाशनम् ॥ १३ ॥
मेकलाजलसंसेवी मुक्तिमाप्नोति शाश्वतीम् ॥ १४ ॥
यथा यथा भजेन्मर्त्यो यद्यदिच्छति तीर्थगः ।
तत्तदाप्नोति नियतं श्रद्धयाऽश्रद्धयापि च ॥ १५ ॥
इदं ब्रह्माहरिरिदमिदं साक्षात्परोहरः । इदं ब्रह्म निराकारं कैवल्यं नर्मदाजलम्
तावद्गर्जन्ति तीर्थानि नद्योहृद्यफलप्रदाः । यावन्नस्मर्यते रेवासेवाहेवा कलौ नरैः
ध्रुवं लोके हितार्थाय शिवेन स्वशरीरतः । शक्तिः कापिसरिद्रूपा रेवेयमवतारिता
तावद्गर्जन्ति यज्ञाश्च वनक्षेत्रादयो भृशम् । यावन्ननर्मदानाम कीर्तनं क्रियते कलौ
गरिमा गण्यते तावत्तपोदानव्रतादिषु । नरैर्वा प्राप्यते यावद्धुविभर्गभवा धुनी
ये वसन्त्युत्तरेकूले रुद्रस्यानुचरा हि ते ।
वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम् ॥ २१ ॥
धन्यास्ते देशवर्यास्ते येषु देशेषु नर्मदा । नरकान्तकरीशश्वत्संश्रिताशर्वनिर्मिता
कृतपुण्याश्च ते लोकाः शोकाय न भवन्ति ते ।

ये पिबन्ति जलं पुण्यं पार्वतीपतिसिन्धुजम् ॥ २३ ॥
इदं पवित्रमतुलं रेवायाश्चरितं द्विजाः । शृणोति यःकीर्तयते मुच्यते सर्वपातकैः
यत्फलंसर्ववेदैश्च सषडङ्गपदक्रमैः । श्रुतैश्च पठितैस्तस्मात्फलमष्टगुणं भवेत् ॥ २५
सत्रयाजी फलं यच्च लभतेद्वादशाब्दिकम् । श्रुत्वासकृच्चरेवायाश्चरितंतत्फलंलभेत्
सर्वतीर्थावगाहाच्च यत्फलं सागरादिषु ।
सकृच्छ्रुत्वा च माहात्म्यं रेवायास्तत्फलं लभेत् ॥ २७ ॥
एतद्धर्म्यमुपाख्यानं सर्वशास्त्रेष्वनुत्तमम् । देशे वा मण्डले वापि नगरे ग्राममध्यतः
गृहे वा तिष्ठते यस्य लिखितं सार्ववर्णिकम् ।
स ब्रह्मा स शिवः साक्षात्स च देवो जनार्दनः ॥ २६ ॥
धर्मार्थकाममोक्षाणां मार्गोऽयं देवसेवितः ।
गुरूणां च गुरुः शास्त्रं परमं सिद्धिकारणम् ॥ ३० ॥
यश्चेदंशृणुयान्नित्यंपुराणंदेवभाषितम् । ब्राह्मणोवेदवान्भूयात्क्षत्त्रियोविजयीभवेत्
धनाढ्यो जायते वैश्यः शूद्रो:वै धर्मभाग्भवेत् ॥ ३२ ॥
सौभाग्यसन्ततिं नारीं श्रुत्वैतत्समवाप्नुयात् ।
श्रियं सौख्यं स्वर्गवासं जन्म चैवोत्तमे कुले ॥ ३३ ॥
रसभेदी कृतघ्नश्च स्वामिध्रुङ् मित्रवञ्चकः । गोघ्नश्च गरदश्चैव कन्याविक्रयकारकः
ब्रह्मघ्नश्चसुरापी चस्तेयी च गुरुतल्पगः । नर्मदाचरितं शृण्वंस्तामब्दं योऽभिषेवते
सर्वपापविनिर्मुक्तो जायते नात्र संशयः । पाकभेदी वृथापाकी देवब्राह्मणनिन्दकः
परीवादीगुरोःपित्रोः साधूनां नृपतेस्तदा ।
तेऽपि श्रुत्वा च पापेभ्यो मुच्यन्ते नाऽत्र संशयः ॥ ३७ ॥
ये पुनर्भावितात्मानः शास्त्रं शृण्वन्ति नित्यशः ।
पूजयन्ति च तच्छास्त्रं नार्मदं वस्त्रभूषणैः ३८ ॥
पुष्पैःफलैश्चन्दनाद्यैर्भोजनैर्विविधैरपि । शास्त्रेऽस्मिन्पूजितेदेवा पूजितागुरवस्तथा
इहलोकेपरेचैव नात्रकार्या विचारणा । तस्मात्सर्वप्रयत्नेन गन्धवस्त्रादिभूषणैः ॥

पूजयेत्परया भक्त्या वाचकं शास्त्रमेव च । वेदपाठैश्च यत्पुण्यमग्निहोत्रैश्चपालितैः
तत्फलं समवाप्नोति नर्मदाचरिते शुभे । कुरुक्षेत्रे च यत्पुण्यं प्रभासे पुष्करे तथा
रुद्रावर्ते गयायां च वाराणस्यां विशेषतः । गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे
एवमादिषु तीर्थेषु यत्पुण्यंजायते नृणाम् । नर्मदाचरितंश्रुत्वातत्पुण्यंसकलंलभेत्

आदिमध्यावसानेषु नर्मदाचरितं शुभम् ।
यः शृणोति नरो भक्त्या शृणुध्वं तत्फलं महत् ॥ ४५ ॥

समाप्य शिवसंस्थानं देवकन्यासमावृतः । रुद्रस्यानुचरोभूत्वा शिवेनसहमोदते
धर्माख्यानमिदंपुण्यं सर्वाख्यानेष्वनुत्तमम् । गृहेऽपिपठ्यतेयस्यचतुर्वर्णस्यसत्तमाः
धन्यं तस्यगृहेमन्ये गृहस्थंचापि तत्कुलम् । पुस्तकंपूजयेयस्तु नर्मदाचरितस्य तु
नर्मदा पूजिता तेन भगवांश्च महेश्वरः । वाचके पूजितेतद्वद्देवाश्चऋषयोऽर्चिताः ॥
लेखयित्वा च सकलं रेवाचरितमुत्तमम् । भूषणं सर्वशास्त्राणांयोददातिद्विजन्मने
नर्मदा सर्वतीर्थेषु स्नानदानेन यत्फलम् । तत्फलंसमवाप्नोति सनरोनाऽत्र संशयः
एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदम् । स्वर्गदं पुत्रदं धन्यं यशस्यं कीर्त्तिवर्धनम्

धर्म्यमायुष्यमतुलं दुःखदुःस्वप्ननाशनम् ।
पठतां शृण्वतां चापि सर्वकामार्थसिद्धिदम् ॥ ५३ ॥
यत्प्रदत्तमिदं पुण्यं पुराणं वाच्यते द्विजैः ।
शिवलोके स्थितिस्तस्य पुराणाक्षरवत्सरी ॥ ५४ ॥

इति निगदितमेतन्नर्मदायाश्चरित्रं पवनगदितमग्र्यं शर्ववक्त्रादवाप्य ।
त्रिभुवनजनवन्द्यं त्वेतदादौ मुनीनां कुलपतिपुरतस्तत्सूतमुख्येन साधु ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डे रेवाखण्डसमाप्तिवर्णनंनामद्वात्रिंशदधिकद्विशततमोऽध्यायः ॥

॥ श्रीगणेशायनमः ॥

* त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः

सत्यनारायणविप्रसम्वादवर्णनम्

ऋषय ऊचुः

व्रतेन तपसा वाऽपि प्राप्यते वाञ्छितं फलम् ।
सर्वं तच्छ्रोतुमिच्छामि कथयस्व महामुने ॥ १ ॥

श्रीसूत उवाच

नारदेनैवमुक्तःस भगवान् कमलापतिः । सुरर्षयेयथाप्राहतच्छृणुध्वं समाहिताः ॥
एकदा नारदोयोगीपरानुग्रहकाम्यया । पर्यटन् विविधाँल्लोकान्मर्त्यलोकमुपागतः

तत्र दृष्ट्वा जनाः सर्व्वे नानादुःखसमन्विताः ।
नानायोनिसमुत्पन्नाः क्लिश्यन्ते पापकर्मभिः ॥ ४ ॥

केनोपायेनचैतेषांदुःखनाशोभवेद्ध्रुवम् । इतिसञ्चिन्त्यमनसाविष्णुलोकंगतस्तदा
तत्रनारायणंदेवं शुक्लवर्णंचतुर्भुजम् । शङ्खचक्रगदापद्मवनमालाविभूषितम् ॥ ६ ॥

दृष्ट्वा तं देवदेवेशं वक्तुं समुपचक्रमे ।

नारद उवाच

नमस्ते वाङ्मनोऽतीतरूपायाऽनन्तशक्तये ।
आदिमध्यान्तहीनाय निर्गुणाय गुणात्मने ॥ ७ ॥

* मोहमयीस्थ श्रीवेङ्कटेश्वरमुद्रणालयप्रकाशितेऽवन्तीखण्डेइतः पूर्वं रेवाखण्ड समाप्तिर्दृश्यते । वङ्गवासीमुद्रणालयप्रकाशितेइतोऽग्रेसत्यनारायणव्रत-कथात्मकः पाठोऽधिकः उपलभ्यते स एवाऽधुना विदुषाम्मुदेप्रस्तूयत इति सम्पादकयोः ।

सर्वेषामादिभूतायभक्तानामार्त्तिनाशिने । श्रुत्वास्तोत्रंततोविष्णुर्नारदंप्रत्यभाषत

श्रीभगवानुवाच

किमर्थमागतोऽसित्वं किन्तेमनसिवर्त्तते । कथयस्वमहाभाग!तत्सर्वंकथयामि ते

नारद उवाच

मर्त्यलोके जनाःसर्वे नानाक्लेशसमन्विताः ।

नानायोनिसमुत्पन्नाः पच्यन्ते पापकर्मभिः ॥ १० ॥

तत्सर्वं शमयेन्नाथ! लघूपायेन तद्वद । श्रोतुमिच्छामितत्सर्वंकृपाऽस्तियदिते मयि

श्रीभगवानुवाच

साधुपृष्टंत्वयावत्स!लोकानुग्रहकाम्यया ।यत्कृत्वामुच्यतेमोहात्तच्छृणुष्ववदामिते

व्रतमस्ति महापुण्यं स्वर्गे भुवि सुदुर्लभम् ।

तव स्नेहान्मया विप्र! प्रकाशः क्रियतेऽधुना ॥ १३ ॥

सत्यनारायणस्यैतद् व्रतं सम्यग् विधानतः ।

कृत्वा सम्यक् सुखं भुक्त्वा परे मोक्षमवाप्नुयात् ॥ १४ ॥

तच्छ्रुत्वा भगवद्वाक्यं नारदःपुनरब्रवीत् । किं फलंकिंविधानञ्चकृतंवाकेनतद्व्रतम्

तत्सर्वं विस्तराद् ब्रूहि कदा कार्यं व्रतं हि तत् ॥ १५ ॥

श्रीभगवानुवाच

दुःखशोकादिशमनं धनधान्यविवर्द्धनम् । सौभाग्यसन्ततिकरं सर्वत्र विजयप्रदम्

यस्मिन् कस्मिन्दिने मर्त्यो भक्तिश्रद्धासमन्वितः ।

सत्यनारायणं देवं यजेत्तुष्टो निशामुखे ॥ १७ ॥

बान्धवैर्ब्राह्मणैश्चैव सहितोधर्मतत्परः । नैवेद्यं भक्तितोदद्यात्प्रसादंभक्ष्यमुत्तमम्

रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम् ।

अभावेशालिचूर्णम्वा शर्कराम्वा गुडन्तथा ॥ १९ ॥

प्रसादं सर्वभक्ष्याणि एकीकृत्य निवेदयेत् ।

विप्राय दक्षिणां दद्यात् कथां श्रुत्वा जनैः सह ॥ २० ॥

ततश्चबन्धुभिः सार्द्धं विप्रेभ्यः प्रतिपादयन् ।

प्रसादं भक्षयेद् भक्त्या नृत्यगीतादिकञ्चरेत् ॥ २१ ॥

ततः स्तुत्वा गृहं गच्छेत् सत्यनारायणं स्मरन् ।

एवं कृते मनुष्याणां वाञ्छासिद्धिर्भवेद् ध्रुवम् ॥ २२ ॥

विशेषतः कलियुगे नान्योपायोऽस्ति भूतले ।

कथामस्य प्रवक्ष्यामि कृतकृत्यो भवेद् द्विज !॥ २३ ॥

कश्चित् काशीपुरे ग्रामे आसीद्विप्रश्च निर्द्धनः ।

क्षुत्तृष्णाव्याकुलो भूत्वा सततं भ्रमते महीम् ॥ २४ ॥

दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मणप्रियः । वृद्धब्राह्मणरूपेणपप्रच्छद्विजमादरात्

किमर्थं भ्रमसे विप्र ! महीं कृत्स्नां सुदुःखितः ।

तत्सर्वं श्रोतुमिच्छामि कथ्यतां यदि रोचते ॥ २६ ॥

ब्राह्मण उवाच

ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं भ्रमणं मम ।

उपायं यदि जानासि कृपया कथय प्रभो ! ॥ २७ ॥

वृद्धब्राह्मण उवाच

सत्यनारायणोविष्णुर्वाञ्छितार्थफलप्रदः । तस्यत्वंद्विजशार्दूल!कुरुष्वव्रतमुत्तमम्

यत्कृत्वा सर्व्वदुखेभ्यो मुक्तो भवति मानवः ॥ २८ ॥

श्रीभगवानुवाच

विधानञ्च व्रतस्याऽस्य विप्रायाऽऽभाष्य यत्नतः ।

सत्यनारायणो वृद्धस्तत्रैवाऽन्तरधीयत ॥ २९ ॥

ततोऽसौमनसाविप्रश्चिन्तयामासईश्वरम् । व्रतंनारायणेनोक्तंविदित्वामन्दिरंययौ

ततोऽहं तत्करिष्यामि व्रतं मनसि चिन्तितम् ।

इति निश्चित्य विप्रोऽसौ रात्रौ निद्रां न लब्धवान् ॥ ३१ ॥

ततःप्रातःसमुत्थायसत्यनारायणव्रतम् । करिष्येऽहञ्चसङ्कल्प्यसिद्धार्थमगमद्द्विज

तस्मिन्नेवदिनेविप्रः प्रचुरं द्रव्यमाप्तवान्। तेनैवबन्धुभिःसार्द्धंसत्यस्यव्रतमाचरन्
सर्व्वदुःखविनिर्मुक्तःसर्वसम्पत्समन्वितः। बभूव सद्विजश्रेष्ठोव्रतस्याऽस्यप्रसादतः
ततः प्रभृति कालञ्च मासि मासि व्रतं कृतम्॥ ३५॥
एवं नारायणादेतद्व्रतं ज्ञात्वाद्विजोत्तमः। सर्व्वपापविनिर्मुक्तोदुर्लभंमोक्षमाप्तवान्
व्रतमेतद्यदाविप्र! पृथिव्यां सञ्चरिष्यति। तदैव सर्वदुखंहिमानवानां विनश्यति

सूत उवाच

एवंनारायणेनोक्तं नारदाय महात्मने। मयाऽपिकथितंविप्राःकिमन्यत्कथयामिवः
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
सत्यनारायणविप्रसम्वादोनाम त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः॥ २३३॥

चतुस्त्रिंशदधिकद्विशततमोऽध्यायः

विप्रकाष्ठकेतुसम्वादवर्णनम्

ऋषय ऊचुः

तस्माद्विप्राद् व्रतं केन पृथिव्यां चरितं मुने!।
तत्सर्वं श्रोतुमिच्छामः श्रद्धाऽस्माकं प्रजायते॥

सूत उवाच

शृणुध्वं मुनयः सर्वे तस्माद्येनकृतं भुवि। एकदा स द्विजवरोयथाविभवविस्तरैः
बन्धुभिः स्वजनैः सार्द्धं व्रतं कर्त्तुं समुद्यतः।
एतस्मिन्नन्तरे काले काष्ठकेतुः (क्रेता) समागतः॥ ३॥
बहिः काष्ठं च संस्थाप्य विप्रस्य मन्दिरं ययौ।
तृष्णया पीडितो भूत्वा विप्रं दृष्ट्वा तथाविधम्॥ ४॥
प्रणिपत्य द्विजं प्राह किमिदं क्रियते त्वया। कृतेकिंफलमाप्नोतिविस्तराद्वदमेप्रभो

विप्र उवाच

सत्यनारायणस्येदं व्रतं सर्वेप्सितप्रदम्। दुःखदारिद्र्यशमनं पुत्रपौत्रविवर्द्धनम्॥
तस्यप्रसादान्मेसर्वं धनधान्यादिकं महत्। ततस्तद्वचनंश्रुत्वाकाष्ठहर्त्ताऽतिहर्षितः
पपौ जलंप्रसादंच भुक्त्वातन्नगरं ययौ। सत्यनारायणंदेवं चिन्तयन्स्थिरमानसः
काष्ठंविक्रीयनगरे प्राप्स्यामिचाद्ययद्धनम्। तेनैव सत्यदेवस्यकरिष्ये व्रतमुत्तमम्
इतिसञ्चिन्त्यमनसा काष्ठंकृत्वातु मस्तके। जगामनगरंरम्यंधनिनांयत्रसंस्थितिः
तद्दिने काष्ठमूल्यं च द्विगुणंप्राप्तवानसौ। ततः प्रसन्नहृदयः सुपक्वं कदलीफलम्
शर्करां घृतदुग्धं च गोधूमस्य च चूर्णकम्। प्रत्येकं तु प्रसादंच गृहीत्वास्वपुरंययौ
ततोबन्धून् समाहूयचकारविधिनाव्रतम्। तद्व्रतस्यप्रसादेनधनपुत्रान्वितोऽभवत्
इहलोकेसुखंभुक्त्वाचान्तेसत्यपुरं ययौ। पुनरन्यत्प्रवक्ष्यामिशृणुध्वं मुनिपुङ्गवाः
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रेवाखण्डेसत्यनारायणव्रतकथायांविप्रकाष्ठकेतुसम्वादोनाम
चतुस्त्रिंशदधिकद्विशततमोऽध्यायः॥ २३४॥

पञ्चत्रिंशदधिकद्विशततमोऽध्यायः

नानाख्यानैःसहवणिक्साधुमोक्षवर्णनम्

सूत उवाच

आसीदुल्कामुखोनामनृपतिर्बलिनांवरः। जितेन्द्रियःसत्यवादीययौदेवालयम्प्रति
दिने दिने धनं दत्त्वाद्विजान्सन्तोषयत्सुधीः॥ २॥
तस्य भार्या प्रमुग्धा च सरोजवदना सती।
भद्रशीला व्रतं सत्यं सिन्धुतीरेऽकरोन्मुने!॥ ३॥

एतस्मिन्नेवसमये साधुरेकः समागतः । वाणिज्यार्थंबहुविधैरत्नाद्यैः परिपूरिताम्
नावं संस्थाप्यतत्तीरे जगाम तत्तटम्प्रति । दृष्ट्वातत्रव्रतंसम्यक्पप्रच्छविनयान्वितः

साधुरुवाच

किमिदं क्रियते राजन्! भक्तियुक्तेन चेतसा ।
प्रकाशं कुरु तत्सर्वं श्रोतुमिच्छामि साम्प्रतम् ॥ ६ ॥

राजोवाच

पूजनं क्रियते साधो! विष्णोरतुलतेजसः । व्रतश्च स्वजनैःसार्द्धं पूजादिप्राप्तयेमया
प्रत्युवाच ततोनत्वाराजानंसादरंवचः । साङ्गंकथयमेराजन्! व्रतमेतत्करोम्यहम्
ममाऽपि सन्ततिर्नास्ति एतस्माद्भविता ध्रुवम् ।
ततो निवृत्त्य वाणिज्यात्सानन्दं गृहमाययौ ॥ ६ ॥
कियद्दिने तस्यभार्याऽभवद्गर्भवतीसती ।
गर्भयुक्ताऽऽनन्दचित्ताऽभवद्धर्मपरायणा ॥ १० ॥
पूर्णे गर्भे ततो जाता बालिकाचातिसुन्दरी
दिने दिने वर्धमाना शुक्लपक्षे यथा शशी ॥ ११ ॥
ततोवणिक्सुतायाश्च जातकादीन्समाप्य च ।
नाम्ना कलावतीचेति तन्नामकरणं कृतम् ॥ १२ ॥
ततो लीलावतीप्राह स्वामिनं मधुरंवचः । न करोषिकिमर्थम्वापुरायच्चप्रतिश्रुतम्

साधुरुवाच

विवाहसमयेऽप्यस्याः करिष्यामि व्रतं प्रिये !।
इतिःभार्यां समाश्वास्य जगाम तत्तटम्प्रति ॥ १४ ॥
ततःकलावतीकन्यावर्द्धिता पितृवेश्मनि । दृष्ट्वाकन्यांततःसाधुर्नगरे बन्धुभिः सह
मन्त्रयित्वाद्रुतंदूतं प्रेषयामासधर्मवित । विवाहार्थंच कन्यायावरंश्रेष्ठं विचारयन्
तेनाऽऽज्ञप्तस्ततस्सोऽसौकाञ्चनंनगरंययौतस्मादेकंवणिक्पुत्रंसमादायाऽऽगतोहिसः
दृष्ट्वा तुसुन्दरंबालंवणिक्पुत्रंगुणान्वितम् । ज्ञातिभिर्बन्धुभिःसार्द्धंपरितुष्टेनचेतसा

दत्तवान् साधुपुत्राय कन्यां विधिविधानतः ।
ततोऽभाग्यवशात्तेन विस्मृतं व्रतमुत्तमम् ।
विवाहसमयेऽप्यस्यास्तेन रुष्टोऽभवद्विभुः ॥ १६ ॥
ततःकालेनकियतानिजधर्मविशारदः। वाणिज्यार्थंगतःशीघ्रंजामात्रासहितोवणिक्
रत्नसारपुरेरम्ये गत्वा सिन्धुसमीपतः । वाणिज्यंकुरुते साधुर्जामात्राश्रीमतासह
पुरीं निर्माय नगरे चन्द्रकेतुनृपस्य च ॥ २१ ॥
एतस्मिन्नेवकालेतु सत्यनारायणः प्रभुः । भ्रष्टप्रतिज्ञमालोक्यशापंतस्मैप्रदत्तवान्
आद्यारम्यमियत्कालं दुःखस्तेऽत्र भविष्यति ॥ २३ ॥
तस्मिन्नेवदिनेराज्ञो धनमादायतस्करः । तेनैववर्त्मनाऽऽयातः पृष्ठदेशं विलोकयम्
स पश्चाद्धावतोदूतान् दृष्ट्वाभीतेनचेतसा । धनंसंस्थाप्यतत्रैव गतः शीघ्रमलक्षितः
ततो दूताः समायाता यत्राऽऽस्तेसज्जनो वणिक् ।
दृष्ट्वा भूपधनं तत्रबद्ध्वा दूतावणिक् सुतौ । हर्षयुक्ताधावमानाःऊचुर्नृपसमीपतः
तस्करौ द्वौ समानीतौ विलोक्याऽऽज्ञापय प्रभो! ।
तेनाऽऽज्ञप्तैस्ततः शीघ्रं दृढं बद्ध्वा तु तावुभौ ॥ २७ ॥
स्थापितोद्वौमहादुर्गे कारागारेऽविचारतः । माययासत्यदेवस्यनश्रुतंच तयोर्वचः
अतस्तयोर्धनं यच्चगृहीतंचन्द्रकेतुना । तच्छापाच्चतयोर्गेहेभार्याऽपिदुःखिताऽभवत्
चौरेणापहृतंसर्वंगेहेयच्चस्थितंधनम् ।आधिव्याधिसमायुक्ताक्षुत्पिपासाप्रपीडिता
अन्नचिन्तापराभूत्वाभ्रमते च गृहे गृहे । ततः कलावतीकन्या बभ्राम प्रतिवासरम्
एकदा सा तु भवनात् क्षुधार्त्ता द्विजमन्दिरम् ।
गत्वाऽपश्यद्व्रतं तत्र सत्यनारायणस्य या ॥ ३२ ॥
उपविश्यकथांश्रुत्वावरंसम्प्राथ्र्यवाञ्छितम् ।प्रसादभक्षणंकृत्वाययौरात्रौगृहम्प्रति
ततो लीलावतीकन्यां भर्त्सयामासताम्भृशम् ।
पुत्रि! रात्रौ स्थिता कुत्र किं ते मनसिवर्तते ॥ ३४ ॥
द्विजालये व्रतं मातर्दृष्टं वाञ्छितसिद्धिदम् ।

तच्छ्रुत्वा कन्यकावाक्यं व्रतं कर्त्तुं समुद्यता ॥
ससुता सा वणिग्भार्या सत्यनारायणस्य च ॥ ३५ ॥
व्रतं चक्रे च वै साध्वी वन्धुभिः स्वजनैः सह ।
भर्तृजामातरौ क्षिप्रमागच्छेतां ममाऽऽश्रमम् ॥ ३६ ॥
इतिदेवं वरं याचे सत्यदेवं पुनः पुनः । अपराधं तुभर्त्तुर्मे जामातुः क्षन्तुमर्हसि ॥
व्रतेनतस्यास्तुष्टोऽसौसत्यनारायणःप्रभुः । दर्शयामासस्वप्नंहिचन्द्रकेतुंनृपोत्तमम्
बन्दी तौ मोचय प्रातर्वणिजौ नृपसत्तम! । देयंधनंचतत्सर्वंविधिनाद्विगुणीकृतम्
नो चेत्त्वां नाशयिष्यामि सराज्यधनपुत्रकम् ।
एवमाभाष्य राजानं ध्यानगम्योऽभवत् प्रभुः ॥ ४० ॥
ततःप्रभातसमये राजा च स्वजनैः सह । उपविश्य सभामध्ये प्राह दूतजनम्प्रति
बद्धौ महाजनौ शीघ्रं मोचयध्वं वणिक् सुतौ ॥ ४१ ॥
इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ ।
समानीय नृपस्याऽग्रे प्रोचुस्ते विनयान्विताः ॥ ४२ ॥
आनीतौ द्वौ वणिक् पुत्रौ मुक्तौ निगडबन्धनात् ॥ ४३ ॥
ततो महाजनौनत्वाचन्द्रकेतुं नृपोत्तमम् । स्मृत्वाचपूर्ववृत्तान्तंविस्मयाद्भयविह्वलौ
राजावणिक्सुतौ वीक्ष्य प्रोवाच सादरं वचः ।
दैवात्प्राप्तं महत् कष्टमिदानीं नास्ति तद्भयम् ॥ ४५ ॥
इदानीमेवमुक्तस्त्वं क्षुरकर्मादिकं चर ॥ ४६ ॥
ततो नृपवरः श्रीमान् स्वर्णरत्नविभूषणैः ।
अलङ्कृत्य वणिक् पुत्रौ वचसाऽप्रीणयद् भृशम् ।
पुरानीतं च यद्द्रव्यं द्विगुणीकृत्य दत्तवान् ॥ ४७ ॥
प्रोवाच तौ ततो राजा गच्छ साधो ! निजाश्रमम् ।
राजानं प्रणिपत्याह गन्तव्यं तत्प्रसादतः ॥ ४८ ॥
(अत्रप्रचलितसत्यनारायणपुस्तकेषु चतुर्थोऽध्यायः समाप्तः)

यात्राकृत्वाततःसाधुर्मङ्गलाचारपूर्विकाम् । ब्राह्मणेभ्योधनंदत्त्वासहर्षो नगरं ययौ
कियद्दूरे गतेसाधौ सत्यनारायणः प्रभुः ।
जिज्ञासां कृतवान् साधो ! किमस्ति तरणौ तव ॥ ५० ॥
ततो महाजनौ मत्तौ हेलया च प्रहस्य च ।
कथं पृच्छसि भो दण्डिन् ! मुद्रां किं लब्धुमिच्छसि ॥
लतापत्रादिकं चैव वर्तते तरणौ मम ॥ ५१ ॥
निष्ठुरं च वचः श्रुत्वासत्यंभवतुतेवचः । एवमुक्त्वागतःशीघ्रंदण्डीतस्यसमीपतः
गते दण्डिनि साधुश्च कृतनित्यक्रियस्तदा ।
उत्थितां (औकसां) तरणिं दृष्ट्वा विस्मयं परमं ययौ ॥ ५३ ॥
लतापत्रादिकं दृष्ट्वा मूर्च्छितो न्यपतद् भुवि ।
लब्धसञ्ज्ञो वणिक् पुत्रस्ततश्चिन्तापरोऽभवत् ।
श्वशुरं दुहितुः कान्तो वचनं चेदमब्रवीत् ॥ ५४ ॥

जामातोवाच

किमर्थंकुरुषे शोकं शापादेतच्चदण्डिनः । शक्यते तेन सर्वं हि कर्त्तुं हर्त्तुं न संशयः
अतस्तच्छरणं यामो वाञ्छितार्थो भविष्यति ।
जामातुश्च वचः श्रुत्वा तत्सकाशंगतस्तदा ॥ ५६ ॥
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम् ।
क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ ॥ ५७ ॥
मया दुरात्मना देव मुग्धोऽहं तवमायया । यदुक्तं तद्वचोनाथ ! दुष्टंमे क्षन्तुमर्हसि
यतः परकृपाः सर्वे क्षमासारा हिसाधवः । पुनः पुनस्तदानत्वारुरोदशोकविह्वलः
तमुवाचततोदण्डीविलपन्तंविलोक्यच । मारोदीःश्रृणुमद्वाक्यंममपूजापराङ्मुखः
मामवज्ञायदुर्बुद्धे ! लब्धं दुःखंमहुर्मुहुः । तच्छ्रुत्वाभगवद्वाक्यंस्तुतिंकर्त्तुंसमुद्यतः

साधुरुवाच

त्वन्मयामोहिताःसर्वे ब्रह्माद्यास्त्रिदिवौकसः । नजानन्तिगुणंरूपंतवाश्चर्यमिदंप्रभो

मूढोऽहंत्वांकथंजानेमोहितस्तवमायया । प्रसीदपूजयिष्यामियथाविभवविस्तरैः

पुत्रं वित्तं च मे देहि त्राहि मां शरणागतम् ॥ ६३ ॥

श्रुत्वाभक्तियुतंवाक्यं परितुष्टोजनार्दनः । वरं चवाञ्छितंदत्त्वा तत्रैवान्तरधीयत

ततोऽसौनावमारुह्यदृष्ट्वारत्नादिपूरिताम् । कृपयासत्यदेवस्य यत्फलंवाञ्छितं मम

इत्युक्त्वा स्वजनैः सार्धं पूजां कृत्वा यथाविधि ।

हर्षेण महतासाधुः प्रयाणं चाकरोद् द्विजाः ॥ ६६ ॥

नावं संयोज्य वेगेन स्वदेशमगमत्तदा ॥ ६७ ॥

ततोजामातरंप्राहपश्यवत्स! पुरीं मम । दूतं च प्रेषयामास निजवित्तस्य रक्षकम्

ततोऽसौ नगरं गत्वा साधुभार्यां विलोक्य च ।

उवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा ॥ ६९ ॥

निकटे नगरस्यैव जामात्रासहितोवणिक् । आगतो बन्धुवर्गैश्चधनैर्बहुविधैस्तथा

श्रुत्वादूतमुखाद्वाक्यं महाहर्षयुतासती । सत्यपूजांततःकृत्वाप्रोवाच तनुजांप्रति

व्रजामि शीघ्रमागच्छ साधुसन्दर्शनाय च ॥ ७० ॥

इतिमातृवचःश्रुत्वाव्रतंकृत्वासमाप्यच । प्रसादंसम्परित्यज्यगतासा च पतिं प्रति

तेनरुष्टःसत्यदेवो भर्त्तारंतरणीं तथा । संहृत्य च धनैः सार्द्धं जलेतस्मिन्समार्जयत्

ततः कलावती कन्यानालोक्यवणिजंपतिम् । शोकेनमहतातत्ररुदन्तीचापतद्भुवि

दृष्ट्वा तथाविधां कन्यां नदृष्ट्वातत्पतिंतरीम् । भयेनमहतासाधुःकिमाश्चर्यमिदंमहत्

विचिन्तयन्तस्ते सर्वे बभूवुस्तरिवाहकाः ॥ ७६ ॥

ततोलीलावतीसाध्वीदृष्ट्वातद्विह्वलासती ।विललापातिदुःखेनभर्त्तारञ्चेदमब्रवीत्

इदानीं नौकयासार्द्धमदृश्योऽभूदलक्षितः । न जानेकेन दैवेन हेलयावाऽपहारितम्

सत्यदेवस्य माहात्म्यं किं ज्ञातुं नहि शक्यते ।

इत्युक्त्वा विललापाऽथ तत्रस्था स्वजनैः सह ।

ततो लीलावती कन्यां क्रोडे कृत्वा रुरोद च ॥ ७९ ॥

ततःकलावतीकन्यानष्टेस्वामिनिदुःखिता । गृहीत्वापादुकां तस्यअनुगन्तुंमनोदधे

कन्यायाश्चरितं दृष्ट्वा सभार्य्यः स्वजनो (सज्जनो) वणिक् ।

अतिशोकेन सन्तप्तश्चिन्तयामास धर्म्मवित् ॥ ८१ ॥

हृतोहिसत्यदेवेनजामातासत्यमायया । सत्यपूजांकरिष्यामियथाविभवविस्तरैः

इति सर्वान्समाहूय कथयित्वा मनोरथम् ॥ ८३ ॥

ननाम दण्डवद् भूमौ सत्यदेवं पुनः पुनः ।

ततस्तुष्टः सत्यदेवो गगनाद्वणिजम्प्रति । जगाद वचनञ्चेदं नैवेद्यमवमन्य च ॥

आगता स्वामिनं द्रष्टुमतोऽदृश्योऽभवत्प्रभुः ॥ ८५ ॥

गृहं गत्वा प्रसादञ्च भुक्त्वा चायातु सा पुनः ।

लब्धभर्तृसुखा साधो ! भविष्यति नसंशयः ॥ ८६ ॥

ततः साप्राणदंवाक्यंश्रुत्वागगनमण्डलात् । क्षिप्रंतदागृहंगत्वाप्रसादं प्रतिभुज्यच

अपश्यत्पुनरागत्य पतिं नावं जनैः सह ॥ ८७ ॥

ततःकलावतीतुष्टाजगादपितरम्प्रति । एहि तात! गृहं यामो विलम्बं कुरुषे कथम्

तच्छ्रुत्वा कन्यका वाक्यं सन्तुष्टोऽभूद्वणिक् सुतः ॥ ८९ ॥

पूजनं सत्यदेवस्य कृत्वाविधिविधानतः । धनैर्बन्धुगणैःसार्द्धंजगाम निजमन्दिरम्

पौर्णमास्याञ्च सङ्क्रान्त्यां पूजां कृत्वा यथाविधि ।

इह लोके सुखी भूत्वा चान्ते सत्यपुरं ययौ ॥ ९० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रेवाखण्डे श्रीसत्यनारायणकथायां वणिक्साधुमोक्षवर्णनंनाम पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥

षट्त्रिंशदधिकद्विशततमोऽध्यायः

वंशध्वजवृत्तान्तवर्णनम्

सूत उवाच

अथ चान्यत्प्रवक्ष्यामि शृणुध्वं मुनिसत्तमाः !।

आसीद्वंशध्वजोराजा प्रजापालननतत्परः । प्रसादंसत्यदेवस्यत्यक्त्वादुःखमवापसः

एकदा स वनं गत्वा हत्वा च विविधान् मृगान् ।

आगत्य वटमूले च दृष्ट्वा सत्यस्य पूजनम् ॥ २ ॥

गोपाः कुर्वन्ति सन्तुष्टा भक्तियुक्ताः सबान्धवाः ।

राजा दृष्ट्वा तु दर्पेण नागत्य न ननाम सः ॥ ३ ॥

ततोगोपगणाःसर्व्वेप्रसादंनृपसन्निधौ ।संस्थाप्यपुनरागत्यभुक्त्वासर्वेयथेप्सितम्

ततः प्रसादं सन्त्यज्य राजादुःखमवापसः ॥ ५ ॥

तस्यपुत्रशतंनष्टं धनधान्यादिकञ्चयत् । सत्यदेवेन तत्सर्वं नाशितं मम निश्चितम्

अतस्तत्रैवगच्छामियत्रदेवस्य पूजनम् । मनसेतिविनिश्चत्ययर्यौगोपालसन्निधिम्

ततोऽसौ सत्यदेवस्य पूजां गोपगणैःसह ।

भक्तिश्रद्धान्वितो भूत्वा चकार विधिवन्नृपः ॥ ८ ॥

सत्यदेवप्रसादेनधनपुत्रान्वितोऽभवत् । इहलोके सुखीभूत्वा चान्तेविष्णुपुरं ययौ

य इदं कुरुतेसत्यव्रतं परमदुर्लभम् । शृणोति च कथां पुण्यां भुक्तिमुक्तिफलप्रदाम्

धनधान्यादिकंतस्य भवेत्सत्यप्रसादतः । दरिद्रो लभतेवित्तंबद्धो मुच्येतबन्धनात्

भीतोभयात्प्रमुच्येत सत्यमेतन्नसंशयः । ईप्सितञ्चफलंभुक्त्वा चान्तेसत्यपुरं व्रजेत्

इति वः कथितं विप्राः! सत्यनारायणव्रतम् ।

यत्कृत्वा सर्वदुःखेभ्यो मुक्तोभवति मानवः ॥ १३ ॥

विशेषतः कलियुगेसत्यपूजा महाफला । सत्यनारायणं केचित् सत्यदेवंतथा परे

नानारूपधरोभूत्वा सर्व्वेषामीप्सितप्रदः । भविष्यतिकलौसत्यव्रतरूपीसनातनः

य इदं पठतेनित्यंशृणोतिमुनिसत्तमाः । तस्यनश्यन्तिपापानि सत्यदेवप्रसादतः ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे-रेवाखण्डे सत्यनारायणकथायांवंशध्वजचरित्रवर्णनंनामषट्त्रिंशदधिक-द्विशततमोऽध्यायः ॥ २३६ ॥

———

शुभम्भूयात्

---

* 'सत्यइत्येव वा केचित् प्रवदन्ति मनीषिणः ।' इतिपुस्तकान्तरसम्मतोऽधिकः पाठः ।

मूलग्रन्थ के
मुद्रकः—
ब्रजकिशोर सिंह
गोपाल प्रिण्टिङ्ग वर्क्स
८७ ए, राजा दिनेन्द्र स्ट्रीट, कलकत्ता—६
कव्हर और टाइटल पेज के मुद्रक
दी ओभरलैण्ड प्रिण्टिङ्ग प्रेस
६७, इजरा स्ट्रीट, कलकत्ता—१

Gurumandal Series No. XX

SKANDAPURANAM

WITH

Fifth Volume

(Uttarardham)

AVANTIKHANDA WITH REWAKHANDA

BY

MAHARSHI VEDAVYAS

PART V (Latter Half)

5, CLIVE ROW,
CALCUTTA-1

Vikram Samvat	First Edition	A. D.
2019	5000	1962